It means that the income due to the king was remitted by so and so on such a date before the particular authority. The English translation of Shama Sastri that "the expenditure shall on the *Vyuṣṭa* or new year's day, be verified"[88] etc; is really off the mark.

12. "On page 65 line 15" युक्तप्रतिषेध: युक्तानामध्यक्षाणां धनापहाराद्वारणम्। किं धनापहार: अध्यक्ष: राजसमक्षमेव क्रियते येन राजा तांस्तस्माद् वारयेत् अत इदं व्याख्यानमसङ्गतमेव।"

Here Ganapati Sastri has given a detailed explanation :[84] युक्तानामध्यक्षाणां प्रतिषेधौ धनापहाराद् वारणम् उत्कोचग्रहणनिमित्ताद्वा प्रजापीडनाद् वा वारणम्।

For this he has his basis on the Malayalam commentary which actually states something more.[85] "Yuktapratiṣedham āvitu adhyakṣaril nintum rājaputraril nintum prajaikkuvarum pīḍai olippitu". It means that the term stands for the prevention by authorities and the sons of kings, If the people of this category extract wealth, without good intentions, it will naturally affect the income of the state. Their act will be of the nature of misapproriation of funds due to the king. This is sought to be explained by the Trivandrum commentator and it cannot be termend as far-fetched.

13. "P. 67, line 8, : उपयुक्त: युक्तानामुपरि नियुक्त:, one who is appointed above Yuktas. This is contradictory to the meaning of the same word given by him on page 52, line 4. There he says : युक्त: उपयुक्त: तत्सहकारी।"

Here the position taken by the Mysore editor is apparently justifiable. Ganapati Sastri has explained the word उपयुक्त in the sense of a superior officer in the first instance and as colleague, apparently junior, on the second occasion. This needs an explanation. The contradiction is owing to his dependence on the Malayalam commentator who explains the instances as follow :[80]

(i) "Upayuktan āvon adhyakṣarakku menokki ceyyum avan".

(ii) "Upayuktan āvan aupakārikan".

The meaning of the first that he is a supervising officer is expressed by the terms : युक्तानामुपरि नियुक्तः। The Malayalam term औपकारिक meaning one who gives his service is translated as तत्सहकारी by the *Śrīmūlam* commentator. One has to concede that he was depending on a traditional explanation. He could have saved himself from the embarrassment of the contradiction by mentioning his authority as भाषाटीका as he did in instances like TSS I. p. 140, 141 and 225.

Editorial Drawbacks

Shama Sastri has been severe in his criticism of his counterpart. He is of the opinion that the Trivandrum edition is not all a worthy attempt. He observes : "Another serious defect of his edition is the omission of all various readings".

This indeed is a serious charge levelled against the well known editor of the famous Trivandrum Sanskrit series in which he had already published 78 works on a variety of subjects. The present work is the 79th editorial effort of the great Pandit. In a text book of this character the possibility of coming across meaningful readings other than scribal errors is rather limited. Further, the fidelity of the manuscripts has been brought out by the following observations of the learned editor in his introduction. "They are complete and written in Malayalam characters and almost free errors." As the Mysore editor has imagined the number of readings will not be large.

Editor's Perspective

Ganapati Sastri concerned himself only with meaningful readings as can be gathered from his statement in the उपोद्घात to the third part of the work :

व्यावृत्तानामर्थवतामस्मत्पुस्तकस्थानां पाठविशेषाणां सूचनिका काचिदिह प्रथमपरिशिष्टात्मा निवेशिता।

As is evident from the first part, the editor has made use of four manuscripts designated by him as क, ख, ग and घ: In this part he has given

as footnotes nearly forty readings collected from his critical apparatus. See for instance, pages 2, 14, 52, 63, 6S, 65, 67, 69, 80 81, 84, 85, 86, 91, 104 etc. This practice was discontinued in the subsequent volumes for some unknown reason. All along he was promising to give a comparative table as appendix and this he provided in 79 pages of the third volume. In addition to this he has discussed the important variants in the course of his commentary. "Such of the variants that have special import to convey are dealt with in the commentary. Improvements of this nature will be obvious from a perusal of the text and the commentary" observes Ganapati Sastri.

As already stated he secured a copy of the Mysore edition (1909) and noted down his reading in its pages correcting the mistakes here and there. In fact he substantially changed the printed text to transform it as his press copy. He started with the intention of giving all the different variants in the footnote as he was wont to do in his previous editorial projects. The Mysore reading rejected by him on the basis of manuscript evidence were noted down in his press copy as मुद्रितपुस्तकपाठः। But on second thought he scored them off retaining only the variants from his own manuscripts. He felt that the Mysore reading were profuse and teeming with errors so as to demand a separate treatment in the appendix and he did it also. After noting the variants in the first 20 pages of the printed version he decided to eschew the practice and to be selective. This is what really happened. The present writer is of the opinion that Ganapati Sastri omitted the reading of the different manuscripts in the later parts of the text for the the sake of convenience. Still, one has to admit that it has deprived the text of what would have been an excellent and valuable addition enhancing the worth of the treatise.

The Mysore text was changed drastically by inserting numbers, deleting full stop where it was not suited to the text of the Trivandrum editor, providing full stops where it was found necessary, changing full stops to semi-colon, re-arranging paragraphs, recasting chapter titles and colophons by changing the sequence of words, taking away or adding quotation marks, scoring off foot notes and correcting the numerous printers devils. All this he was able to do since he wisely chose a printed text to prepare his press copy.

The Tone of Dialogue

Before concluding this section the present writer feels it necessary to say something about the tone of the dialogue or rather controversy between two of the greatest scholars that the early part of the 19th century has produced. Ganapati Sastri has unwittingly invited the wrath of his

counterpart by stating that the Mysore edition "abounded with errors". But he also admitted that the nature of the text was such that "even a talented Pandit cannot hope to easily understand it" and for that "sufficient manuscripts material was indispensable". "Regarding the English translation the Trivandrum editor cited just one instance and said :" I do not see how this meaning was made out. "He further felt that 'the purification of the text alone will not suffice, that the meaning has also to be preserved from misinterpretations". This is all what Ganapati Sastri said about the Mysore editor.

These remarks, apparently made in good taste and with a critical spirit provoked Shama Sastri to the core to unleash a spate of criticism, often based on grounds not so sure since he was not in a position to verify them. His Sanskrit introduction to the third edition issued in the year 1924 contains the following uncharitable observations.

1. तृतीय मुद्रणमिदमर्थशास्त्रस्य न द्वितीयमुद्रणादतीव भिद्यत इति नोपोद्घातान्तरमपेक्षते। तथापि महामहोपाध्यायेन गणपतिशास्त्रिणा स्वीयव्याख्यया साकमनन्तशयनसंस्कृतग्रन्थावल्यां प्रकाशितस्यार्थशास्त्रप्रथमाधिकरणद्वयस्योपोद्घाते महीशूरराजकीयसंस्कृतग्रन्थावल्यां प्रकाशितमर्थशास्त्रमूलं पाठाशुद्धिभूयिष्ठं तदीयाङ्गलेयभाषानुवादश्चासङ्गतार्थ इति यत् प्रलपितं यच्च स्वप्रकाशितं मूलं व्याख्यानं च बाढं शुद्धं सङ्गतं चेति प्रोद्घुष्टं तदत्र किञ्चिद् विचार्यते। असूयान्धीकृतदृशाऽनेन शास्त्रिणा दृष्टा पाठाशुद्धिः पूर्ववाक्ययोज्यस्योत्तरवाक्येन सह योजनमुत्तरवाक्ययोज्यस्य पूर्ववाक्येन सह योजनमित्येवंजातीयेत्यवर्णि।
2. किञ्चात्र व्याख्याने गणपतिशास्त्रिणा "अग्निकार्य" शब्दोऽनेकवारं प्रयुक्तो दृश्यते। अग्निकार्य-शब्दोऽग्न्युपासनमभिधत्ते न ततु लौकिकमग्न्युद्दीपनमिति नाद्यापि तेन ज्ञातमिति विस्मयावहमेतत्।
3. अपि च मर्यादाशब्दस्य तात्पर्यार्थं पुरस्कारमुपादाय कृतमाङ्गलेयभाषानुवादमधिक्षिपन् गणपतिशास्त्री स्वीये पदप्रयोगे पदशक्यार्थमपि न गणयतीति विस्मयावहमेतत्।
4. तदेवं सत्यामपि सव्याख्यत्रयमातृकासामग्र्यामेतैरन्यैश्च बहुभिर्दोषैः परिपूर्णा गणपतिशास्त्रिणः कृतिरित्येतद् विस्मयावहम्।

In his English introduction to the same volume also there are a few more observations of a similar nature, if not more vehement in tone.

1. "It follows therefore that the Mahāmahopādhyāya's interpretation here is quite wrong and that his splitting the sentence into two is indefensible. Another serious objection to this interpretation is the violation of grammar".
2. "Even an ordinary student of Sanskrit knows that 'pāda' never means a 'daṇḍa', but only a quarter".

Shama Sastri concludes his tirade with a challenging note as follows : "Whether in the face of these and other errors to point out here, it is fair for the Mahāmahopādhyāya to find fault with the Mysore edition of the text

and its English version, is a question that is left to scholars for decision".

Ganapati Sastri Vindicated

But it is gratifying to note that N.S. Venkatanathacharya who brought out the revised fourth edition of the Mysore text in 1960 after the sad demise of his illustrious predecessor Shama Sastri (who passed away on 23rd January, 1944) has made amends and kept the great tradition of true and unbiased scholarship. Without the least hesitation he accepted the good reading and explanations of Ganapati Sastri which he felt was necessary to make his edition upto-date and free from errors of omission and commission. This he has admitted in his introductory statement as follows :[87]

तत्रापि श्रीमद्भिः टि गणपतिशास्त्रिभितः अङ्गीकृतः पाठः पदार्थो वा यत्र समीचीनतया भातः तत्र स एवाङ्गीकृत इति च।

It is true in doing this he has obliterated the text of Shama Sastri and made the English translation incompatible with the present text. But that is a different problem. What assumes significance is that the latest editor from Mysore was able to see through the working of the mind of his predecessors In a footnote to the introduction of Shama Sastri which he reproduced in his edition, he observes :[88]

किञ्च श्रीशामाशास्त्रिणां श्रीगणपतिशास्त्रिणां च कारणान्तरप्राप्तात्कालिकमनोवृत्तिभेदेन परस्परमुद्भाविता आरोपिताश्च एतादृशाः दोषाः किञ्चिदसमाहितमनःपरिणामा इति नैषां दोषाणां तावद्याथार्थ्यं सम्भवेदिति च समाहितैः विभावनीयम्।

It is true that extra-academic considerations too have gone into the course of this controversy. But that does not diminish the contribution made by the two great savants to the study of Kauṭalya's *Arthaśāstra.*

Editions And Translations

Editions and translations of this important text have appeared from different institutions in India and abroad. For a detailed bibliographical account see : "*Bibliography of Kauṭiliya Arthaśāstra.*" by Ludwik Sternbach, Vishwesharanand Research Institute, Hoshiarpur, Punjab, 1973, pp. 39. Since studies embracing the different aspects of the work are being published from different places from time to time no such account can claim to be complete. Some of the important editions and translations may alone be noted here.

Editions of The Text and Commentary

Arthaśāstra of Kauṭilya, ed R. Shama Sastri, Mysore, 1909; 2nd ed.. 1919; 3rd., ed., 1924; 4th revised ed. : *Kauṭalīyārthaśāstra of Śrī Viṣṇu Gupta,* revised by N.S. Venkatanathacharya, Mysore, 1960 5th revised ed. N.S. Venkatanathacharya, 1986

The Arthaśāstra of Kauṭalya; with the commentary Śrimūla of M.M.T. Ganapati Sastri, Part I, Trivandrum, 1924; Part II, Trivandrum 1924; Part III, Trivandrum, 1925; Reprinted with a general introduction by Dr. N.P. Unni, Bharatiya Vidya Prakashan (in 3 Vols.), Dehli, 1984.

The Kauṭaliya Arthaśāstra, Part I, a critical edition with a Glossary by R.P. Kangle, Bombay, 1966

The Pratipadañcikā, a commentary on 2.1.5 to Banarji Sastri, Journal of the Bihar and Orissa Research Society, Patna, 11-12, 1925-26

The Kauṭalīya, with a Malayalam commentary, Part I (1st Adhikaraṇa), ed. K. Sambasiva Sastri, Trivandrum 1930; 2nd edition., 1972; Part II (2nd Adhikaraṇa), ed. K. Sambasiva Sastri, Trivandrum 1938; 2nd edition.; 1972; Part III (3rd Adhikaraṇa), ed. V.A. Ramaswami Sastri, Trivandrum, 1945; 2nd edition, 1973; *Bhāṣākauṭalīyām* (Malayalam commentary) Adhikaraṇas 4 to 7., K.N., Ezhuttachan, Madras, 1960

Arthaśāstravyākhyā Jayamaṅgalā (by Śaṅkarārya?) 1st Adhikaraṇa, Ed. G. Harihara Sastri, Madras, 1958

Cāṇakyaṭīkā of Bhikṣuprabhamati, (2nd Adhikaraṇa and 3.1), ed. G. Harihara Sastri, Journal of Oriental Research, Madras 1956-57

A Fragment of The Kauṭalya's Arthaśāstra Rājasiddhānta with the fragment of the commentary named *Nitinirṇīti* by Ācārya Yogghama alias Mugdhavilāsa, ed. Muni Jina Vijaya, Bombay 1959

Cāṇakya-Rājanīti, ed. Ludwik Sternbach, Adyar Library Series, Madras, 1963

Besides these, some popular editions with a free Hindi translation have been brought out by several scholars. Some of them are : Ramateja Sastri Pandey, Varanasi, 1159; Udayavira Sastri, Delhi, 1969-70; Bharatiyayogi, Bareli, 1973; Gangaprasad, Delhi, Saṁvat 2010; Vacaspati Gairola, Varanasi, 1962.

Translations

The work has been translated into several Indian and foreign languages. In some of the languages more than one attempt have been made. Translations have appeared in languages like Bengali, English, French, German, Gujarati, Hindi, Italian, Kannada, Malayalam, Marathi, Oriya, Russian, Tamil and Telugu.

The world of scholars owes much to Shama Sastri for not only discovering and publishing the text of *Arthaśāstra*, but also for bringing out the first ever translation in English in the year 1915. It has its own limitations as the learned translator himself has stated in his preface : "As regards my

translation I am conscious of the fact that it is far from being perfect. Beset as the work is with difficulties, it would be sheer presumption on my part to hope that my translation presents a correct interpretation". In an introductory note to the volume, J.F. Fleet observes : "He now lays before us a translation which has been improved in various details, in addition to being brought together in a connected and convenient form. His task has not been an easy one" V.A. Ramaswamī Sastri in his preface to the edition of the Malayalam commentary has made the observation : "Dr. R. Shama Sastri's English translation of the *Kauṭalīya Arthaśāstra* is, no doubt, a pioneer work in the field, but it required a thorough revision in some places in the light of new materials now available to scholars. Many passages can be better interpreted on the basis of the Malayalam commentary than has been been done in the English rendering". He then proceeds to show the limitations by citing several instances.

Actually Shama Sastri had in his possession the transcripts of the Malayalam commentary. Here and there he has added some footnotes with a reference to the Tamil-Malayalam commentary. But he did not have the patience to study the early Malayalam commentary, which is as difficult to understand as the original text itself, since it was couched in old Malayalam language very often bordering Tamil. The excuse given by him is that "I had to hurry on the second edition without comparing my own translation with that of the Tamil commentator". Even in his third edition this aspect was not cared for. Obviously he was under the impression that the commentary is not of much significance and that it was "written in a mixture of dialects and not easy to understand. It seems to be quite recent and is not free from misinterpretation of a few words". This shows that he could not appreciate the value of this important commentary written several centuries back.

R.P. Kangle has brought out a fairly accurate translation taking into account all recent studies and research materials. Further, commentaries were available to him in printed form. He has thoroughly made use of he above-mentioned Malayalam commentary which was available to him in print unlike in the case of other writers. What he fails to convey in the text of the translation, he has supplied in the copious foot notes where the different reading and meanings are discussed. The volume is very useful for an understanding of the text. He states that : "I am keenly aware of the possibility that I may have very often misunderstood the text". But by marshalling all the readings and interpretations in footnotes he has saved himself from the embarrassment of being accused of being conservative in outlook or obstinate in his interpretations.

Towards the end of his introduction Ganapati Sastri has stressed the need of a adequate English rendering with the correct interpretations proposed in his commentary and historical notes. He had expressed the hope that a "scholarly friend who has given many years to the study of the *"Arthaśāstra"* will undertake it. I think that the friend referred to here must be K.V. Rangaswami Iyengar, a close associate of the *Śrīmūlam* commentator. But that hope did not materialise for some reason or other.

Studies

The results of Kauṭalya studies have appeared both in the form of books and learned articles from all over the world in different languages. Books on the topic by J.J. Meyer, Sten Konow, N.C. Bandhyopadhyaya, R.K. Mookerji, K.V. Rangaswami Iyengar, M.V. Krishana Rao, P.L. Bhargava, P.C. Chunder, R.P. Kangle, S. Dhar, Indra, Mehta and Thakkar deserve special mention. Learned papers were contributed by a host of scholars in research journals and conferences. Some of the scholars who dealt with the subjects with distinction are Keith, Winternitz, Jacobi, Hillebrandt, Sternbach, R.C. Hazra, K.P. Jayaswal, P.V. Kane, D.D. Kosambi G.H. Sastri, Dr. Pushpendrakumar and others.

Conclusion

Studies embracing the different aspects of *Arthśāstra* are carried out even at present in research-oriented institutions. But the impetus provided by Ganapati Sastri after the initial discovery and publication by Shama Sastri can never be overestimated. He brought to bear on the topic his rich experience and uncanny talent. His effort in composing the first ever complete commentary on the *Arthaśāstra* is stupendous, to say the least. F. Edgerton has no hesitation to pronounce that "Dr. Ganapati Sastri's edition of the Kauṭalīya Arthaśāstra with commentary is decidedly the best edition of that all important work in existence". Prof. M. Winternitz observed that "Ganapati's *Śrīmūla*, as he called his commentary is an indispensable help for every student of *Arthśāstra*".

New reprint

For long, the work remained out of print. This situation had deprived many students of the text the benefit of consulting it. I am glad that the present publishers rightly chose to bring out a new edition of this most important work despite the huge financial involvement. It was indeed a pleasant experience to the present writer to pen these lines on a worthy occasion. He concludes with a sense of deep gratitude to the Herculean

efforts of T. Ganapati Sastri, borrowing a couple of stanzas on his achievements from R.V. Krishnamachariar, an admirer of the great savant :—

विद्यावित्तविनीतचित्तविबुधश्रेणीशिरोलङ्कृतिः
सारासारविवेककर्मचतुरोदञ्चत्कुशाग्रीयधीः ।
राजादेशवशंवदो गणपतिः शास्त्री समन्तादपि
ग्रन्थान् सम्परिगृह्य साधु विमृशंस्तन्मुद्रणे व्यापृतः ।।
तर्के व्याकरणेऽथ तन्त्रयुगलेऽलङ्कारसाहित्ययोः
सङ्गीतस्मृतिगृह्यनीतिषु तथा शिल्पागमज्यौतिषे ।
कल्पे मन्त्रचिकित्सयोरपि बहुन्यन्येषु शास्त्रेष्वपि
श्रेष्ठान् मुद्रणकर्मणा बहिरसौ ग्रन्थानवातीतरत् ।।

The Present Edition

The edition of the Arthaśāstra of Kauṭlaya brought out by T. Ganapati Sastri with his Śrimūlam commentary was brought out in three volumes from the Bharatiya Vidya Prakashan, Delhi in the year 1984. Since the publication was by photo-process except the general introduction by the present editor contained all the limitations of the work such as occasional spelling mistakes and lacunae. This edition is a recomposed edition with a new English translation according to the text represented by Ganapati Sastri. This claim could not be made by the earlier translation like Shama Sastri and R.P. Kangle. The translator has also made use of the Malayalam commentary of the work published by the University of Kerala (in three volumes upto the end of the 3rd Adhikaraṇa).

In preparing the present edition I have been extremely careful in translating and going through the proof sheets. The present publisher deserves the thanks of reader in presenting Arthaśāstra along with an English translation for the first time.

References

1. *TSS* 79, Trivandrum, 1924, introduction, p. 4
2. *Kauṭalīya* with Malayalam commentary, Part, I (second edition), University, of Kerala, 1972, introduction, p. 22
3. *Kauṭalīya* with Malayalam commentary, Part II (Second edition), Trivandrum, 1972, Preface.
4. *Kauṭalīya* with Malayalam commentary, Part III (second edition), Trivandrum, 1973, Preface, p. 1.
5. *TSS* 79 instroduction, p. 4; Usha Mehta and Usha Thakkar *Kauṭilya and his Arthaśāstra*, Delhi, 1980; p. 2
6. M.V. Krishna Rao, *Studies in Kauṭilya*, (third edition), Delhi, 1979, p. 2
7. *Arthaśāstra*, Mysore, 1960, p. 55

8. Usha Mehta & Usha Thakkar, *op.cit.*, p. 9
9. *Ibid.*, p. 3.
10. *Bhāṣā Kauṭalīyam*, ed. K.N. Ezhuthachan, University of Madras, Madras, 1960, p. 294.
11. V.K. Subramonian *Maxims of Chanakya*, New Delhi 1980, p. 2.
12. *Kauṭilya's Arthaśāstra*, English trans. by Dr. R. Shama Sastri, (8th edn.), 1967, preface, p. vii.
13. *TSS* 82, p. 7
14. *TSS* 79, p. 5
15. *TSS* 82, p. 213
16. M.V. Krishna Rao, *op.cit.*, p. 2.
17. *Ibid.*, p. 13.
18. M.V. Krishna Rao, p. 2?.
19. Ed. K.P. Jayaswal & A. Banerji Sastri, *JBORS*, IX Pt. I, March, 1925, pp. 1-24; June 1925, pp. 25-54; Sept. & Dec. 1925, pp. 55-92; XII Pt. I March 1926, pp. 93-130; June 1926, pp. 131-168; Sept. 1926; pp. 169-214.
20. D. 3873 of Govt. Oriental Manuscripts Library, Madras.
21. *The Arthaśāstra of Kauṭilya*, A new edition by J. Jolly and R. Schmidt, Panjab Sanskrit Series, Lahore, 1923 and 1924; Vol. I Text; Vol. II Notes with the commentary Nayacandrikā.
22. Ed. G. Harihara Sastri with introduction, Kuppusvami Sastri Research Institue, Madras, 1958, pp. 76
23. Ullur S. Parameswara Iyer, *Keralasāhityacaritram*, Trivandrum, 1957, Vol. I, pp. 268-69; K. Sambasiva Sāstri, *Kauṭaliya* with Malayalam commentary; I, pp. 9, 28.
24. *Cāṇkyaṭīkā* of Bhikṣuprabhamati, ed. G. Harihara Sastri, Journal of Oriental Research, Madras, Vol. 26, 1956-57.
25. A Fragment.of Kauṭalya's *Arthaśāstra* alias *Rājasiddhānta* with a fragment of the commentary named *Nītinirṇīti* of Ācārya Yogghama alias Mugdhavilāsa; ed. Muni Jina Vijaya, Singhi Sanskrit Series 47, Bombay, 1959.
26. D.D; Kosambi, "The text of Arthaśāstra' Jl. of the American Oriental Society, New Haven, Vol. 78 (1958), p. 169
27. (i) The *Kauṭilīya* with a Malayalam commentary, Pt. I (Vinayādhikārikā), Ed. K. Sambasiva Sastri, Travancore Manuscripts Library, Trivandrum, 1930; reprinted in 1972.
    (ii) The *Kauṭilīya* with a Malayalam commentary, Pt. II (Adhyakṣpracāra) ed. K. Sambasiva Sastsri. Trivendrum, 1938; reprinted in 1972.
    (iii) The *Kauṭilīya* with a Malayalam commentary, Pt. III (Dharmasthīya), ed. V.A. Ramasvami Sastri, Trivandrum, 1945; reprinted in 1973.
    (iv) *Bhaṣākauṭalīyam* (from Kaṇṭakaśodhanam upto the end of Ṣāḍguṇya), ed. KN. Ezhuthachan, University of Madras, 1960.
28. *Kauṭilya's Arthaśāstra*, Eng. trans. by Dr. R. Shama Sastri, (8th edn), Mysore 1967, preface to the second edition, p. xxiii
29. K.N. Ezhuthachan, *Bhāṣākauṭalīyam*, introduction p. xxxii
30. Ullur S. Parameswara Iyer, *Keralasāhityacaritam*, Vol. I, p. 270
31. The *Kauṭaliya* with Malayalam commentary Pt, I, intorduction, p. 11

32. English translation, p. xxiii
33. *Ibid.*, p. 16
34. Mysore edition, 1960, p. 17
35. *TSS* 79, p. 45
36. K. Sambasiva Sāstri, *op.cit.*, Pt. I, p. 94.
37. *Bhāṣākauṭalīyam*, introduction, p. xxxi
38. *Ibid.*
39. *Ibid.*, p. 54.
40. *TSS* 80, p. 109
41. *Kauṭalīya* with Malayalam commentary ed. V.A. Ramaswami Sastri, Pt. III, p. 123
42. *Kauṭalīyam* Malayalam commentary, pt. II, p. 93
43. *Ibid.*, pt. I, p. 115
44. Ullur, *op.cit.*, p. 269
45. P.N. Kunjan Pilali, *Keralabhāṣayuṭe Vikāsapariṇāmaṅṅal*, Part 1, (Revised edn.), Kottayam, 1959, p. 92
45a. Dr. V. Raghavan, MMT. Ganapati, Jl. of Kerala University Manuscripts Library, Vol. No. 2, pp. 37-41.
46. *Kauṭalīya* with Malayalam commentary, Pt. II, p. 169
47. *TSS* 79, p. 179
48. *Kauṭalīya* with Malayalam commentary, Pt. II, pp. 93-94
49. Eng. trans. p. 77
50. *TSS* 80, p. 216
51. *Bhāṣākauṭalīyam*, p. 227
52. *TSS* 80, p. 11
53. *Kauṭalīyam* Malayalam commentary, Pt. III, pp. 13-14.
54. *TSS* 79, p. 138; Mal. Com. II, p. 44
55. *Ibid.*, p. 247; *Ibid.*, p. 187
56. *TSS* 79, p. 251; Mal. Com. II, p. 172
57. *TSS* 85, p. 189
58. *Ibid.*, p. 214
59. *Ibid.*, p. 231.
60. *Ibid.*, p. 233
61. *Ibid.*, p. 237
62. A Souvenier of the Silver Jubilee Celebrations of the Dept. of Publication of Oriental manuscripts, Trivandrum 1934, p. 35
63. *Ibid.*, p. 44
64. Mysore edition, 1924, p. xxxi
65. Mysore Edition, 1924
66. The page number in this section refers to the pages of the first Mysore edition, 1909.
67. *Kauṭalīya* with Malayalam commentary, 1, p. 93
68. *TSS* 79, p. 49
69. *Kauṭalīya* with Malayalam commentary, I, p. 138
70. Ibid., I, p. 142
71. *Kauṭalīyam* with Malayalam commentary, II, p. 34

72. *Ibid.*, p. 40
73. *TSS* 79, p. 136
74. *Kauṭalīyam* Malayalam commentary II, p. 40
75. *Kauṭalīyam*, Malayalam commentary II, p. 42
76. *Ibid.*, p. 124
77. *Ibid.*, p. 42
78. *Kauṭalīyam*, with Malayalam Commentary II, p. 124
79. *TSS*, 79, p. 138
80. *Kauṭalīyam* Malayalam commentary, II, p. 44
81. *Kauṭalīyam* with Malayalam Commentary, p. 44
82. *Kauṭalīyam* with Malayalam Commetnary, p. 57
83. Mysore, 1923, p. 70
84. *TSS* 79, p. 152
85. *Kauṭalīya* with Malayalam commentary, II, p. 60
86. *Ibid.*, pp. 67, 38
87. *Mysore*, 1960, p. xi
88. *Ibid.*, p. xxxv

।। श्रीः ।।

श्रीगणेशाय नमः।

Salutation to Śrīgaṇeśa

कौटलीयम्

अर्थशास्त्रम्

महामहोपाध्यायगणपतिशास्त्रिविरचित व्याख्योपेतम्।

विनयाधिकारिकं-प्रथममधिकरणम्।

BOOK ONE : ON DISCIPLINE

Chapter 1

ॐनमः शुक्रबृहस्पतिभ्याम्।

Oṁ—salutations to Śukra (= the preceptor of demons) and Bṛhaspati (= the preceptor of gods)

पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्।

विघ्नेशं देवतां वाचं प्रणिपत्य गुरूनपि।

व्याख्यानमर्थशास्त्रस्य कौटलीयस्य कुर्महे।।

अथ निखिलविद्याविचक्षणः स्वबुद्धिसामर्थ्यापहृतनन्दराज्यसिंहासनारोपणानुगृहीतचन्द्रगुप्तः कौटल्यचाणक्यादिपर्यायपदवाच्यस्तत्रभवान् विष्णुगुप्ताचार्यस्त्रिवर्गसम्प्रत्तिहेतुभूतार्थार्जनोपायोपदेश-प्रधानमर्थशास्त्रमारिप्सुः पूर्वाचार्यप्रणामलक्षणं मङ्गलमाचरति–

ॐ नमः शुक्रबृहस्पतिभ्याम्।

इति। ओमिति माङ्गलिकः शब्दः। नम इति प्रणामः। अस्त्वित्यध्याहारः। शुक्रबृहस्पतिभ्यां शुक्रोऽसुरगुरुः बृहस्पतिर्देवगुरुः ताभ्याम्। 'नमस्स्वस्ती' (2.3.16)त्यादिना चतुर्थी। तौ ह्यर्थशास्त्र-प्रवर्तकेष्वाचार्येषु कूटस्थाविति तत्प्रणामोऽत्यन्तमुचितः। तत्र शुक्रप्रणीतमौशनसं नाम, यत्सङ्ग्रहात्मा शुक्र नीतिः। बृहस्पतिप्रणीतं तु बार्हस्पत्याख्यमिति द्रष्टव्यम्। अत एव शास्त्रकर्तृत्वादाचार्यत्वविवक्षया तयोर्देवतात्वाविवक्षणाद् 'देवताद्वन्द्वे च' (6.3.26) इत्यनङिह द्वन्द्वे न कृतः।

स्वग्रन्थस्य निर्मूलत्वादिशङ्कानिराकरणपूर्वं प्रकरणाधिकरणसमुद्देशं प्रतिज्ञातुं भूमिकां रचयति–**पृथिव्या** इत्यादिना। पृथिव्या भूमेः, लाभे अप्राप्तायाः प्राप्तौ, पालने लब्धायाः परिरक्षणे च विषये। अर्थशास्त्राणि अर्थो नाम वृत्तिः वर्तनं स्थितिः, सैव हि मनुष्याणां मुख्योऽर्थः। तया च मनुष्यसम्बन्धिन्या तदाधारभूता

भूमिरुपलक्ष्यते। एवञ्च मनुष्यवती भूमिरित्यर्थः। तस्याः लाभपालनोपायोपदेशकानि शास्त्राणि अर्थशास्त्राणि। यावन्ति, पूर्वाचार्यैः शुक्रबृहस्पतिविशालाक्षादिभिः, प्रस्थापितानि प्रवर्तितानि, तानि, प्रायश इति बाहुल्योक्त्या क्वचित् क्वचिदात्मीयदर्शनानां प्रतिपादनं दर्शयति। संहृत्य सङ्गृह्य, एकमिदमर्थशास्त्रं, कृतं मया प्रणीतम्। एतेन, मदीयस्यास्यैकस्य ग्रन्थस्य परिशीलनात् कृत्स्नपूर्वाचार्यदर्शनविज्ञानं सुखलभ्यमिति सूचयन् स्वशास्त्रस्य समूलत्वं पूर्वाचार्यग्रन्थैरगतार्थत्वं च द्योतयति।

Treatises on polity concerning the acquisition and maintenance of the earth composed by preceptors of ancient times are all epitomised herein to form the present text on political science.

तस्यायं प्रकरणाधिकरणसमुद्देशः

तदिदमर्थशास्त्रं साशीतिशतसङ्ख्यैः प्रकरणैः तत्परिच्छिन्नैश्च पञ्चदशसङ्ख्यैरधिकरणैर्विभज्य प्रस्थापितम्। तेषु यथास्थानं वितत्य विशेषतो व्युत्पादयिष्यमाणेषु प्रथमं विषयतः समाख्यातः क्रमत इयत्तया च किमपि सामान्यज्ञानं विशेषजिज्ञासानिमित्तं शिष्याणां जनयितुं तत्समुद्देशं प्रतिजानीते—तस्यायमिति। अस्य अर्थशास्त्रस्य, अयम् आरब्धाध्यायगोचरः प्रदर्श्यमानप्रकारः, प्रकरणाधिकरणसमुद्देशः प्रकरणानामधिकरणानां च सर्वेषां समुद्देशः संक्षेपेण निर्देशः सक्षिप्तस्वरूपक्रमेयत्ताख्यानमित्यर्थः, क्रियत इति शेषः। प्रक्रियन्ते प्रकर्षेण व्युत्पाद्यन्ते एष्वर्था इति प्रकरणानि। अधिक्रियन्ते विषयीक्रियन्ते एषु प्रकरणानीत्यधिकरणानि।

The following are the Book-wise contents of the present treatise.

1. विद्यासमुद्देशः। 2. वृद्धसंयोगः। 3. इन्द्रियजयः। 4. अमात्योत्पत्तिः। 5. मन्त्रिपुरोहितोत्पत्तिः। 6. उपधाभिः शौचाशौचज्ञानममात्यानाम्। 7. गूढपुरुषोत्पत्तिः। 8. गूढपुरुषप्रणिधिः। 9. स्वविषये कृत्याकृत्यपक्षरक्षणम्। 10. परविषये कृत्याकृत्यपक्षोपग्रहः। 11. मन्त्राधिकारः। 12. दूतप्रणिधिः। 13. राजपुत्ररक्षणम्। 14. अवरुद्धवृत्तम्। 15. अवरुद्धे च वृत्तिः। 16. राजप्रणिधिः। 17. निशान्तप्रणिधिः। 18. आत्मरक्षितकम्। इति विनयाधिकारिकं प्रथमाधिकरणम्।

तत्र विनयाधिकारिकस्य प्रथमाधिकरणस्य प्रथमं प्रकरणं समुद्दिशति—विद्यासमुद्देशति इति। विद्यानाम् आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरित्येतासां चतसृणां समुद्देशः विद्यासमुद्देशः। तदाख्यं प्रकरणमित्यार्थम्। विद्यासमुद्देश इत्येतच्च सूत्रमिति व्यवहर्तव्यं, विस्तारार्हबहुलार्थगर्भत्वात्। सूत्रमेव चेदं तत्प्रकरणे 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः' इत्युपक्रम्य 'स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु' इत्यन्तैस्त्रिभिरध्यायैर्महता प्रयत्नेन प्रपञ्च्यत इति सूत्रस्य तथाविधं व्याख्यानं भाष्यं भवितुमर्हति। एवं 'प्रकरणाधिकरणसमुद्देश' इत्युक्तचरमुत्तराण्यपि 'वृद्धसंयोग' इत्यादीनि सूत्राणि भवन्ति, तत्तत्प्रकरणगतानि प्रपञ्चनवाक्यानि च भाष्याणि। एवमधिकरणेषु सर्वेषु। एवञ्च 'स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च' इति ग्रन्थान्तोक्तिरुपपन्ना भवतीति वेदितव्यम्।

तत्र विनयविहीनो लोकशास्त्रव्यवहारेष्वशिक्षितो राजा राज्यरक्षणानर्हत्वाद् वैनयिकीषु विद्यास्ववश्यं विनेतव्य इत्यतो **विद्यासमुद्देश** इत्येतत् प्रकरणमादौ सूत्रितम्।। 1।।

विद्याश्च वृद्धसंयोगाभावे लब्धुं न शक्या इति **वृद्धसंयोग** इति सूत्रम्।। 2।।

वृद्धसंयोगश्च इन्द्रियजयमन्तरेण न लभ्य इति **इन्द्रियजय** इति सूत्रम्।। 3।।

वृद्धैर्विद्यासु शिक्षितो जितेन्द्रियोऽपि सहायाभावे कार्यं साधयितुं न क्षम इति तदनन्तरम् **अमात्योत्पत्तिरिति** सूत्रम्।। 4।।

अमात्याश्च केचिद् बुद्धिसाचिव्याय नित्यनैमित्तिककर्मसाचिव्याय चापेक्षिताः, शान्तिकपौष्टिक-कर्मानुष्ठानाय चान्ये। तदर्थं मन्त्रिपुरोहिताः कर्तव्या इति **मन्त्रिपुरोहितोत्पत्तिरिति** सूत्रम्।। 5।।

तैश्च सर्वप्रकारविशुद्धैर्भाव्यमिति **उपधाभिः शौचाशौचज्ञानममात्यानाम्** इति सूत्रम्।। 6।।

उपधाशुद्धिर्गूढपुरुषानन्तरेण ज्ञातुमशक्येति ततो **गूढपुरुषोत्पत्तिः** इति सूत्रम्। 7।।

तेषां च स्वामिनियोगमन्तरेणाव्यापाराद् **गूढपुरुषप्रणिधिः** इति सूत्रम्। गूढपुरुषाणां प्रणिधिः प्रणिधानं तत्तत्कार्येषु स्वामिना नियोजनमिति तदर्थः।। 8।।

तैश्च नियुक्तैः स्वराज्यगतान् क्रुद्धलुब्धादीन् विज्ञाय तद्दोषप्रतिविधानं, परराष्ट्रगतान् विज्ञाय तेषां भेदनेन स्वपक्षे प्रवेशनं चावश्यकमिति स्वविषये कृत्याकृत्यपक्षरक्षणम् इति परविषये कृत्याकृत्यपक्षोपग्रहः इति च सूत्रे। स्वदेशे कृत्याः शत्रुभेद्याः क्रुद्धादयः अकृत्याः अभेद्याः सुहृदः, कृत्याकृत्यानां पक्षाणां सङ्घानां शत्रूपजापाद् रक्षणमिति प्रथमसूत्रस्यार्थः। परराष्ट्रे ये कृत्याकृत्याः पक्षाः तेषामुपजापादिना स्वपक्षे संग्रहणमिति द्वितीयसूत्रस्यार्थः।। 9, 10।।

स्वराष्ट्ररक्षणं परराष्ट्रहरणमित्येतावद् राज्ञः कर्मसर्वस्वम्। तस्य मन्त्रायत्तत्वाद् मन्त्राधिकारः इति सूत्रम्। कर्मणामारम्भोपायादिसम्प्रधारणं मन्त्रः, तस्याधिकारो मन्त्राधिकार इति।। 11।।

परराष्ट्रकरणीयानां स्वकर्मणां स्वयं कर्तुमशक्यतया दूतसापेक्षत्वाद् दूतप्रणिधिः इति सूत्रम्।। 12।।

यथा राजपुत्राः स्वपितरि न द्रोहमाचरेयुः, तथा ते प्रयत्नेन परोपजापादिभ्यो रक्षणीया इति राजपुत्ररक्षणम् इति सूत्रम्।। 13।।

पित्रा क्वचिदवरुध्य तथा रक्ष्यमाणः कुमारः पितरि कथं व्यवहरेत्, पिता च तस्मिन् कथमित्येतद् वक्तुं सूत्रे अवरुद्धवृत्तम् इति अवरुद्धे च वृत्तिः इति च।। 14, 15।।

इत्थमात्मानं रक्षतो राज्ञो नियतकालां व्यापारपरिपाटीं वक्तुं सूत्रं राजप्रणिधिः इति। राज्ञः प्रणिधिः प्रणिधानं व्यापारपरिचिन्तनमित्यर्थः।। 16।।

निशान्तप्रणिधिः इति सूत्रम्। निशान्तं राजभवनं, तस्य प्रणिधिः प्रणिधानं देशसन्निवेशादि-चिन्तनम्।। 17।।

आत्मरक्षितकम् इति सूत्रम्। रक्षितमिति भावेक्तः, स्वार्थे च कः। राज्ञ आत्मरक्षणौपयिकं प्रकरणेऽस्मिन्नुपदिश्यत इत्यर्थः।। 18।।

।। इति **विनयाधिकारिकमित्यादि**। विनयः विद्यादिशिक्षणं
तस्याधिकारः प्रस्तावो विनयाधिकारः सोऽस्मिन्नस्तीति
विनयाधिकारिकं नाम प्रथममधिकरणं समुद्दिष्टमित्यर्थः।।

1. Indication of sciences; 2. Association with the aged; 3. Subjugation of sense organs; 4. Engagement of ministers; 5. Engagement of councillors

and preceptors; 6. Ascertainment of nobility and purity of ministers; 7. Institution of spies; 9. Maintenance of proper and improper factions in one's own state; 10. Winning over of proper and improper factions from the enemy's state; 11. Section on counselling; 12. Employment of messengers; 13. Protection of one-self from the sons of kings; 14. Keeping of prince under restraint; 25. Treatment of one under such restraints, 16. Messengers of kings; 17. Arrangement of the harem; 18. Concern for self-protection, and these are the brief contents of the first chapter dealing with the life of a king concerning discipline.

Book Two : Authorities

(The brief contents of this Adhikaraṇa (Book) are as follows :)

1. जनपदविनिवेशः। 2. भूमिच्छिद्रविधानम्। 3. दुर्गविधानम्। 4. दुर्गविनिवेशः। 5. सन्निधातृनिचयकर्म। 6. समाहर्तृसमुदयप्रस्थापनम्। 7. अक्षपटले गाणनिक्याधिकारः। 8. समुदयस्य युक्तापहृतस्य प्रत्यानयनम्। 9. उपयुक्तपरीक्षा। 10. शासनाधिकारः। 11. कोशप्रवेश्यरत्नपरीक्षा। 12. आकरकर्मान्तप्रवर्तनम्। 13. अक्षशालायां सुवर्णाध्यक्षः। 14. विशिखायां सौवर्णिकप्रचारः। 15. कोष्ठागाराध्यक्षः। 16. पण्याध्यक्षः। 17. कुप्याध्यक्षः। 18. आयुधागाराध्यक्षः। 19. तुलामानपौतवम्। 20. देशकालमानम्। 21. शुल्काध्यक्षः। 22. सूत्राध्यक्षः। 23. सीताध्यक्षः। 24. सुराध्यक्षः। 25. सूनाध्यक्षः। 26. गणिकाध्यक्षः। 27. नावध्यक्षः। 28. गोध्यक्षः। 29. अश्वाध्यक्षः। 30. हस्त्यध्यक्षः। 31. रथाध्यक्षः। 32. पत्त्यध्यक्षः। 33. सेनापतिप्रचारः। 34. मुद्राध्यक्षः। 35. विवीताध्यक्षः। 36. समाहर्तृप्रचारः। 37. गृहपतिकवैदेहकताप सव्यञ्जनाः प्रणिधयः। 38. नागरिकप्रणिधिः। इत्यध्यक्षप्रचारो द्वितीयमधिकरणम्।।

इत्थं प्रथमाधिकरणसूत्रिताष्टादशप्रकरणोपदिष्टवर्त्मना समासादितविनयसम्पत्को राजा तन्त्रावापयोरधिकारी भवति। तन्त्रं नाम स्वराज्यक्षेमसाधनानुकूलः पञ्चस्वाद्येष्वधिकरणेषु पञ्चनवत्या सूत्रैः प्रतिपाद्यमानोऽर्थः। आवापः शत्रुराष्ट्रहरणानुकूलः षष्ठादिषु त्रयोदशान्तेषु अष्टस्वधिकरणेषु सूत्राणामेकाशीत्या प्रतिपाद्यमानोऽर्थः, अर्थं ह्येनं विज्ञाय प्रवर्तमानो विजिगीषुः परराष्ट्रं स्ववशे करोतीति। तत्र येऽर्थाः द्वितीयेऽधिकरणे अध्यक्षप्रचाराख्ये अष्टात्रिंशता सूत्रैः प्रतिपाद्यन्ते, ये तृतीये धर्मस्थीये एकोनविंशत्या सूत्रैः, ये चतुर्थे दुर्गराष्ट्रसम्बन्धिकण्टकशोधनाख्ये त्रयोदशभिः सूत्रैः, ये च पञ्चमे राजराज्यकण्टकशोधनपरे योगवृत्तनाम्नि सप्तभिः सूत्रैः, तेष्वेव सर्वेष्वधीनं राज्यकुटुम्बभरणकर्मेति तमेतं चतुरधिकरण्यर्थं तन्त्रमाहुः, तन्त्रिधातोः कुटुम्बधारणार्थत्वात्। द्विसूत्रं प्रकरणद्वयात्मकं मण्डलयोनिसंज्ञमधिकरणं षष्ठम्, एकोनत्रिंशत्सूत्रयुक्तं षाड्गुण्यं सप्तमम्, अष्टसूत्रीरूपं व्यसनाधिकारिकमष्टमं, द्वादशसूत्रमभियास्यत्कर्माख्यं नवमं, त्रयोदशसूत्रं सांग्रामिकं दशमं, द्विसूत्रं संघवृत्तमेकादशं, नवसूत्रमाबलीयसं द्वादशं, षट्सूत्रं दुर्गलम्भोपायाख्यं त्रयोदशमित्येकाशीतिसूत्रामष्टाधिकरणीं शत्रुराज्यहरणोपायोपदेशिनीमावापां व्यवहरन्ति।

त्रिसूत्रमौपनिषदं नाम चतुर्दशमधिकरणं तन्त्रावापयोरत्यन्तमनुगुणम्।

एकसूत्रात्मकं तन्त्रयुक्तिसंज्ञं **पञ्चदशमधिकरणं** कौटल्यशास्त्रादृतास्तन्त्रयुक्तीर्द्वात्रिंशतं व्युत्पादयतीति स्थितिः।

तत्र स्वराज्यं रक्षतो राजधान्याद्यपेक्षणादध्यक्षप्रचाराधिकरणे **जनपदविनिवेश** इति प्रथमं प्रकरणं सूत्रितम्।। 1।।

स्वराज्यगतानां कृषिनिवासानर्हाणां गिरिवनश्वभ्रप्रायाणां भूभागानामुपयोगप्रकारोपदेशार्थं सूत्रं **भूमिच्छिद्रविधानम्** इति। भूमिच्छिद्राणां कृष्याद्यनर्हभूभागानां विधानम् उपयोगप्रकार इत्यर्थः।'भूमिच्छिद्रं कृष्ययोग्ये'ति यादवः।। 2।।

देशस्य शत्र्वनाक्रमणीयत्वसम्पत्तये दुर्गापेक्षणाद् **दुर्गविधानम्** इति सूत्रं **दुर्गविनिवेश** इति च।। 3, 4।।

सन्निधातृनिचयकर्म इति सूत्रम्। सन्निधाता नाम धनादिकं सञ्चित्य निधाता। तस्य निचयकर्म धनादिरक्षणव्यापार उच्यत इति सूत्रार्थः।। 5।।

समाहर्तृसमुदयप्रस्थापनम् इति सूत्रम्। सर्वायस्थानेभ्यो राजार्थानां सम्यक् समन्ताद्वा आहर्ता समाहर्ता विषयबल्यध्यक्षः। समुदयो धनोत्थानं तस्य प्रस्थापनं मार्गपरिकल्पनं समुदयप्रस्थापनं समाहर्तुः समुदयप्रस्थापनं समाहर्तृसमुदयप्रस्थापनम्। समाहर्ता कया कया विधया समुदयं प्रस्थापयेदित्येतदस्मिन् प्रकरणे उपदिश्यत इत्यर्थः।। 6।।

अक्षपटले गाणनिक्याधिकारः इति सूत्रम्। अक्षा गणनयोग्यानि रूप्यकादीनि तेषां पटलं स्थानम् अक्षपटलं तस्मिन्, गणनायां नियुक्तो गाणनिकः तस्य कर्म गाणनिक्यं तस्य प्रस्तावो गाणनिक्याधिकारः।। 7।।

समुदयस्य युक्तापहृतस्य प्रत्यानयनम् इति सूत्रम्। उत्पन्नस्यार्थस्य नियुक्तैः पुरुषैरपहृतस्य पुनः प्रापणमित्यर्थः।। 8।।

उपयुक्तपरीक्षा इति सूत्रम्। युक्तानाम् उपरि नियुक्ताः प्रत्ययितपुरुषा उपयुक्ताः तेषां परीक्षा दोषगवेषणेति सूत्रार्थः।। 9।।

शासनाधिकारः इति सूत्रम्। तालपत्रादिषु लिख्यमानोऽर्थः शासनं तस्याधिकारो विधिरुच्यत इत्यर्थः।। 10।।

कोशप्रवेश्यरत्नपरीक्षा इति सूत्रम्। कोशो भाण्डागारं तस्मिन् प्रवेशयितुं योग्यानां मणिमुक्तादीनां परीक्षणमत्रोपदिश्यत इत्यर्थः।। 11।।

आकरकर्मान्तप्रवर्तनम् इति सूत्रम्। सुवर्णरजतरत्नाद्युत्पत्तिस्थानमाकरः, तस्य कर्मान्तः तत्क्रियानिश्चयः, तस्य प्रवर्तनं व्यापारणमित्यर्थः।। 12।।

अक्षशालायां सुवर्णाध्यक्षः इति सूत्रम्। अक्षशाला अक्षः गण्यं धनं सुवर्णरूप्यादि तस्य शाला तद्घटनशाला तस्यां सुवर्णाध्यक्षः सुवर्णादिघटनगणनाद्यधिकृतः लक्षणया तद्व्यापार इत्यर्थः।। 13।।

विशिखायां सौवर्णिकप्रचारः इति सूत्रम्। विशिखायाम् आपणवीथ्यां, सौवर्णिकप्रचारः सुवर्णनियुक्तस्य व्यापारः।। 14।।

कोष्ठागाराध्यक्षः इति सूत्रम्। कोष्ठमुदरं लक्षणया तत्पोषणार्थं व्रीहिगोधूमादिकमाहारद्रव्यं तस्य अगारं सङ्ग्रहस्थानं तस्याध्यक्षः, अर्थात् तद्व्यापारः।। 15।।

पण्याध्यक्षः इति सूत्रम्। विक्रेयद्रव्याध्यक्ष इत्यर्थः।। 16।।

कुप्याध्यक्षः इति सूत्रम्। कुप्यं सारदारुवेणुवल्लिवल्कादि तस्मिन् नियुक्तः कुप्याध्यक्षः।। 17।।

आयुधागाराध्यक्षः इति सूत्रम्। स्पष्टार्थम्।। 18।।

तुलामानपौतवम् इति सूत्रम्। तुला उन्मानसाधनं मानं कुडुबादि ताभ्यां पौतवं परिच्छेदनं तुलामानपौतवं, लक्षणया तत्संशोधनमित्यर्थः। तच्च वाणिजकाः कूटतुलामानव्यवहारिणो मा भूवन्नित्येतदर्थम्।। 19।।

देशकालमानम् इति सूत्रम्। देशो योजनगव्यूतिक्रोशादिः कालस्त्रुटिलवादिः तयोर्मानं परिच्छेद इति सूत्रार्थः।। 20।।

शुल्काध्यक्षः इति सूत्रम्। शुल्कं पञ्चदशभागादिकं शुल्कव्यवहारे वक्ष्यमाणं राज्ञो देयं तस्याध्यक्षः, तद्व्यापार इत्यर्थः।। 21।।

सूत्राध्यक्षः इति सूत्रम्। सूत्रं कार्पासादिजस्तन्तुः तस्य अध्यक्षः तद्वानादिकारयिता।। 22।।

सीताध्यक्षः इति सूत्रम्। सीता कृषिः तस्या अध्यक्षः कृषितन्त्र-वृक्षायुर्वेदौ विज्ञाय प्रवर्तकः।। 23।।

सुराध्यक्षः इति सूत्रम्। सुरा मधुमैरेयादि तस्या अध्यक्षः सन्धानविक्रयाद्यधिकृतः सुराध्यक्षः।। 24।।

सूनाध्यक्षः इति सूत्रम्। सूना भक्ष्यप्राणिवधस्थानं तस्या अध्यक्षः वध्यावध्यनियमनाद्यधिकृतः।। 25।।

गणिकाध्यक्षः इति सूत्रम्। धनमेव गणयन्तीति गणिका वेश्याः तासामध्यक्षः गणिकाध्यक्षः।। 26।।

नावध्यक्षः इति सूत्रम्। नावां यानपात्राणाम् अध्यक्षः आदेयराजभागग्रहणाधिकर्ता।। 27।।

गोध्यक्षः इति सूत्रम्। गवाम् उपलक्षणेन गोमहिषाजादीनां तदाजीवानां गोपालादीनां च अध्यक्षः नियामक इत्यर्थः।। 28।।

अश्वाध्यक्षः इति सूत्रम्। अश्वानां लक्षणकुलादिकं विज्ञाय तद्रक्षणादिकर्मानुष्ठाता अश्वाध्यक्षः।। 29।।

हस्त्यध्यक्षः इति सूत्रम्। अश्वाध्यक्षवद् हस्त्यध्यक्षो व्याख्येयः।। 30।।

रथाध्यक्षः इति सूत्रम्। रथानां देवरथादीनां घटनाद्यधिकर्ता रथाध्यक्षः।। 31।।

पत्त्यध्यक्षः इति सूत्रम्। पत्तयः पदातयः ये पादचारेण युध्यन्ते, तेष्वधिकृतः पत्त्यध्यक्षः।। 32।।

सेनापतिप्रचारः इति सूत्रम्। सेनापतिः चतुरङ्गबलनेता तस्य प्रचारः सेनाविषयो व्यापारः प्रतिपाद्यत इत्यर्थः।। 33।।

मुद्राध्यक्षः इति सूत्रम्। मुद्रा नाम राजचिह्नं राजनामधेयप्रतिमादिलक्षणं यच्छासनपत्रादौ दीयते, तस्या अध्यक्षः प्रवर्तयिता।। 34।।

विवीताध्यक्षः इति सूत्रम्। विवीतं तृणजलवान् अकृष्यः प्रदेशः पश्वर्थः तस्याध्यक्षः तद्व्यापार इत्यर्थः।। 35।।

समाहर्तृप्रचारः इति सूत्रम्। समाहर्ता आयस्थानेभ्यो राजार्थसंग्राहको जनपदाध्यक्षः तस्य प्रचारो व्यापारः जनपदचिन्तनमित्यर्थः।। 36।।

गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः इति सूत्रम्। गृहस्थवणिक्-तपस्विवेषाः प्रणिधयः गूढपुरुषाः। अर्थात् तेषां जनपदेषु नियोजनम्। तच्च समाहर्तृकार्योपयोगिने जनपदवृत्तान्तज्ञानाय।। 37।।

नागरिकप्रणिधिः इति सूत्रम्। नगरे नियुक्तो नागरिकः, तस्य प्रणिधिः प्रणिधानं व्यापारचिन्तनमित्यर्थः।।38।।

।। इतीत्यादि। अध्यक्षप्रचारोऽध्यक्षाणां व्यापारः।।

1. Arrangement of villages; 2. reclamation of unfit land for use; 3. construction of forts; 4. fortification of houses by building walls of protection; 5. collection and protection of wealth by the treasury officer; 6. collection of wealth and keeping them in the treasury by the concerned officials; 7. counting of wealth in the form of coins and maintaining of accounts; 8. reclamation of wealth embezzled by accoun tants; 9. constant testing of the conduct of the employees; 10. institution of scribe for maintaining accounts and issuing writs; 11. examination and evaluation of gems to be deposited in the treasury; 12. work concerned with mining and procurement of gold and silver from it; 13. superintendent of gold whose function is to maintain records of wealth procured; 14. work-place of the goldsmith in the high road or bazzar; 15. superintendent of ware house keeping paddy and spices; 16. superintendent of commerce; 17. superintendent of forest produces (like bamboos); 18. superintendent of armoury; 19. superintendent of weights and measures, 20. authority of measurement of space and time; 21. superintendent of taxes (due to the state); 22. superintendent of weaving; 23. superintendent of agricultural activities; 24. superintendent of liquor; 25. superintendent of slaughter-house; 26. superintendent of prostitutes; 27. superintendent of ships (and boats); 28. superintendent of cattles (like cow and buffaloes etc) 29. superintendent of horses (and stables); 30. superintendent of elephants; 31. superintendent of chariots; 32. superintendent of infantry (consisting of elephants, chariots, horses and soldiers on foot) 33. the office of the commander-in-chief; 14. superintendent of passports (who certifies the document by affixing the stamp of a ring of authority), 35. superintendent of pastures fit for grazing the cows by affording them protection (from thieves and beasts of prey); 36. the office of the collector of revenues from villages and other regions; 37. spies engaged in the collection of information by living in the guise of householders, merchants and ascetics; 38. the office of a city superintendent; and these are contents of the second book concerned with authorities.

Book Three : On Laws

1. व्यवहारस्थापना। 2. विवादपदनिबन्धः। 3. विवाहसंयुक्तम्। 4. दायविभागः। 5. वास्तुकम्। 6. समयस्यानपाकर्म। 7. ऋणादानम्। 8. औपनिधिकम्। 9. दासकर्मकरकल्पः। 10. सम्भूयसमुत्थानम्। 11. विक्रीतक्रीतानुशयः। 12. दत्तस्यानपाकर्म। 13.

अस्वामिविक्रयः। 14. स्वस्वामिसम्बन्धः। 15. साहसम्। 16. वाक्पारुष्यम्। 17. दण्डपारुष्यम्। 18. द्यूतसमाह्वयम्। 19. प्रकीर्णकानि। इति धर्मस्थीयं तृतीयमधिकरणम्।।

अथ धर्मस्थीयं तृतीयमधिकरणम्। धर्मस्था नाम धर्मशास्त्रज्ञाः धर्मशास्त्रानुसारेण व्यवहार-निर्णयकर्मण्यधिकृताः। तेषामिदं धर्मस्थीयं तन्निर्णयव्यवहारपदप्रतिपादकमित्यर्थः। तत्र प्रथमं सूत्रं-**व्यवहारस्थापना** इति। कीदृशो व्यवहारः सिध्यति कीदृशो न सिध्यतीति व्यवस्थापनमिति सूत्रार्थः।। 1।।

विवादपदनिबन्धः इति सूत्रम्। विवादपदस्य निबन्धः पूर्वोत्तरपक्षात्मना पत्र आरोपणं, तत्पूर्वकं चिन्तनमित्यर्थः।। 2।।

विवाहसंयुक्तम् इति सूत्रम्। विवाहा अष्टविधाः ब्राह्मादयः, तत्संम्बद्धो व्यवहार इत्यर्थः। एतच्च प्रकरणं त्रिभिरध्यायैर्वितन्यते।। 3।।

दायविभागः इति सूत्रम्। दायः पितृपितृव्यादिधनं तस्य विभागः। अयमपि त्रिभिरध्यायैर्वितन्यते।। 4।।

वास्तुकम् इति सूत्रम्। वस्तु गृहारामक्षेत्रादि तत्सम्बद्धं वास्तुकम्। इदमध्यायत्रयेण वितन्यते। तत्र तृतीयाध्याये उत्तरमपि प्रकरणं प्रवेशितम्।। 5।।

समयस्यानपाकर्म इति सूत्रम्। इदमहं करिष्यामीत्यभ्युपगमात्मा सङ्केतः, इदमनेन कर्तव्यमिति बहुभिः सम्भूय कृतो वा सङ्केतः समयः। तस्य अनपाकर्म त्यागाभावः इति सूत्रार्थः। इदं प्रकरणं वास्तुकप्रकरणीयविवीतक्षेत्रपथहिंसाव्युत्पादनाध्याये व्युत्पादितम्।। 6।।

ऋणादानम् इति सूत्रम्। ऋणग्रहणनिर्यातनसम्बद्धो व्यवहार इत्यर्थः।। 7।।

औपनिधिकम् इति सूत्रम्। उपनिधिर्निक्षेपः, तत्सम्बद्धमनुष्ठानमौपनिधिकम्।। 8।।

दासकर्मकरकल्पः इति सूत्रम्। अत्यन्तपारार्थ्यमासाद्य शुश्रूषका दासाः, भृत्यर्थं शुश्रूषकाः कर्मकराः तेषां कल्पः तत्सम्बन्धी विधिः।। 9।।

सम्भूयसमुत्थानम् इति सूत्रम्। वाणिजकैरन्यैर्वा समुदेत्यारभ्यमाणं कार्यं सम्भूयसमुत्थानम्।। 10।।

विक्रीतक्रीतानुशयः इति सूत्रम्। विक्रीतं मूल्यमादाय दत्तं पण्यं क्रीतं मूल्यं दत्त्वा गृहीतं, तयोर्विषये अनुशयः विक्रयविषयः क्रयविषयश्च पश्चात्ताप इत्यर्थः।। 11।।

दत्तस्यानपाकर्म इति सूत्रम्। दत्तस्य धर्माद्यर्थे वाचा दत्तस्य अनपाकर्म अप्रदानम्। एतच्च विषयविशेषे पुनर्हरणस्याप्युपलक्षणम्।। 12।।

अस्वामिविक्रयः इति सूत्रम्। अस्वामी परद्रव्यव्यवहर्ता तेन कृतो विक्रयः अस्वामिविक्रयः।। 13।।

स्वस्वामिसम्बन्धः इति सूत्रम्। स्पष्टार्थम्।। 14।।

साहसम् इति सूत्रम्। सहसा कृतं कर्म साहसं प्रसभकर्म।। 15।।

वाक्पारुष्यम् इति सूत्रम्। वाचा कुत्सनभर्त्सनादिकमित्यर्थः।। 16।।

दण्डापारुष्यमिति सूत्रम्। दण्डेन पारुष्यं परुषकर्म द्रोहो दण्डपारुष्यम्।। 17।।

द्यूतसमाह्वयम् इति सूत्रम्। द्यूतम् अक्षक्रीडा समाह्वयः अजकुक्कुटादिप्राणिदेवनं तयोः समाहारः द्यूतसमाहृयं, तत्सम्बद्धो व्यवहारः प्रकरणेऽस्मिन्नभिधीयत इत्यर्थः।। 18।।

प्रकीर्णकानि इति सूत्रम्। उक्तविवादपदानन्तर्गतानि याचितकाद्यदानादिनिमित्तानि विवादपदानि प्रकर्णकानि, तान्यत्राभिधीयन्ते इत्यर्थः।। 19।।

।। इति धर्मस्थीयमित्यादि। एवमेकोनविंशतिप्रकरणं
धर्मस्थीयमधिकरणं तृतीयं समुद्दिष्टमित्यर्थः।।

1. Maintenance of laws which are proper and improper; 2. determination of disputes; 3. disputes related to marriages; 4. laws of inheritance; 5. concerning buildings and properties, 6. non-performance of agreements; 7. debt and recory; 8. concerning deposits; 9. rules regarding slaves and labourers; 10. cooperative activities; 11. repentance on things sold and purchased earlier, 12. giving and avoiding of what is due to someone; 13. selling of what is not owned by one; 14. ownership of something; 15. engaging in cruel activities (like killing cows and brahmins); 16. use of harsh words, 17. inflicting injury, 18. gambling and betting; 19. miscellaneous activities; and this forms the third book concerned with laws.

Book Four : Removal of Thorns

1. कारुकरक्षणम्। 2. वैदेहकरक्षणम्। 3. उपनिपातप्रतीकारः। 4. गूढाजीविनां रक्षा। 5. सिद्धव्यञ्जनैर्माणवप्रकाशनम्। 6. शङ्कारूपकर्माभिग्रहः। 7. आशुमृतकपरीक्षा। 8. वाक्यकर्मानुयोगः। 9. सर्वाधिकरणरक्षणम्। 10. एकाङ्गवधनिष्क्रयः। 11. शुद्धश्चित्रश्च दण्डकल्पः। 12. कन्याप्रकर्म। 13. अतिचारदण्डः। इति कण्टकशोधनं चतुर्थमधिकरणम्।।

अथ कण्टकशोधनाख्यं चतुर्थमाधिकरणम्। तत्रेदं प्रथमं सूत्रं-**कारुकरक्षणम्** इति। कारुकाः तक्षायस्कारस्वर्णकारादयः तेभ्यः कूटकर्मकारिभ्यो देशस्य रक्षणमिहाभिधीयत इत्यर्थः।। 1।।

वैदेहकरक्षणम् इति सूत्रम्। वाणिजकेभ्यः पौतवापचारिभ्यो रक्षणमित्यर्थः।। 2।।

उपनिपातप्रतीकारः इति सूत्रम्। उपनिपाताः दैविकानि महाभयानि तेषां प्रतीकारः।। 3।।

गूढाजीविनां रक्षा इति सूत्रम्। ये गूढं लञ्चग्रहणेन स्वामिनं प्रजाश्च वञ्चयन्त आजीवन्ति ते गूढाजीविनः तेषां रक्षा तेभ्यो देशस्य रक्षणमित्यर्थः।। 4।।

सिद्धव्यञ्जनैर्माणवप्रकाशनम् इति सूत्रम्। सिद्धव्यञ्जनाः मुण्डजटिलतापसवेषा धूर्ताः तैः करणैः माणवप्रकाशनं माणवस्य प्रलोभनविद्यायाः प्रकाशनम्। तच्च चोरादिग्रहणार्थम्।। 5।।

शङ्कारूपकर्माभिग्रहः इति सूत्रम्। आत्मनः परान् प्रति परेषामात्मानं प्रति च शङ्का द्विरूपा, रूपं सलोप्त्रदर्शनं, कर्म सन्धिच्छेदादि, एतैः अभिग्रहः चोराणां ग्रहणमिति सूत्रार्थः।। 6।।

आशुमृतकपरीक्षा इति सूत्रम्। आशु मृतकस्य परीक्षा किमयं स्वयं मृतः उत परेण मारित इति परीक्षणम्।। 7।।

वाक्यकर्मानुयोगः इति सूत्रम्। वाक्यानुयोगः कर्मानुयोगश्चेति सूत्रार्थः। तत्र वाक्यानुयोगः सामवादैश्चौरपृच्छा, कर्मानुयोगः कशाप्रहारादिना चोरविचारणा।। 8।।

सर्वाधिकरणरक्षणम् इति सूत्रम्। अधिकरणशब्देन लक्षणया अध्यक्षप्रचाराधिकरणोक्ता अध्यक्षास्तन्नियम्याः पुरुषाश्च गृह्यन्ते। तेभ्यः सर्वेभ्यः प्रजानां धनस्य च रक्षणमिति सूत्रार्थः।। 9।।

एकाङ्गवधनिष्क्रयः इति सूत्रम्। एकाङ्गं हस्तः पादः कर्ण इत्येवञ्जातीयं तस्य वधश्छेदनम्। एकाङ्गवधः तद्युक्तो निष्क्रयः वधस्थानीयो धनदण्डश्चतुष्पञ्चाशत्पणादिः।। 10।।

शुद्धश्चित्रश्च दण्डकल्पः इति सूत्रम्। शुद्धः चित्र इति द्विविधो दण्डविधिः। तत्र शुद्धः अक्लेशमारणं, चित्रः क्लेशमारणम्।। 11।।

कन्याप्रकर्म इति सूत्रम्। कन्याया अपुष्पितायाः स्त्रियाः प्रकर्मदूषणम्। तत्सम्बद्धो दण्डविधिरत्रोच्यत इत्यर्थः।। 12।।

अतिचारदण्डः इति सूत्रम्। अतिचारः अभक्ष्यभक्षणम् अगम्यागमनम् इत्येवमादिः तन्निमित्तो दण्ड उच्यत इत्यर्थः।। 13।।

।। इति कण्टकशोधनमित्यादि। एवं त्रयोदशप्रकरणं दुर्गराष्ट्रकण्टकशोधनप्रतिपादकं चतुर्थमधिकरणं समुद्दिष्टमित्यर्थः।।

1. Protection of artisans; 2. protection (of people) from merchants; 3. protection from natural calamities; 4. Protection of spies (who work for the state); 5. protection from people in disguise by showing acts of temptation; 6. catching of thieves by their activities of doubtful nature; 7. ascertainment of the cause of sudden death (whether it is a murder or not); 8. eliciting of truth by cross examination in a trial or by torture; 9. protection of people and wealth from various authorities; 10. mutilation of limbs as punishment or collection of fine in lieu of such punishment; 12. death with or without torture; 12. sexual intercourse with maidens who have not attained puberty; 13. punishment for improper food and violation of virtue of other girls; and this forms the fourth book concerned with the removal of thorns.

Book Five : Conduct of Courtiers

1. दाण्डकर्मिकम्। 2. कोशाभिसंहरणम्। 3. भृत्यभरणीयम्। 4. अनुजीविवृत्तम्। 5. सामयाचारिकम्। 6. राज्यप्रतिसन्धानम्। 7. एकैश्वर्यम्। इति योगवृत्तं पञ्चममधिकरणम्।।

अथ योगवृत्तं नाम पञ्चममाधिकरणम्। योगो विस्रब्धघाती तद्वृत्तं तच्चोपांशुदण्डादिकम्। राजराज्यकण्टकविषय उपांशुदण्डादिप्रयोगोऽस्मिन्नधिकरणेऽभिधास्यते। तत्रेदं प्रथमं सूत्रं-**दाण्डकर्मिकम्** इति। दण्ड उपांशुवधः तस्य कर्म प्रयोगः दण्डकर्म तत्सम्बद्धमिहोच्यत इत्यर्थः।। 1।।

कोशाभिसंहरणम् इति सूत्रम्। कोशस्य सुवर्णादेः अभिसंहरणं पूर्वत आधिक्येन सङ्ग्रहणमर्थकृच्छ्रप्राप्तावित्यर्थः।। 2।।

भृत्यभरणीयम् इति सूत्रम्। भृत्याः बुद्धौ शास्त्रे कर्मणि च साहाय्यदायिनः तेषां भरणं पोषणं तत्सम्बद्धं भृत्यभरणीयम्।। 3।।

अनुजीविवृत्तम् इति सूत्रम्। अनुजीविनो मन्त्रिप्रभृतयः तैः स्वामिनि कथं वर्तितव्यमित्येतदत्रोपदिश्यत इत्यर्थः।।4।।

सामयाचारिकम् इति सूत्रम्। समयो व्यवस्था आचारः अनुष्ठानं समयाचारमधिकृत्य प्रवृत्तं सामयाचारिकम्।।5।।

राज्यप्रतिसन्धानम् इति सूत्रम्। राज्यस्य प्रतिसन्धानं राजव्यसने सति तत्पुत्रानभिषिच्य यत् परिचिन्तनममात्यैः क्रियते तदिहोच्यत इत्यर्थः। इदमुत्तरं च प्रकरणमेकस्मिन्नध्याये समावेशितम्।।6।।

एकैश्वर्यम् इति सूत्रम्। एकस्यैव राजपुत्रस्यैकातपत्रमैश्वर्यं कर्तव्यम् इत्येतदुच्यत इत्यर्थः। एकग्रहणं बहूनामैश्वर्यकरणे अराजकत्वप्रसङ्ग इति द्योतनार्थम्।।7।।

।। इति **योगवृत्तमित्यादि**। एवं सप्तप्रकरणं योगवृत्ताख्यं
पञ्चममधिकरणं समुद्दिष्टमित्यर्थः।।

1. Confidants may be punished resorting to (three) means like secrecy, openness and treachery 2. replenishment of the treasury by employees; 3. taking into confidence of the servants by giving them gifts; 4. conduct of a courtier, 5. maintenance of traditional rules, 6. helping the king to regain his control over the kingdom and 7. absolute sovereignty by subjugating vassals; and this forms the fifth book concerned with the conduct of courtiers.

Book Six : Sovereignty of State

1. प्रकृतिसम्पदः। 2. शमव्यायामिकम्। इति मण्डलयोनिः षष्ठमधिकरणम्।।

अथावापो यावत् त्रयोदशमधिकरणम्। तत्र षष्ठं मण्डलयोनिर्नाम। विजिगीष्वरिमध्यमोदासीनाख्य-चतुरवयवं मण्डलं, योनिः उत्तराधिकरणार्थस्य षाड्गुण्यस्य विषयः। मण्डलं च तद् योनिश्च मण्डलयोनिः मण्डलात्मा षाड्गुण्यप्रकृतिरित्यर्थः। तत्र प्रथमं सूत्रं–**प्रकृतिसम्पद** इति। इति प्रकृतयः स्वाम्यमात्यसुहृत्कोश-राष्ट्रदुर्गबलानि तासां सम्पदः अपेक्षितगुणपुष्कलता इहोच्यन्त इत्यर्थः।।1।।

शमव्यायामिकम् इति सूत्रम्। कर्मफलोपभोगानां क्षेमसाधनं शमः, व्यायामस्तु कर्मारम्भोपकरणानां कर्मयोगघटकः, तदुभयमस्मिन् प्रकरणे प्रतिपाद्यत इत्यर्थः।।2।।

इति मण्डलयोनिरित्यादि। एवं द्विप्रकरणं मण्डलयोन्यधिकरणं षष्ठं समुद्दिष्टमित्यर्थः।।

1. Prosperity of people in all respects. 2. efforts for prosperity and engaging in fruitful actions; and this forms the sixth book concerned with the welfare of the state.

Book Seven : The Six-fold Policy

1. षाड्गुण्यसमुद्देशः। 2. क्षयस्थानवृद्धिनिश्चयः। 3. संश्रयवृत्तिः। 4. समहीनज्यायसां गुणाभिनिवेशः। 5. हीनसन्धयः। 6. विगृह्यासनम्। 7. सन्धायासनम्। 8. विगृह्ययानम्। 9. सन्धाययानम्। 10. सम्भूयप्रयाणम्। 11. यातव्यामित्रयोरभिग्रहचिन्ता। 12, क्षयलोभ-

विरागहेतवः प्रकृतीनाम्। 13. सामवायिकविपरिमर्शः। 14. संहितप्रयाणिकम्। 15. परिपणितापरिपणितापसृताश्च सन्धयः। 16. द्वैधीभाविकाः सन्धिविक्रमाः। 17. यातव्यवृत्तिः। 18. अनुग्राह्यमित्रविशेषाः। 19. मित्रहिरण्यभूमिकर्मसन्धयः। 20. पार्ष्णिग्राहचिन्ता। 21. हीनशक्तिपूरणम्। 22. बलवता विगृह्योपरोधहेतवः। 23. दण्डोपनतवृत्तम्। 24. दण्डोपनायिवृत्तम्। 25. सन्धिकर्म। 26. सन्धिमोक्षः। 27. मध्यमचरितम्। 28. उदासीनचरितम्। 29. मण्डलचरितम्। इति षाड्गुण्यं सप्तममधिकरणम्।।

अथ षाड्गुण्याधिकरणे प्रथमं सूत्रं–**षाड्गुण्यसमुद्देश** इति। सन्ध्यादीनां षड्गुणानां संक्षिप्य प्रतिपादनमिति सूत्रार्थः।। 1।।

तत् किमर्थमित्यपेक्षायां **क्षयस्थानवृद्धिनिश्चय** इति सूत्रम्। क्षयो ह्रासः, स्थानं तादवस्थ्यं, वृद्धिः उपचयः, तेषां निश्चयः स्वरूपावधारणम्। तदिहोच्यत इत्यर्थः। प्रकरणमिदं पूर्वं चैकस्मिन्नध्याये समावेशितम्।। 2।।

क्षीणकार्यं वक्तु सूत्रं–**संश्रयवृत्तिः** इति। प्रबलमाश्रित्य वर्तनमिति सूत्रार्थः।। 3।।

समहीनज्यायसां गुणाभिनिवेशः इति सूत्रम्। समः शत्रुणा सदृशशक्तिः, हीन निकृष्टः, ज्यायान् उत्कृष्टः। आसु तिसृष्ववस्थासु गुणस्थापनात्रोच्यत इत्यर्थः।। 4।।

हीनसन्धय इति सूत्रम्। हीनेन कोशदण्डभूमीः प्रदाय करणीयाः सन्धय इह वर्ण्यन्त इत्यर्थः।। 5।।

विगृह्यासनम् इति सूत्रम्। शत्रुणा सह विगृह्य शत्रोर्धान्यादिप्राप्तिप्रतिघातं कृत्वा स्वविषये स्थितिरिति सूत्रार्थः।। 6।।

सन्धायासनम् इति सूत्रम्। अभियानाशक्तौ परेण सन्धिं कृत्वावस्थानमित्यर्थः।। 7।।

विगृह्ययानम् इति सूत्रम्। पार्ष्णिग्राहादिभिः सह विग्रहं कृत्वा परं प्रति अभियानमित्यर्थः।। 8।।

सन्धाययानम् इति सूत्रम्। पार्ष्णिग्राहादिभिः सह सन्धिं कृत्वा शत्रुमुद्दिश्य यानमित्यर्थः।। 9।।

सम्भूयप्रयाणम् इति सूत्रम्। समहीनज्यायसां शत्रुं प्रति समुदेत्य प्रयाणमित्यर्थः।। 10।।

यातव्यामित्रयोरभिग्रहचिन्ता इति सूत्रम्। अरिसम्पद्युक्तो व्यसनी च यातव्यः, अमित्रो नित्यापकारी शत्रुः, अभिग्रहो यानम्। यातव्यामित्रयोः कतरं प्रति यानमनुष्ठेयमिति सम्प्रधारणमिहोच्यत इत्यर्थः।। 11।।

क्षयलोभविरागहेतवः प्रकृतीनाम् इति सूत्रम्। क्षयः गजवाजिपुरुषधनादीनामपचयः, लोभः, अतितृष्णा, विरागः प्रद्वेषः, तदुत्पत्तिहेतवोऽमात्यादीनामिहाभिधीयन्त इत्यर्थः।। 12।।

सामवायिकविपरिमर्शः इति सूत्रम्। समवायेन चरन्ति सामवायिकाः विजिगीष्वनुयायिनो राजानः तेषां विपरिमर्शः गुरुलघुभावचिन्तनमित्यर्थः।। 13।।

संहितप्रयाणिकम् इति सूत्रम्। संहितयोः अन्योन्यकृतसन्धिकयोः शत्रुविजिगीष्वोः प्रयाणं भिन्नदिक्कं यानं, तदिह प्रतिपाद्यत इत्यर्थः।। 14।।

परिपणितापरिपणितापसृताश्च सन्धयः इति सूत्रम्। देशकालकार्यव्यवस्थया कृतः सन्धिः परिपणितसन्धिः, तद्विपरीतोऽपरिपणितसन्धिः, कुतोऽपि निमित्तात् स्वपक्षादपसृतेन पुनः सन्धिः अपसृतसन्धिः, त इमे सन्धय इह व्युत्पाद्यन्त इत्यर्थः।। 15।।

द्वैधीभाविकाः सन्धिविक्रमाः इति सूत्रम्। सन्धिविग्रहोपादानं द्वैधीभावः तत्सम्बद्धाः सन्धिविक्रमाः कथ्यन्त इत्यर्थः।। 16।।

यातव्यवृत्तिः इति सूत्रम्। यातव्यो विजिगीषुः तस्य सामवायिकेषु वृत्तिः यातव्ये सामवायिकानां वृत्तिश्चोच्यत इत्यर्थः।। 17।।

अनुग्राह्यमित्रविशेषाः इति सूत्रम्। भूम्येकान्तरा राजानो मित्राणि। तत्र कानि मित्राणि साहाय्यदानेनानुग्राह्याणि कानि नेति विचारोऽत्र क्रियत इत्यर्थः।। 18।।

मित्रहिरण्यभूमिकर्मसन्धयः इति सूत्रम्। मित्रेण हिरण्येन भूम्या कर्मणा च ये सन्धयः पणबन्धाः त इहाभिधीयन्त इत्यर्थः। इदं प्रकरणं चतुरध्यायीरूपम्।। 19।।

हीनशक्तिपूरणम्। इति सूत्रम्। अपचितानां प्रभुमन्त्रोत्साहशक्तीनां वर्धनमिहोच्यत इत्यर्थः।। 21।।

बलवता विगृह्योपरोधहेतव इति सूत्रम्। प्रबलेन शत्रुणा सह विगृह्य दुर्गप्रवेशस्य कारणान्यभिधीयन्त इत्यर्थः।। 22।।

दण्डोपनतवृत्तम् इति सूत्रम्। दण्डेन बलेन उपनतः अधःकृतः तदवस्थापन्नस्य विजिगीषोर्बलवन्तं प्रत्यनुष्ठानमुच्यत इत्यर्थः।। 23।।

दण्डोपनायिवृत्तम् इति सूत्रम्। दण्डेन बलेन शत्रुमात्मनः समीपमुपनयति उपनमयतीति दण्डोपनायी तदवस्थस्य विजिगीषोर्वृत्तमुच्यत इत्यर्थः।। 24।।

सन्धिकर्म इति सूत्रम्। सन्धेः शपथादिना दृढीकरणमुच्यत इत्यर्थः।। 25।।

सन्धिमोक्षः इति सूत्रम्। सन्धिनिमित्तं ग्रहीकृतः सन्धिरित्युपचर्यते तस्य मोक्षो मोचनमुच्यत इत्यर्थः।। 26।।

मध्यमचरितम् इति सूत्रम्। मध्यमेषु विजिगीषोर्वृत्तिरुच्यत इत्यर्थः। एतदादिप्रकरणत्रयमेकस्मिन्नध्याये सन्निवेशितम्।। 27।।

उदासीनचरितम् इति सूत्रम्। उदासीनं प्रति विजिगीषोरनुष्ठानमभिधीयत इति सूत्रार्थः।। 28।।

मण्डलचरितम् इति सूत्रम्। मण्डलम् अरिमित्रलक्षणम्। तत् प्रति विजिगीषोरनुष्ठानमुच्यत इति सूत्रार्थः।। 29।।

।। **इति षाड्गुण्यं सप्तममधिकरणमिति**। एवमेकोनत्रिंशत्प्रकरणं षाड्गुण्याधिकरणं सप्तमं समुद्दिष्टमित्यर्थः।।

1. Enumeration of the sixfold oplicy; 2. determination of deterioration, stagnation and prgression; 3. the nature of alliance; 4. attitudes of equal, inferior and superior kings; 5. alliances of the inferiors; 6. neutrality after proclaiming the war; 7. entering into agreement on being weak to enter

into a war; 8. marching after proclaiming war; 9. marching after effecting a treaty; 10. joining together of the forces of equal, inferior and superior kings and marching for battle; 11. marching against an immediate enemy and a permanent enemy; 12. reasons leading to the dwindling, greed and disloyalty of people; 13. consideration of the comparative strength of vassal kings accompanying a conqueror; 14. march of combined forces; 15. agreement reached with or without definite forms; 16. double dealing involving agreement and agression; 17. behaviour of a conqueror to his friends or vice-versa; 18. friends who deserve help; 19. agreement for the acquisition of a friend or a quantity of gold; 20. considerations about an enemy in the rear; 21. measures to increase the power that has decreased; 22. taking precautions after provoking a powerful enemy; 23. attitude of a conqueror towards a powerful enemy; 24. the attitude of a conquered king towards the victor; 25. promise to keep agreement at all cost; 26. release from the agreement once reached; 27. the conduct of a Madhyama king; 28. conduct of an Udāsīna ruler (= a neutral king); 29. state of a circle of regions, and this forms the seventh book concerned with the six-fold policy.

Book Eight : Vices and Calamities

1. प्रकृतिव्यसनवर्गः । 2. राजराज्ययोर्व्यसनचिन्ता । 3. पुरुषव्यसनवर्गः । 4. पीडनवर्गः । 5. स्तम्भनवर्गः । 6. कोशसङ्गवर्गः । 7. बलव्यसनवर्गः । 8. मित्रव्यसनवर्गः । इति व्यसनाधिकारिकमष्टममधिकरणम् ।।

अथ व्यसनाधिकारिकेऽधिकरणे प्रथमं सूत्रं–**प्रकृतिव्यसनवर्गः इति**। प्रकृतयः स्वाम्यमात्यादयः, व्यसनानि गुणप्रातिलोम्यादीनि, तेषां वर्गः समूहोऽभिधीयत इत्यर्थः ।। 1 ।।

राजराज्ययोर्व्यसनचिन्ता इति सूत्रम् । राजा स्वामी, राज्यम् अमात्यादिप्रकृतिपञ्चकं द्रव्यप्रकृतिपञ्चकं च, तयोर्व्यसनचिन्ता व्यसनगुरुलघुभावसम्प्रधारणमुच्यत इत्यर्थः ।। 2 ।।

पुरुषव्यसनवर्गः इति सूत्रम् । पुरुषस्य व्यसनानि व्यसनप्रभवा दोषाः तेषां वर्गोऽभिधीयत इत्यर्थः ।। 3 ।।

पीडनवर्गः इति सूत्रम् । अग्न्युदकादिनिमित्ताः शक्त्यपचयाः पीडनानि, तेषां वर्गः, संख्यास्वरूपगौरवलाघवतोऽभिधीयत इत्यर्थः । एतदादिप्रकरणत्रयमेकस्मिन्नध्याये समावेशितम् ।। 4 ।।

स्तम्भनवर्गः इति सूत्रम् । स्तम्भनं प्रत्यूहोक्त्या राजकार्योपरोधः तद्धेतूनां वर्ग उच्यत इति सूत्रार्थः ।। 5 ।।

कोशसङ्गवर्गः इति सूत्रम् । कोशस्य राजार्थस्य सङ्गः अप्रदानं कोशसङ्गः तद्धेतुवर्गः उच्यत इत्यर्थः ।। 6 ।।

बलव्यसनवर्गः इति सूत्रम् । बलं चतुरङ्गं सैन्यं मौलभृतकादिभेदेन षड्विधं तस्य व्यसनवर्गः अमानितविमानितादित्रयस्त्रिंशत्प्रकारोऽभिधीयत इत्यर्थः ।। 7 ।।

मित्रव्यसनवर्गः इति सूत्रम् । स्पष्टार्थम् । प्रकरणद्वयमिदमेकाध्यायगतम् ।। 8 ।।

इति व्यसनाधिकारिकमित्यादि। एवमष्टप्रकरणं व्यसनाधिकारेण प्रवृत्तमष्टममधिकरणं समुद्दिष्टमित्यर्थः।।

1. Categories of calamities of people in general; 2. problems and troubles of the ruler and the kingdom; 3. aggregate of troubles for men; 4. kinds of molestations; 5. group of obstructions; 6. troubles on account of finances; 7. troubles concerning the army; 8. troubles relating to one's friends; and this forms the eighth book concerned with vices and calamities.

Book Nine : Actions of an Invader

1. शक्तिदेशकालबलाबलज्ञानम्। 2. यात्राकालाः। 3. बलोपादानकालाः। 4. सन्नाहगुणाः। 5. प्रतिबलकर्म। 6. पश्चात्कोपचिन्ता। 7. बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः। 8. क्षयव्ययलाभविपरिमर्शः। 9. बाह्याभ्यान्तराश्चापदः। 10. दूष्यशत्रुसंयुक्ताः। 11. अर्थानर्थसंशययुक्ताः। 12. तासामुपायविकल्पजाः सिद्धयः। इत्यभियास्यत्कर्म नवममधिकरणम्।।

अथ अभियास्यत्कर्माख्यं नवममधिकरणम्। अभियास्यतो विजिगीषोः अभियानात् प्राक् चिन्तनीयमर्थजातमस्मिन्नधिकरणे उपदेक्ष्यते। तत्र प्रथमं सूत्रं-**शक्तिदेशकालबलाबलज्ञानम्** इति। शक्तेर्देशस्य कालस्य च बलाबलज्ञानमुपदिश्यत इत्यर्थः। इदं प्रकरणमुत्तरं चैकाध्यायगते।। 1।।

यात्राकालाः इति सूत्रम्। शत्रुं प्रति अभियानं यात्रा तद्योग्याः कालाः ऋतव उच्यन्त इत्यर्थः।। 2।।

बलोपादानकालाः इति सूत्रम्। बलानि मौलभृतकादीनि षट् तेषाम् उपादानकालाः उद्योजनसमयाः। अमुकबलममुकसमये समुद्योजयितव्यमित्ययमर्थ इह चिन्त्यत इत्यर्थः।। 3।।

सन्नाहगुणाः इति सूत्रम्। सन्नाहः शस्त्रावरणग्रहणं तस्य गुणाः श्रेष्ठत्वप्रकाराः कथ्यन्त इत्यर्थः।। 4।।

प्रतिबलकर्म इति सूत्रम्। परबलाभिभवसमर्थं बलं प्रतिबलं, तस्य करणप्रकार उच्यत इत्यर्थः।। 5।।

पश्चात्कोपचिन्ता इति सूत्रम्। पश्चात्कोपः पार्ष्णिग्राहादिकृतः कोपो दाहविलोपादिः, स इह चिन्त्यत इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगते।। 6।।

बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः इति सूत्रम्। बाह्यप्रकृतयो राष्ट्रमुख्यान्तपालादयः, आभ्यन्तरप्रकृतयो मन्त्रिपुरोहितादयः, तासां कोपो व्यलीकजनितश्चित्तविकारः, तस्य प्रतिविधानमुच्यत इति सूत्रार्थः।। 7।।

क्षयव्ययलाभविपरिमर्शः इति सूत्रम्। क्षयो युग्यपुरुषापचयः, व्ययो हिरण्यधान्यापचयः, लाभो यानफलं भूम्यादिप्राप्तिः, तेषां विपरिमर्शः गौरवलाघवसम्प्रधारणमभिधीयत इत्यर्थः।। 8।।

बाह्याभ्यन्तराश्चापदः इति सूत्रम्। बाह्यापदः बाह्यराष्ट्रमुख्यान्तपालाद्युत्पादिता विपदः, आभ्यन्तरापदः मन्त्रिपुरोहिताद्युत्थापिताः, तासां स्वरूपं प्रतिविधानं चोपदिश्यत इत्यर्थः।। 9।।

दूष्यशत्रुसंयुक्ताः इति सूत्रम्।। दूष्याः कृत्याः पौरजानपदास्तन्मुख्याश्च, शत्रवः सहजकृत्रिमादयः, तत्संयुक्तास्तदुत्पादिताः आपद इति विशेष्यमनुवर्तते। ता इहोच्यन्ते स्वरूपतः प्रतिविधानतश्चेत्यर्थः।। 10।।

अर्थानर्थसंशययुक्ताः। इति सूत्रम् अर्थो मित्रहिरण्यभूम्यादिः अनर्थस्तन्नाशः शरीरनाशश्च, संशयः अर्थप्राणयोः सन्देहः, तैर्युक्ता आपद उच्यन्त इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगतम्।। 11।।

तासामुपायविकल्पजाः सिद्धयः इति सूत्रम्। तासां पूर्वोक्तानामापदाम् उपायविकल्पजाः उपायाः प्रशमार्थाः सामादयः तेषां विकल्पः प्रयोगभेदः तज्जनिताः सिद्धयः प्रतीकारा उच्यन्त इत्यर्थः।। 12।।

इत्यभियास्यत्कर्मेत्यादि। एवं द्वादशप्रकरणमभियास्यत्कर्माख्यं
नवममधिकरणं समुद्दिष्टमित्यर्थः।।

1. Knowledge relating to power, place, time, strength and weakness; 2. proper time for invasion; 3. time for recruiting the army; 4. proper arrangement of armoury and equipment; 5. work of understanding the strength of the enemy force; 6. considerations relating to the annoyance from the rear; 7. remedies against the internal and external disturbances; 8. considerations of loss, and expenditure in comparison; 9. internal and external dangers; 10. people associated with traitors and enemies; 11. doubts relating to prosperity and harm; 12. means to be adopted to avoid such troubles, and this forms the ninth book concerned with the acts of an invader.

Book Ten : Acts Relating to War

1. स्कन्धावारनिवेशः। 2. स्कन्धावारप्रयाणम्। 3. बलव्यसना- वस्कन्दकालरक्षणम्। 4. कूटयुद्धविकल्पाः। 5. स्वसैन्योत्साहनम्। 6. स्वबलान्यबलव्यायोगः। 7. युद्धभूमयः। 8. पत्त्यश्वरथहस्तिकर्माणि। 9. पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः। 10. सारफल्गुबलविभागः। 11. पत्त्यश्वरथहस्तियुद्धानि। 12. दण्डभोगमण्डलासंहतव्यूहव्यूहनम्। 13. तस्य प्रतिव्यूहसंस्थापनम्। इति साङ्ग्रामिकं दशममधिकरणम्।।

अथ दशमे साङ्ग्रामिकेऽधिकरणे प्रथमं सूत्रं—**स्कन्धावारनिवेशः** इति। सैन्यावास्थानं स्कन्धावारः तस्य निवेशो निर्माणविधिरुच्यत इत्यर्थः।। 1।।

स्कन्धावारप्रयाणम् इति सूत्रम्। स्कन्धावारस्य कटकस्य देशकालाद्यनुगुणसन्नाहपुरस्सरम-भिषेणनमुच्यत इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगतम्।। 2।।

बलव्यसनावस्कन्दकालरक्षणम् इति सूत्रम्। अमानितविमानितादीनि बलव्यसनानि अवस्कन्दकाला दीर्घकान्तारानुदकाद्यध्वगमनकालाः तेभ्यः सैन्यसंरक्षणमुच्यत इत्यर्थः।। 3।।

कूटयुद्धविकल्पाः इति सूत्रम्। कूटयुद्धं नाम कपटयुद्धं बलव्यसनावस्कन्दकालादिच्छिद्रमुपलभ्य शत्रुहिंसनं, तस्य विकल्पाः भेदाः कथ्यन्त इत्यर्थः। एतदादिप्रकरणत्रयमेकाध्यायगतम्।। 4।।

स्वसैन्योत्साहनम्। इति सूत्रम्। आत्मयोधानां संग्रामगुणसंकीर्तनादिना युद्धोत्साहजननमुच्यत इत्यर्थः।। 5।।

स्वबलान्यबलव्यायोगः इति सूत्रम्। स्वसैन्यस्य परसैन्यापेक्षया व्यायोगः विशिष्टमायोजनं व्यवस्थापनं दिक्सूर्यवाताद्यानुगुण्यं यथा स्यात् तथा व्यूहरचनमिति यावत्। तदिहोच्यत इत्यर्थः।। 6।।

युद्धभूमयः इति सूत्रम्। युद्धानुगुणाः समस्थिराभिकाशादिलक्षणाः भूमयः कथ्यन्त इत्यर्थः।। 7।।

पत्त्यश्वरथहस्तिकर्माणि इति सूत्रम्। पत्तिः पदातिः तदादीनां व्यापाराः उच्यन्त इत्यर्थः।। 8।।

पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागाः इति सूत्रम्। पक्षौ पञ्चव्यूहात्मना स्थाप्यमानस्य बलस्य बहिः पुरस्तात्कौट्यौ, कक्षौ पश्चादन्तःपार्श्वे, उरस्यम् मध्यम्, एषां पञ्चानां व्यूहविशेषाणां बलपरिमाणानुगुण्येन व्यूहविभागोऽभिधीयत इत्यर्थः। एतदादिप्रकरणत्रयमेकाध्यायगतम्।। 9।।

सारफल्गुबलविभागः इति सूत्रम्। सारबलं पितृपैतामहत्वादिदण्डसम्पद्युक्तं, तद्विपरीतं भीरुकं वा फल्गुबलं, तयोर्विभागो विभज्यावस्थापनं चिन्त्यत इति सूत्रार्थः।। 10।।

पत्त्यश्वरथहस्तियुद्धानि इति सूत्रम्। स्पष्टार्थम्।। 11।।

दण्डभोगमण्डलासंहतव्यूहव्यूहनम् इति सूत्रम्। दण्डव्यूहो भोगव्यूहो मण्डलव्यूहः असंहतव्यूहः इत्येतेषां प्रकृतिव्यूहानां तद्विकृतिव्यूहानां च रचनमभिधीयत इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगतम्।। 12।।

तस्य प्रतिव्यूहसंस्थापनम् इति सूत्रम्। तस्य दण्डादिव्यूहनस्य अर्थात् दण्डादिव्यूहानां प्रतिव्यूहस्थापनमुच्यत इत्यर्थः।। 13।।

इति साङ्ग्रामिकं दशममधिकरणमिति। संग्राममधिकृत्य प्रवृत्तं सांग्रामिकं तदाख्यं दशममधिकरणम् इत्थं त्रयोदशप्रकरणकं समुद्दिष्टमित्यर्थः।।

1. Arrangement of the cantonment; 2. moving of the cantonment; 3. protection of the forces in distress and under attack; 4. forms of treacherous fight; 5. encouragement of one's own army; 6. fight between the armies of one' own and rivals; 7. battle-fields; 8. activities of infantry, cavalry, chariots and elephants; 9. clear-cut arraying of troops in respect of wings, flanks and front; 10. distinction between strong and weak troops; 11. battles with infantry, cavalry, chariots and elephants; 12. arrangement of army like a staff, a snake, a circle or in detached order; 13. array of an army against a similar enemy troops; and this forms the tenth book relating to war.

Book Eleven : Conduct of Alliance

1. भेदोपादानानि। 2. उपांशुदण्डः। इति सङ्घवृत्तमेकादशमधिकरणम्।

अथैकादशे सङ्घवृत्तेऽधिकरणे प्रथमं सूत्रं–भेदोपादानानि इति। भेदः सङ्घविश्लेषोपायः तस्य उपादानानि प्रयोगा उच्यन्त इत्यर्थः।। 1।।

उपांशुदण्डः इति सूत्रम्। तूष्णीदण्डः निगूढवध उच्यत इत्यर्थः।। 2।।

इति सङ्घवृत्तमेकादशमधिकरणमिति। सङ्घः शस्त्रोपजीविनां सङ्घीभावैकबलानां राजाविधयानां समूहः, तस्मिन् वृत्तं तद्विधेयी- करणानुकूले राज्ञो व्यापारः तत्प्रतिपादकम्, एवं द्विप्रकरणम् एकादशमधिकरणं समुद्दिष्टमित्यर्थः। एतच्चैकाध्यायम्।।

1. Means for dissension; 2. punishment meted out in secret; and this forms the eleventh book concerned with dissensions.

Book Twelve : Relating to Strong Enemy

1. दूतकर्म। 2. मन्त्रयुद्धम्। 3. सेनामुख्यवधः। 4. मण्डलप्रोत्साहनम्। 5. शस्त्राग्निरसप्रणिधयः। 6. विवधासारप्रसारवधः। 7. योगातिसन्धानम्। 8. दण्डातिसन्धानम्। 9. एकविजयः। इत्याबलीयसं द्वादशमधिकरणम्।।

अथ आबलीयसं नाम द्वादशमधिकरणम्। अबलीयान् दुर्बलतरः तस्येदमाबलीयसं प्रबले सन्धिमनिच्छति सति दुर्बलतरस्य कृत्यम्। तदिह प्रतिपाद्यम्। तत्र प्रथमं सूत्रं-**दूतकर्म** इति। दूता नाम निसृष्टार्थाः परिमितार्थाः शासनहरा इति त्रिविधाः तेषां व्यापारोऽभिधीयत इत्यर्थः।। 1।।

मन्त्रयुद्धम् इति सूत्रम्। मन्त्रः प्रज्ञोत्कर्षः तेन युद्धं मन्त्रयुद्धम्। तच्च शत्रुषड्वर्गवशागानेक-भूमिपतिनाशोदाहरणादिना शत्रोर्मतिमुपजनय्य वञ्चनम्। तदिहोच्यत इति सूत्रार्थः।। 2।।

सेनामुख्यवधः इति सूत्रम्। सेना चतुरङ्गबलं तत्र मुख्याः सेनापत्यादयः तेषा वधोपाय उच्यत इत्यर्थः। इदमुत्तरं चैकाध्यायगतम्।। 3।।

मण्डलप्रोत्साहनम् इति सूत्रम्। मण्डलं मित्रादिमण्डलं तस्य प्रोत्साहनम् आत्मरक्षार्थमुद्योजनं विजिगीषुणा कर्तव्यमुच्यत इत्यर्थः।। 4।।

शास्त्राग्निरसप्रणिधयः इति सूत्रम्। शस्त्राग्निरसानां गूढप्रयोगा उच्यन्त इत्यर्थः। इदमुत्तरं चैकाध्यायगतम्।। 5।।

विवधासारप्रसारवधः इति सूत्रम्। विवधः पर्याहारः उपचारात् पर्याहारवाही स्वप्रजास-काशलभ्यायभारानेता, आसारः सुहृद्बलं, प्रसारो वनाद् यवसेन्धनाहर्ता, तेषां वध उच्यत इत्यर्थः।। 6।।

योगातिसन्धानम् इति सूत्रम्। योगः कपटोपायः देवतागृहप्रवेशाद्यवसरे शत्रोरुपरि शिलायन्त्रमोक्षणभित्तिपातनादिः तेनातिसन्धानमुच्यत इत्यर्थः। एतदादिप्रकरणत्रयमेकाध्यायान्तर्गतम्।। 7।।

दण्डातिसन्धानम् इति सूत्रम्। दण्डो वधपरिक्लेशार्थाहरणादिः, तेन शत्रोरभिभवनमुच्यत इत्यर्थः।। 8।।

एकविजयः इति सूत्रम्। एकेन सहायनिरपेक्षेणैव विजिगीषुणा विजयः शत्रोरभिभव उच्यत इत्यर्थः।। 9।।

।। इत्याबलीयसमित्यादि। एवं नवप्रकरणमाबलीयसं
द्वादशमधिकरणं समुद्दिष्टमित्यर्थः।।

1. Actions of a messenger; 2. battle using intrigues; 3. killing of the commander-in-chief of the enemy forces, 4. incitement of a circle of states, 5. spies equipped with weapons, fire and poison; 6. destruction of various stores of supply; granaries etc; 7. capture of enemy by means secret contrivances, arranged by one's forces; 8. victory over enemy by using force, torture etc; 9. complete victory over enemy and this forms the twelfth book called meeting a strong enemy in battle.

Book Thirteen : Means of Capturing Fortress

1. उपजापः । 2. योगवामनम् । 3. अपसर्पप्रणिधिः । 4. पर्युपासनकर्म । 5. अवमर्दः । 6. लब्धप्रशमनम् । इति दुर्गलम्भोपायस्त्रयोदशमधिकरणम् ।।

अथ त्रयोदशं दुर्गलम्भोपायाख्यमधिकरणमारभ्यते। दुर्गस्य परकीयस्य प्राप्त्युपायोऽस्मिन्नधिकरण उपदिश्यते। तत्र प्रथमं सूत्रम्—**उपजाप** इति। उपजापो भेदः उच्यत इत्यर्थः।। 1।।

योगवामनम् इति सूत्रम्। योगो मुण्डजटिलादिवेषान्यत्वग्रहणं तेनोपायेन वामनं शत्रोर्दुर्गान्निष्क्रामण-मभिधीयत इत्यर्थः।। 2।।

अपसर्पप्रणिधिः इति सूत्रम्। अपसर्पा गूढपुरुषाः तेषां प्रणिधानं शत्रुविषये निवासनमुच्यत इत्यर्थः।। 3।।

पुर्यपासनकर्म इति सूत्रम्। परदुर्गं परित उपासनकर्म सैन्यनिवासनव्यापार उच्यत इत्यर्थः। इदमुत्तरं चैकाध्यायगतम्।। 4।।

अवमर्दः इति सूत्रम्। अवमर्दः परदुर्गग्रहणं तत् कदा केन प्रकारेण कर्तव्यमित्ययमर्थोऽभिधीयत इत्यर्थः।। 5।।

लब्धप्रशमनम् इति सूत्रम्। विजिगीषुणा लब्धस्य शत्रुदुर्गादेः प्रशमनं लब्धप्रशमनम्। तच्च दुर्गादिवासिनाम् अपूर्वभूपतिविषयशङ्काद्यपोहनेन विजिगीषौ विस्रम्भजननम्। तदभिधीयत इति सूत्रार्थः।। 6।।

इति **दुर्गलम्भोपाय** इत्यादि। एवं षट्प्रकरणं दुर्गलम्भोपायाख्यं
त्रयोदशमधिकरणं समुद्दिष्टमित्यर्थः।।

1. Means of dissension; 2. prompting the enemy to come out of the fort by employing suitable persons; 3. working of one's spies among the enemy forces; 4. laying siege of a fortress of an enemy; 5. the successful operation of a siege; 6. restoration of peace in a conquered country and this forms the thirteenth book called capturing a fortress.

Book Fourteen : Secret Means

1. परघातप्रयोगः। 2. प्रलम्भनम्। 3. स्वबलोपघातप्रतीकारः। इत्यौपनिषदं चतुर्दशमधिकरणम्।।

अथोपनिषदं चतुर्दशमधिकरणम्। उपनिषत् शत्रुजयोपायरहस्यं तदधिकृत्य प्रवृत्तमौपनिषदम्। तत्र प्रथमं सूत्रं—**परघातप्रयोग** इति। शत्रुवधार्थं औषधप्रयोग उच्यत इत्यर्थः।। 1।।

प्रलम्भनम् इति सूत्रम्। **औषधमन्त्रप्रयोगद्वारेण** क्षुत्प्रतीकारविरूपकरणादिना शत्रुवञ्चनमुच्यत इत्यर्थः। अद्भुतोत्पादनं भैषज्यमन्त्रप्रयोग इति द्विधा विभज्य प्रकरणमिदमध्यायद्वयेन वितन्यते। तत्र मार्जारोष्ट्रादिचक्षुस्साधितचूर्णादिकं भैषज्यं दृश्यादृश्यकरणादिसाधनं, 'बलिं वैरोचनमि'त्यादिर्मन्त्रः।। 2।।

स्वबलोपघातप्रतीकारः इति सूत्रम्। स्वबलस्य स्वसैन्यस्य परप्रयुक्तविषाम्बुदूषणादिनिमित्तो य उपघातः तस्य प्रतीकारोऽभिधीयत इत्यर्थः।। 3।।

।। इत्यौपनिषदमित्यादि। एवं त्रिप्रकरणम् औपनिषदं चतुर्दशमधिकरणं समुद्दिष्टमित्यर्थः। औपनिषदिकमित्यपि पाठः। तदाणन्ताट्टन्।।

1. Injuring an enemy by use of potions; 2. delusive means to deceive and enemy; 3. remedies against the injuries to one's own army, and this forms the fourteenth book called secret means.

Book Fifteen : Plan of the Treatise

1. तन्त्रयुक्तयः। इति तन्त्रयुक्तिः पञ्चदशमधिकरणम्।

शास्त्रसमुद्देशः पञ्चदशाधिकरणानि सपञ्चाशदध्यायशतं साशीति प्रकरणशतं षट् श्लोकसहस्राणीति।

सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम्।
कौटल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम्।।

।। इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथममाधिकरणे प्रथमोऽध्यायः राजवृत्तिः।।

अथान्तिमं तन्त्रयुक्तिर्नाम पञ्चदशमधिकरणम्। तन्त्रं तन्त्रावापात्मकमिदमर्थशास्त्रं तस्य युक्तिः व्याख्यानोपायभूतो न्यायः स इह प्रतिपाद्यते। तत्रेदं सूत्रं–**तन्त्रयुक्तय** इति। तन्त्रोपयुक्ता युक्तयः अधिकरण विधानादयो द्वात्रिंशदस्मिन् प्रकरणेऽभिधीयन्त इति सूत्रार्थः।। 1।।

इति **तन्त्रयुक्तिरित्यादि**। एवमेकप्रकरणकमिदं तन्त्रयुक्त्यधिकरणं समुद्दिष्टमित्यर्थः।।

अथ सर्वप्रकारेयत्ताख्यनेन कृत्स्नस्य शास्त्रस्य समुद्देशमाह–**शास्त्रसमुद्देश** इत्यादि। श्लोक इह द्वात्रिंशद् अक्षराणि, येषां समुदाय एको ग्रन्थ इति गण्यते। शेषं स्पष्टम्।

व्युत्पित्सुप्ररोचनार्थं स्वशास्त्रस्य तन्मृग्यगुणपुष्कलतां श्लोकेनाह–**सुखेत्यादिना**। सुखं क्लेशासहं ग्रहणं बुद्धिर्येषां ते सुखग्रहणाः सुकुमारमतयः तैरपि विज्ञेयं विज्ञातुं शक्यम्। तदन्यविज्ञेयत्वं तु कैमुत्यसिद्धम्। तत्त्वार्थपदनिश्चितं तत्त्वम् अर्थस्य याथात्म्यं, अर्थः शब्दाभिधेयः, पदं वाचकशब्दः, तत्त्वतोऽर्थतः पदतश्च निश्चितम्। किं यथाप्रतिपादितमेवार्थस्य याथात्म्यम् उतान्यदपि स्यादिति सन्देहानुत्थापकं तत्त्वनिश्चितम्, अर्थपदयोरन्यूनानतिरिक्ततया सन्देहाजनकम् अर्थपदनिश्चितमिति बोद्धव्यम्। तत्त्वार्थपदानि निश्चितानि यस्मिन्निति बहुव्रीहिर्वा। तदा तु निश्चितशब्दस्य परनिपात आहिताग्न्यादित्वात् साध्यः।

।। इतीत्याद्यध्यायसमाप्तिवाक्यम्। तत्र प्रान्ते **राजवृत्तिरिति** प्रतिपाद्यसूचनम्, एतदध्यायसंक्षिप्तस्य कृत्स्नशास्त्रार्थस्य राजसम्बन्धिव्यापारात्मकत्वात्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे प्रथमोऽध्यायः राजवृत्तिः।।

1. Plan of the treatise dividing contents under various chapters and sections.

The present work consists of 15 books, 150 chapters, 180 sections and 6000 ślokas (a śloka stands for 32 syllablic units in verse or prose.)

This treatise easy to comprehend, bereft of undue enlargement and composed in words of definite meaning has been produced by Kauṭalya

Thus the first chapter of the Arthaśāstra of Kauṭalya entitled *Vinayādhikārika* dealing with the functions of a king comes to an end.

Chapter 2

1. प्रकरणं विद्यासमुद्देशः—आन्वीक्षिकीस्थापना।

Section 1 : Indication of Sciences Place of Ānvīkṣikī determined.

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्याः।

त्रयी वार्त्ता दण्डनीतिश्चेति मानवाः, त्रयीविशेषो ह्यान्वीक्षिकीति।

वार्त्ता दण्डनीतिश्चेति बार्हस्पत्याः, संवरणमात्रं हि त्रयी लोकयात्राविद इति।

दण्डनीतिरेका विद्येत्यौशनसाः, तस्यां हि सर्वविद्यारम्भाः प्रतिबद्धा इति।

अथ समुद्देशनिर्देशक्रमेण अधिकरणप्रकरणानि व्याख्येयानि। तत्र तावत् प्रथमाधिकरणस्यादिमं प्रकरणं द्वितीयादिभिस्त्रिभिरध्यायैः प्रपञ्च्यते। विद्यासमुद्देश इति हि प्रथमं सूत्रम्। कास्ता विद्या इत्याकाङ्क्षायामाह—**आन्वीक्षिकीत्यादि**। अर्थतत्त्वस्य हेतुभिः परीक्षणमन्वीक्षा सा प्रयोजनमस्या इति आन्वीक्षिकी हेतुविद्या। ऋग्यजुःसामानि त्रयी तेषाम् अभिचारकर्मज्ञानादिफलादथर्ववेदाद् भिन्नप्रस्थानतया पृथक्पङ्क्तिनिवेश्यानां सम्भूयैकक्रतुकार्यसाधकत्वात् तत्समुदायस्य त्रयीति संज्ञा। कृषिः पाशुपाल्यं वणिज्या च वार्त्ता। दण्डनीतिस्तु राजनीतिः। इति एवं प्रसिद्धा इति शेषः।

तत्र मनुशिष्याणां पक्षमाह—**त्रयीत्यादि**। आन्वीक्षिकी त्रयीविशेषो हि त्रय्यनुगामितया त्रय्यर्थविचाररूपतया च त्रय्याः प्रकार एव न विद्यान्तरमित्यर्थः। तत्र त्रय्यनुगामिनी आन्वीक्षिकी साङ्ख्ययोगतर्कशास्त्राणि, अन्या तु पूर्वोत्तरमीमांसे। आह च कामन्दकः—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणं च त्रयीदं सर्वमुच्यते।।

इति।

बृहस्पतिशिष्याणां मतमाह—**वार्त्ता दण्डेत्यादि**। त्रय्या विद्यान्तरत्वाभावे हेतुमाह—**संवरणमात्रं हीति**। त्रयी, लोकयात्राविदः वार्तादण्डनीत्यनुष्ठानलक्षणलोकतन्त्रविदुषः, संवरणमात्रं हि। नास्तिकोऽयमिति लोकनिन्दाद्वारसंवृतिसाधनमेव केवलम्। लोकतन्त्रसम्यङ्निर्वहणसमर्थमपि त्रय्यपरिग्राहिणं सन्तं नास्तिक इति लोको निन्देदिति त्रयीपरिग्रहस्य यथोक्तनिन्दाद्वारगोपनमात्रफलत्वेनाल्पप्रयोजनत्वात्र सा विद्यान्तरमित्यभिप्रायः। त्रयीनिरासेन तदन्तर्गताया आन्वीक्षिक्या अपि निरासः सिद्धः।

मतान्तरमाह—**दण्डनीतिरेकेत्यादि**। दण्डनीतिः, एका एकैव, विद्या प्राधान्येन विद्याव्यपदेशमर्हतीत्यर्थः। इति, औशनसाः शुक्रशिष्याः, कुतः, सर्वासां विद्यानामारम्भाः योगक्षेमाः, तस्यां हि प्रतिबद्धाः दण्डनीतावेव प्रतिष्ठिताः, इति कृत्वा। यद् वक्ष्यति—'आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः' (अध्या०-4) इति।

Ānvīkṣikī, the three Vedas, Vārtā (agriculture, cattle-breeding and trade) and Daṇḍanīti (science of government) are called the four sciences.

Mānavas (the followers of the school of Manu) hold them as consisting of the three Vedas, Vārtā and Daṇḍanīti, (for according to them) Ānvīkṣikī is included under the scope of the Vedas.

Bārhaspatyas (the followers of the school of Bṛhaspati) consider Vārtā and Daṇḍanīti alone, since the three Vedas simply comprehend the affairs of the temporal world.

Auśanasās (the followers of Uśanas (= Śukra-the preceptor of Asuras) consider Daṇḍanīti as the only science, since all sciences are encompassed therein (in a succinct form).

चतस्त्र एव विद्या इति कौटल्यः। ताभिर्धर्मार्थौ यद् विद्यात्, तद् विद्यानां विद्यात्वम्।

साङ्ख्यं योगो लोकायतं चेत्यान्वीक्षिकी। धर्माधर्मौ त्रय्याम्। अर्थानर्थौ वार्त्तायाम्। नयापनयौ दण्डनीत्याम्। बलाबले चैतासां हेतुभिरन्वीक्षमाणान्वीक्षिकी लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
द्वितीयोऽध्यायः विद्यासमुद्देशे आन्वीक्षिकीस्थापना।।

स्वमतमाह—**चतस्त्र** एवेत्यादि। विद्याः चतस्त्र एव, एवकारेण त्रित्वादिपक्षव्यवच्छेदः। आसां विद्यात्वविद्यान्तरत्वयोर्विद्यात्वमादौ निर्वचनभङ्ग्या स्थापयति—**ताभिरित्यादि**। विद्यात्वं नाम धर्मार्थवेदन-करणत्वम्। तच्चान्वीक्षिक्यादिषु चतसृषु अविशिष्टमित्यर्थः। विद्यान्तरत्वं तु परस्परविसदृशस्वरूप-फलनिरूपणेन यथाक्रमं स्थापयिष्यते।

तत्रान्वीक्षिक्याः स्वरूपमाह—**साङ्ख्यमित्यादि**। साङ्ख्यं प्रकृतिपुरुषविवेचकं शास्त्रं कपिलप्रोक्तं, योगः प्रत्याहारध्यानधारणादिप्रतिपादकं महेश्वरप्रोक्तं, लोकायतं न्यायशास्त्रं ब्रह्मगार्ग्योक्तम्। एतत्त्रितयात्मिका-न्वीक्षिकी। धर्माधर्मौ त्रय्यादीनां फलसूचनम्, तच्चान्वीक्षिकीफलस्य तद्विसदृशत्वव्युत्पादनार्थम्। **धर्माधर्माविति**, प्राधान्येन प्रतिपाद्याविति शेषः। तेन त्रय्यामर्थानर्थनयापनयानामानुषङ्गिकतया क्वचित् क्वचित् प्रतिपादनेऽप्यविरोधः। एवं वार्तादण्डनीत्योरपि ज्ञेयम्। तत्र धर्मोऽध्ययनयजनादिः, अधर्मः श्वमांसभक्षणादिः। अर्थः कालबीजवापादिजन्यं फलम्, अनर्थोऽकालबीजवापादिजन्यम्। नयो ज्यायसा सन्ध्यादिः येन योगक्षेमो निष्पाद्यते; अपनयस्तु ज्यायसा विग्रहादिः येन योगक्षेमो विहन्यते। एतासां त्रय्यादीनाम्। हेतुभिरन्वीक्षमाणा न्यायैः सम्प्रधारयन्ती। व्यसन इत्यादिनोपकारस्वरूपोक्तिः।

बुद्धिमवस्थापयति अविकृतां करोति, बुद्धिर्दु:खे यथा नोद्विजेत सुखे च न प्रहृष्येत् तथा तां नियच्छतीत्यर्थ:। यदाहु:–'न प्रहृष्येत् सुखं प्राप्य नोद्विजेत।सुखादपि' इति। प्रज्ञावाक्यक्रियावैशारद्यं विचारवचनकर्मसु पाटवम्।

प्रदीप इति। आन्वीक्षिकी सर्वविद्यानां प्रदीप: परीक्षणसाधनत्वात्। सर्वकर्मणाम् उपाय: आरम्भादिफलाधिगमपर्यन्तानुष्ठानवैचित्र्यप्रतिभोत्पादकत्वात्। सर्वधर्माणां शश्वद् आश्रय: वैदिकलौकिकानां सर्वेषां धर्माणामन्वीक्षाऽवधार्यत्वात् सर्वदा आश्रयभूता। एवञ्च त्रय्यादिविसदृशस्वरूपफलत्वादान्वीक्षिक्या विद्यान्तरत्वं सिद्धमित्यभिप्राय:।।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
द्वितीयोऽध्याय: विद्यासमुद्देशे आन्वीक्षिकीस्थापना।

Kauṭalya is of the view that the sciences are just four; by them one may understand dharma (rightcousness) and artha (wealth) and hence they attain the status of science. (or wisdom)

Ānvīkṣikī comprises (the philosophy) of Sāṅkhya, Yoga and Lokāyata (= atheistical or materialistic) Dharma and Adharma (righteous and unrighteous acts) are to be known from the three Vedas. Artha and Anartha (wealth and non-wealth) from Vārtā; Naya and Apanaya (expedient and inexpedient) to be known from Daṇḍanītī (the government).

Potency and impotency of these are to be determined by reasons of observance and as such Ānvīkṣikī (the science of observation) becomes useful to the world; controls one's intelligence in calamity as well as prosperity and clarifies (or brings clarity to) intellect, words and actions.

Ānvīkṣikī may be considered as a beacon of light to all sciences, means for all actions, and a perennial source of strength to all righteous activities.

Thus the second chapter of the first section called 'Indication of sciences' in the Arthaśāstra of Kauṭalya comes to an end by determining the place of Ānvīkṣikī.

Chapter 3

1. प्रक०विद्यासमुद्देशः—त्रयीस्थापना।

Section 1 : Indication of Sciences (Contd.) Place of the Three Vedas Determined

सामग्यंजुर्वेदास्त्रयस्त्रयी अथर्ववेदेतिहासवेदौ च वेदाः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिर्ज्योतिषमिति चाङ्गानि। एष त्रयीधर्मश्चतुर्णो वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः।

स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति। क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च। वैश्यस्याध्ययनं यजनं दानं कृषिपाशुपाल्ये वणिज्या च। शूद्रस्य द्विजातिशुश्रूषा वार्त्ता कारुकुशीलवकर्म च।

त्रयीस्थापनार्थं तत्स्वरूपमाह—सामेत्यादि। सामवेदः ऋग्वेदो यजुर्वेद इति त्रयस्त्रयीपदवाच्याः, अथर्ववेदः, इतिहासवेदो महाभारतादिश्च वेदपदार्थाः। शिक्षा वर्णोच्चारणोपदेशकं शास्त्रम्। कल्पः क्रत्वनुष्ठानोपदेशपरम् आश्वालायनादिप्रणीत सूत्रम्। व्याकरणं शब्दानुशासनं पाणिनीयादि। निरुक्तं निर्वचनशास्त्रं यास्कप्रणीतम्। छन्दोविचितिः छन्दश्शास्त्रं पैङ्गलादि। ज्योतिषं सूर्यादिगत्यादिप्रतिपादकं शास्त्रम्।

त्रय्याः फलं वक्तुमाह—एष इति। एष त्रयीधर्मः त्रय्युपदिष्टो धर्मः, चतुर्णां ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च औपकारिकः उपकारफलः। कस्मात्, स्वधर्मस्थापनात् स्वधर्मेषु स्थापनात् स्वधर्मानुपदिश्य तेषु नियन्त्रणाद्, अर्थाद् वर्णाश्रमाणाम्।

वर्णधर्मं विवृणोति—**स्वधर्म** इत्यादि। शस्त्राजीवः शस्त्रेण आजीवो वृत्तिः। भूतरक्षणं प्राणिपालनम्। कृषिपाशुपाल्ये कृषिः केदारेषु बीजवापपरिकर्मादिविधानम्, पाशुपाल्यं पशुपालनकर्म गवाश्वादीनां पोषणचिकित्सादि। वणिज्या क्रयविक्रयव्यवहारः। द्विजातिशुश्रूषा द्विजातयो ब्रह्मक्षत्रियवैश्याः तेषां परिचरणम्। वार्त्ता कृषिपाशुपाल्यवणिज्याः। कारुकुशीलवकर्म शिल्पिकर्म चारणकर्म च।

Sāma, Ṛg and Yajus constitute the three Vedas and these together with Atharvaveda and Itihāsaveda are known as Vedas. Śikṣā (phonetics), Kalpa (rules for ceremonial acts), Vyākaraṇa (grammar), Nirukta (etymological interpretation), Cchandoviciti (prosody), and Jyotiṣa (Astrology) constitute the Aṅgas (the Ancillaries).

These three (Vedas) prescribe the respective duties of the four castes and as such they are most useful.

The proper duty of the Brahmin is study, teaching, conducting sacrifice, officiating in other's sacrificial rituals, giving and receiving of gifts. The duty of a Kṣatriya is study, performance of sacrifice, giving gifts, military occupation and protection of life. That of a Vaiśya is study, performance of sacrifice, giving of gifts, agricultural activities and breeding of cattle in addition to trade. That of a Śūdra is serving the twice-born, trade, profession of artisans and court-bards.

गृहस्थस्य स्वकर्माजीवस्तुल्यैरसमानर्षिभिर्वैवाह्यमृतुगामित्वं देवपित्रतिथिभृत्येषु त्यागः शेषभोजनं च।

ब्रह्मचारिणः स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतत्वमाचार्ये प्राणान्तिकी वृत्तिस्तदभावे गुरुपुत्रे सब्रह्मचारिणि वा।

वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः।

परिव्राजकस्य संयतेन्द्रियत्वमनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षमनेकत्र अरण्यवासो बाह्याभ्यन्तरं च शौचम्।

सर्वेषामहिंसा सत्यं शौचमनसूयानृशंस्यं क्षमा च।

आश्रमधर्ममाह—गृहस्थस्येत्यादि। गृहिणः स्वकर्माजीवः स्ववर्णोक्तकर्मणा वृत्तिः। तुल्यैः कुलादिना समानैः। असमानर्षिभिः भिन्नार्षगोत्रैः। वैवाह्यं विवाहः, स्वार्थे ष्यञ्। ऋतुगामित्वं ऋतुः पुष्पस्नानदिनादूर्ध्वं द्वादशनिशाः तस्मिन् स्त्रीगमनशीलत्वम्। शेषभोजनं देवादिदत्तवाशिष्टाशनम्।

ब्रह्मेत्यादि। ब्रह्मशब्दो वेदवाची तद्ग्रहणार्थे दण्डाजिनधारणादिलक्षणे व्रते वर्तते, तच्चरितुं शीलमस्येति ब्रह्मचारी तस्य ब्रह्मचारिणः। स्वाध्यायः स्ववेदाध्ययनम्। अग्निकार्याभिषेकौ अग्निशुश्रूषात्रिषवणस्नाने। भैक्षव्रतत्वं भैक्षं भिक्षावृत्तिः व्रतत्वं व्रतित्वं गोदानान्तं कर्म तदुभयम्। एवं तावदुपकुर्वाणस्य वेदब्रह्मचारिण आसमावर्तनादनुष्ठानम्। नैष्ठिकस्य विशेषमाह- **आचार्ये प्राणान्तिकी वृत्तिरित्यादि।** गुरुकुले आप्राणोत्क्रमणकालभाविनी स्थितिः। गुरुपुत्रे आचार्यपुत्रसमीपे। सब्रह्मचारिणि वा समानशाखाध्यायिनि वा वृद्धे। कार्येति शेषः।

वानप्रस्थस्येत्यादि। वानप्रस्थस्य वने प्रकर्षेण तिष्ठतीति वनप्रस्थः, वनप्रस्थ एव वानप्रस्थः स्वार्थेऽण्, तस्य। ब्रह्मचर्यम् ऊर्ध्वरेतस्त्वम्। भूमौ शय्या स्थण्डिले शयनम्। अग्निहोत्रं सायंप्रातरनुष्ठेयमग्निकार्यम्, अग्नये होत्रं हविराज्यादि यस्मिंस्तदिति व्युत्पत्तिः, तच्च अभिषेकस्त्रिकालस्नानं च अग्निहोत्राभिषेकौ। वन्य आहारः कन्दमूलफलादिः।

परिव्राजकस्येत्यादि। परिव्राजकस्य परित्यज्य सर्वं व्रजतीति परिव्राजकः संन्यासी तस्य। संयतेन्द्रियत्वं जितेन्द्रियता। अनारम्भः नैष्कर्म्यम्। निष्किञ्चनत्वं निस्स्वत्वम्। सङ्गत्यागः प्रव्रजितान्तरेणापि संसर्गपरिहारः। अनेकत्र भैक्षं प्राणयात्रापर्याप्तस्यान्नस्य बहुषु गृहेषु भिक्षित्वा ग्रहणम्। बाह्याभ्यन्तरशौचं कायवाङ्मानसनैर्मल्यम्।

सर्ववर्णाश्रमसाधारणान् धर्मानाह–सर्वेषामिति। अनसूया गुणपक्षपात:। आनृशंस्यम् अनिष्ठुरत्वम्।

The duty of a house-holder is earning livelihood by his own profession, marriage among his equals belonging to same ancestral line from a common Ṛṣi-ancestral sage, intercourse with own wife after her monthly periods, gifts to gods, manes, guests and servants and partaking of the left over.

The duty of the Brahmacārin is study (of the Vedas), worship in sacred fire, ablution, living by procuring alms, serving on the preceptor even at the cost of one's life or in the absence of his teacher serving on the son of the preceptor or in on elder classmate.

The duty of a forester (recluse living in a forest) is observance of celibacy, sleeping on the bare ground, keeping matted locks, wearing deer-skin, fire-sacrifice, ablution, worship of gods, manes and guests and wild food stuffs (for maintaining the body)

The duty of a wandering ascetic is control of sense organs, abstaining from (wordly) activities, disowning money (or wealth), abstinence from attachment, begging from different localities, life in forest, cleanliness both internal and external.

For all the duties include abstaining from injuring beings, attachment to truth, purity, absence of envy and cruelty and patience.

स्वधर्म: स्वर्गायानन्त्याय च। तस्यातिक्रमे लोक: सङ्करादुच्छिद्येत।

तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत्।
स्वधर्मं संदधानो हि प्रेत्य चेह च नन्दति।।
व्यवस्थितार्यमर्याद: कृतवर्णाश्रमास्थिति:।
त्रय्या हि रक्षितो लोक: प्रसीदति न सीदति।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
तृतीयोऽध्याय: विद्यासमुद्देशे त्रयीस्थापना।।

स्वधर्म: किमर्थमादर्तव्यस्तत्राह–स्वधर्म इति। स्वर्गाय परलोकसुखाय। आनन्त्याय च इहाविनाशाय मोक्षाय वा। अतिक्रमे उल्लङ्घने। सङ्करादुच्छिद्येत अनुष्ठातृव्यवस्थाविरहेण कर्मसङ्कराद् वर्णसङ्कराच्च उत्सादं प्राप्नुयात्। अयमाशय:–वर्णाश्रमधर्मा हि यथोक्ता अविवादसिद्धलोकयोगक्षेमहेतुभावा: तदुपासकबीज-क्षेत्रसंक्रान्ततदनुष्ठानवासनासनाथै: तत्तद्वर्णाश्रमिभिरेव स्वकुलधर्मत्वबुद्ध्या भक्तिश्रद्धापुरस्सरमनुष्ठीयमाना: सन्त: सौष्ठवविशेषं प्रतिपत्तुं लोकोपकारे च कमपि कमप्यतिशयमाधातुं क्षमन्ते। ते चेदव्यवस्थमन्यै: कथञ्चिदनुष्ठीयेरन् ध्रुवं तर्हि सौष्ठवाद्धीयेरन्, लोकोपकारे च नातिशयमादधीरन्, अनुष्ठानबाह्यतां च क्रमेणासादयेयुरिति धर्मव्याकुलीभावाल्लोकविनाश: स्यादिति।

अत: किं कर्तव्यं तत्राह—**तस्मादित्यादि**। भूतानां मनुष्याणाम्। न व्यभिचारयेत् व्यभिचरन्तं नानुमन्येत। स्वधर्मं सन्दधान: सम्यगनुष्ठापयन्। प्रेत्य परलोके, ल्यप् प्रतिरूपो निपात:।।

वर्णाश्रमधर्मविधानद्वारेण त्रय्या महाफलत्वं वदन्नध्यायमुपसंहरति—**व्यवस्थिते**त्यादि। व्यवस्थिता वर्णाश्रमप्रतिबद्धा आर्यमर्यादा सदाचारनियमो यस्य स व्यवस्थितार्यमर्याद:। प्रसीदति मोदते। न सीदति न नश्यति।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
तृतीयोऽध्याय: विद्यासमुद्देशे त्रयीस्थापना।।

Performance one's own duty leads one to heaven and bliss which is eternal. By transgressing the same and causing confusion of castes, the world itself will crumble.

Hence the king should not permit his people to swerve from their own duties. By following one's own duty one enjoys pleasure in this world and the one after death. By keeping the lines of demarkation and following the rules of castes and stages of religious life ordained by the three Vedas, the people will thrive and will never perish.

Thus the third chapter of the first section of Arthaśāstra of Kauṭalya comes to an end, the title of the chapter being the determination of the place of the three Vedas.

Chapter 4

1. प्रक०विद्यासमुद्देशः –वार्त्तादण्डनीतिस्थापना।

Section 1 : Indication of Sciences (cont.) Vārtā and Daṇḍanīti Established

कृषिपाशुपाल्ये वणिज्या च वार्त्ता धान्यपशुहिरण्यकुप्यविष्टिप्रदाना- दौपकारिकी। तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम्।

आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः अलब्धलाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धनी, वृद्धस्य तीर्थेषु प्रतिपादनी च। तस्यामायत्ता लोकयात्रा। तस्माल्लोकयात्रार्थी नित्यमुद्यतदण्डः स्यात्।

अथ वार्त्तया विद्यात्वं स्थापयितुं स्वरूपादिकमाह–**कृषिपाशुपाल्ये** इत्यादि। कृषिः क्षेत्रबीजवापपरिकर्मादिप्रतिपादकं शास्त्रं पराशरप्रोक्तं, पाशुपाल्यं गवाश्वादिपालनप्रकारोपदेशकं शास्त्रं गौतमशालिहोत्रादिप्रणीतम्। वणिज्या क्रयविक्रयव्यवहारतन्त्रं विदेहराजप्रणीतम्। धान्येत्यादि। तत्र हिरण्यम् अकुप्यं सुवर्णादि। कुप्यं स्वर्णरजतातिरिक्तं ताम्रादि तैजसं सारदारुवेणुवल्लीवल्कादिकमतैजसं च। विष्टिः कर्मकरः। तया **कोशदण्डाभ्यां** वार्त्तया जनिताभ्यां कोशदण्डाभ्यां कोशो धननिचयः दण्डः सेना ताभ्यां। स्वपक्षं परपक्षं च **वशीकरोति** स्वायत्तीकरोति, अर्थाद् राजा।

दण्डनीतेः **स्वरूपादिकमाह–आन्वीक्षिकीत्यादि**। योगक्षेमौ साधयतीति योगक्षेमसाधनः। दण्डो दमः सामादिषु **प्रधानभूत** उपायविशेषः। अथवा दण्डस्थत्वाद् राजा दण्डः। सति दण्डभये लोक आन्वीक्षिक्यादिषु **सम्यक्** प्रवर्तते, न त्वितरथेति दण्डस्यान्वीक्षिक्यादियोगक्षेमसाधनत्वं विज्ञेयम्। अत एवाहुः–

सर्वो दण्डजितो लोको दुर्लभो हि शुचिः क्वचित्।
दण्डस्य हि भयात् कृत्स्नं जगद् भोगाय कल्पते।।

इति। तस्य **नीतिः** नयनमनुष्ठानम् अर्थात् तदुपदेशशास्त्रम्। अलब्धलाभार्थेत्यादि। दण्डनीतेः फलकथनम्। दण्डेन **ह्यलब्धं** लभ्यते, लब्धं परिरक्ष्यते परिरक्षितं वर्ध्यते, वर्धितं च तीर्थेषु पुण्यक्षेत्राध्वरादिषु विनियुज्यते। **तस्मादिति**। तस्मात् लोकवृत्तेर्दण्डनीत्यधीनत्वात्। नित्यम् उद्यतदण्डः सर्वदा दण्डप्रणयनोद्युक्तः स्याद्, अर्थाद् राजा।

Agriculture, breeding of cattle and trade comprise (what is called)

Vārtā. As such it is most useful that it brings grains, cattle, gold, other metals and forest produces in addition to free labour. With these one could gain control over one's own people as well as other people since they could support treasury and army.

Ānvīkṣikī, trayī (the triple Vedas) and Vārtā gain proper progress by Daṇḍa-law of administration. That which accomplishes the same is called Daṇḍanīti (Law of punishment given by the government). With this means one could obtain what is not already obtained, protect what is thus gained, increase what is accomplished, and distribute the same among the deserving people. It is this course of administration that contributes to the progress of the world at large and hence one should hold the sceptre raised if one wants the progress of the world.

नह्येवंविधं वशोपनयनमस्ति भूतानां यथा दण्ड इत्याचार्याः।

नेति कौटल्यः। तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः। मृदुदण्डः परिभूयते। यथार्हदण्डः पूज्यः। सुविज्ञातप्रणीतो हि दण्डःप्रजा धर्मार्थकामैर्योजयति। दुष्प्रणीतः कामक्रोधाभ्यामज्ञानाद् वानप्रस्थपरिव्राजकानपि कोपयति, किमङ्ग पुनर्गृहस्थान्। अप्रणीतो हि मात्स्यन्यायमुद्भावयति। बलीयानबलं हि ग्रसते दण्डधराभावे। तेन गुप्तः प्रभवतीति।

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
चतुर्थोऽध्यायः विद्यासमुद्देशे वार्त्तास्थापना
दण्डनीतिस्थापना च। विद्यासमुद्देशः समाप्तः।।

न ह्रीत्यादि। एवंविधं यथा दण्डस्तथाविधम्। वशोपनयनम् अनायत्तायत्तीकरणसाधनम्। नह्यस्ति नास्त्येव।

तमिमं दण्डसामान्यश्लाघावादमाचार्याणां प्रतिषेधति–नेति। तत्र कारणवचनं तीक्ष्णेत्यादिना। तीक्ष्णदण्डः उग्रदण्डः, भूतानाम् उद्वेजनीयः उद्वेगजनकः उद्विजन्तेऽस्मादित्यपादानेऽनीयर्। यथार्हदण्डः युक्तदण्डः देशकालापराधानुगुण्यप्रयुज्यमानदण्डः, पूज्यः लोकबहुमान्यः। सा पूज्यता युक्तस्य दण्डस्य लोकाभ्युदयहेतुत्वादित्यभिप्रायवानाह–सुविज्ञातेत्यादि। सुविज्ञातप्रणीतः सुष्ठु शास्त्रतोऽवगत्य प्रयुक्तः। अयथावत् प्रणीतस्याप्रणीतस्य वा दण्डस्य सर्वानर्थहेतुत्वमाह–दुष्प्रणीत इत्यादिना। कामक्रोधाभ्यामज्ञानाद् दुष्प्रणीतः कामात् क्रोधादज्ञानाच्चायथावत् प्रयुक्तः। किं पुनर्गृहस्थान्, संयतेन्द्रियानपि यः कोपयति सोऽसंयतेन्द्रियान् कोपयतीति किमुवक्तव्यम्। अङ्गेत्युपदेश्यसम्बोधनम्। मात्स्यन्यायमिति महान् हि मत्स्यः क्षुद्रं मत्स्यं ग्रसत इति बलवता दुर्बलस्य यत् पीडनं स मात्स्यन्याय इत्युच्यते। बलीयानित्यादि। दण्डधराभावे दण्डप्रणेतुरभावे। तेन गुप्तः प्रभवति सुप्रणीतेन दण्डेन रक्षितः अर्थाद् दुर्बलः प्रभवति बलयुक्तो भवति।

अध्यायान्ते श्लोकमाह–चतुर्वर्णेत्यादि। स्वधर्मकर्माभिरतः वर्णाश्रमधर्मकर्मानुष्ठानपरः। स्वेषु वेश्मसु वर्तते स्वास्थ्येन वसतीत्यर्थः। दण्डपालनाभावे हि स्वगृहेऽपि स्वास्थ्यवृत्तिर्दुर्लभेति।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
चतुर्थोऽध्याय: विद्यासमुद्देशे वार्त्तास्थापना दण्डनीतिस्थापना च।
विद्यासमुद्देश: समाप्त:।।

Authorities maintain that there is no substitute for Daṇḍa—the instrument of strict administration to control the people at large.

'Not so' maintains Kauṭalya. Strict rule involving punishment causes anxiety to the people. A mild punishment can on the other hand) generate contempt for the administrator. Punishment in the proper manner (depending upon the crime) brings respect to the ruler. Well-administered punishment makes the people to observe righteousness, earn wealth and enjoy life. Ill-administered punishment prompted by greed or anger due to ignorance, makes eager those who live in forest and mendicants who wander about. Then what about the householders. Law and punishment kept in abeyance will cause discomfort as in the cases of fishes (the bigger one eating the smaller ones). The strong one oppresses the weak in the absence of a strict administrator of law and punishment. Protected by the strong government even the weak one could survive.

The world consisting of the four castes and four orders of religious life protected by a law-enforcing king devotedly adhere to the duties prescribed and leads a life in a happy home.

Thus the fourth chapter of the first section called 'indication of sciences' comes to an end in the treatise of Arthaśāstra of Kauṭalya.

Chapter 5

2. प्रक० वृद्धसंयोगः।

Section 2 : Assocation with the Aged

तस्माद् दण्डमूलास्तिस्रो विद्याः। विनयमूलो दण्डः प्राणभृतां योगक्षेमावहः।

कृतकः स्वभाविकश्च विनयः। क्रिया हि द्रव्यं विनयति नाद्रव्यम्। शुश्रूषाश्रवण-ग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम्।

विद्यानां तु यथास्वमाचार्यप्रामाण्याद् विनयो नियमश्च।

वृद्धसंयोग इति सूत्रम्। वृद्धा आन्वीक्षिक्यादिविद्याकोविदाः तैः संयोगः शिष्याचार्यभावलक्षणः सम्बन्धोऽभिधीयत इति सूत्रार्थः।

तस्मादित्यादि। तस्मात् चतुर्वर्णाश्रमस्य लोकस्य राज्ञा सुविज्ञातप्रयुक्तदण्डमुखेन पाल्यमानस्यैव स्वधर्मकर्मानुष्ठानप्रवणतोत्पादात्, तिस्रो विद्याः आन्वीक्षिकीत्रयीवार्त्तालक्षणाः, दण्डमूलाः दण्डाधीन-स्थितिकाः। दण्डश्च विनयलक्षणेन शास्त्रविज्ञानेन दत्तहस्तः प्राणिनां योगक्षेमसम्पत्तिहेतुरित्याह—**विनयेत्यादि।**

कृतक इत्यादि। तत्र विनयः, क्रियया अभियोगलक्षणया निर्वृत्तः कृतक इत्येकः। विनापि क्रियां वासनावशात् सिद्धः स्वाभाविक इत्यपरः। यथा हि संस्करणाभियोगः शाणघर्षणादिः द्रव्यं खन्यादिप्रभवं पाषाणादिविशेषं संस्करोति न पुनरद्रव्यं यंकमपि शिलादिखण्डं, तथा विद्याभियोगः स्वतस्सिद्ध-शुश्रूषादिबुद्धिगुणसम्पन्नमेव जनं संस्करोति, न तु तद्रहितम्। बुद्धिगुणाश्च तेऽष्टौ भवन्ति—शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशाख्याः। तत्र शुश्रूषा श्रवणार्हेषु श्रोतुमिच्छा, तस्यां सत्यां श्रवणम् आसेवा, ग्रहणं श्रुतार्थज्ञानं, धारणं गृहीताविस्मरणं, विज्ञानं धारितेष्वर्थेषु साध्यसाधनादि-स्वरूपविवेकज्ञानम्, ऊहः शब्दानुक्तस्य लिङ्गेनावगतिः, अपोहो युक्त्यपेतस्य हानं, तत्त्वाभिनिवेशो वस्तुयाथात्म्यज्ञानम्।

एवं विद्याधिकारिणं तदनधिकारिणं चोक्त्वा विद्याग्रहणकाले शिष्येणाचरणीयमाह—**विद्यानां त्विति।** विद्यानाम् आचार्यप्रामाण्याद् यस्या विद्याया यो य आचार्य उपदेष्टा तस्य प्रामाण्यात् तदध्ययनकाले तं तं शिष्यं प्रति धर्मानुशासनप्रभविष्णुत्वात्, यथास्वं तत्तदाचार्यानुशासननानतिक्रमेण विनयः शिक्षणम्, 'आहूतश्चाप्यधीयीत' इत्युक्तप्रकारं, समुदाचारो वा गुर्वागमनोपवेशादौ प्रत्युत्थानानुपवेशादिः, नियमश्च गुरुपरिचरणादिव्रतं च, अर्थाच्छिष्यस्य भवति।

Hence the three sciences (enumerated earlier) are based upon

Danḍa—the science of governance. Punishment based on discipline could ensure the well-being of the people.

Discipline can be artificial as well as natural. By instruction one could instil discipline in a docile person but not in an undocile being. Sciences could instil discipline in one who has such mental faculties as hearing, grasping, retentive memory, discrimination, inference, deliberation and eagerness to understand the principles, but not others.

Sciences shall be understood from authoritative preceptors, especially those related to discipline and strict rules.

वृत्तचौलकर्मा लिपिं सङ्ख्यानं चोपयुञ्जीत। वृत्तोपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः, वार्त्तामध्यक्षेभ्यः, दण्डनीतिं वक्तृप्रयोक्तृभ्यः।

ब्रह्मचर्यं च आ षोडशाद् वर्षात्। अतो गोदानं दारकर्म च। अस्य नित्यश्च विद्यावृद्धसंयोगो विनयवृद्ध्यर्थे, तन्मूलत्वाद् विनयस्य।

पूर्वमहर्भागं हस्त्यश्वरथप्रहरणविद्यासु विनयं गच्छेत्, पश्चिममितिहास- श्रवणे। पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रमर्थशास्त्रं चेतीतिहासः। शेषमहोरात्रभागम- पूर्वग्रहणं गृहीतपरिचयं च कुर्याद्, अगृहीतानामाभीक्ष्ण्यश्रवणं च।

श्रुताद्धि प्रज्ञोपजायते प्रज्ञाया योगो योगादात्मवत्तेति विद्यासामर्थ्यम्।

वृत्तेति। वृत्तचौलकर्मा कृतचौलः त्रिवर्षः पञ्चवर्षो वेत्यर्थः, लिपिम् अक्षरम्, संख्यानं गणितं च, उपयुञ्जीत नियमपूर्वमधीयीत। त्रयीमित्यादिनाप्येतत् सम्बध्यते। वृत्तोपनयनः लब्धगायत्र्युपदेशः, त्रयीम् आन्वीक्षिकीं च, शिष्टेभ्यः सम्यगधिगततद्विद्येभ्यः, उपयुञ्जीत। वार्त्ताम्, अध्यक्षेभ्यः सीताध्यक्षादिभ्यः, उपयुञ्जीत। दण्डनीतिं, वक्तृप्रयोक्तृभ्यः प्रवचनप्रयोगकुशलेभ्यः, उपयुञ्जीत।

ब्रह्मचर्यमिति। आ षोडशाद् वर्षात् षोडशं वयोऽभिव्याप्य, ब्रह्मचर्यं, रक्ष्यमित्यार्थम्। अतः पश्चात्, गोदान केशान्तकर्म, दारकर्म च विवाहश्च। अस्य कृतदारस्य, विद्यावृद्धसंयोगः विद्यावृद्धैः सह परिचयः, नित्यः दारकर्मोत्तरकालेऽप्यनुवर्त्यः। किमर्थं, विनयवृद्ध्यर्थं विनयस्य शास्त्रसंस्कारस्य वृद्धये। कस्मात्, विनयस्य तन्मूलत्वाद् विद्यावृद्धसंयोगप्रभवत्वात्।

भूयः कलाभ्यासं राज्ञ उपदेष्टुमाह–पूर्वमिति। पूर्वम् अहर्भागम्, अत्यन्तसंयोगे द्वितीया। हस्त्यश्वरथप्रहरणविद्यासु हस्तिचर्यायामश्वचर्यायां रथचर्यायाम् आयुधविद्यायां च, विनयं शिक्षां, गच्छेत्। पश्चिमं तृतीयमहर्भागम्, इतिहासश्रवणे, विनयं गच्छेत्। इतिहासपदार्थविवरणं पुराणमित्यादि। पुराणं ब्राह्मादि। इतिवृत्तं श्रीरामायणमहाभारतादि। आख्यायिका दिव्यमानुषादिचरितम्। उदाहरणं न्यायोपन्यासशास्त्रं मीमांसादि,

धर्मशास्त्रं मानवादि। अर्थशास्त्रम् औशनसबार्हस्पत्यादि। शेषं मध्यमम् अहर्भागम् अहोरात्रभागमिति मूलग्रन्थेषु पठ्यते। तदा शिष्टं मध्यममहर्भागं, रात्रौ कार्यान्तरनिद्रादिविनियुक्तावशिष्टतया लभ्यमानं रात्रिभागं चेति व्याख्येयम्। अपूर्वग्रहणं प्रतिनवप्रमेयश्रवणं, गृहीतपरिचयं गृहीतधारणार्थं चिन्तनं च कुर्यात्। अगृहीतानाम् आभीक्ष्ण्यश्रवणम् ईषद्गृहीतानां सम्यङ्मनःप्रवेशार्थं पुनःपुनःश्रवणं च।

Having performed the ceremony of tonsure, the student shall be

initiated to letters and arithmetic. After the ceremony of the investiture with the sacred thread the shall study the three Vedas and Ānvīkṣikī from teachers of great repute, Vārta from superintendents of government and Daṇḍanīti from politicians well-versed in the theory and practice of the same.

Celibacy is to be practised upto the age of sixteen. There after he shall perform godāna (tonsure) and marry. Then he shall keep constant relation with aged teachers so that his discipline may increase, since such a relation form its basis.

He may spend the forenoon of the day in getting lessons in (military arts) like riding elephants, horses and wieding weapons while the afternoon time may be set apart for listening to Itihāsas (epics). By Itihāsa is meant Purāṇa, Itivṛtta (history) Ākhyāika (romances), Udāharaṇa (illustrative stories), Dharmaśāstra and Arthaśāstra. Rest of the day and night may be spent to learn new lesson and to revise the ones already learnt while that which is not properly understood may be repeatedly listened to.

It is from hearing that one become knowledgeable, and by the steady grasping of wisdom one attains individuality of self and efficiency in knowledge.

विद्याविनीतो राजा हि प्रजानां विनये रतः।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
पञ्चमोऽध्यायः वृद्धसंयोगः।।

श्रुतादिति। श्रुतात् श्रवणात्, प्रज्ञा त्रैकालिकी बुद्धिः, उपजायते। प्रज्ञाया योगः शास्त्रोक्तानुष्ठानश्रद्धा, योगाद् आत्मवत्ता मनस्विता सत्त्ववत्ता उपजायते। इति विद्यासामर्थ्यम् इत्येतद् विद्याशक्तिजन्यं फलमित्यर्थः।

विद्याविनीत इत्यादि। विनये शिक्षणे। अनन्यां नाथान्तरशून्याम् एकनाथामित्यर्थः। शेषं स्फुटम्।

।। इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
पञ्चमोऽध्यायः वृद्धसंयोगः।।

A king well educated, disciplined, and bent on the welfare of the people enjoys the earth unopposed by ensuring the well-being of all people.

Thus the fifth chapter of the Arthaśāstra of Kauṭalya called the assocaition with the aged comes to an end.

Chapter 6

3. प्रक० इन्द्रियजयः– अरिषड्वर्गत्यागः।

Section 3 : Control of Sense Ograns Abandoning of the Aggregate of Six Enemies

विद्याविनयहेतुरिन्द्रियजयः कामक्रोधलोभमानमदहर्षत्यागात् कार्यः। कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिन्द्रियजयः शास्त्रार्थानुष्ठानं वा। कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः।

इन्द्रियजय इति सूत्रम्। इन्द्रियाणि श्रोत्रादीनि तेषां जयः शब्दादिषु स्वस्वविषयेषु अविरुद्धा प्रवृत्तिः। सा शास्त्रसंस्कारमन्तरेण स्वत एव भवन्ती स्वाभाविक इन्द्रियजयः, शास्त्रानुष्ठाननिष्ठावशाद् भवन्ती कृतकः। स इहोच्यत इति सूत्रार्थः। इदं च सूत्रमध्यायद्वयेन भाष्यते। वृद्धसंयोगानन्तरं तद्धेतुरिन्द्रियजयः प्रसक्त इति प्रकरणसङ्गतिः।

विद्येत्यादि। विद्याविनयहेतुः विद्यासंस्कारकारणम्। कामेति। परस्त्रीविषयोऽभिलाषः कामः, हिंसाप्रवर्तकश्चित्तविकारः क्रोधः, परद्रव्येच्छा लोभः, बालिश्यादात्मन्यनुपमत्वबुद्धिर्मानः धनविद्यादिप्रभवो गर्वो मदः, इष्टार्थप्राप्त्युपभोगजन्या प्रीतिर्हर्षः, षडेते शत्रव इत्युच्यन्ते। एषां त्यागाद् वर्जनात्। अविप्रतिपत्तिः स्वत एवाविरुद्धा प्रवृत्तिः। शास्त्रार्थानुष्ठानं शास्त्रार्थेषु उपादयेत्वेन शास्त्रोऽवगतेषु शब्दस्पर्शादिषु अनुष्ठानं प्रवृत्तिनियमः। कृत्स्नं हि शास्त्रमिदमिन्द्रियजय इति अनुष्ठेयतया शास्त्रेण प्रतिपाद्यमानः सर्वोऽर्थ इन्द्रियजयस्य कारणमित्यर्थः, कारणे कार्योपचारः।

The control of the sense organs on which success of study and discipline depend, may be accomplished by shaking away the feelings like lust, anger, greed, vanity, haughtiness and excessive joy. By the controlling of senses like ear, skin, eyes, tongue and nose from their respective objects like sound, touch, colour, flavour and scent, this restraint is achieved as also by following the precepts of sciences. In fact restraint of the organs of sense forms the sole purpose of sciences.

तद्विरुद्धवृत्तिरवश्येन्द्रियश्चातुरन्तोऽपि राजा सद्यो विनश्यति-यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश करालश्च वैदेहः, कोपाज्जनमेजयो ब्राह्मणेषु विक्रान्तः तालजङ्घश्च भृगुषु, लोभादैलश्चातुर्वर्ण्यमत्याहारयमाणः

सौवीरश्चाजबिन्दुः, मानाद् रावणः परदारानप्रयच्छन् दुर्योधनो राज्यादंशं च, मदाद् डम्भोद्भवो भूतावमानी हैहयश्चार्जुनः, हर्षाद् वातापिरगस्त्यमत्यासादयन् वृष्णिसङ्घश्च द्वैपायनमिति।

तद्विरुद्धेत्यादि। तद्विरुद्धवृत्तिः शास्त्रविरुद्धानुष्ठानः। चातुरन्तोऽपि चतुरन्ता चतुस्समुद्रपर्यन्ता भूमिः तस्या ईश्वरोऽपि। तत्र कामादिषु एकैकेन विनष्टेषु द्वौ द्वौ निदर्शयति–**यथेत्यादिना**। भोजवंश्यो दाण्डक्यः कामाद् ब्राह्मणकन्यायमपहृत्य तत्पित्रा शप्तः बन्धुराष्ट्रसहितो नष्टः, तथा विदेहाधिपः करालो ब्राह्मणीमभिलषन् ब्राह्मणेन शप्तो नष्टः। कोपाद् जनमेजयो नाम राजाश्वमेधे वर्तमाने ब्राह्मणैः सह कलहायितस्तच्छापान्नष्टः, तथा तालजङ्घो भृगुषु विक्रम्य तच्छापान्नष्टः। लोभाद् ऐलः पुरूरवा नाम राजा चातुर्वर्ण्यमतिमात्रधनहरणेन पीडयंश्चातुर्वर्ण्यकोपान्नष्टः, तथा सौवीरपतिरजबिन्दुः। लोभादैलो नैमिशीय ब्राह्मणयज्ञशालां प्रविश्य ततोऽपरिमितं धनं हर्तुमुद्युक्तो ब्राह्मणशापान्नष्ट इत्यैतिह्यं कैश्चिद् वर्ण्यते। मानाद् रावणः सीतां रामायाप्रयच्छन् नष्टः, तथा दुर्योधनो राज्यांशं पाण्डवेभ्योऽप्रयच्छन् नष्टः। मदाद् राजा डम्भोद्भवो नाम कृतसर्वप्रजावज्ञानो नरनारायणाभ्यां सह युद्धमासाद्य हतः, तथा हेहयाधिपः कार्तवीर्यो मदात् परशुरामपितरि प्रयुक्तापराधः परशुरामेण युद्धे हतः हर्षाद् वातापिरसुरोऽगस्त्यं महर्षि वञ्चयन् यादवसङ्घश्च व्यासममिसन्धित्सुस्ताभ्यां शप्तौ विनेशतुः। इत्यैतिह्यानि।

The king who has not obtained the control, even though he controls the earth bounded by the four quarters will meet with immediate destruction. For example king Bhoja and known as Dāṇḍakya making a lascivious overtures to a Brahmin maiden persihed along with his kingdom and relations. So also is the case with Karāḷa, the king of Videha. Janamejaya perished because of his anger with Brahmins. Similar is the case with Tālajaṅgha, the brave one who showed anger to Bhṛgus. Aila perished because of greed demanding this share from Brahmins against the principles of Cāturvarṇya. Similar is the case of Ajabindu of the Sauvīra country. Rāvaṇa perished by vanity by refusing to return the life of another and Duryodhana by refusing the part with a portion of his kingdom. King Ḍambhodbhava perished on account of his haughtiness and Arjuna, the king of Haihayas perished likewise disregarding the wishes of his people. Because of excessive joy Vātāpi overlooked (the prowess of) Agastya and was cursed while a group of Vṛṣṇis by provoking Dvaipāyana.

एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः।
सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रियाः।।
शुत्रषड्वर्गमुमृत्सृज्य जामदग्न्यो जितेन्द्रियः।
अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे षष्ठोऽध्यायः
इन्द्रियजये अरिषद्वर्गत्यागः।।

उक्ता राजान उपलक्षणम्, अन्येऽपि बहव आसन्नित्याह–एत इत्यादि।।

अरिषड्वर्गस्यान्वयेऽनर्थं निदर्श्य व्यतिरेके निःश्रेयसप्राप्तिं निदर्शयति–**शत्रुषड्वर्गमित्यादि**। जामदग्न्यः परशुरामः। नाभागो नभागसूनुः।।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
षष्ठोऽध्यायः इन्द्रियजये अरिषड्वर्गत्यागः।।

These and many other kings perished because of the aggregate of six enemies all of whom perished with their relatives and kingdoms having failed to control their senses. On the other hand by shaking of the sixfold enemies and controlling their sense organs son of Jamadagni (Paraśurāma) and Ambarīṣa, the son of Nābhāga enjoyed the earth for a long time.

Thus the sixth chapter of the Arthaśāstra of Kauṭalya dealing with the control of sense orgains comes to an end.

Chapter 7

3. प्रक० इन्द्रियजयः--राजर्षिवृत्तम्।

Section 3 : Control of Sense Organs (Contd.) Life of a Saintly King

तस्मादरिषड्वर्गत्यागेनेन्द्रियजयं कुर्वीत, बृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनं, कार्यानुशासनेन स्वधर्मस्थापनं, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन, हितेन वृत्तिम्।

एवं वश्येन्द्रियः परस्त्रीद्रव्यहिंसाश्च वर्जयेत् स्वप्नं लौल्यमनृत- मुद्धतवेषत्वमनर्थसंयोगं च, अधर्मसंयुक्तमनर्थसंयुक्तं च व्यवहारम्।

अस्मिन्नध्याये राजर्षिवृत्तमुच्यते। राजैव सन् य ऋषि जितेन्द्रियः स राजर्षिः।

तस्मादित्यादि। तस्माद् अरिषड्वर्गत्यागस्य श्रेयस्साधनत्वात्। वृद्धसंयोगेन प्रज्ञां कुर्वीत उत्पादयेत् विकासयेच्च। चारेण चक्षुः कुर्वीत गूढ पुरुषं चक्षुस्थाने कुर्यात् स्वपरराष्ट्रवृत्तप्रत्यक्षीकरणार्थम्। उत्थानेन उद्योगेन, उत्थानमुद्योगः अनुष्ठानमिति पर्यायाः, योगक्षेमसाधनं योगक्षेमसम्पादनम्। कार्यानुशासनेन सवधर्मस्थापनम् इदमीदृशमित्थं कर्तव्यमित्याज्ञापनेन स्वधर्मे लोकस्य नियन्त्रणम्। अर्थसंयोगेन लोकप्रियत्वम् अर्थस्य धनस्य स्वीकरणेन समुचितेषु पात्रेष्वर्पणेन च जनप्रियत्वं। हितेन वृत्तिं तदात्वायत्योर्यत् पथ्यं तेन लोकयात्राम्। कुर्वीतेति सर्वत्रानुषङ्गः।

एवमित्यादि। परस्त्रीद्रव्यहिंसाः परस्त्रियं परद्रव्यं परहिंसां च। स्वप्नम् अयथोचितां निद्राम्। लौल्यं चापलम् अनृतं मिथ्यावादम्। उद्धतवेषत्वम् अविनीतवेषताम्। अनर्थसंयोगम् उक्तस्यार्थसंयोगस्य प्रत्यनीकम्।

Hence by abandoning the aggregate of six enemies one should attain knowledge by attending on aged professors. One should observe things by the eyes that are spies, obtain means of prosperity and well being by strenuous effort, establish one's own duty by following strict rules of administration, acquire discipline by the advice of sciences, become popular by the judicious use of wealth and doing good to the people.

Thus gaining control over the sense organs one should avoid indulgence with strange women, propsperity of others and hurting other people. Similar is the case with dream, lust, falsehood, gaudy dress and

attachment with improper wealth as also dealings which are unrighteous and troublesome.

धर्मार्थाविरोधेन कामं सेवेत न निस्सुखः स्यात्। समं वा त्रिवर्गमन्योन्यानुबन्धम्। एको ह्यत्यासेवितो धर्मार्थकामानामात्मानमितरौ च पीडयति।

अर्थ एव प्रधान इति कौटल्यः, अर्थमूलौ हि धर्मकामाविति।

मर्यादां स्थापयेदाचार्यानमात्यान् वा, य एनमपायस्थानेभ्यो वारयेयुः, छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः।

सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।
कुर्वीत सचिवांस्तस्मात् तेषां च शृणुयान्मतम्।।

।। इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
सप्तमोऽध्यायः इन्द्रियजये राजर्षिवृत्तम्। इन्द्रियजयः समाप्तः।।

धर्मेत्यादि। धर्मार्थाविरोधेन धर्मार्थयोरबाधेन कामं तृतीयपुरुषार्थम्। वेति पक्षान्तरे, तच्च अन्योन्यानुबन्धं त्रिवर्गं समं सेवेतेति। परस्परसंसृष्टान् धर्मार्थकामांस्तुल्यमात्रया सेवेतेत्यर्थः। सममसेवने को दोषस्तत्राह– **धार्मर्थकामानां** मध्ये एकः अन्यतमः अत्यासेवितः अतिमात्रं व्यसनितया सेवितः सन् इतरौ अर्थकामौ धर्मकामौ धर्मार्थौ वा, पीडयति हि।

धर्मादीनां समप्राधान्यमरोचयमान आह–**अर्थ एवेति।** एवकारेण धर्मकामयोरप्राधान्यमुक्तम्। तत्र हेतुरुच्यते–**अर्थमूलौ** हीत्यादिना। अर्थमूलौ अर्थसाध्यौ।

मूर्धाभिषिक्तं राजर्षिवृत्तमाह–**मर्यादामिति।** आचार्यान् गुरून्, अमात्यान् मन्त्रिणो वा, मर्यादां स्थापयेत् सीमां परिकल्पयेत्, ताद्धर्म्यात् ताच्छब्द्यम्, सीमामिवालङ्घनस्थानमात्मनो विदध्यादित्यर्थः। ते कीदृशाः, ये एनं राजानम्, अपायस्थानेभ्यो वारयेयुः अनर्थकारणानुष्ठानेभ्यो निवर्तयेयुः, रहसि प्रमाद्यन्तम् अन्तःपुरादावतिप्रसजन्तमेनं, छायानालिकाप्रतोदेन छाया त्रिपौरुष्यादिरूपं छायाप्रमाणमतीतघटिकावेदकं राजप्रणिधिप्रकरणे वक्ष्यमाणं नालिका घटिकाप्रमाणं तदुभयरूपेण प्रतोदेन कार्यान्तरकालातिपातसूचनद्वारा प्रसक्तेष्टकर्मप्रत्यूहजनकतया मनोव्यथाकारित्वात् प्रतोदतुल्येन पुनः पुनश्छायानालिकानिवेदनेनेत्यर्थः, अभितुदेयुर्वा परिव्यथयेयुश्च प्रमादभङ्गार्थम्।

किमर्थं यथोक्तसचिवस्थापनेनात्मा परतन्त्रतां नीयत इति चेत् तत्राह–**सहायेत्यादि।** सहायसाध्यं सहायनिर्वाह्यं न त्वेकाकिनात्मना निर्वाह्यम्। तत्र दृष्टान्तः–चक्रमेकं न वर्तत इति, शकटादौ युक्तम् एकं चक्रान्तरसहायरहितं चक्रं न परिभ्रमति। सचिवान् आचार्यानमात्यांश्च। शृणुयाच्च श्रुत्वानुतिष्ठेच्च।।

।। इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
सप्तमोऽध्यायः इन्द्रियजये राजर्षिवृत्तम्। इन्द्रियजयः समाप्तः।।

One should enjoy pleasure without violating righteousness and principles of economics and should not remain devoid of happiness. The three pursuits of life are mutually related and hence should be resorted to

with equal importance. If one is to enjoy any one of these three in an excessive measure, it is likely to hurt the other two as also itself.

Kauṭalya holds that wealth is of greator importance since it is based on it that righteousness and desire come up.

The preceptors and ministers need to be respected since it is they who prevent the ruler from falling prey to dangers. They employ various means like mesasuring the shadow to indicate the time as well as pointing out the bowl of water showing the passing of time or by warning him in secret pointing out his mistakes.

Kingship is dependent on help; just a single wheel could not move forward on its own volition. Hence one should employ ministers and listen to their views.

Thus the seventh chapter of the Arthaśāstra of Kauṭalya called the life of a saintly king comes to an end.

Chapter 8

4. प्रक० अमात्योत्पत्तिः।

Section 4 : Employment of Ministers

सहाध्यायिनोऽमात्यान् कुर्वीत दृष्टशौचसामर्थ्यत्वादिति भारद्वाजः, ते ह्यस्य विश्वास्या भवन्तीति।

नेति विशालाक्षः। सहक्रीडितत्वात् परिभवन्त्येनम्। ये ह्यस्य गुह्यसधर्माणस्तानमात्यान् कुर्वीत समानशीलव्यसनत्वात्, ते ह्यस्य मर्मज्ञभयान्नापराध्यन्तीति।

साधारण एष दोष इति पराशरः। तेषामपि मर्मज्ञभयात् कृताकृतान्यनुवर्तेत।

अमात्योत्पत्तिरिति सूत्रम्। अमात्या नाम राज्ञः सहायाः तेषामुत्पत्तिः करणमिहोच्यत इत्यर्थः। विद्यावृद्धसंयोगेन्द्रियजययुक्तोऽपि राजा सहायमन्तरेण राज्यपालनं कर्तुमशक्त इति सहायापेक्षायां तदुत्पत्तिरुच्यत इति प्रकरणसङ्गतिः।

के तावदमात्यपदमर्हन्तीत्यपेक्षायां भारद्वाजादयः सप्ताचार्याः सप्तधा वर्णयन्ति। तत्र भारद्वाजस्य पक्षमाह–सहाध्यायिन इत्यादि। दृष्टशौचसामर्थ्यत्वात् शौचं हृदयशुद्धिः तच्च सामर्थ्यं कार्यनैपुण्यं च दृष्टं सहाध्ययनकाले प्रत्यक्षितं येषां तेषां भावस्तत्त्वं तस्मात्। विश्वास्याः विश्वासयोग्याः।

तं पक्षं विशालाक्षः प्रतिषेधति–नेतीत्यादि। परिभवन्ति अवजानन्ति। के तर्ह्यमात्याः कार्यास्तत्राह–ये हीति। गुह्यसधर्माणः गुह्यं शीलच्युतिः पारदारिकत्वादि तत्र समानाः। तथाविधानाममात्यीकरणे गुणमाह–ते हीति। ते हि मर्मज्ञभयात् अस्मन्मर्मज्ञो राजेति भयात्।। अस्य नापराध्यन्ति अपराधं न कुर्वन्ति, यत्नेन शीलसौष्ठवमासाद्य स्वकर्म सम्यगनुतिष्ठन्तीत्यर्थः।

पराशरमतमाह–साधारण इति। एष दोषः दुश्शीलत्वं, साधारणैः गुह्यसधर्मणां राज्ञश्च समानः। अस्तु को दोष इति चेदाह–मर्मज्ञभयात् अमात्या मन्मर्मज्ञा इति भयात्, तेषामपि अमात्यानामपि, कृताकृतानि असुष्ठुकृतानि कर्माणि अनुवर्तेत अनुसरेत्, अर्थाद् राजा।

The king should employ one of his calssmates as his minister holds Bhāradvāja since there was occasion to study his purity, integrity and ability in addition to being trust- worthy.

'Not so' observes Viśālākṣa—Being a playmate he is likely to despise (and cause embarrassment) to the king. Istead those who are equal to the

king in his habits and tendencies and have shared the secrects should be chosen as ministers. They would not hurt him lest he would betray their secrets.

'Common is such fear' notes Parāśara. Under the fear of being exposed the king may follow them in their good or bad acts.

यावद्भ्यो गुह्यमाचष्टे जनेभ्यः पुरुषाधिपः।
अवशः कर्मणा तेन वश्यो भवति तावताम्॥

य एनमापत्सु प्राणाबाधयुक्तास्वनुगृह्णीयुस्तानमात्यान् कुर्वीत, दृष्टानुरागत्वादिति।

नेति पिशुनः। भक्तिरेषा न बुद्धिगुणः। सङ्ख्यातार्थेषु कर्मसु नियुक्ता ये यथादिष्टमर्थं सविशेषं वा कुर्युस्तानमात्यान् कुर्वीत, दृष्टगुणत्वादिति।

नेति कौणपदन्तः। अन्यैरमात्यगुणैरयुक्ता ह्येते। पितृपैतामहानमात्यान् कुर्वीत, दृष्टापदानत्वात्। ते ह्येनमपचरन्तमपि न त्यजन्ति, सगन्धत्वात्। अमानुषेष्वपि चैतद् दृश्यते—गावो ह्यसगन्धं गोगणमतिक्रम्य सगन्धेष्वेवावतिष्ठन्ते इति।

अस्मिन्नर्थे श्लोकमाह—**यावद्भ्य** इत्यादि। गुह्यम् आचष्टे स्वं शीलभ्रंशं प्रकाशयति। अवशः अधीरः। एवञ्च गुह्यसधर्मणोऽमात्यान् न कुर्यादित्यभिप्रायः।

कांस्तर्हि कुर्यादित्यत्राह—**य एनमिति**। अनुगृह्णीयुः उपकुर्युः।

उक्तं पक्षं खण्डयति—**नेतीति**। पिशुनः नारदः। तत्र हेतुरुच्यते—भक्तिरेषा न बुद्धिगुणः, स्वशरीरनैरपेक्ष्येण राजरक्षणप्रवृत्तिर्नामायं सेवाधर्मः नतु बुद्धिगुणः बुद्धिगुणसम्पन्नश्चामात्यो भवितुमर्हतीत्याशयः। **संख्यातेत्यादि**। ये संख्यातार्थेषु परिगणितद्रव्योत्पत्तिषु, कर्मसु नियुक्ताः अर्थं यथादिष्टं सविशेषं वा कुर्युः द्रव्यं क्लृप्तसंख्यानूनं क्लृप्तसंख्याधिकसंख्यं वा भावयेयुः।

नारदपक्षं कौणपदन्तो निराचष्टे—**नेति कौणपेत्यादि**। अन्यैर्गुणैः धनभावनातिरिक्तैर्विश्वास्यत्वानुरक्तत्वादिभिर्गुणैः। पितृपैतामहान् पितृपितामहक्रमागतान्। दृष्टापदानत्वात् दृष्टं साक्षादनुभूतम् अपदानं पूर्ववृत्तं येषां ते दृष्टापदानाः तेषां भावस्तत्त्वं तस्मात्। एतेन पूर्वपुरुषशीलप्रत्येयगुणत्वमुक्तम्। गुणान्तरमाह—**ते हीति**। अपचरन्तमपि एनम् आत्मापकारिणमपि स्वामिनम्। सगन्धत्वात् सम्बन्धित्वात् परिचितत्वात्, सम्बन्धसामान्यवचन इह गन्धशब्दः। पशुदृष्टान्तमाह—**अमानुषेष्विति**। एतत् परिचयस्य परिचितात्यागकारणत्वम्। असगन्धम् अपरिचितम्।

A king who shares his secrets to as many persons is bound to be influenced by all those and as such he is helpless and bound to succumb to their pressure.

Those who have proved themselves to be faithful to the king even in utmost danger of life may be made as ministers, since their integrity stands tested.

'Not so' states Piśuna. This is just attachment and not a quality of the intellect. When entrusted with financial matters, those who make progress

in the collection of revenue and are of tried ability may be made as ministers.

'Not so' observes Kauṇapadanta. Such persons are devoid of other qualities expected from a minister. Select such persons whose fathers and grand-fathers had been ministers on earlier occasion and are noted for their qualities. Such person will not abandon the king even if the latter resorts to vagaries, because of absolute faith. This is noted even in non-human beings such as cows who never forsake their own herds in preference to a strange herd of cows.

नेति वातव्याधिः, ते ह्यस्य सर्वमवगृह्य स्वामिवत् प्रचरन्तीति। तस्मान्नीतिविदो नवानमात्यान् कुर्वीत, नवास्तु यमस्थाने दण्डधरं मन्यमाना नापराध्यन्तीति।

नेति बाहुदन्तीपुत्रः। शास्त्रविदटदृष्टकर्मा कर्मसु विषादं गच्छेत्। अभिजनप्रज्ञाशौचशौर्यानुरागयुक्तानमात्यान् कुर्वीत, गुणप्रधान्यादिति।

सर्वमुपपन्नमिति कौटल्यः, कार्यसामर्थ्याद्धि पुरुषसामर्थ्यं कल्प्यते सामर्थ्यतश्च।

उक्तं पक्षं वातव्याधिर्नानुमन्यत इत्याह—**नेति** वातेत्यादि। वातव्याधिरुद्धवः श्रीकृष्णमन्त्री। ते कुलक्रमागता अमात्याः। अस्य सर्वमवगृह्य स्वामिनः समस्तं विश्वमवष्टभ्य स्वामिवत् प्रवरन्ति स्वतन्त्रवृत्तयो भवेयुः। के तर्ह्यमात्याः कार्या इत्याह—**तस्मादित्यादि**। नवान् पूर्वसम्बन्धरहितान्। दण्डधरं यमस्थाने मन्यमानाः राजानं यमवदुग्रदण्डं बुध्यमानाः।

इममपि पक्षं बाहुदन्तीपुत्रो न सहत इत्याह—**नेति** बाह्विति। कुत इत्यत्राह—**शास्त्रेत्यादि**। नीतिशास्त्रग्रन्थनिष्णातस्तदर्थानुष्ठानपरिचयविकलः अमात्यकर्मसु अवसादं प्राप्नुयात् अनिर्वाही स्यादित्यर्थः। कांस्तर्हि अमात्यान् कुर्वीतेत्यत्राह—**अभिजनेत्यादि**। अभिजनो वंशशुद्धिः प्रज्ञा बुद्ध्यतिशयः शौचमुपधाशुद्धिः शौर्यम् उत्साहशक्तिः अनुरागः स्वामिभक्तिः एतैर्युक्ता ये पुरुषाः तान् अमात्यान् कुर्वीत। कुतः, गुणप्राधान्यात् गुणानामेव प्रधानत्वात्।

स्वमतमाह—**सर्वमिति**। सर्वम् उपपन्नं, शौचसामर्थ्यादयो गुणाः स्वामिपरिभवादिदोषाश्च पूर्वोक्ताः सहाध्यायिप्रभृतिषु न्याय्याः। कुतः, हि यस्मात् कारणात्, पुरुषसामर्थ्यं पुरुषस्य तत्तदधिकारपदयोग्यता, कार्यसामर्थ्यात् सामर्थ्यतश्च कार्याणां सहाध्ययनक्रीडादीनां शक्त्या सामर्थ्याच्च प्रज्ञाशास्त्रसंस्कारशौर्यादितारतम्ययोगित्वलक्षणात्, कल्प्यते व्यवस्थाप्यते इत्यर्थः। गुणदोषोभयोपपन्नत्वं वदता चार्थादिदमुक्तं भवति—सहाध्यायिप्रभृतयो न हेयाः विश्वास्यत्वादिगुणयोगात्, नापि मन्त्रिपदे कर्तव्याः परिभवादिदोषयोगात्, पारिशेष्यात् तु कर्मसचिवपदे कर्तव्याः तत्तद्गुणापेक्षेषु च कर्मसु देशकालानुरोधेन नियोक्तव्या इति।

'Not so' maintains Vātavyādhi since such persons are likely to appropriate the powers of the king and act on their own as kings. Hence one should appoint new persons proficient in the science of polity as his ministers. They are not likely to hurt the king for fear of immediate punishment.

'Not so' opines the son of Bāhudanti (whose personal name is Śaka). Despite being proficient in the science of polity lack of practical experience on this part is likely to force him to commit blunders in actual works. Hence one should appoint a minister after being satisfied that the person possesses the qualities of nobility of birth, intelligence, purity, valour, loyalty etc., the importance being given to qualities (of head and heart).

'All this become appropriate' concludes Kauṭalya, said the ability of man can be ascertained from his capacity shown in actual execution (of work).

विभज्यामात्यविभवं देशकालौ च कर्म च।
अमात्याः सर्व एवैते कार्याः स्युर्नतु मन्त्रिणः।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
अष्टमोऽध्यायः अमात्योत्पत्तिः।।

एतदर्थकमध्यायप्रान्ते श्लोकमाह–विभज्येत्यादि। अमात्यविभवं विश्वास्यत्वाद्यमात्यगुणसम्पदम्। विभज्य यस्मिन् देशे यस्मिन् काले यस्य कर्मणः सुष्ठु निष्पत्तये यो गुणोऽपेक्ष्यते, तं तं यथायथं विविच्येत्यर्थः। सर्व एवैते तत्तद्गुणवन्तः सहाध्याय्यादयः सर्वेऽपि। अमात्याः कर्मसचिवाः कार्याः, मन्त्रिणस्तु न कार्याः मन्त्रिपदे तु न निवेश्याः।।

।। इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
अष्टमोऽध्यायः अमात्योत्पत्तिः।।

Having considered the spheres of their powers and taking into account the place and time as well as action such persons shall be made ministers in general but not as councillors (who advice the king).

Thus the eighth chapter of the Arthaśāstra of Kauṭalya comes to an end having dealt with the topic of the employment of ministers.

Chapter 9

5. प्रक०मन्त्रिपुरोहितोत्पत्तिः।

Section 5 : Selection of Councillors and Priests

जानपदोऽभिजातः स्ववग्रहः कृतशिल्पश्चक्षुष्मान् प्राज्ञो धारयिष्णुर्दक्षो वाग्गमी प्रगल्भः प्रतिपत्तिमानुत्साहप्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबलारोग्यसत्त्वसंयुक्तः स्तम्भचापल्यवर्जितः संप्रियो वैराणामकर्तेत्यमात्यसम्पत्। अतः पादार्धगुणहीनौ मध्यमावरौ।

मन्त्रिपुरोहितोत्पत्तिरिति सूत्रम्। मन्त्री प्रधानामात्यः यस्मिन्नायत्ताः कर्मसचिवाः, पुरोहिताः पुरोऽग्रे धीयते सर्वकार्येषु प्रमाणत्वेन निवेश्यत इति पुरोहितः, तयोरुत्पत्तिरिहाभिधीयत इत्यर्थः। इत्यमात्यसम्पदिति। अमात्यस्य मन्त्रिणो गुणवैभवम् एवंप्रकारम्। जानपदत्वादयस्तु गुणप्रकाराः। तत्र जानपदः त्रिजिगीषुराष्ट्रभवः। अभिजातः विशुद्धान्वयः। स्वग्रहः शोभनबन्धुरिति साम्प्रदायिकाः, सुखेनावग्रहीतुं प्रामादिकाकार्यप्रवृत्तेर्वारयितुं शक्यः। कृतशिल्पः कृतं शिक्षितं गजाश्वारोहणरथयुद्धायुधगान्धर्वविद्यादिकं येन स तथा। चक्षुष्मान् अर्थशास्त्रं चक्षुः तदभिज्ञः। प्राज्ञः सहजबुद्धिसम्पन्नः। धारयिष्णुः अविस्मरणशीलः। दक्षः क्षिप्रकारी। वाग्गमी मधुरोपपन्नवक्ता। प्रगल्भः प्रौढः। प्रतिपत्तिमान् प्रतिकर्तुं प्रतिवक्तुं च समर्थः, इतिकर्तव्यतानिश्चयवान् वा। उत्साहप्रभावयुक्तः उत्साहयुक्तः पुरुषकारवान् प्रभावयुक्तः प्रभुशक्तिमान्। क्लेशसहः जितश्रमः। शुचिः चतुर्विधोपधाशुद्धः। मैत्रः सर्वत्र स्निग्धव्यवहर्ता। दृढभक्तिः अविचाल्यराजानुरागः। शीलबलारोग्यसत्त्वसंयुक्तः शीलं सद्वृत्तं बलं देहशक्तिः आरोग्यं निर्व्याधित्वं सत्त्वं धैर्यम् एतैर्युक्तः। स्तम्भचापल्यवर्जितः स्तम्भवर्जितः विगर्वः प्रणतिशीलो वा, चापल्यवर्जितः स्थिरप्रकृतिः। संप्रियः सौम्यदर्शन। वैराणामकर्ता स्त्रीभूम्यादिनिमित्तानां वैराणामनुत्पादकः शमयिता च। एभिः पञ्चविंशतिगुणैः सम्पन्न उत्तमो मन्त्री। अत इति। अतः एभ्यो गुणेभ्यः, पादार्धगुणहीनौ मध्यमावरौ, चतुर्थांशगुणहीनो मध्यमः, अर्धगुणविहीनोऽधम इत्यर्थः।

The qualifications of a minister (of superior class) are : native (of the locality), born of high family, influential, well-trained in arts, possessed of foresight, wise, having strong memory, bold, eloquent, skilful, intelligent, sprightly, having dignity, endurance, purity of character, affable (in nature) firm in loyal devotion ,endowed with excellent conduct, good physical strength, health, bravery, free from such traits as procrastination, fickle-mindedness, affectionate (in behaviour) and not at all exciting people for hatred and enmity.

One who is possessed of a quarter of the above qualities is Madhyama and one with half the above is Avara (the lower) type of ministers.

तेषां जनपदमवग्रहं चाप्यतः परीक्षेत, समानविद्येभ्यः शिल्पं शास्त्रचक्षुष्मत्तां च; कर्मारम्भेषु प्रज्ञां धारयिष्णुतां दाक्ष्यं च; कथायोगेषु वाग्मित्वं प्रागल्भ्यं प्रतिभानवत्त्वं च; आपद्युत्साहप्रभावौ क्लेशसहत्वं च; संव्यवहाराच्छौचं मैत्रतां दृढभक्तित्वं च; संवासिभ्यः शीलबलारोग्यसत्त्वयोगमस्तम्भमचापल्यं च; प्रत्यक्षतः संप्रियत्वमवैरित्वं च।

जानपदत्वादिज्ञानोपायानाह—तेषामित्यादि। तेषां जानपदत्वादीनां मध्ये अथवा उत्तममध्यमाधमानां मन्त्रिणाम्। आप्यतः आप्तियोग्यात् प्रत्येतव्याद् विश्वासयोग्यादित्यर्थः, 'आप्तिः प्रत्ययितत्वे स्याल्लाभसम्बन्धयोरपि' इति केशवः। आप्तश्च यथादृष्टार्थवादी। परीक्षेत परीक्ष्य जानीयात्। समानविद्येभ्यः। तुल्यविद्याविद्भ्यः। कर्मारम्भेषु कार्यानुष्ठानेषु। कथायोगेषु कार्यकथनप्रसङ्गेषु। प्रतिभानवत्त्वं नवनवप्रज्ञोन्मेषशालित्वम्। संव्यवहारात् समाचरणात्। संवासिभ्यः सहवासिभ्यः। प्रत्यक्षतः स्वयमनुभवात्।

Thereafter these qualities are to be put to test as for instance nativity and influential position may be ascertained from reliable persons; proficiency in arts, science and foresight from professors of equal learning; intelligence and power of memory as well as dexterity may be put to text; eloquence, skilfulness and flash of intelligence may be known from their conversational activities; ability to withstand and bravery to be known from their behaviour in dangerous situations; purity of character, friendship and sincere devotion may be known from frequent association; conduct, strength, health, dignity, absence of indolence and ficklemindedness shall be ascertained from their intimate friends and popularity and lack of enmity shall be known by personal association.

प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः। स्वयंदृष्टं प्रत्यक्षं परोपदिष्टं परोक्षं कर्मसु कृतेनाकृतावेक्षणमनुमेयम्। यौगपद्यात् तु कर्मणामनेकत्वादनेकस्थत्वाच्च देशकालात्ययो मा भूदिति परोक्षममात्यैः कारयेदित्यमात्यकर्म।

पुरोहितमुदितोदितकुलशीलं षडङ्गे वेदे दैवे निमित्ते दण्डनीत्यां च अभिविनीतमापदां दैवमानुषीणाम् अथर्वभिरुपायैश्च प्रतिकर्तारं कुर्वीत। तमाचार्यं शिष्यः पितरं पुत्रो भृत्यः स्वामिनमिव चानुवर्तेत।

कस्मात् पुनर्जानपदत्वादिगुणज्ञाने प्रत्यक्षम् आप्तवाक्यमनुमानमिति त्रीणि प्रमाणानि आश्रयणीयानि, न पुनरेकमेवाश्रीयेतेत्याशङ्कायामाह—प्रत्यक्षपरोक्षानुमेयेत्यादि। राजवृत्तिः दण्डनीतिप्रतिपाद्यो राजव्यवहारः। परोपदिष्टम् आप्तवाक्यावगतम्। कृतेन अकृतावेक्षणमनुमेयम् अनुष्ठितेन कर्मांशेन करिष्यमाणांश-परिणामोत्प्रेक्षणमनुमानायत्तमित्यर्थः। एवञ्च यतो राजवृत्तिस्त्रिप्रमाणावसेया ततस्त्रिप्रमाणप्रदर्शनमित्यभिप्रायः। किमर्थं महता प्रयासेन परीक्ष्यैवामात्याः कर्तव्या इति चेत् तत्राह—यौगपद्यादित्यादि। अयं भावः—कर्माणि खलु नाम राजकीयानि बहूनि बहुप्रकाराणि बहुप्रदेशस्थानि सद्यः करणीयानि च भवन्ति। तानि सर्वाणि साक्षादेव राज्ञा स्वयमनुष्ठातुं न शक्यन्त इति यथादेशकालं तेषामनुष्ठानसिद्ध्यर्थममात्या एव तत्र राज्ञा

नियोक्तव्याः। एषितव्याश्च ते गुणवन्त एव कर्मानुष्ठानसम्यक्त्वायेत्यावश्यकं तेषां महता प्रयासेन गुणपरीक्षणमिति। इत्यमात्यकर्मेति, एष मन्त्र्युत्पत्तिप्रकार उक्त इत्यर्थः।

पुरोहितोत्पत्तिमाह–**पुरोहितमित्यादि**। उदितोदितकुलशीलत्वादियुक्तं पुरोहितं कुर्वीत। उदितोदितकुलशीलम् उदितोदितम् उदितैः शास्त्रोक्तैर्विद्याभिजनादिभिः उदिताः समृद्धाः उदितोदिताः तेषां कुलं शीलं वृत्तं च यस्य तं तथाभूतम्, उदितोदितकुलजातम् उदितोदिताचारयुक्तं चेत्यर्थः। षडङ्गे वेदे, दैवे ज्योतिश्शास्त्रे पूर्वकर्मपरिपाकलक्षणदैवप्रतिपादके, निमित्ते शकुनशास्त्रे, दण्डनीत्यां च, अभिविनीतं शिक्षितम्। दैवमानुषीणां देवकृतानां मानुषकृतानां च, आपदाम्, अथर्वभिः अथर्वमन्त्रप्रयोगैः, उपायैश्च सामदानादिभिश्च, प्रतिकर्तारं परिहर्तारम्। तमिति। शिष्य आचार्यमिव, पुत्रः पितरमिव, भृत्यः स्वामिनमिव च, तम् अनुवर्तेत अनुसरेत् तत्परतन्त्रो भवेत्।

The function of royalty is to be known from visible, invisible and inferential situations. What is seen directly is visible, and what is reported by another based on his experience is invisible. Inferential is that which is known by observing the actions both visible and invisible. Since many actions are to be performed at the same time, there should not be any lapse and hence the work of a minister is often not apparently visible. Such is the arduous job of ministers.

The high priest should be of noble family traits both in birth and habits; proficient in Vedas with their sixfold ancillaries, skilful in ascertaining portents and administration; capable of preventing calamities both divine and human by resorting to the expedience prescribed in the Atharvaveda. Such a high priest should be obeyed to by the disciple as father, son, servant and master.

ब्राह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम्।
जयत्यजितमत्यन्तं शास्त्रानुगमशस्त्रितम्।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
नवमोऽध्यायः मन्त्रिपुरोहितोत्पत्तिः।।

एवञ्च करणे अलब्धलाभो भवतीत्यर्थकं श्लोकमाह–**ब्राह्मणेनेति**। ब्राह्मणेन यथोक्तगुणेन पुरोहितेन, एधितं वर्धितं, मन्त्रिमन्त्राभिमन्त्रितं मन्त्रिणो यथोक्तगुणस्य मन्त्रेण अर्थनिश्चयेन अभिमन्त्रितं संस्कृतम्। अभिरक्षितमित्यपि पाठः। अत एव शास्त्रानुगं शास्त्रोक्तानुष्ठानपरं, क्षत्रं क्षत्रियकुलं कर्तृ, अशस्त्रितं सत् अशस्त्रयुक्तं सत्, युद्धं विनैवेत्यर्थः। शास्त्रानुगतशस्त्रितमिति पाठे शास्त्रानुगमात्मकशस्त्रयुक्तं तदतिरिक्तशस्त्रानपेक्षमित्यर्थः। अत्यन्तम् एकान्ततः, अजितं जयति अलब्धं लभते।।

।। इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
नवमोऽध्यायः मन्त्रिपुरोहितोत्पत्तिः।।

Kṣatriyahood is increased in quality by Brahmins by way of

counselling of ministers according to the principles of political science and it gains success of a high order.

Thus the ninth chapter of the Arthaśāstra of Kauṭalya dealing with the selection of councillors and priest comes to an end.

Chapter 10

6. प्रक०उपधाभिः शौचाशौचज्ञानममात्यानाम्।

Section 6 : Purity and Impurity of Ministers Tested

मन्त्रिपुरोहितसखः सामान्येष्वधिकरणेषु स्थापयित्वामात्यानुपधाभिः शौचयेत्।

पुरोहितमयाज्ययाजनाध्यापने नियुक्तममृष्यमाणं राजा अवक्षिपेत्। स सत्रिभिः शपथपूर्वमेकैकममात्यमुपजापयेत्–अधार्मिकोऽयं राजा, साधु धार्मिकमन्यमस्य तत्कुलीनमवरुद्धं कुल्यमेकप्रग्रहं सामन्तमाटविकमौपपादिकं वा प्रतिपादयामः। सर्वेषामेतद्रोचते, कथं वा तवेति। प्रत्याख्याने शुचिरिति धर्मोपधा।

उपधाभिः **शौचाशौचज्ञानममात्यानामिति** सूत्रम्। उपधाभिः छलैः, अमात्यानां शौचाशौचज्ञानं शौचं स्वामिन्यदुष्टभावता अशौचं दुष्टभावता तयोर्ज्ञानम् अभिधीयत इति सूत्रार्थः। जानपदत्वादि-गुणसम्पन्नोऽप्युपधाशुद्धिविरहेऽमात्यत्वं नार्हतीत्युपधाशुद्धिरुच्यत इति प्रकरणसङ्गतिः।

मन्त्रीत्यादि। मन्त्रिपुरोहितसखः मन्त्रिपुरोहितसमुपेतः। सामान्येषु अधिकरणेषु साधारणेषु अप्रधानेष्वधिकारपदेषु। उपधाभिः छलैर्वक्ष्यमाणैः। शौचयेत् शोधयेत्।

छलप्रयोगमाह–**पुरोहितमिति**। राजा अयाज्ययाजनाध्यापने याजयितुमनर्हस्य वृषलीपत्यादेर्या-जनेऽध्यापने च नियुक्तं चोदितम्, अमृष्यमाणम् अधर्मनियोजनेन कुप्यन्तं, पुरोहितम् अवक्षिपेत् अवमन्येत स्वपदादवरोपयेद् वा। सः अवक्षिप्तः पुरोहितः, सत्रिभिः स्त्रीपुरुषलक्षणनिमित्तादिशास्त्राभिज्ञापदेशचारिणः सञ्चारविशेषाः सत्रिणः गूढपुरुषप्रणिधौ वक्ष्यमाणाः तैः प्रयोज्यकर्तृभिः, एकैकम्, अमात्यं, शपथपूर्वम् उपजापयेत् भेदयेत्। उपजापस्य शपथपूर्वत्वमनुद्वेदार्थम्। उपजापनप्रकारमाह–**अधार्मिक** इत्यादिना। अधार्मिकः अधर्मप्रवृत्तः। धार्मिकमिति तत्कुलीनादिषु सर्वत्र सम्बध्यते। तत्कुलीनं प्रकृतराजवंशभवम्। अवरुद्धम् अवरुध्य रक्ष्यमाणं तत्पुत्रादिकम्। कुल्यं राजभावार्हकुलोत्पन्नम्। एकप्रग्रहम् एकः तुल्यः सर्वैरविशेषं क्रियमाणः प्रग्रहः पूजा यस्य तं सर्वपूजितमित्यर्थः। सामन्तं विषयानन्तरं राजानम्। आटविकम् अटवीपतिम्। औपपादिकम् उपपादं प्रत्यन्तपर्वतसमीपे भवः तम्। अथवा औपपादिकमिति अस्माभिः सम्भूय सम्प्रधारणीयमित्यर्थः उपपादं समर्थनमर्हतीति ठक्। अस्य प्रतिपादयामः अस्य स्थाने निवेशयामः। एतद् उपन्यस्तं मतम्। कथं वा तव, मतमिति गम्यम्। प्रत्याख्याने शुचिः इत्थमुपजापितोऽमात्यो 'नाहमीदृशं कुर्यामि'ति यदि निरस्येत् तर्हि शुद्ध इत्यर्थः। इति धर्मोपधा धर्मस्थापनवाचोयुक्तया छलनम्। स एष धर्मप्रधानेषु शोधनप्रकारः।

Having ensured the loyalty (and cooperation) of the prime minister and high priest, the king shall test the character of the council of ministers by offering temptations.

The king shall dismiss a high priest who refuses to teach (the Vedas) or to officiate in a sacrifice performed by an outcaste at his order. Then using services of the high priest (already dismissed) the king shall instigate each minister through his classmate taking him (minister) into confidence under oath as follows : "This king is unrighteous, so let us set up another in his place as king who is righteous or one born in his family, or one who is kept imprisoned by him or a neighbouring king belonging to this family, possessed of self-sufficiency, or a wild chief (brought from the forest) or an upstart, we may all agree on his, if you people also think so." If the minister concerned spurns the suggestion then it may be concluded that he is pure in character. This is what is called a righteous allurement.

सेनापतिरसत्प्रग्रहेणावक्षिप्तः सत्रिभिरेकैकममात्यमुपजापयेल्लोभनीयेनार्थेन राजविनाशाय–सर्वेषामेतद् रोचते, कथं वा तवेति। प्रत्याख्याने शुचिरित्यर्थोपधा।

परिव्राजिका लब्धविश्वासान्तःपुरे कृतसत्कारा महामात्रमेकैकमुपजपेत्–राजमहिषी त्वां कामयते कृतसमागमोपाया। महानर्थश्च भविष्यतीति। प्रत्याख्याने शुचिरिति कामोपधा।

प्रवहणनिमित्तमेकोऽमात्यः सर्वानमात्यानावाहयेत्। तेनोद्वेगेन राजा तानवरुन्ध्यात्। कापटिकश्छात्रः पूर्वावरुद्धस्तेषामर्थमानावक्षिप्तमेकैकममात्यमुपजपेत्–असत्प्रवृत्तोऽयं राजा, साध्वेनं हत्वा अन्यं प्रतिपादयिष्यामः। सर्वेषामेतद् रोचते, कथं वा तवेति। प्रत्याख्याने शुचिरिति भयोपधा।

अर्थोपधामाह–सेनापतिरित्यादि। असत्प्रग्रहेण अवक्षिप्तः अपूज्यपूजनेन निमित्तेन परिभूतः, अपूज्यपूजने राज्ञा चोदितस्तदकुर्वन्नर्थमानाभ्यां हापित इत्यर्थः। लोभनीयेन उपजाप्यपुरुषकाम्येन। राजविनाशायेत्युपजापफलमुच्यते। तदनुकूल उपजापप्रकारस्तु–अपथप्रवृत्तोऽयं राजा, साधु सत्पथवर्तिनमन्यमस्य स्थाने तत्कुलीनमवरुद्धं वा प्रतिपादयाम इत्येवमादिरूपो गम्यः। सर्वेषामित्यादिकं तच्छेषवाक्यम्। लुब्धेष्वेष शोधनप्रकारः।

स्त्रैणेषु प्रयोज्यां कामोपधामाह–**परिव्राजिके**त्यादि। परिव्राजिका भिक्षुकी। कृतसत्कारा राजमहिषीभिः पूजिता। अर्थश्च धनादिकं च।

भयोपधामाह–**प्रवहणे**त्यादि। प्रवहणनिमित्तं प्रवहणं नौविशेषः कर्णीरथश्च, तेन जलस्थलयात्राक्रीडोद्यानभोजनादिकं गोष्ठीकौतुकं लक्ष्यते, तदर्थमित्यर्थः। आवाहयेत् आनीय मेलयेत्। तेनोद्वेगेन तन्निमित्तेन उद्वेगेन अक्षमया। तान् अमात्यान्। अवरुन्ध्यात् अर्थमानापहारादिनापकुर्यात्। **कापटिक** इति। **पूर्वावरुद्धः** राज्ञा पूर्वमपकृतः, छात्रः कापटिकः अध्यापकाध्येतृवृत्तिः कापटिकाख्यः गूढपुरुषविशेषः। तेषाम् अमात्यानां मध्ये, अर्थमानावक्षिप्तम् अर्थमानाभ्यां हापितम्, एकैकम् अमात्यम्, उपजपेत् राजसकाशाद् भेदयेत्। उपजापप्रकारकथनम् असत्प्रवृत्त इत्यादिना। असत्प्रवृत्तः अशोभनकर्मप्रवृत्तः। इयमुपधा भीरुविषया।

A commander of the army having been dismissed by the king for receiving improper gifts may be tested through spies who are his classmates, by offering wealth in order to destroy the ruler by suggesting "that the idea is agreed to by all, but what is your opinion?" On spurning such a proposal he may be considered as pure. This is what is called testing by monetary offers.

A lady ascetic after gaining confidence and esteem in the harem of the king may entice each of the Mahāmātras (ministers) by telling him that the queen is in love with him and that she has made arrangements to admit him into her chamber (for enjoyment of conjugal pleasure) and that there is the certainty of acquiring much wealth. If he rejects her allurement he may be ascertained as pure. This is called allurement of love.

A minister may invite other ministers for a get together on a canoe involving food and drinks. Now the king suddenly arrests all of them apprehending danger. A spy under the guise of a fraudulent disciple, pretending to have suffered humility at the hands of the king may incite each of the minister saying that the king is moving on the wrong path, we may call him and replace him with another. Is it agreeable to all of you or not? On rejecting the proposal it may be concluded that they are dependable. This mode of allurement is due to fear.

तत्र धर्मोपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु स्थापयेद्, अर्थोपधाशुद्धान् समाहर्तृसन्निधातृनिचयकर्मसु, कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु, भयोपधाशुद्धानासन्नकार्येषु राज्ञः। सर्वोपधाशुद्धान् मन्त्रिणः कुर्यात्। सर्वत्राशुचीन् खनिद्रव्यहस्तिवनकर्मान्तेषूपयोजयेत्।

त्रिवर्गभयसंशुद्धानमात्यान् स्वेषु कर्मसु।
अधिकुर्याद् यथाशौचमित्याचार्या व्यवस्थिताः।।

उपधाशुद्धानां यथायथं विनियोगस्थानान्याह–तत्रेत्यादि। तत्र उपधाचतुष्टयशोधितेषु मध्ये। धर्मस्थीयकण्टकशोधनेषु धर्मस्थानुबन्धिषु कर्मसु कण्टकशोधनेषु च वक्ष्यमाणेषु। स्थापयेत् नियुञ्जीत। समाहर्तृसन्निधातृनिचयकर्मसु समाहर्तृकर्मसु धनोत्थापनादिलक्षणेषु, सन्निधातृनिचयकर्मसु च धनरक्षणलक्षणेषु। बाह्याभ्यन्तरविहाररक्षासु बाह्याभ्यन्तरा ये विहाराः कामक्रीडाः अर्थाद् विहारसाधनभूता नृपस्त्रियः तद्रक्षणकर्मसु। तत्र बाह्या भोगिन्यः, आभ्यन्तर्यस्तु देव्य इति ज्ञेयम्। आसन्नकार्येषु शरीरक्षणादिकर्मसु। सर्वेति। सर्वोपधाशुद्धान् चतसृष्वप्युपधासु दृष्टशौचान्। सर्वत्रेति। सर्वासु उपधासु, अशुचीन्, खनिद्रव्यहस्तिवनकर्मान्तेषु खनिः सुवर्णरजताद्युत्पत्तिस्थानं द्रव्यवनं दारुयोग्यवृक्षप्रायं वनं हस्तिवनं गजोत्पत्तिवनम् एतत्सम्बन्धिषु कर्मान्तेषु व्यापारस्थानेषु, उपयोजयेत् अर्थात् कायायासकर्मणि।

तदिदमाचार्याणां मतमित्यर्थकं श्लोकमाह–त्रिवर्गेत्यादि। त्रिवर्गभयसंशुद्धान् त्रिवर्गभयैर्धर्मार्थकामभयोपधाभिर्दृष्टशौचान्। अधिकुर्यात् नियोजयेत्। यथाशौचं तत्तच्छुद्ध्यानुगुण्येन।

Those who are tested by means of the righteous mode of allurement may be entrusted with the duties in general administration of justice involving civil and criminal matters. Those tempted and found pure by the allurement of wealth may be employed as collectors of revenue and chamberlain. Those exonerated by the temptations of love shall be appointed as superintendent of the pleasure grounds and halls both external and internal. Those who have been tested by the allurement of fear shall be appointed to immediate service while all those who were tested under all allurements shall be employed as prime ministers. Those who are found not pure to the expected level may be entrusted with the duties in mines, timber forest abounding in elephants and different manufactories.

Preceptors have maintained that ministers tested by temptations of the three pursuits of life (righteousness, wealth and love) shall be employed in suitable positions according to their purity.

नत्वेव कुर्यादात्मानं देवीं वा लक्ष्मीश्वरः।
शौचहेतोरमात्यानामेतत् कौटल्यदर्शनम्।।
न दूषणमदुष्टस्य विषेणेवाम्भसश्चरेत्।
कदाचिद्धि प्रदुष्टस्य नाधिगम्येत भेषजम्।।
कृता च कलुषा बुद्धिरुपधाभिश्चतुर्विधा।
नागत्वान्तं निवर्तेत स्थिता सत्त्ववतां धृतौ।।
तस्माद् बाह्यमधिष्ठानं कृत्वा चार्ये चतुर्विधे।
शौचाशौचममात्यानां राजा मार्गेत सत्रिभिः।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
दशमोऽध्यायः उपधाभिः शौचाशौचज्ञानममात्यानाम्।।

उक्तमाचार्यमतम्। स्वमतं तु नैवं, किन्तु अमात्यशुद्धिपरीक्षार्थे स्वात्मानं देवीं च विषयं नैव राजा कुर्यादित्येवंरूपमित्याह—नत्वेवेत्यादि।

कुत आत्मानं देवीं च न लक्षं कुर्यादित्यत्राह—न दूषणमिति। अदुष्टस्य स्वभावाद् दोषशून्यस्य अमात्यादेः प्रतीकारसमर्थस्यापि, दूषणम् उपधया वञ्चनम्, अम्भसः विषेण दूषणमिव अम्भसः स्वभावतो, जीवनहेतोर्जलस्य एकान्तमरणहेतुना विषेण दूषणमिव, न चरेत् न कुर्यात्। सति प्रतीकारसामर्थ्ये दूषणेन को दोष इत्यत्राह—कदाचिदित्यादि। अयमर्थः—अदुष्टोऽपि यद्युपधावशात् कदाचित् प्रकर्षेण दुष्टान्तकरणो भवेत्, तदानीम् अशक्यप्रतीकारस्तत्सकाशादनर्थ आपतेदिति।

उपधादूषिता च धीराणां बुद्धिर्यतमाना स्वाध्यवसितार्थसिद्धिमप्राप्य नैव विरमतीत्याह—कृता चेत्यादि।

कथं तर्ह्यमात्याः शोधनीया इत्याकाङ्क्षायामाह—तस्मादिति। तस्माद् राजा, चतुर्विधे चार्ये उपधाप्रयोगे, बाह्यं बहिरङ्गं दूष्यम्, अधिष्ठानं लक्षं कृत्वा, अमात्यानां शौचाशौचं, सत्रिभिः सत्रिद्वारेण, मार्गेत परीक्षेत।।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
दशमोऽध्यायः उपधाभिः शौचाशौचज्ञानममात्यानाम्॥

It is the view of Kauṭalya that the king shall never make himself or his queen as the object of test in relation to the purity of the ministers. He shall never vitiate the pure one as one pollutes water with poison. For, such a vitiated fellow one may fail to find out suitable antidote (in the form of medicine). The mind of the brave which is naturally steadfast, once vitiated and repelled by the four kinds of allurements may not regain its original state. Thus having employed an external object as the temptation for four kinds of allurements, the king shall through the expedient of spies find out the pure and impure character of his ministers.

Thus the tenth chapter of the Arthaśāstra of Kauṭalya dealing with the testing of the purity and impurity of ministers comes to an end.

Chapter 11

7. प्रक० गूढपुरुषोत्पत्तिः।

Section 7 : Constitution of Spies

उपधाभिः शुद्धामात्यवर्गो गूढपुरुषानुत्पादयेत् कापटिकोदास्थितगृहपतिकवैदेहक-तापसव्यञ्जनान् सत्रितीक्ष्णरसदभिक्षुकीश्च।

परमर्मज्ञः प्रगल्भश्छात्रः कापटिकः। तमर्थमानाभ्यामुत्साह्य मन्त्री ब्रूयात्–राजानं मां च प्रमाणं कृत्वा यस्य यदकुशलं पश्यसि तत् तदानीमेव प्रत्यादिशेति।

प्रव्रज्याप्रत्यवसितः प्रज्ञाशौचयुक्त उदास्थितः। स वार्त्ताकर्मप्रदिष्टायां भूमौ प्रभूतहिरण्यान्तेवासी कर्म कारयेत्। कर्मफलाच्च सर्वप्रव्रजितानां ग्रासाच्छादनावसथान् प्रतिविदध्यात्। वृत्तिकामांश्चोपजपेत्–एतेनैव वेषेण राजार्थश्चरितव्यो भक्तवेतनकाले चोपस्थातव्यमिति। सर्वप्रव्रजिताश्च स्वं स्वं वर्गमुपजपेयुः।

गूढपुरुषोत्पत्तिरिति सूत्रम्। अमात्यशौचाशौचपरीक्षणं गूढपुरुषानन्तरेण न शक्यं कर्तुमिति तदुत्पत्तिरुच्यत इत्यर्थः। तत्रास्मिन्नध्याये संस्थोत्पत्तिः, उत्तरस्यादौ सञ्चारोत्पत्तिः।

उपधाभिरित्यादि। उपधाभिः शुद्धामात्यवर्गः धर्मोपधादिभिः छलोपायैः शोधितसचिववर्गः। उत्पादयेत्, राजा। के ते गूढपुरुषा इत्याकाङ्क्षायामाह–**कापटिके**त्यादि। चकारात् कुब्जवामनकिरातमूकबधिर-जडान्धनटनर्तकगायनवादनवाग्जीवनकुशीलवा अपि गृह्यन्ते।

परेति। परमर्मज्ञः परच्छिद्रवेदी, प्रगल्भः प्रौढः, छात्रः अध्यापकाध्येतृवृत्तिः निष्परिग्रहत्वाच्छरीर-मात्रपरिच्छेदो राजकार्यैकपरः। एवङ्गुणः कापटिकः कपटवृत्तित्वात् तदाख्ययोच्यते। अस्य विनियोगमाह–तमित्यादि। अर्थमानाभ्यां धनबहुमानाभ्याम्। यस्य यदकुशलं पश्यसि यस्य अमात्यादेः यद् अवद्यं चौर्यं परदाराभिमर्शनमित्येवञ्जातीयम् उपलभसे। प्रत्यादिश विज्ञापय।

प्रव्रज्येत्यादि। प्रव्रज्याप्रत्यवसितः चतुर्थाश्रमात् प्रतिनिवृत्तः संन्यासं प्राप्य ततश्च्युतः, बौद्धशैवत्वादि-च्युतानामपीदमुपलक्षणम्। प्रज्ञाशौचयुक्तः प्रज्ञया मत्या शौचेन सत्त्वेन च युक्तः, उदास्थितः तदाख्यः। प्रभूतहिरण्यान्तेवासी प्रभूताः प्रचुराः हिरण्यान्तेवासिनः धनानि शिष्याश्च यस्य स तथाभूतः। अनेन वार्त्ताकर्मा-पेक्षिता मूलधनसम्पत् कर्मकरसम्पच्चोक्ता। सः उदास्थितः, वार्त्ताकर्मप्रदिष्टायां कृषिवाणिज्यपाशुपाल्यकर्मार्थे उपकल्पितायां, भूमौ, कर्म वार्त्ताकर्म, कारयेद् अर्थादन्तेवासिभिः। कर्मफलाच्च सर्वप्रव्रजितानां सर्वेषां स्वकर्ममकरातिरिक्तानामपि संन्यास्यादीनाम्। सर्ववेषधारिणामित्यपि पाठः। तत्र वेषधारिणः। संन्यासिशैव-

शाक्यदिगम्बरादय एव। ग्रासाच्छादनावसथान् अन्नवस्त्रवासस्थानानि, प्रतिविदध्यात् संविदधीत। ग्रासादिप्रतिविधानस्य सर्वविषयत्वं प्रसिद्ध्यर्थं, प्रसिद्धिश्च तदर्थिनवनवान्तेवास्युपस्थानार्थेति बोद्धव्यम्। वृत्तिकामान् स्वदीयमानग्रासादिना नित्यदेहयात्रां ये कामयन्ते तान्, उपजपेच्च उपजापेन वशीकुर्याच्च। एतेनैवेत्यादिरुपजापप्रकारः। अनेन परिगृहीतेनैव बौद्धभिक्षुपाशुपतादिवेषेण राजप्रयोजनं परराष्ट्रवृत्तगवेषणरूपं युष्माभिरनुष्ठेयं, गृहीतपरराष्ट्रवृत्तान्तैश्च धान्यतण्डुलादिभृतिग्रहणकाले सन्निधातव्यमित्यर्थः। सर्वेति। स्वं स्वं वर्गम् उपजपेयुः बौद्धा बौद्धं पाशुपताः पाशुपतम् इत्येवं स्वस्वजातीयम् उपजपेयुः उपजप्य स्वसहायान् कुर्युः।

With the assistance of the council of ministers who have been put to test of honesty, the king shall proceed to consiitute a group of spies under the guises of a fraudulent disciple, a recluse, a householder, a merchant, an ascetic practising austerities, a classmate or colleague, a fire-brand, a poisoner and a lady mendicant.

The fraudulent disciple (Kāpaṭika) is a person capable of guessing the mind of others. Having pleased such a spy with suitable honour and rewards the minister shall tell him that he should explicitly obey the king and the minister and report to us whatever wickedness is found in others.

The recluse (Udāsthita) is one who has embraced asceticism and is possessed of foresight and of pure character. Endowed with money he is to live with many disciples and shall carry out agricultural activities, cattle breeding and trade on the land allotted to him. He is to provide ascetics with subsistence, clothing and lodging out of the profits acquired from the produce. Those who are desirous of a livelihood shall be encouraged by him, ordering each of them to detect and report a particular kind of crime committed in connection with the wealth of the king. They have to make the report when they come to receive their subsistence and wages. All such ascetics shall instruct their own disciples to move about in the particular attire and collect information.

कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपतिकव्यञ्जनः। स कृषिकर्मप्रदिष्टायां भूमाविति समानं पूर्वेण।

वाणिजको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो वैदेहकव्यञ्जनः। स वणिक्कर्मप्रदिष्टयां भूमाविति समानं पूर्वेण।

मुण्डो जटिलो वा वृत्तिकामस्तापसव्यञ्जनः। स नगराभ्याशे प्रभूतमुण्डजटिलान्तेवासी शाकं यवसमुष्टिं वा मासद्विमासान्तरं प्रकाशमश्नीयात्, गूढमिष्टमाहारम्। वैदेहकान्तेवासिनश्चैनं समिद्धयोगैरर्चयेयुः। शिष्याश्चास्यावेदयेयुः—असौ सिद्धः सामेधिक इति। समेधाशास्तिभिश्चाभिगतानामङ्गविद्यया शिष्यसंज्ञाभिश्च कर्माण्यभिजनेऽवसितान्यादिशेदल्पलाभमग्निदाहं चोरभयं दूष्यवधं तुष्टिदानं विदेशप्रवृत्तिज्ञानम् इदमद्य श्वो वा भविष्यतीदं वा राजा करिष्यतीति।

कर्षक इति। वृत्तिक्षीण: कृषिवृत्त्या क्षयं प्राप्त:, प्रज्ञाशौचयुक्त:, कर्षक: कृषिशील:, गृहपतिकव्यञ्जन: तन्नामा। तत्कृत्यमाह–**स कृषीत्यादि। भूमाविति समानं पूर्वेणेति**, भूमावित्यादिकम् उदास्थितकृत्योक्तेन तुल्यम्। तच्च 'प्रभूतहिरण्यान्तेवासी कर्म कारयेत्। कर्मफलाच्च सर्वगृहपतिकव्यञ्जनानां ग्रासाच्छादनाव-सथानि 'त्यादिकं यथोचितमूह्यम्।

वैदेहकव्यञ्जनसंज्ञमाह–**वाणिजक** इत्यादि। वृत्तिक्षीण: धनविरहाद् वाणिज्यवृत्तिच्युत:। **भूमाविति समानं पूर्वेणेति**। तच्च 'प्रभूतहिरण्यान्तेववासी 'त्यादिकं 'स्वं स्वं वर्गमुपजपेयुरि 'त्यन्तं प्रव्रजितशब्दस्थाने वैदेहकशब्दस्य यथास्थानयोजनेन बोद्धव्यम्।

तापसव्यञ्जनाख्यमाह–**मुण्ड** इत्यादि। मुण्ड: भिक्षुक्षपणकादि:। जटिल: शैवपाशुपतादि: शाकं हरिताख्यं सस्यम्। 'मूलपत्रकरीराग्रफलकाण्डाधिरूढकम्। त्वक् पुष्पं कवकं चेति शाकं दशविधं स्मृतम्।।' इत्युक्तरूपं, वृक्षमूलपत्रफलादिकं वा। यवसमुष्टिं मुष्टिमेयं तृणम्। मासद्विमासान्तरम् एकमासव्यवहितं मासद्वयव्यवहितं वा। इदमशनाक्रियाविशेषणम्। प्रकाशं सर्वजनप्रत्यक्षं यथा भवति तथा। ईदृशं प्रकाशाशनं निराहारख्यात्यर्थम्। गूढम् अन्याविदितम्। **वैदेहकेति**। वैदेहकान्तेवासिनश्च वणिग्वृत्तय: शिष्याश्च, एनं तापसव्यञ्जनं, समिद्धयोगै: समिद्धै: समृद्धै: योगै: इष्टार्थलाभै:, अर्चयेयु:, संभावयेयु:। अथवा समिद्धयोगै: तापसप्रसादात् समृद्धार्था वयमिति कपटयुक्तिभि: अर्चयेयु: धनदानादिना पूजयेयुरित्यर्थ:। **शिष्या** इति। अस्य तापसस्य शिष्याश्च, असौ तापस:, सिद्ध: योगी, अत एव सामेधिक: समेधा भाविनी सम्पत्ति: तदभिज्ञ:, इति आवेदयेयु: प्रख्यापयेयु:। एवमारोपितमाहात्म्यस्तापसव्यञ्जन: किं कुर्यादित्याह–**समेधाशास्तिभिरिति**। समेधाशास्तिभि: अभिगतानां भाविसम्पद्विज्ञानाभिलाषैस्तां प्रष्टुमागतानाम्, अभिजने अवसितानि कर्माणि तत्कुलनिष्पन्नानि वृत्तानि, अङ्गविद्यया अङ्गानां शरीरावयवानां प्रश्नकालिकचेष्टाविशेषै: शुभाशुभज्ञप्तिप्रतिपादकेन ज्योतिषाङ्गशास्त्रेण, पुष्पशकटयेत्यन्ये, सा त्वाकाशवाणी। शिष्यसंज्ञाभिश्च शिष्याणामक्षिभ्रूविलासादिसूचनैश्च आदिशेत् कथयेदित्यर्थ:। आदेष्टव्यान्तराण्याह–अल्पलाभं किञ्चिद्धन-प्राप्तिम्, आदिशेत् प्रष्टुर्मध्यमत्व इत्यौचित्यलभ्यम्। अग्निदाहं चोरभयं च, आदिशेत्, प्रश्नकृतो राजापकारित्वे। दूष्यवधं ये दूष्या: कृत्या: प्रष्टारस्तेषां वधम्, आदिशेत्। तुष्टिदानं सन्तोषनिमित्तमर्थदानम्, आदिशेत्, प्रश्नकृतो राजोपकारित्वे। विदेशप्रवृत्तिज्ञानं दूरदेशवृत्तान्तज्ञानम् आदिशेत्। इदमद्य श्वो वा भविष्यतीत्यादिशेत्। इदमद्य श्वो वा राजा करिष्यतीत्यादिशेत्। वाक्यान्त इतिशब्द: प्रकारार्थ:। एवञ्जातीयमन्यच्चादिशेदित्यर्थ:।

The spy in the form of a householder is a cultivator fallen from his profession, through he is of good character and endowed with foresight. He shall cultivate the land allotted to him for the purpose and help other cultivators (and ask them to act as a spy).

The merchant spy is a trader fallen from his profession despite having foresight and good character. He shall carry on the manufacture of merchandise on the lands allotted to him for the purpose (and shall act as in the case of the previous ones.)

A person with a shaved head (muṇḍa) or matted hair (jaṭila) in search of livelihood is a spy under the guise of an ascetic. Such a man lives in the suburbs of the city in the company of people with shaved head and

braided hair subsisting on a handful of vegetables or yavasa (meadow grass) which he consumes once in the interval of a month or two, though he may eat in secret such items of food of which he is fond of. Spies in the guise merchants shall have disciples who attend on them and claim that he has supernatural powers. They should say that this ascetic is prossessed of superhuman powers. When people desrious of knowing their portents approach him and ask him the question he shall tell them through palmistry and also noting the nodding of the head of the disicples who have elicited the information earlier. Thus he shall tell about small gains, destruction from fire, fear from robbers, killing of the seditious people, rewards for the good and forecast of foreign affairs. He will conclude that the king will act this way or that way either today or tomorrow.

तदस्य गूढाः सत्रिणश्च संवादयेयुः। सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां राजभाव्यमनुव्याहरेन्मन्त्रिसंयोगं च। मन्त्री चैषां वृत्तिकर्मभ्यां वियतेत। ये च कारणादभिक्रुद्धास्तानर्थमानाभ्यां शमयेत्, अकारणक्रुद्धान् तूष्णींदण्डेन राजद्विष्टकारिणश्च।

पूजिताश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम्।
जानीयुः शौचमित्येताः पञ्च संस्थाः प्रकीर्तिताः।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
एकादशोऽध्यायः गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः।।

आदिश्यतां काममीदृशं, कथं पुनरिदं संवादियतुं शक्यमित्यत आह–**तदस्येति**। अस्य तापसस्य, तद् आदेशनं गूढाः सत्रिणः संवादयेयुश्च यथार्थयेयुश्च, लाभाग्निदाहादीनां प्रछन्नोत्पादनेनेत्यर्थसिद्धम्। **सत्त्वेति**। सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां धैर्यबुद्धिवाग्मित्वप्रभुशक्तियुक्तानां प्रष्टॄणां, राजभाव्यं राजसकाशाद् भाविनमर्थं धनादिलाभरूपं, मन्त्रिसंयोगं च मन्त्रिसमागमं च, अनुव्याहरेत् आदिशेत्। आदेशसंवादनाय मन्त्रिकर्तव्यमाह–**मन्त्रीति**। मन्त्री च अर्थाद् घटितसंयोगः, एषां वियतेत सत्त्वप्रज्ञादिसम्पन्नानामर्थे विशिष्य यत्नं कुर्यात्। कथं वियतेतेत्यत्राह–**वृत्तिकर्मभ्यां** वृत्तिः आजीवः कर्म व्यापारः ताभ्यां, सत्त्वप्रज्ञाद्यनुरूपवृत्तिकर्मपरिकल्पनेनेत्यर्थः। **ये चेति**। ये, कारणात् अपकाररूपात्, क्रुद्धाः क्रुद्धत्वेन कापटिकादिद्वारा विज्ञाताः, तान्, अर्थमानाभ्यां, शमयेत् शान्तक्रोधान् कुर्यात्। अकारणक्रुद्धान् राजद्विष्टकारिणश्च तूष्णींदण्डेन उपांशुवधेन शमयेत्।

गूढपुरुषेषु मन्त्रिणः समुदाचार उक्तः। राज्ञस्तमाह–**पूजिताश्चेति**। राज्ञा, अर्थमानाभ्यां पूजिताः सन्तः अर्थाद् गूढपुरुषाः, राजोपजीविनाम् अमात्यादीनां, शौचं शुद्धिं जानीयुः। एतावता अध्यायार्थं तत्प्रान्ते सञ्चष्टे–**इत्येताः पञ्च संस्थाः प्रकीर्तिता इति**। इत्थं कापटिकाद्येकैकप्रधानाः पञ्च संस्थाः सम्यक् तिष्ठन्ति राजप्रयोजनकारिण आस्विति संस्थाः गूढपुरुषकर्मस्थानानि प्रकीर्तिताः व्युत्पादिताः।।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
एकादशोऽध्यायः गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः।

His disciples shall do such acts as to convince the visitors even generating if needed the acts of burning, robbery etc. For persons possessed of foresight he shall foretell the rewards at the hands of the king since they have foresight, eloquence and bravery. He may even suggest changes occurring in the reconstitution of the ministry involving probable changes. The ministers of the should act accordingly so that the king forecast of the ascetic comes true. The king shall appease those who are disaffected on the basis of sufficient reasons by offering them wealth an honour. But those who are disaffected and plotting against the king shall be imposed with punishment in secret.

These five types of spies doing work of espionage under different guises shall ascertain the purity of the character of the servants of the king. For this they shall be honoured by the king with money and titles of honour.

Thus the eleventh chapter of the Arthaśāstra of Kauṭalya dealing with the constitution of spies comes to an end.

Chaper 12

1. प्रक० गूढपुरुषप्रणिधिः ।

Section 8 : Duties Assigned to the Spies

ये चास्य सम्बन्धिनोऽवश्यभर्तव्यास्ते लक्षणमङ्गविद्यां जम्भकविद्यां मायागतमाश्रमधर्मं निमित्तमन्तरचक्रमित्यधीयानाः सत्रिणः संसर्गविद्या वा ।

ये जनपदे शूरास्त्यक्तात्मानो हस्तिनं व्यालं वा द्रव्यहेतोः प्रतियोधयेयुस्ते तीक्ष्णाः ।

गूढपुरुषप्रणिधिरिति सूत्रम्। गूढपुरुषाणां प्रणिधिः प्रणिधानं कार्येषु नियोजनमिहोच्यत इत्यर्थः। तत्र पूर्वाध्यायोद्दिष्टेषु गूढपुरुषेषु कापटिकादीनां स्वरूपं वर्णितं, सत्रितीक्ष्णरसदभिक्षुकीणां तु तद् वर्णनीयमवशिष्यते। तदिहादावभिधीयते। उभयेषां गूढपुरुषत्वाविशेषेऽप्यध्यायपृथक्त्वकरणं कर्तृभेदद्योतनार्थम्। कापटिकादीनां हि पञ्चानां मन्त्रिसहितो राजा कर्ता 'तमर्थमानाभ्यामुत्साह्य मन्त्री ब्रूयादि'त्युक्तत्वात्। सत्रितीक्ष्णरसदभिक्षुकीणा तु विना मन्त्रिणं स्वयमेव राजा कर्ता, मन्त्रिशुद्धिपरिज्ञानायापि तन्नियोजनात्। यद्वक्ष्यति–'तान् राजा स्वविषये मन्त्रिपुरोहितसेनापतियुवराजे'त्यादि। इत्थं स्फुटः कर्तृभेदः। स्वरूपतोऽप्युभयेषामस्ति भेदः। संस्थाशब्दवाच्या हि कापटिकादयः स्वस्थाने सम्यक् तिष्ठन्तो राजार्थमनुतिष्ठन्ति, न सञ्चरन्तः, सत्रिप्रभृतयस्तु सर्वत्र सञ्चरन्त एव राजार्थमनुतिष्ठन्ति सञ्चारपदवाच्या इति।

ये चास्येत्यादि अस्य राज्ञः, सम्बन्धिनः सगन्धाः, अवश्यभर्तव्याः अवश्यपोष्याः ये वन्तिम, लक्षणं सामुद्रिकादि, अङ्गविद्यां शिक्षाव्याकरणादिम् अङ्गस्पर्शेन शुभाशुभपरिज्ञानविद्यां वा, जम्भकविद्यां वशीकरणान्तर्धानविद्यां, मायागतम् इन्द्रजालम्, आश्रमधर्मं मन्वादिधर्मशास्त्रं, निमित्तं कपिञ्जलरुत-पूर्णकुम्भदर्शनादि, अन्तरचक्रं पक्षिभिः शुभाशुभज्ञापनं पक्षिशास्त्रम्, इत्यधीयानाः एवञ्जातीयकमधीत्य विदन्तः, संसर्गविद्या अधीयाना वा कामतदनुबन्धिगीतनृत्तादिशास्त्राणि अधीयानाश्च, ते, सत्रिणः सत्रिसंज्ञाः।

ये जनपद इत्यादि। त्यक्तात्मानाः शरीरनिरपेक्षाः। व्यालं व्याघ्रादिम्। तीक्ष्णाः तदाख्याः।

The spies employed to watch the nearby people and who are classmates (of the king) should be trained in palmistry (lakṣaṇa), ancillaries of the Vedic lore or knowledge of bodily marks (aṅgavidyā), sleight-of-hand or legerdemain (jambhakavidyā) jugglery (māyāgata), science of righteousness, augury (nimittam), omens by the help of birds (antara-cakra) and proficient in erotic science and social intercourse.

ये बन्धुषु निःस्नेहाः क्रूराश्चालसाश्च ते रसदाः।

परिव्राजिका वृत्तिकामा दरिद्रा विधवा प्रगल्भा ब्राह्मण्यन्तःपुरे कृतसत्कारा महामात्रकुलान्यधिगच्छेत्। एतया मुण्डावृषल्यो व्याख्याताः। इति सञ्चाराः।

तान् राजा स्वविषये मन्त्रिपुरोहितसेनापतियुवराजदौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसन्निधातृप्रदेष्टृनायकपौरव्यावहारिककार्मान्तिकमन्त्रिपरिषदध्यक्षदण्डदुर्गान्तपालाटविकेषु श्रद्धेयदेशवेषशिल्पभाषाभिजनापदेशान् भक्तितः सामर्थ्ययोगाच्चापसर्पयेत्।

ये बन्धुष्वित्यादि। क्रूराः आततायिनः। अलसाः अनुत्साहाः। रसदाः तदाख्याः, विषदानेऽपि निश्शङ्का इति कृत्वा तथोक्तिः।

परिव्राजिकेत्यादि। वृत्तिकामा भोगार्थिनी। महामात्रकुलानि अधिगच्छेत् असकृदमात्यगृहाणि गच्छेत् सत्कारस्वीकारार्थम्। यैवम्भूता, सा परिव्राजिकेत्यभिधीयत इत्यर्थः। एतयेति। एतया ब्राह्मणपरिव्राजिकया उक्तया, मुण्डावृषल्यो व्याख्याताः उक्तप्रायाः ब्राह्मणपरिव्राजिकासमानाचारा वेदितव्या इत्यभिप्रायः। तत्र मुण्डाः शाक्यभिक्षुक्यः, वृषल्यः शूद्राः। इति सञ्चाराः इत्युक्तरूपाः सत्रिप्रभृतयः सञ्चारशब्देनाख्यायन्ते।

सञ्चाराणां विनियोगमाह—**तानिति।** राजा स्वविषये आत्मजनपदे तान् सञ्चारान् अपसर्पयेत् चारयेत्। केषु चारयेत्, मन्त्रिपुरोहितसेनापतिप्रभृतिष्वष्टादशपुरुषेषु विषये, मन्त्र्यादीनां शुद्धिज्ञानायेत्यर्थलभ्यम्। तत्र मन्त्र्यादयः प्रसिद्धाः। दौवारिको द्वाराधिकृतः प्रतिहारी, अन्तर्वंशिकः अन्तःपुराधिकृतः, प्रशास्ता स्कन्धावारनिवेशयिता, समाहर्ता राजार्थसमाहरणकर्ता, सन्निधाता भाण्डागाराधिकृतः, प्रदेष्टा कण्टकशोधनाधिकृतः, नायकः एकद्विसहस्रपदातिनेता, पौरव्यावहारिकः पुरमुख्यः पुरप्राड्विवाको वा। पुरपाठेऽप्ययमेवार्थः। कार्मान्तिकः आकरादिकर्माधिकृतः। मन्त्रिपरिषत् मन्त्रिसभा, तदध्यक्षः। भाषाटीकायां तु मन्त्रिपरिषदध्यक्षो नाम द्वादशमण्डलाधिकारनेतेत्युक्तम्। दण्डपालः सैन्यसेनामुखादिनेता। सेनापतिस्तु अक्षौहिणीश्वरः पूर्वमुक्तः। दुर्गपालः प्राकारादिरक्षी, अन्तपालः राज्य-सीमारक्षी यो वीवधाध्यक्ष इत्युच्यते, आटविकः अटवीराज्याधिपतिः। तान् कीदृशान्, श्रद्धेयदेशवेषशिल्पभाषाभिजनापदेशान् देशो मध्यदेशगौडदेशादिः, वेषः प्रलम्बश्मश्रुत्वादिः, शिल्पं कलाकौशलं, भाषा प्राच्योदीच्यादिव्याहारभेदः, अभिजनः ब्राह्मणादिजन्म, एषां देशादीनाम् अपदेशो निर्देशः श्रद्धेयः अनभिशङ्कनीयो विश्वसनीयो येषां तान् तथाभूतान्। कथं कृत्वा चारयेत्, भक्तितः सामर्थ्ययोगाच्च भक्तिं सेव्यगतां सामर्थ्ययोगं सेवकगतं चानुसृत्य। अयं भावः–सेव्येषु मन्त्र्यादिषु यो यद्देवभक्तः तस्मिंस्तद्देवभक्तवेषान् स्वस्वसामर्थ्यानुरूपच्छत्र-ग्रहणादिकर्मनियुक्तांश्च कृत्वा चारयेदिति।

Those who show bravery by ignoring personal safety in confronting elephants and tigers for the sake of wealth they belong to the class of spies called fire brands (Tīkṣṇa).

Those who have no affection for relations, cruel and lazy are called poisoners (rasadas).

A widow of the Brahmin caste in search of livelihood, poor, clever and respected in the harem of the king is a woman ascetic (parivrājika) doing the work of a spy. She should gain entrance into the residences of

the chief-ministers of the king. These rules apply to women with shaved head and belonging to the caste of Śūdras. All these are termed as spies on the move.

The ones who are of noble birth, loyal, reliable, well experienced in putting upon appropriate disguises befitting the countries and trades, having command over various regional languages and arts, shall be employed by the king to spy upon the people of his own country including ministers, priests, commanders of the army, the heir-apparent, the door-keepers, officers in the harem, the magistrate, the collector of general income, chamberlain, commissioner, the city constable, the chief-superintendent of the city, chief of transactions, superintendent of manufactories, the assembly of councillors, heads of various departments, head magistrate and officers in charge of fortifications, boundaries of the country and wild tracts.

तेषा बाह्यं चारं छत्रभृङ्गारव्यजनपादुकासनयानवाहनोपग्राहिणस्तीक्ष्णा विद्युः। तं सत्रिणः संस्थास्वर्पयेयुः।

सूदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधकोदकपरिचारका रसदाः कुब्जावामनाकिरातमूकबधिरजडान्धच्छद्मानो नटनर्तकगायनवादकवाग्जीवनकुशीलवाः स्त्रियश्चाभ्यन्तरं चारं विद्युः। तं भिक्षुक्यः संस्थास्वर्पयेयुः।

सञ्चाराणां मध्ये तीक्ष्णाः मन्त्र्यादीनां बाह्यं समाचारं छत्रभृङ्गाराद्युपग्रहणवृत्त्या तान् सेवमानाः सन्तो जानीयुरित्याह—तेषामित्यादि। तत्र छत्रम् आतपत्रम्। भृङ्गारः पात्रभेदः कनकालुकाख्यः। व्यजनं तालवृन्तम्। पादुका उपानत्। आसनम् उपवेशसंवेशाधारः। यानम् आन्दोलिका। वाहनम् अश्वः। तमिति। तं तीक्ष्णविदितं चारं, सत्रिणः उक्तलक्षणाः, संस्थासु, अर्पयेयुः निवेदयेयुः।

विषदानसुलभसौकर्यां सूदारालिकादिवृत्तिमाश्रिताः रसदाः, तथा कुब्जवामनादिच्छलजीविनः, नटनर्तकादयः, स्त्रियश्च गृहान्तर्गतं चारं जानीयुरित्याह—**सूदेत्यादि। सूदः अन्नकारः**, आरालिको भक्ष्यकारः, स्नापकः स्नपयिता, संवाहकः अङ्गमर्दकः, आस्तरकः शय्यास्तरणकर्ता, कल्पकः नापितः, प्रसाधकः अलङ्कर्ता, उदकपरिचारकः जलहारकः। कुब्जः गडुलः, वामनः खर्वः, किरातः अल्पतनुः, जडः लोकव्यवहारानभिज्ञः। कुब्जादिषु शेषाः प्रतीताः। नटः नवरसाभिनयकर्ता, नर्तकः चारणः अङ्गविक्षेपमात्रकर्ता, गायनः गान्धर्ववित्, वादकः वंशवीणादिवादयिता, वाग्जीवनः पुरावृत्तकथनोपजीवी पुस्तकवाचकः, कुशीलवः वेणः लङ्घनप्लवनादिवृत्तिः। स्त्रियः प्रतारिकाः, स्त्रीग्रहणं षण्डस्याप्युपलक्षणम्। तमिति। तं रसदादिविज्ञातं चारं भिक्षुक्य उक्तलक्षणाः, संस्थास्वर्पयेयुः।

The spies of the class of fiery ones (Tikṣṇas) are employed as bearers of the royal umbrellas, vases, fans and shoes, to attend the throne, chariot and other conveyances to watch the behaviour of various officers. These spies belonging to the category of classmates shall convey the information gathered to the king (from time to time).

The spies called poisoners (rasadas) are engaged in various jobs as sauce-maker (sūda), cook, procurer of water for royal bath, shampooer, the spreader of bed, barber, toilet-maker, water-server—all of whom are in a position to poison the king. Other spies put on the guises of a humpbacked person, a dwarf, a pigmy, a dumb, a deaf, an idiot, a blind etc; (to know the behaviour of officers employed in the palace). Yet others espy the activities of officers putting on the guises of artisans such as actors, dancers, singers, players of various musical instruments, buffoons and bards. Women also resort to such guises for espionage. A mendicant woman is best suited to institute them and collect the information by way of spying.

संस्थानामन्तेवासिनः संज्ञालिपिभिश्चारसञ्चारं कुर्युः। न चान्योन्यं संस्थास्ते वा विद्युः।

भिक्षुकीप्रतिषेधे द्वास्स्थपरम्परा मातापितृव्यञ्जनाः शिल्पकारिकाः कुशीलवा दास्यो वा गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा चारं निर्हरेयुः। दीर्घरोगोन्मादाग्निरसविसर्गेण वा गूढनिर्गमनम्।

संस्थास्वर्पितश्चारः केन द्वारेण राजानं प्राप्नुयादित्यत्राह—**संस्थानामित्यादि**। संज्ञालिपिभिः अर्थसूचनाय स्वसंकेतकल्पिताभिर्लिपिभिः पत्रे निवेशिताभिः। चारसञ्चारं चारस्य बाह्यस्याभ्यन्तरस्य च व्यापारस्य सञ्चारं राज्ञि समर्पणम्। न चेति। संस्थाः ते वा अन्योन्यं न विद्युः, संस्थाः संस्थान्तरवेदिनः सञ्चाराश्च सञ्चारान्तरवेदिनो न भवेयुः, संवादच्छलनपरिहारार्थम् एकविज्ञाने सर्वग्रहणं मा भूदित्येतदर्थं च। अन्योन्यवेदने हि स्वस्वचारस्यान्यचारेण संवादं मिथ्यैव परिकल्प्य स्वामिनं वञ्चयेयुः, एकस्मिन् विज्ञाते तद्द्वारेणान्यस्य तद्द्वारेणान्यस्येति क्रमेण सर्वस्य ग्रहणं च प्रसज्येतेति।

यदि भिक्षुक्यो नान्तः प्रवेशं लभेरन्, तदा सूदादिसकाशाच्चारः कथं निष्क्रामयितव्य इत्यत्राह—**भिक्षुकीति**। भिक्षुकीप्रतिषेधे भिक्षुकीनामन्तःप्रवेशप्रतिरोधे, द्वाःस्थपरम्परा चारं निर्हरेत्। एको द्वाःस्थस्तदनन्तराय द्वास्थय, स तदनन्तरायेति क्रमेण चरमो द्वाःस्थो भिक्षुक्यादये बाह्यजनाय राज्ञे वा चारं समर्पयेदित्यर्थः। तदभावे मातापितृव्यञ्जनाः अन्तःपुरसेवकजनस्य माताहं पिताहमिति बन्धुत्वापदेशिनो वृद्धाः स्त्रियः पुरुषाश्च चारं निर्हरेयुः। शिल्पकारिकाः केशसंस्कारपत्रवल्लीरचनादिवैचित्र्यं शिल्पं तत्कर्त्र्यः, कुशीलवाः गायन्यः, दास्यो वा परिचारिका वा, चारं निर्हरेयुः। गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा गीतेन सूचनीयार्थसूचकपदबन्धचारुणा गेयेन, पाठ्येन तथाविधेन श्लोकेन, वाद्येन वंशवीणादिना, भाण्डगूढलेख्येन भाण्डे जलकुम्भादौ क्षिप्तेन गूढलेख्येन च याः संज्ञा अर्थसूचनाः ताभिर्वा चारं निर्हरेयुः अर्थात् तत्तत्कुशलाः। उक्तोपायासम्भवे सूदादयः स्वयमेव चारनिर्हरणायान्तःपुराद् दीर्घरोगोन्मादापदेशादिना निमित्तेन निर्गच्छेयुरित्याह—**दीर्घेत्यादि**। दीर्घरोगोन्मादाग्निरसविसर्गेण समाहारद्वन्द्वोऽयम्। दीर्घरोगेण गुल्मादिना उन्मादेन ग्रहपीडया अग्निरसविसर्गेण शालायामग्निदानेन अन्नादौ विषदानेन च। अग्निरसविसर्गवचनं तज्जनितेऽन्तःपुरसम्भ्रमे गूढपुरुषाणां रोगाद्यपदेशं विनैव निर्गमनसौकर्यात्।

The disciples of these spies shall convey the information by making use of signs or by written documents. But usually none of them knows each other with regard to their profession of being the spy.

In case the mendicant woman is stopped at the door of the harem spies in the form of door-keepers one after the other upto the inner-most apartment shall collect information. Other spies in the guise of father and mother, women artists, court-bards or prostitutes shall enter the harem under the pretext of taking in musical instruments or through secret writing or by means of signs shall convey the information to the authority. When needed spies may go out in the pretext of having incurable diseases, epilepsy, having been burnt by fire or getting afflicted by poison.

When the three categories of spies give the same information it may be taken as reliable. It they frequently show differences of version they should be secretly punished or dismissed.

त्रयाणामेकवाक्ये सम्प्रत्ययः। तेषामभीक्ष्णविनिपाते तूष्णीदण्डः प्रतिषेधो वा।

कण्टकशोधनोक्ताश्चापसर्पाः परेषु कृतवेतना वसेयुः सम्पातनिश्चरार्थं, त उभयवेतनाः।

गृहीतपुत्रदारांश्च कुर्यादुभयवेतनान्।
तांश्चारिप्रहितान् विद्यात् तेषां शौचं च तद्विधैः।।

गूढपुरुषार्पितस्य चारस्य कथं विश्वास्यतेत्याकाङ्क्षायाम् अन्योन्यानभिज्ञाः त्रयो गूढपुरुषाः परचारमधिकृत्य यदि वाक्यमेकार्थं ब्रूयुस्तदा तत्र विश्वासः कार्यो नत्वन्यथेत्यभिप्रायेणाह–त्रयाणामित्यादि एकवाक्ये परस्परवाक्यसंवादिनि वाक्ये। सम्प्रत्ययः विश्वासः। अभीक्ष्णविनिपाते पौनःपुनिके वाक्यविसंवादे। तेषां तूष्णींदण्डः प्रतिषेधो वा ते उपांशु ताडनीयाः गूढपुरुषकर्मणो वारणीया वेत्यर्थः।

किमेतावन्त एव चारपुरुषाः, उतान्येऽपि सन्तीति जिज्ञासायामाह–कण्टकेत्यादि। कण्टकशोधनोक्ताः कण्टकशोधनाधिकरणोक्ताः सिद्धप्रव्रजितचक्रचरादयश्च अपसर्पाः गूढपुरुषाः कार्याः। ते परेषु शत्रुषु तद्राज्ये तन्मन्त्र्यादिष्वष्टादशतीर्थेषु च कृतवेतनाः कल्पितजीविकाः वसेयुः सेवां कुर्युः। किमर्थं, सम्पातनिश्चारार्थं सम्पातानां चाराणां निश्चारार्थं निरायासानुष्ठानार्थं शत्रुचाराणां स्वराज्यापसर्पणे प्रवृत्तिपरिहाराय च। ते उभयवेतनाः विजिगीषो शत्रोश्च वेतनग्राहिणः।

गृहीतेत्यादि। उभयवेतनान्, गृहीतपुत्रदारान् कुर्यात् गृहीता राज्ञा पूजापूर्वमात्मवशे कृताः पुत्रा दाराश्च येषां तांस्तथाभूतान् कृत्वा परेषु विसृजेदित्यर्थः। अरिप्रहितान् तान् शत्रुप्रेषितान् उभयवेतनान्, तेषां शौचं च स्वीयानामुभयवेतनानां शुद्धिं च, तद्विधैः विद्यात् उभयवेतनद्वारेण जानीयात्।।

Those spies referred to in Book IV, viz; 'Removal of thorns' are to receive their salaries from the kings with whom they live as servants, but when they aid both the states in catching robbers etc; they are to be paid by both the states.

Those spies whose sons and wives are kept as hostages (by the enemies) shall be made recipients of salaries from both the states since they are under the mission of enemies. From people of similar profession their character and conduct shall be ascertained.

एवं शत्रौ च मित्रे च मध्यमे चावपेच्चरान्।
उदासीने च तेषां च तीर्थेष्वष्टादशस्वपि।।
अन्तर्गृहचरास्तेषां कुब्जवामनषण्डकाः।
शिल्पवत्यः स्त्रियो मूकाश्चित्राश्च म्लेच्छजातयः।।
दुर्गेषु वणिजः संस्था दुर्गान्ते सिद्धतापसाः।
कर्षकोदास्थिता राष्ट्रे राष्ट्रान्ते व्रजवासिनः।।
वने वनचराः कार्याः श्रमणाटविकादयः।
परप्रवृत्तिज्ञानार्थाः शीघ्राश्चारपरम्पराः।।
परस्य चैते बोद्धव्यास्तादृशैरेव तादृशाः।
चारसञ्चारिणः संस्था गूढाश्चागूढसंज्ञिताः।।

एवमित्यादि। आवपेत् विसृजेत्। अष्टादशसु तेषां तीर्थेष्वपि शत्रुमित्रमध्यमोदासीनानां मन्त्रिपुरोहित-सेनापतिप्रभृतिषु पूर्वोक्तेषु कार्यस्थानेषु च।।

अन्तरित्यादि। तेषाम् अन्तर्गृहचराः शत्र्वादितत्तीर्थान्तानाम् अन्तर्गृहसञ्चारिणः कर्तव्याः। चित्राः नानाप्रकाराः।।

दुर्गेष्विति। दुर्गेषु जलादिदुर्गवत्सु राजधान्यादिमहानगरेषु, वणिजः, सम्यक् तिष्ठन्तीति संस्थाः गूढपुरुषाः कार्याः। दुर्गान्ते दुर्गसीमायां सिद्धतापसाः संस्थाः कार्याः। राष्ट्रे कर्षका उदास्थिताश्च संस्थाः कार्याः। राष्ट्रान्ते राष्ट्रसीमायां व्रजवासिनः गोपालाः गूढपुरुषाः कार्याः।।

वन इति। वने श्रमणाटविकादयः क्षपणाटवीपालप्रभृतयो वनचराः कार्याः। परप्रवृत्तिज्ञानार्थाः शत्रुव्यापरिज्ञानप्रयोजनाः शीघ्राः क्षिप्रचारिण्यः चारपरम्परा कर्तव्याः।।

परस्येति। एते तादृशाः उक्तजातीयाः, गूढाश्चारगूढसंज्ञिताः छन्नरूपा अपि अच्छन्नचिह्नधारिणः, परस्य शत्रोः, चारसंचारिणः सत्रितीक्ष्णादयः, संस्थाश्च कापटिकोदास्थितप्रभृतयश्च, तादृशैरेव तज्जातीयैरेव, बोद्धव्याः ज्ञातव्याः।।

Thus spies may be employed with regard to kings who are inimical, freindly intermediate and neutral as also the eighteen departments of the government of these (four) type of rulers.

Their inner apartments should be pervaded by spies of the type of the humpbacked, the dwarf, the enuch, women of accomplishments, the dumb and various strata of the Mleccha (lower) caste.

Inside the forts spies as merchants may be employed and in the inner areas of the fortification spies in the guise of saints and ascetics may be put. In country parts and boundaries of the region, spies as cultivators and cowherds.

In forest regions, forest dwellers and wandering mendicants may be employed for spying. They in turn shall ascertain the movements of the enemies and report them quickly to the ruler.

By these series of spies the movement of the enemy should be understood resorting to suitable guises. These wandering spies are thus sometimes employed in extreme secret or on a profession not so secret.

अकृत्यान् कृत्यपक्षीयैर्दर्शितान् कार्यहेतुभिः।
परापसर्पज्ञानार्थं मुख्यानन्तेषु वासयेत्॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
द्वादशोऽध्यायः गुढपुरुषोत्पत्तौ सञ्चारोत्पत्तिः,
गुढपुरुषप्रणिधिः॥

अकृतनिति। अकृत्यान् मुख्यान् असाध्यान् विरुद्धानपि राष्ट्रमुख्यान्, कृत्यपक्षीयैः कार्यहेतुभिः साध्यपक्षोचितैः कार्यकारणैः, दर्शितान् कृत्यता यथा स्यात् तथा बोधितान्, कृत्वेत्यार्थम्। परापसर्पज्ञानार्थं शत्रुचारपुरुषज्ञानाय अन्तेषु राष्ट्रसीमसु वासयेत्॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
द्वादशोऽध्यायः गूढपुरुषोत्पत्तौ सञ्चारोत्पत्तिः, गूढपुरुषप्रणिधिः॥

Those officers who are found not reliable as per the reports of the spies should be sent out to the border areas of the country. They may be engaged to find out the movements of the enemies while living on the boundaries of the state.

Thus the twefith chapter of the Arthaśāstra of Kauṭalya called 'Duties assigned to the spies' comes to an end.

Chapter 13

9. प्रक०स्वविषये कृत्याकृत्यपक्षरक्षणम्।

Section 9 : Engaging Spies Against One's Officers

कृतमहामात्यापसर्पः पौरजानपदानपसर्पयेत्।

सत्रिणो द्वन्द्विनस्तीर्थसभाशालापूगजनसमवायेषु विवादं कुर्युः—सर्वगुणसम्पन्नश्चायं राजा श्रूयते। न चास्य कश्चिद् गुणो दृश्यते यः पौरजानपदान् दण्डकराभ्यां पीडयति इति।

तत्र येऽनुप्रशंसेयुः तानितरस्तं च प्रतिषेधयेत्—मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे। धान्यषड्भागं पण्यदशभागं हिरण्यं चास्य भागधेयं प्रकल्पयामासुः। तेन भृता राजानः प्रजानां योगक्षेमवहाः। तेषां किल्बिषं दण्डकरा हरन्ति, योगक्षेमवहाश्च प्रजानाम्। तस्मादुञ्छषड्भागमारण्यका अपि निवपन्ति—तस्यैतद् भागधेयं योऽस्मान् गोपायतीति। इन्द्रयमस्थानमेतद् राजानः प्रत्यक्षहेडप्रसादाः। तानवमन्मानं दैवोऽपि दण्डः स्पृशति। तस्माद् राजानो नावमन्तव्याः इति क्षुद्रकान् प्रतिषेधयेत्।

स्वविषये कृत्याकृत्यपक्षरक्षणमिति सूत्रम्। स्वविषये स्वपुरे स्वजनपदे च, कृत्याकृत्यपक्षरक्षणं कृत्याः क्रुद्धलुब्धभीतावमानिताः शत्रुभेद्याः तद्विपरीता अकृत्याः कृत्यपक्षस्य अकृत्यपक्षस्य च रक्षणं परोपजापात् पालनम् अत्रोच्यत इत्यर्थः।

तत्र जानपदकृत्याकृत्यपक्षावबोधो जानपदेषु गूढपुरुषप्रणिधानादृते न भवतीति तदिदं पूर्वाध्यायानुक्तमिदानीं प्राप्तावसरमाह—**कृतेत्यादि**। **कृतमहामात्यापसर्पः** महामात्यग्रहणं पूर्वोक्ताष्टाद- शतीर्थोपलक्षणम्। मन्त्रिपुरोहितादिषु चारप्रणिधानानन्तरमित्यर्थः। पौरजानपदान् अपसर्पयेत् अपसर्पैर्गूढपुरुषैः परिशोधयेत् ते स्वस्मिन्ननुरागिणोऽपरागिणो वेति। 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्चे'ति णिच्।

सत्रिण इति। सत्रिणः, द्वन्द्विनः कलहायमानाः सन्तः, तीर्थसभाशालापूगजनसमवायेषु नद्यादितीर्थेषु ब्राह्मणादिसभासु अन्नपानीयादिशालासु कर्मकरवृन्देषु नानाजातीयजनसङ्घेषु च विवादं विरुद्धं वादं वक्ष्यमाणप्रकारं कुर्युः। सर्वगुणेत्यादि स्फुटार्थम्।

तत्रेति। तत्र तीर्थादिषु। ये अनुप्रशंसेयुः यथोक्तराजनिन्दानुगुणं कथयेयुः सत्यमेवमेतदिति, तान् तं च पूर्वनिन्दकं च इतरः सत्र्यन्यतमः प्रतिषेधयेत् वारयेत्। प्रतिषेधनप्रकारं प्रपञ्चयति—**मात्स्यन्यायेत्यादि**। मनुं वैवस्वतं मनुनामानं विवस्वतः सूनुम्। धान्यषड्भागं धान्यस्य षष्ठमंशम्। पण्यदशभागं पण्यादीनां वस्त्रादीनां

विक्रेयद्रव्याणां दशमांशम्। हिरण्यं यथादेशप्रसिद्धम्। भागधेयम् अंशम्। तेन भृताः यथोक्तभागधेयरूपभृतिग्राहिणः सन्तः। प्रजानां योगक्षेमवहाः पौरजानपदानां योगक्षेमवहनरूपकर्मकराः। पौरजानपदान् दण्डकराभ्यां पीडयतीति यद् दूषणमुद्भावितं तत्र समाधिमाह–तेषामिति। तेषां दण्डकराः तत्सम्बन्धिनो दण्डकराः राजभिः प्रजासु प्रयुज्यमाना दण्डाः प्रजाभ्यो गृह्यमाणाः कराश्चेत्यर्थः। प्रजानां किल्विषं हरन्ति पापं चौर्यादिजनितमपनुदन्ति, योगक्षेमवहाश्च योगक्षेमसाधकाश्च भवन्ति। तत्र दण्डानां किल्बिषहरत्वं दण्डानुभवस्य प्रायश्चित्तानुष्ठानस्थानीयत्वाद् बोद्धव्यं, योगक्षेमवहत्वं च स्वधर्मव्यतिक्रमभयोत्पादनेन सन्मार्गप्रवर्तकत्वात्। कराणां योगक्षेमवहत्वं तु जनहितेषु पूर्तादिकर्मसु विनियुज्यमानत्वात् स्पष्टमेव। तस्मादिति। तस्मात् कराणां रक्षाभृतिरूपत्वात्, आरण्यका अपि ऋषयोऽपि, उञ्छषड्भागम् उञ्छस्य कणश आत्तस्य धान्यादेः षष्ठमंशं, निवपन्ति वितरन्ति। किं कृत्वा, यः अस्मान् रक्षति तस्यैतद् भागधेयमिति मत्वा। इन्द्रेति। राजानः प्रत्यक्षहेडप्रसादाः प्रत्यक्षनिग्रहानुग्रहाः, अत एव एतद् इन्द्रयमस्थानम् इमे इन्द्रयमस्थानस्थिताः इन्द्रयमतुल्या इत्यर्थः, तात्स्थ्यात् ताच्छब्द्यम्। तानवमन्यमानमित्यादि स्फुटार्थम्। तानवमन्यमानानिति पाठे व्यधिकरणे द्वितीये।

After engaging spies on the prime ministers the king shall employ them to watch his own people in the city and villages.

Spies of the category of classmates shall engage between themselves in dispute in various places such as holy ghats, assembles, houses, corporations and congregations where peoples converge together. While one holds the view that the king is endowed with all noble qualities, the other negates saying that the king is devoid of any good qualities and that he oppresses citizens and villagers by levying taxes and imposing fines.

When the people are seen to commend the opinion expressed against the nobility of the king and following the latters view, the third one shall intervene and observe as follows : 'Both of you should not maintain like this (without understanding the truth). When people showed the tendency of the proverbial fish (mātsyanyāya = a large fish swallowing the small ones) leading to anarchy they elected Manu of the Vaivasvata race to be their king. They set apart one sixth of the grains, one tenth of the merchandise (in the form of gold) as sovereign dues. Thus accepting proper remuneration the kings administered the people looking after their welfare. By levying taxes and meeting out just punishment, the rulers performed their duty without fail. Hence hermits too supply the king with one-sixth of the grains obtained by them believing firmly that it is the king who affords them the protection. Kingship is thus the combined positions (or status) of Indra (the protector) and Yama (the punisher) and the king is the visible dispenser of punishments and rewards. To disregard them is to invite even divine punishment. Hence kings should not be despised at all." Thus the opposing views should be dismissed by the spy (the third one).

किंवदन्तीं च विद्युः।

ये चास्य धान्यपशुहिरण्यान्याजीवन्ति, तैरुपकुर्वन्ति व्यसने अभ्युदये वा, कुपितं बन्धुं राष्ट्रं वा व्यावर्तयन्ति, अमित्रमाटविकं वा प्रतिषेधयन्ति, तेषां मुण्डजटिल-व्यञ्जनास्तुष्टातुष्टत्वं विद्युः।

किंवदन्तीमिति। किंवदन्तीं च विद्युः जनश्रुतिं च जानीयुः, अर्थात् सत्रिणः।

ये चेति। ये अस्य राज्ञः धान्यपशुहिरण्यानि आजीवन्ति उपजीवन्ति, तैः धान्यादिभिः व्यसने अभ्युदये वा अस्य उपकुर्वन्ति, ये वा कुपितं बन्धुं राष्ट्रं च व्यावर्तयन्ति कोपान्निवर्तयन्ति, ये वा अमित्रं शत्रुम् आटविकं अटवीपालं प्रतिषेधयन्ति शत्रुभवाद् वारयन्ति, तेषां तुष्टातुष्टत्वं तुष्टत्वमतुष्टत्वं च, मुण्डजटिलव्यञ्जना मुण्डजटिलवेषा विद्युः।

The classmate-spies should take into account the rumour also.

Spies in the guises with shaved heads and braided hair shall ascertain the content or discontent among the subjects who live upon grains, cattle and gold, who support the king in good and bad times, who put under restraint the disaffected relative of the ruler or a rebellious district administration or oppose an enemy or disaffected forest dwellers.

तुष्टान् भूयः पूजयेत्। अतुष्टांस्तुष्टिहेतोस्त्यागेन साम्ना च प्रसादयेत्। परस्पराद्वा भेदयेदेनान् सामन्ताटविकतत्कुलीनावरुद्धेभ्यश्च। तथाप्यतुष्यतो दण्डकरसाधनाधिकारेण वा जनपदविद्वेषं ग्राहयेत्। विद्विष्टानुपांशुदण्डेन जनपदकोपेन वा साधयेत्। गुप्तपुत्रदाराना-करकर्मान्तेषु वा वासयेत् परेषामास्पदभयात्।

क्रुद्धलुब्धभीतावमानिनस्तु परेषां कृत्याः। तेषां कार्तान्तिक- नैमित्तिकमौहूर्तिकव्यञ्जनाः परस्पराभिसम्बन्धम् अमित्रप्रतिसम्बन्धं वा विद्युः।

तुष्टातुष्टत्ववेदनानन्तरकार्यमाह–तुष्टानित्यादि। भूयः पूजयेत् तुष्ट्यतिशयार्थम्। तुष्टिहेतोः तुष्ट्यर्थम्। त्यागेन अर्थदानेन। साम्ना सान्त्ववादेन। अर्थदानादिनाप्यतुष्टावाह–परस्परादिति। एनान् अतुष्टान् परस्पराद् भेदयेत् मिथः संहता भूत्वा मापकार्षुरिति। सामन्ताटविकतत्कुलीनावरुद्धेभ्यश्च भेदयेत् सामन्तादिषु मोपजापं कार्षुरिति। तथापि अतुष्यतः भेदनेऽप्यार्जवमप्रतिपद्यमानान्, दण्डकरसाधनाविकारेण दण्डसाधनाधिकादानेन वा करसाधनाधिकारदानेन वा जनपदविद्वेषं जानपदविरोधं ग्राहयेत् विद्विष्टान् तथा प्राप्तजनपदविद्वेषान्, उपांशुदण्डेन रहोघातेन जनपदकोपेन वा जानपदनिष्ठया स्वविद्विष्टजिघांसया वा, साधयेत् दमयेत्। किञ्च गुप्तपुत्रदारान् आकरकर्मान्तेषु वासयेत्, तत्पुत्रदारगुप्तिं स्वयमङ्गीकृत्य तान् अतुष्टान् खनिकर्मस्थानेषु व्यापारयेत्। कस्मात्, परेषामास्पदभयात् शत्रुपक्ष्याणामास्पदमिमे स्युरिति भयात्। तदेवं गूढपुरुषप्रणिधानं व्युत्पादितम्।

अथ स्वविषये कृत्याकृत्यपक्षरक्षणमाह–क्रुद्धेत्यादि। कुद्धलुब्धभीतमानिनः परेषां कृत्याः शत्रू कृत्याः साध्या भेद्या भवन्ति। एतेन शत्रभेद्या अकृत्या इत्यर्थादुक्तप्रायम्। तेषां क्रुद्धादीनां, परस्पराभिसम्बन्धम् अमित्रप्रतिसम्बन्धं वा अन्योन्यसम्बन्धं शत्रुसम्बन्धं च, कार्तान्तिकनैमित्तिकमौहूर्तिकव्यञ्जना विद्युः,

कार्तान्तिका: कृतान्तो दैवं पूर्वकर्म तद्वेदिन: नैमित्तिका: शुभाशुभशकुनज्ञा: मौहूर्तिका: त्रिकालवृत्तज्ञा: तद्वेषा जानीयु:। एतेन अकृत्यज्ञानमप्युक्तप्रायम्।

Those who show affection towards the king should be further encouraged. Disaffected and neutral people should be pleased and won over by gifts and pacification. If they still remain unaffected then such people should be made to hate each other by sowing the seeds of dissension, so that they may alienate themselves from a neighbouring enemy, a wild foresters group, from a banished or imprisoned prince. If they still remain displeased then they should be subjected to penalties or asked to collect fines and taxes which will cause displeaure of the people towards them. Such hated people should be destroyed in secret or made the target of anger of the people of the region. Or their wives and children may be taken under state protection and may be forced to work in mines to avoid them from sheltering enemies. People nurturing anger, avarice, fear and despised are the target of enemies for sowing dissension. Spies under the guises of astrologers and soothsayers fortelling future shall ascertain the relationship with each other with foreign kings.

The affected people may be suitably rewarded by way of wealth and honour. The disaffected ones shall be dealt with the expedienees of conciliation, gifts, dissension or by punishment.

तुष्टानर्थमानाभ्यां पूजयेत्। अतुष्टान् सामदानभेददण्डै: साधयेत्।

एवं स्वविषये कृत्यानकृत्यांश्च विचक्षण:।

परोपजापात् संरक्षेत् प्रधानान् क्षुद्रकानपि।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
त्रयोदशोऽध्याय: स्वविषये कृत्याकृत्यपक्षरक्षणम्।।

एवं कार्तान्तिकादिव्यञ्जनद्वारेण अकृत्येषु कृत्येषु च विज्ञातेषु विजिगीषो: कर्तव्यमाह—तुष्टानिति। तुष्टान् राज्ञि प्रीतिमत: अकृत्यपक्ष्यानित्यर्थ:, अर्थमानाभ्यां पूजयेत् अर्थो धनं मानो बहुमानचिह्नं वलयाङ्गदादि तद्दानेन सत्कुर्यात्। अतुष्टान् कृत्यान् कृत्यपक्ष्यानित्यर्थ:, सामदानभेददण्डै: साधयेद् दमयेत्।

एवमित्यादि। एवम् उक्तप्रकारेण। विचक्षण: नीतिज्ञ:। क्षुद्रकानपि अमुख्यानपि।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
त्रयोदशोऽध्याय: स्वविषये कृत्याकृत्यपक्षरक्षणम्।।

Thus the intelligent king shall protect affected and disaffected people from being influenced by the enemy, whether they be important officers or commoners.

Thus the thirteenth chapter of the Arthaśāstra of Kauṭalya dealing with the engagement of spies against one's own officers comes to an end.

Chapter 14

10. प्रक०परविषये कृत्याकृत्यपक्षोपग्रहः।

Section 10 : Winning Over Faction in an Enemy State

कृत्याकृत्यपक्षोपग्रहः स्वविषये व्याख्यातः परविषये वाच्यः।

संश्रुत्यार्थान् विप्रलब्धः, तुल्यकारिणोः शिल्पे वोपकारे वा विमानितः, वल्लभावरुद्धः, समाहूय पराजितः, प्रवासोपतप्तः, कृत्वा व्ययमलब्धकार्यः, स्वधर्माद् दायाद्याद् वोपरुद्धः, मानाधिकाराभ्यां भ्रष्टः, कुल्यैरन्तर्हितः, प्रसभाभिमृष्टस्त्रीकः, काराभिन्यस्तः, परोक्तदण्डितः, मिथ्याचारवारितः, सर्वस्वमाहारितः, बन्धनपरिक्लिष्टः, प्रवासितबन्धुरिति क्रुद्धवर्गः।

परविषये कृत्याकृत्यपक्षोपग्रह इति सूत्रम्। परविषये शत्रुजनपदे, कृत्याकृत्यपक्षोपग्रहः कृत्यपक्षस्य अतुष्टवर्गस्य अकृत्यपक्षस्य तुष्टवर्गस्य च उपग्रहः उपजापादिना सङ्ग्रहः स्वायत्तीकरणम् इहोच्यत इत्यर्थः।

प्रकरणसङ्गतिमाह–कृत्याकृत्येत्यादि।

कृत्या नाम क्रुद्धलुब्धभीतमानिन इत्युक्तम्। तत्र प्रथमं क्रुद्धान् व्युत्पादयति–संश्रुत्येति। अर्थान् संश्रुत्य विप्रलब्धः ददामीति प्रतिज्ञाय तददानेन वञ्चितः, शिल्पे उपकारे वा तुल्यकारिणोः समानं कर्म कृतवतोर्मध्ये विमानितः अनभिनन्दितोऽन्यतरः, वल्लभावरुद्धः राज्ञः परमाप्तसेवकैः प्रतिषिद्धराजकुलप्रवेशः, समाहूय पराजितः द्यूतक्रीडार्थमाहूय हृतधनः, प्रवासोपतप्तः राजकृतेनावरोधेन स्वेप्सितदेशवासप्रतिबन्धः प्रवासः तेन दुःखितः, कृत्वा व्ययमलब्धकार्यः कार्यार्थं राजवल्लभादिभ्य उत्कोचं दत्त्वाप्यलब्धप्रयोजनः, स्वधर्माद् दायाद्याद् वा उपरुद्धः स्वधर्मो दाक्षिणात्यानां मातुलकन्यापरिणयादिः दायाद्यं दायत्वेन भोग्यं भागिनेयानां केरलेषु मातुलधनं तादृशात् स्वधर्माद् दायाद्याच्च प्रतिषिद्धः, मानाधिकाराभ्यां भ्रष्टः मानः छत्रान्दोलिकादिः परिच्छदबहुमानः अधिकारः समाहर्तृसन्निधातृप्रभृतिनियोगः ताभ्यां प्रच्यावितः, कुल्यैः कुलभवैः राजबन्ध्वादिभिर्निमित्तभूतैः अन्तर्हितः अप्रकाशं गतः, अपलपितगुणत्वादित्यार्थम्। प्रसभाभिमृष्टस्त्रीकः बलात्कारधर्षितदारः, काराभिन्यस्तः बन्दीकृतः, परोक्तदण्डितः अविचार्यैव परवचनप्रत्ययमात्रेण कृतदण्डः, मिथ्याचारवारितः प्राणिवधरूपत्वाद् यज्ञः पापकर्मेत्येवञ्जातीयेन मिथ्यान्यायेन आचाराद् यज्ञादिसत्कर्मानुष्ठानाद्वारितः, सर्वस्वमाहारितः हृतसर्वस्वः, बन्धनपरिक्लिष्टः बन्धनेन कार्येष्वयथार्हनियन्त्रणया परिक्लिष्टः, प्रवासितबन्धुः प्रवासितः स्वदेशान्निष्कासितो बन्धुः पुत्रादिर्यस्य सः, इति एवञ्जातीयः, क्रुद्धवर्गः वेदितव्य इति इति शेषः।

Winning over opposing factions in one's own state has been enumerated and now we may be concerned with those in an enemy state.

Under the category of provoked and offended people include—those who are cheated after making a promise of considerable reward; those who are slighted in the matter of reward despite being equal in skill and productiveness with another equally qualified having been ignored in the matter of recognition; those who are embarrassed by royal courtiers unnecessarily; those who are slighted after being invited (for attending a function); those who are harassed by banishment, those who are cheated from obtaining something after being put to a lot of expenses; those who are deprived of their due inheritance; those who have lost their honour as well as authority; those who are ignored by their own kinsmen; those whose women are assaulted all an a sudden; those who are put in jail; those who are punished on the words of others without a proper enquiry; those who are prevented from doing their duties on account of wrong accusations; those who have lost all their wealth by confiscaton; those who have suffered from imprisonment and those whose relatives are banished from the country.

स्वयमुपहतः, विप्रकृतः, पापकर्माभिख्यातः, तुल्यदोषदण्डेनोद्विग्नः, पर्यात्तभूमिः, दण्डेनोपहतः, सर्वाधिकरणस्थः, सहसोपचितार्थः, तत्कुलीनोपाशंसुः, प्रद्विष्टो राज्ञा, राजद्वेषी चेति भीतवर्गः।

परिक्षीणोऽत्यात्तस्वः कदर्यो व्यसन्यत्याहितव्यवहारश्चेति लुब्धवर्गः।

आत्मसम्भावितो मानकामः शत्रुपूजामर्षितो नीचैरुपहितस्तीक्ष्णः साहसिको भोगेनासन्तुष्ट इति मानिवर्गः।

भीतवर्गमाह—स्वयमित्यादि। स्वयमुपहतः धनार्थं स्वकृतेन परमारणादिना नृशंसकर्मणा दूषितः, विजिगीषुणा वा स्वयं धनदानेन नृशंसकर्म परमारणादिकं कारयित्वा दूषितः। स हि विजिगीषुसकाशाद् भीतो भवति—'शत्रुपक्षादधिकधनलाभे मामप्ययं हन्यादिति विजिगीषुरात्मानमभिशङ्केतेति मत्वा। विप्रकृतः अन्तःपुरादौ विजिगीषुविरुद्धक्रियारम्भः, पापकर्माभिख्यातः ब्रह्महत्यादिपापकर्माभिशस्तः, तुल्यदोषदण्डेन उद्विग्नः, स्वसमानदोषेऽन्यस्मिन् दण्डं प्रयुक्तं दृष्ट्वा भीतः मय्यपि दण्डः पतेदिति, पर्यात्तभूमिः भूम्यपहर्ता, दण्डेनोपहतः कर्शितः, सर्वाधिकरणार्थः सर्वेषु राजकीयनियोगस्थनेषु प्राप्तस्वाम्यः, सहसोपचितार्थः अकस्माद् साहसेन वा वर्धितधनः, साहसेति च पाठः। तत्कुलीनोपाशंसुः तस्य राज्ञः कुलीनं दायादम् उपाशंसुः कामुक उपाश्रित इत्यर्थः। शेषं स्फुटम्।

लुब्धवर्गमाह—परीत्यादि। परिक्षीणः विनष्टसर्ववैभवः, अत्यात्तस्वः अत्यात्तं राज्ञा दण्डकररूपतयातिमात्रं गृहीतं स्वं धनं यस्य सः, कदर्यः कृपणः, व्यसनी स्त्रीपानादिव्यसनवान्, अत्याहितव्यवहारः अतिमात्रप्रयुक्तधननिमित्तव्यवहारः।

मानिवर्गमाह—आत्मेति। आत्मसम्भावितः अहमतीव विद्वान् शूर इति, मानकामः धनमवधीर्य

पूजामात्राभिलाषी, शत्रुपूजामर्षितः अनेन मम शत्रुः पूजित इति प्राप्तार्षः, नीचैरुपहितः दुर्जनैः क्वचित् कार्येऽभिनिवेशितः, तीक्ष्णः आत्मत्यागी, साहसिकः अतर्कितप्रवृत्तिः साहसं तद्वान्, भोगेन असन्तुष्टः क्लृप्तया भृत्या तृप्तिमप्राप्तः।

Those who come under the category of alarmed persons (who is afraid of the rulers) include : one who has fallen a victim by one's own reckless deeds; one who is offended by the king; one whose sinful deeds are exposed; one who is anxious of getting punished as in the case of another for a similar guilt; one whose land is already confiscated; one who has been put down by severe punishment; one who is in charge of several government departments; one who has acquired much wealth all as a sudden; one who is a close relative of such a person (who has amassed much wealth); one who is considered as an enemy by the king and one who speaks ill of the king.

Those who are considered as ambitious include one who is impoverished; one who has lost all his wealth and prosperity; one who is niggardly; one who is addicted to evil propensities and one who is caught up with dangerous litigation involving much loss.

Those who are considered as haughty persons include, those who are self-sufficient and as such self-conceited; those who are angry in finding his enemies placated by the ruler; those surounded by low-class of people; those who are given to cruel actions; those who are fond of bravery; and those who are not contented with prosperity.

तेषां मुण्डजटिलव्यञ्जनैर्यो यद्भक्तिः कृत्यपक्षीयस्तं तेनोपजापयेत्।

यथा मदान्धो हस्ती मत्तेनाधिष्ठितो यद्यदासादयति तत् सर्वं प्रमृद्नात्येवमयमशास्त्रचक्षुरन्धो राजान्धेन मन्त्रिणाविष्ठितः पौरजानपदवधायाभ्युत्थितः। शक्यमस्य प्रतिहस्ति-प्रोत्साहनेनापकर्तुम्, अमर्षः क्रियताम् इति क्रुद्धवर्गमुपजापयेत्।

यथा लीनः सर्पो यस्माद् भयं पश्यति तत्र विषमुत्सृजत्येवमयं राजा जातदोषाशङ्कस्त्वयि पुरा क्रोधविषयमुत्सृजाति, अन्यत्र गम्यताम् इति भीतवर्गमुपजापयेत्।

यथा श्वगणिनां धेनुः श्वभ्यो दुग्धे न ब्राह्मणेभ्यः एवमयं राजा सत्त्वप्रज्ञावाक्य-शक्तिहीनेभ्यो दुग्धेनात्मगुणसम्पन्नेभ्यः । असौ राजा पुरुषविशेषज्ञः सेव्यतामिति लुब्धवर्गमुपजापयेत्।

क्रुद्धादीनां कृत्यपक्षीयाणां मध्ये यो यदभिलषति तं मुण्डजटिलव्यञ्जनमुखेन तद्दानपूर्वं भेदयेदित्याह–तेषामित्यादि।

तत्र क्रुद्धवर्गस्य भेदनप्रकारमाह–यथा मदान्ध इत्यादि। मत्तेनाधिष्ठितः प्रमादिना हस्तिपकेन नियम्यमानः। आसादयति दृष्टिविषयं करोति। प्रमृद्नाति नाशयति। अशास्त्रचक्षुः राजशास्त्रलक्षणनेत्रहीनः।

अभ्युत्थित: उद्युक्त:। प्रतिहस्तिप्रोत्साहनेन प्रत्यर्थ्युत्साहजननेन। अमर्ष: क्रियतां प्रकोप उत्पाद्यतां, राज्ञ:।

भीतवर्गस्याह–**यथा** लीन इत्यादि। भयं पश्यति आत्मनो विपत्तिमभिशङ्कते। पुरा जातदोषाशङ्क: पूर्वमुत्पन्नदोषवितर्क:, अथवा पुराशब्द उत्सृजतीत्यनेन सम्बध्यते उत्स्रक्ष्यतीत्यर्थ:।' यावत्पुरानिपातयोरि'ति लट्।

लुब्धवर्गस्याह–यथा श्वगणिनामित्यादि। श्वगणिनां धेनु: श्वगणस्वामिनां गौ:। दुग्धे क्षीरं स्रावयति। अयं सन्निहित:। दुग्धे फलं ददाति। असौ विप्रकृष्ट: सामन्त:। पुरुषविशेषज्ञ: पुरुषतारतम्यवेदी।

All these categories of people (mentioned above) may be put to test by spies disguised as shaven headed people, those with matted hair (as an ascetic), by proclaiming that they are with them in their activities like intrigues.

For instance the provoked category may be told that "the king is like an elephant in rut and mounted over by a driver under intoxication trampling everything that comes underway. He who is dispossessed of the eye of political wisdom, blindly attempts to oppress the citizen as well as the people of the country. It is possible to restrain him in time by provoking a rival elephant."

Those alarmed persons may be taken into confidence by telling them that "just as a dormant serpent emits poison when it is provoked, the king apprehending danger from you people in likely to emit the poison of his anger and hence ere long you may get out from this region."

Those ambitious people may be won over saying that just as the cow of dog-breeders (who hunt for animals) provides milk only to the dogs, this king, obliges (by giving gifts) only people devoid of inner qualities such as valour, foresight, eloquence and bravery. (On the other hand) our king is able to distinguish people possessed of noble qualities and hence he may be courted.

यथा चण्डालोदपानश्चण्डालानामेवोपभोग्यो नान्येषामेवमयं राजा नीचो नीचानामेवोपभोग्यो न त्वद्विधानामार्याणाम्। असौ राजा पुरुषविशेषज्ञ: तत्र गम्यतामिति मानिवर्गमुपजापयेत्।

तथेति प्रतिपन्नांस्तान् संहितान् पणकर्मणा।
योजयेत यथाशक्ति सापसर्पान् स्वकर्मसु।।
लभेत सामदानाभ्यां कृत्यांश्च परभूमिषु।
अकृत्यान् भेददण्डाभ्यां परदोषांश्च दर्शयेत्।।

।। इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
चतुर्दशोऽध्याय: परविषये कृत्याकृत्यपक्षोपग्रह:।।

मानिवर्गस्याह–यथा चण्डालेत्यादि। चण्डालोदपान: चण्डालकूप:। आर्या: शिष्टा:।

तथेतीति। तथेति प्रतिपन्नान् उपजापानुरोधेन परपक्षप्रवेशमङ्गीकृतवत:, पणकर्मणा संहितान् सत्यशपथादिना कृतसन्धानान्, तान् कृत्यान्, सापसर्पान् चारसहितान् कृत्वा, यथाशक्ति स्वकर्मसु योजयेत नियुञ्जीत।।

लभेतेति। परभूमिषु परजनपदे, कृत्यान्, सामदानाभ्यां, लभेत साधयेत्, भेदस्य तेषु भवत एव सिद्धत्वादनुपयोग इत्यभिप्राय:। अकृत्यान् भेददण्डाभ्यां लभेत। अकृत्यान् प्रति भेदनसाधनेषु परदोषप्रदर्शनस्य मुख्यत्वादाह–परदोषान् दर्शयेच्च बोधयेच्च।।

।। इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे चतुर्दशाऽध्याय: परविषये कृत्याकृत्यपक्षोपग्रह:।।

The haughty persons may be won over by telling them that "as the reservoir of water of Caṇḍalas is useful only to Caṇḍalas but not for others, the present king is basically of low birth and as such serviceable only to them but not for those of noble birth. But the other king could distinguish the nobility of the people and hence worthy of being courted.

All such dissatified persons may be brought together under a solemn pledge and may be employed in suitable jobs all the while keeping them under the company of suitable spies.

By employing persuasion and bestowing rewards friends of a foreign king may be won over. It they still continue to be implacable enemies, the use dissension comes necessary to bring them around.

Thus the fourteenth chapter of the Arthaśāstra of Kauṭalya dealing with the winning over of the factions in an enemy state comes to an end.

Chapter 15

11. प्रक० मन्त्राधिकारः।

Section 11 : Counselling

कृतस्वपक्षपरपक्षोपग्रहः कार्यारम्भांश्चिन्तयेत्। मन्त्रपूर्वाः सर्वारम्भाः।

तदुद्देशः संवृतः कथानामनिःस्नावी पक्षिभिरप्यनालोक्यःस्यात्। श्रूयते हि शुकशारिकाभिर्मन्त्रो भिन्नः श्वभिरन्यैश्च तिर्यग्योनिभिः। तस्मान्मन्त्रोद्देशमनायुक्तो नोपगच्छेत्। उच्छिद्येत मन्त्रभेदी।

मन्त्रभेदो हि दूतामात्यस्वामिनामिङ्गिताकाराभ्याम्। इङ्गितमन्यथावृत्तिः। आकृतिग्रहणमाकारः।

मन्त्राधिकार इति सूत्रम्। कर्मणामारम्भोपायादिकार्यनिरूपणं मन्त्रः, स इहाधिक्रियत इत्यर्थः। सर्वोपधाशुद्धा मन्त्रिणः कर्तव्या इत्युक्तम्। मन्त्रस्वरूपं तु नोक्तम्। तदिहोच्यत इति सम्बन्धः।

स्वविषये परविषये च कृत्याकृत्यानां स्वानुकूलीकरणानन्तरं विजिगीषुणा स्वविषये दुर्गादीनां परविषये सन्धिविग्रहादीनां च कर्मणाम् आरम्भाः विमृश्य राज्ञा निर्धारयितव्या इत्याह–**कृतेत्यादि**। चिन्तयेत् मन्त्रयेत्। चिन्तने हेतुमाह–**मन्त्रपूर्वाः सर्वारम्भा** इति। प्रथमं मन्त्रः तत आरम्भ इत्येष क्रमः कर्मसमृद्धिफलो लोके नियतो यस्मात् तस्माच्चिन्तयेदित्यभिप्रायः।

मन्त्रदेशमाह–तदित्यादि। तदुद्देशः मन्त्रयोग्यो देशः, संवृतः सर्वत आवृतः। कथानां वचनानाम् अनिस्स्रावी निस्स्रावो बहिर्निःष्यन्दः तद्वान् न भवतीत्यनिःस्रावी, अन्तः कथ्यमानं बहिःस्थितैर्यथा न श्रूयेत तथा सन्निवेशित इत्यर्थः। पक्षिभिरपि अनालोक्यः अदृश्यश्च स्यात्। कुत इत्यत आह–**श्रूयते हीत्यादि**। भिन्नः प्रकाशितः। **तस्मादित्यादि**। अनायुक्तः राज्ञा मन्त्रकर्मणि अनियुक्तः। मन्त्रभेदने दण्डमाह–**उच्छिद्येतेति**। उच्छेदनमुन्मूलनम्।

विनैव वचनमायुक्तामिङ्गिताकाराभ्यामपि भवतीत्याह–**मन्त्रभेदो हीत्यादि**। अन्यथावृत्तिः स्वाभाविकचेष्टितविलक्षणं चेष्टितम्। आकृतिग्रहणम् आकारः आकृतिः अङ्गसंस्थानं तद्रूपं ग्रहणं भावज्ञानसाधनं स्वाभाविकाकृतिविलक्षणो मुखमालिन्यादिराकृतिविशेष इत्यर्थः, स आकारः आकारशब्दवाच्यः।

Having properly gained absolute control over both one's own and enemies, state in the matter of the behaviour of people, the king shall enter

into the act of counselling in administration. For all matters should be initiated after proper conselling.

The hall chosen for this should have proper enclosure. The deliberations should not be overheard by the people outside. Even birds should not have opportunity to see or hear the counselling. It is heard that birds like parrots and minas often (reproduce what is heard and thus) convey the deliberations. Dogs and other animals are also found acting in a similar manner. Hence without ensuring proper secrecy one should not enter the chamber for counselling. One who discloses the secret affairs is likely to get destroyed.

The loss of secrecy of the counselling is due to the changes in the attitude as well as in the countenances of messengers, ministers and masters themselves. Bhaviour in a different manner denotes the attitude and change in the countenance is noticeable by physical appearance.

तस्य संवरणम् आयुक्तपुरुषरक्षणमा कार्यकालादिति। तेषां हिं प्रमादमदसुप्त-प्रलापकामादिरुत्सेकः प्रच्छन्नोऽवमतो वा मन्त्रं भिनत्ति। तस्माद् रक्षेन्मन्त्रम्।

मन्त्रभेदो ह्ययोगक्षेमकरो राज्ञस्तदायुक्तपुरुषाणां च। तस्माद् गुह्यमेको मन्त्रयेतेति भारद्वाजः। मन्त्रिणामपि हि मन्त्रिणो भवन्ति। तेषामप्यन्ये। सैषा मन्त्रिपरम्परा मन्त्रं भिनत्ति।

तस्मान्नास्य परे विद्युः कर्म किञ्चिच्चिकीर्षितम्।
आरब्धारस्तु जानीयुरारब्धं कृतमेव वा।।

तस्येति। तस्य संवरणम् इङ्गिताकारयोर्गोपनं, स च तच्च तदितीह 'नपुंसकमनपुंसकेने'ति नपुंसकशेष एकवद्भावश्च। आयुक्तपुरुषरक्षणम् आयुक्तानां पुरुषाणां मन्त्राधिकृतानां दूतमन्त्रिप्रभृतीनां मन्त्रभेदस्थानेभ्यो रक्षणं च, आ कार्यकालात् कार्यसिद्धिकालमभिव्याप्य, कर्तव्यमिति शेषः। मन्त्रभेदस्थानं प्रपञ्चयति–**तेषां हीति।** तेषाम् आयुक्तानाम्। प्रमादमदसुप्तप्रलापकामादिः प्रमादः कार्यान्तरवैयग्र्यप्रभवमनवधानं मदो मद्यपानादिजश्चित्तविकारः सुप्तप्रलापः स्वप्नालापाः कामो विषयतृष्णा एते आदयो यस्य दोषसमुदायस्य सः, उत्सेकः गर्वः, प्रच्छन्नः कुड्यान्तरितः श्रोता, अवमतः जडोऽयमित्यवज्ञातः, वाशब्दः समुच्चये, मन्त्रं भिनत्ति रहसि विमृश्य निर्णीतमर्थं बहिरुद्गिरति। **तस्मादिति।** तस्मात् प्रमादादेरवमतपर्यन्ताद् वर्गात्, मन्त्रं रक्षेत्।

मन्त्रभेदो हीत्यादि। अयोगक्षेमकरः योगक्षेमविघातकः। गुह्यं गोप्यमर्थम्। एकः मन्त्रिणापि द्वितीयेन विनाभूतः। भारद्वाजपक्षस्य समर्थकमाह–**मन्त्रिणामपीत्यादि।** मन्त्रिपरम्परा मन्त्रिसन्तानः।

तस्मादिति। तस्मात् मन्त्रभेदप्रसङ्गात्, अस्य विजिगीषोः, चिकीर्षितं कर्तुमिष्टं, कर्म, परे अन्ये, न विद्युः, किन्तु आरब्धारः कर्मानुष्ठानोपक्रमकर्तारः, जानीयुः। तेऽपि कदा जानीयुः, आरब्धं जानीयुः आरम्भानन्तरमनुमिनुयुः, आरम्भमात्रेण कर्मणः कृत्स्ना गतिरनुमातुं शक्या चेत्। यदि न शक्या तेऽप्या निष्पत्तेर्न जानीयुरित्यभिप्रायेणाह–**कृतमेव वेति।।**

The secrecy of a subject of council should be maintained by keeping guard over the officers concerned till the matter is accomplished. The betrayal of the secrecy of the counsel on the part of the officers is due to their curelessness, intoxication, talking in sleep, love and other evil habits. Owing to haughtiness on their part or listening to them behind a wall etc; will contribute to the loss of secrecy. Hence utmost care should be taken to safeguard the counsels against such dangers.

Disclosure of counsel will be disadvantageous to the king as well as the officials concerned. Hence Bhāradvāja is the opinion that the king should counsel with a single minister in a secluded place. Ministers themselves will be having many counsellors and they in turn will deliberate with their assistants. Thus a series of ministers getting involved in a deliberation will certainly entail the disclosure of counsels.

Hence the course of action which the king proposes to undertake shall not be known to others. Even those involved shall know about it when it is started or finished.

नैकस्य मन्त्रसिद्धिरस्तीति विशालाक्षः। प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः। अनुपलब्धस्य ज्ञानमुपलब्धस्य निश्चयबलाधानमर्थद्वैधस्य संशयच्छेदनमेकदेश- दृष्टस्य शेषोपलब्धिरिति मन्त्रिसाध्यमेतत्। तस्माद् बुद्धिवृद्धैः सार्धमासीत मन्त्रम्।

न कञ्चिदवमन्येत सर्वस्य शृणुयान्मतम्।
बालस्याप्यर्थवद् वाक्यमुपयुञ्जीत पण्डितः।।

एतन्मन्त्रज्ञानं नैतन्मन्त्ररक्षणमिति पाराशराः। यदस्य कार्यमभिप्रेतं तत्प्रतिरूपकं मन्त्रिणः पृच्छेत्—कार्यमिदमेवमासीदेवं वा यदि भवेत् तत् कथं कर्तव्यमिति। ते यथा ब्रूयुः तत् कुर्यात्। एवं मन्त्रोपलब्धिः संवृतिश्च भवतीति।

तदिदं भारद्वाजमतमाक्षिप्य विशालाक्षः प्रत्यवतिष्ठत इत्याह—**नैकस्येत्यादि**। प्रत्यक्षपरोक्षेत्यादिवाक्येन राजकर्मणः सर्वस्य सहायसापेक्षत्वं येन दृढीकरणम्, इदमदो वेत्यर्थयोर्द्विधाभवने सन्देहनिवर्तनम्, अंशेनोपलब्धस्यांशान्तरानुमितिरित्येवञ्जातीयं कार्यं मन्त्रिसाध्यमित्याह—**अनुपलब्धस्येत्यादिना**। **तस्मादिति**। तस्माद् राजवृत्तेः सहायसापक्षेत्वनियमात्, बुद्धिवृद्धैः बुद्धिप्रशस्तैः सार्धं, मन्त्रम् आसीत मन्त्रमुद्दिश्यासीत। मन्त्रशब्दस्य भावार्थत्वाद्वा 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वक्तव्यम्' इति कर्मसंज्ञायां द्वितीया।

न कञ्चिदित्यादि। नावमन्येत नावजानीयात्। उपयुञ्जीत स्वीकुर्वीत।।

सोऽयं विशालाक्षपक्षो मन्त्रज्ञानानुकूलः, नतु मन्त्ररक्षणानुकूल इति वदन्तः पराशरशिष्याः प्रत्यवतिष्ठन्ते इत्याह—**एतदित्यादि**। कस्तर्हि मन्त्ररक्षणोपाय इत्याह—**यदस्येति**। अस्य यत् कार्यम्, अभिप्रेतं मन्त्रयितुमिष्टं, तत्प्रतिरूपकं तत्प्रतिबिम्बभूतं तत्समानरूपं कार्यं कथागतं पुराणगतं वापदिश्य, मन्त्रिणः पृच्छेत्। कथं पृच्छेत्, इदं कार्यम्, एवमासीद् यदि अनेन प्रकारेण निष्पन्नं चेत्, अथवा एवं भवेद् यदि अनेन प्रकारेण

निष्पाद्यं चेत्, कथं कर्तव्यं तर्हि केन प्रकारेणानुष्ठेयमिति। ते पृष्टा मन्त्रिणः, यथा ब्रूयुः, तत् कुर्यात् अनुतिष्ठेत्। एवम् अस्मिन् मन्त्रानुष्ठानप्रकारे, मन्त्रोपलब्धिः संवृतिश्च भवति मन्त्रज्ञानं मन्त्रगोपनं च सिध्यतीति।

Viśālākṣa is of the opinion that counselling with a single minister is not enough. It is because the function of a king is dependent upon the inference after considering both the visible and invisible causes. One should have the knowledge of what is not perceived and ascertainment of what is already gathered. This is necessary to clear the doubts when there is the susceptibility of two opinions. Further one has to deduce the fact in whole from what has been known only partially. Hence counselling should be with persons of wide wisdom.

One should not despise the views of any one; but listen to all those different opinions. A wise one shall taking into account and make use of the sensible views of even a child.

The school of Pārāśaras opine that this is just knowledge of the conselling but not protection. The king shall consult the opinion of the ministers on a matter of his own concern as if it is the view of another postulating that this was the given situation and if it is made otherwise what shall be done? When the ministers express their views in this regard, the king may approve it for initiating the action. Thus not only counselling but also its protection is accomplished.

नेति पिशुनः। मन्त्रिणो हि व्यवहितमर्थं वृत्तमवृत्तं वा पृष्टमनादरेण ब्रुवन्ति प्रकाशयन्ति वा। स दोषः। तस्मात् कर्मसु ये येष्वभिप्रेतास्तैः सह मन्त्रयेत्। तैर्मन्त्रयमाणो हि मन्त्रबुद्धिं गुप्तिं च लभत इति।

नेति कौटल्यः। अनवस्था ह्येषा। मन्त्रिभिस्त्रिभिश्चतुर्भिर्वा सह मन्त्रयेत। मन्त्रयमाणो ह्येकेनार्थकृच्छ्रेषु निश्चयं नाधिगच्छेत्। एकश्च मन्त्री यथेष्टमनवग्रहश्चरति। द्वाभ्यां मन्त्रयमाणो द्वाभ्यां संहताभ्यामवगृह्यते, विगृहीताभ्यां विनाश्यते। त्रिषु चतुर्षु वा नैकान्तं कृच्छ्रेणोपपद्यते महादोषम्। उपपन्नं तु भवति। ततः परेषु कृच्छ्रेणार्थनिश्चयो गम्यते, मन्त्रो वा रक्ष्यते।

तदुभयमपि न सिध्यतीति वदन् नारदः प्रत्यवतिष्ठते—नेतीति। उभयासिद्धौ हेतुमाह—मन्त्रिणो हीत्यादि। व्यवहितं रूपान्तरावच्छादितस्वरूपम्। अनादरेण ब्रुवन्ति अनास्थया कथयन्ति नतु पर्यालोच्य कथयन्ति, प्रकाशयन्ति वा भिन्दन्ति च, अस्मास्वविश्वस्तोऽयं राजास्मदनुष्ठेयमप्यर्थमस्मासु न प्रकाशयतीति कोपादिति भावः। तस्मादिति। तस्माद् यथोक्तदोषप्रसङ्गात्, ये येषु कर्मसु अभिप्रेता मन्त्रणानुष्ठाननिपुणतया विश्वस्ततया चाभिमताः, तैः सह मन्त्रयेत्। तथा मन्त्रणे गुणमाह—तैरित्यादि।

इदमपि मतमयुक्तमित्याह—नेतीति। कुत इत्यत्राह—अनवस्थेति। हि यतः एषा अनवस्था यथोक्ताभ्युपगमोऽनवस्थापादकः। अयं भावः—तत्तत्कर्माभिप्रेतैः सह मन्त्रणाङ्गीकारे कर्मणां बहुत्वाद् बहुप्रकारत्वाच्च मन्त्रीयत्तानवधारणप्रसङ्ग इति। स्वमतमाह—मन्त्रिभिस्त्रिभिरित्यादि। एकेन सह मन्त्रणे कार्येष्वित्यर्थः। अनवग्रहः निष्प्रतिद्वन्द्वः। चरति वक्ति अनुतिष्ठति च। द्वाभ्यां सह मन्त्रणे

दोषमाह—द्वाभ्यामित्यादि। संहताभ्याम् अवगृह्यते एकमताभ्यां सद्भ्यां नीयते राजा, विगृहीताभ्यां विनाश्यते परस्परविपरीतमताभ्यां सद्भ्यां कार्यहानिं प्राप्यते। त्रिचतुरमन्त्रिपक्षे विशेषमाह—त्रिष्विति। त्रिषु चतुर्षु वा मन्त्रसहायेषु, महान् दोषोऽनर्थो येन तत् महादोषं परमानर्थहेतुभूतं राजावग्रहणादिकं, नैकान्तं नियतं न भवति, कृच्छ्रेण उपपद्यते कदाचिदुत्पाद्यमानमपि महता यत्नेनोत्पद्यते नाल्पेन यत्नेनेत्यर्थः। महादोष इति पाठे एकद्विमन्त्रिपक्षोक्तो महान् दोष इत्यर्थः कर्मधारयेण लभ्यः। उपपन्नं तु भवति मन्त्रनिश्चयेन मन्त्ररक्षणेन च उपपत्तियुक्तं भवति, अर्थाच्चिन्त्यमानं कर्म। पञ्चादिषु मन्त्रसहायेषु को दोषस्तत्राह—तत इत्यादि। ततः परेषु चतुर्भ्योऽधिकेषु पञ्चादिषु।

"Not so" says Piśuna. Ministers are apt to give an advice on a postulated situation without much deliberation and they are likely give casual counsel and are apt to reveal them (to others). This is a serious fault. Hence one should elicit opinions from those who are concerned with the particular acts (or situation). In that case, deliberating with them will elicit proper consel as well as the desired secrecy.

"Not so" maintains Kauṭalya. This (counselling with concerned ministers) will entail an endless process. One should take into confidence for counselling with just three or four ministers. Counselling with a single person in a matter involving ambiguity will not yield a definite opinion. A single minister is likely to waver in his view without any restraining forces. By counselling with two 'one may be misled if they suggest a single view, but that can be destroyed by those who are opposed to them. By consulting with three or four ministers the king will not suffer any serious disadvantage, Moreover this will help him to arrive at a proper opinion. If he is to deliberate with more persons (than three or four), he will have to arrive at a decision after much deliberation, even though the secrecy is ensured.

देशकालकार्यवशेन त्वेकेन सह द्वाभ्यामेको वा यथासामर्थ्यं मन्त्रयेत।

कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद् देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः। तानेकैकशः पृच्छेत् समस्तांश्च। हेतुभिश्चैषां मतिप्रविवेकान् विद्यात्। अवाप्तार्थः कालं नातिकामयेत्। न दीर्घकालं मन्त्रयेत। न च तेषां पक्ष्यैर्येषाम् अपकुर्यात्।

देशकालकार्यापेक्षया कदाचिदेकेन द्वाभ्यां च सह मन्त्रणम्, असहायस्य सतो वा मन्त्रमिष्यत इत्याह—देशेत्यादि। यथासामर्थ्यम् आत्मात्ममन्त्रिसामर्थ्यानतिक्रमेण।

अथ मन्त्रस्य पञ्चाङ्गत्वं व्युत्पादयति—कर्मणामिति। कर्मणाम् आरम्भोपायः स्वविषये परिखाप्राकारादिरूपदुर्गादिसृष्टिलक्षणानां परविषये सन्धिविग्रहादिनिमित्तदूतसम्प्रेषणादिलक्षणानां च कार्याणामुपक्रमोपायः, पुरुषद्रव्यसम्पत् स्वविषये पुरुषाः दुर्गादिनिर्माणकुशलास्तक्षायस्कारादयः द्रव्याणि पृथुच्छदादिदारव्यवृक्षादीनि परविषये पुरुषाः सन्ध्याद्यनुष्ठानकुशलाः दूतसेनापतिप्रभृतयः द्रव्याणि

रत्नस्वर्णादीनि, तेषां सम्पद् गुणवत्ता समृद्धिश्च, देशकालविभाग: देश: स्वविषये दुर्गाद्यारम्भे जनपदमध्यान्तादिरनूपादिश्च काल: सुभिक्षदुर्भिक्षादिर्वर्षादिश्च परविषये सन्ध्यादौ देश: महाफलोर्वरादि: काल: अभियोगानभियोगाद्यवस्था तेषां सर्वेषां विभाग: विवेक: विनिपातप्रतीकार: विनिपातो विघ्नो दुर्गनिर्माणादिविषय: सन्धिपुरुषप्रेषणादिविषयश्च तस्य प्रतीकार: प्रशमनं, कार्यसिद्धि: कर्मफलं क्षय: स्थानं वृद्धिरित्येवं त्रिरूपम्। इति पञ्चाङ्गो मन्त्र:। मन्त्रविषयमर्थं मन्त्रिष्वेकैकमाहूयान्यासन्निधाने पृच्छेत्– कस्तेऽत्राभिप्राय इति, संमेल्य च सभायां तान् सर्वान् 'कोऽत्र वोऽभिप्राय' इति पृच्छेदित्याह–**तानेकैकश** इत्यादि। **हेतुभिरित्यादि**। एषां मतिप्रविवेकान् अभिप्रायविभागान्, हेतुभि: विद्यात् कारणै: पर्यालोचयेद् अर्थनिश्चयार्थम्। अवाप्तार्थ: निश्चितार्थ:। अपकार्यजनबन्धुभि: सह न मन्त्रयेतेत्याह–**न च तेषामित्यादि**।

In fact, one should deliberate with one or two counsellors according to the need of the situation like the requirements of place, time and nature of the protection in view, or one may even deliberate by oneself.

There are five constituents for a counselling such as the means to launch upon a work, the required personnel, setting apart of time and place, precautions against dangers, and the ultimate success of the venture. The king should enquire from the ministers calling them one by one or collectively. By evaluating the reason he should judge their intellect (or wisdom). Once the aim is attained no further time should be wasted. Counselling should not be a prolonged affair. He should avoid consulting with those who have been hurt by his actions.

मन्त्रिपरिषदं द्वादशामात्यान् कुर्वीतेति मानवा:।
षोडशेति बार्हस्पत्या:।
विंशतिम् इत्यौशनसा:।
यथासामर्थ्यम् इति कौटल्य:।

ते ह्यस्य स्वपक्षं परपक्षं च चिन्तयेयु:। अकृतारम्भमारब्धानुष्ठान- मनुष्ठितविशेषं नियोगसम्पदं च कर्मणां कुर्यु:। आसन्नै: सह कार्याणि पश्येत्, अनासन्नै: सह पत्रसम्प्रेषणेन मन्त्रयेत। इन्द्रस्य हि मन्त्रिपरिषदृषीणां सहस्रम्। स तच्चक्षु:। तस्मादिमं द्व्यक्षं सहस्राक्षमाहु:।

अथ राजनिर्णीतकार्यजातानुष्ठान–राजनिर्णेतव्यनवनवकार्यजातोल्लेखनादिसर्वराष्ट्रकर्मनिर्वहणप्रधाना मन्त्रिपरिषन्नाम काचिद् राज्ञो भवति। तस्यां राज्ञा कति मन्त्रिण: पारिषदा: कर्तव्या इत्याकाङ्क्षायां द्वादशेति मनुशिष्याणां षोडशेति बार्हस्पत्यानां विंशतिरित्यौशनसानां कार्यानुष्ठातृपुरुषसामर्थ्यानुगुण्येन यथोक्तसङ्ख्या- स्तन्न्यूनसङ्ख्यास्तदधिकसङ्ख्या वेत्यात्मनश्च मतमित्याह–**मन्त्रिपरिषदमित्यादि**।

पारिषदानां व्यापारमाह–**ते हीत्यादि**। स्वपक्षं परपक्षं च चिन्तयेयु: स्वपक्षगतं परपक्षगतं च कार्यं समीक्षापूर्वमनुतिष्ठेयु:। कर्मणां मध्ये अकृतारम्भम् अकृतस्य कर्मणोऽनुष्ठानोपक्रमम्, आरब्धानुष्ठानम् उपक्रान्तस्य परिसमापनम्, अनुष्ठितविशेषं परिसमापितस्य संस्कारं परिनिष्ठितप्रासादादिशोभार्थसुधा- लेपचित्रार्पणादिजातीयं, नियोगसम्पदं नियोगा: तत्तत्कर्मकराधिकारा: तेषां सम्पदं गुणवत्तां बाहुल्यं च, कुर्यु:। मन्त्रिपरिषत्सभ्येषु आसन्नानासन्नेषु विषये राजा कथं व्यवहरे- दित्येतदाह–आसन्नैरित्यादि। पत्रसंप्रेषणेन

लिखितसकलार्थस्य लेखस्य प्रेषणेन। इत्थं बहुमन्त्रिबुद्धिसाहाय्येनार्थदर्शनस्य महाफलतयात्मसमर्थितस्य स्तुत्यर्थं सहस्राक्षपदनिर्वचनभङ्ग्यार्थवादमाह–इन्द्रस्य हीति। स इन्द्रः, तच्चक्षुः तद् ऋषिसहस्रं मन्त्रिपरिषदात्मकं चक्षुः कार्यतत्त्वदर्शनसाधनं यस्य सः। द्व्यक्षमिति विशेषणेन वस्तुतः पुरुषान्तरवद् द्विनयन एवासौ सहस्राक्ष इत्युपचर्यत इति दर्शितम्।

Followers of Manu prescribe that the council of ministers shall consist of twelve persons.

According to the school of Bṛhaspati (the number shall be) sixteen.

The followers of Uśanas (Śukra) maintain that it should be twenty.

Kauṭalya is of the view that the number is dependent on the ability of the ministers chosen.

They should judge the behaviour and affairs of the parties of the king as well as his enemies. Further, they shall begin the work not already started, complete what has been started; improve what has been accomplished and see to that the orders are properly implimented. They should oversee the work in the company of their officers and consult with those who are not immediately available by sending communications. It is said that Indra had a council of ministers having a thousand sages. That is spoken of as his eyes. Hence though he had only two eyes he is considered as possessing thousand eyes.

आत्ययिके कार्ये मन्त्रिणो मन्त्रिपरिषदं चाहूय ब्रूयात्। तत्र यद् भूयिष्ठाः कार्यसिद्धिकरं वा ब्रूयुस्तत् कुर्यात्। कुर्वतश्च–

नास्य गुह्यं परे विद्युश्छिद्रं विद्यात् परस्य च।
गूहेत् कूर्म इवाङ्गानि यत् स्याद् विवृतमात्मनः।।
यथा ह्यश्रोत्रियः श्राद्धं न सतां भोक्तुमर्हति।
एवमश्रुतशास्त्रार्थो न मन्त्रं श्रोतुमर्हति।।

।। इति कौटलीयार्थशास्त्रे विनयाधिकरिके प्रथमाधिकरणे
पञ्चदशोऽध्यायः मन्त्राधिकारः।।

प्राणापायशङ्कावहे कार्ये पूर्वोक्तान् मन्त्रिणः मन्त्रिपरिषदं चेमां मेलयित्वा तत्त्वं पृच्छेदित्याह–**आत्ययिक** इत्यादि। तत्र भूयिष्ठा बहुतमाः, यद् ब्रूयुः, तत् कुर्याद् अनुतिष्ठेत्, अथवा यत् कार्यसिद्धिकरं ब्रूयुः अर्थाद् अभूयिष्ठा अपि, तत् कुर्यात्। कुर्वतश्चेति वक्ष्यमाणश्लोकान्वयि।

नास्येति, यथा ह्यश्रोत्रिय इति च श्लोकावतिरोहितार्थौ।।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
पञ्चदशोऽध्यायः मन्त्राधिकारः।।

In an emergency the king shall call for his ministers as well as their council and address them. There the majority of opinion may be accepted and acted upon.

By doing this enemies will not know his secret affairs; further it will help to find out the designs of the enemy also. He should conceal his affairs as the tortoise withdraws its limbs into its shell. As a person not proficient in the Vedas do not deserve to participate in the rites of offering the rice-balls to the manes, one who has not understood the principles of administrative affairs do not deserve to listen to the deliberations of the council.

Thus the Fifteenth chapter of the Arthaśāstra of Kauṭalya called counselling comes to an end.

Chapter 16

12. प्रक० दूतप्रणिधिः।

Section 12 : Employment of Messengers

उद्धृतमन्त्रो दूतप्रणिधिः। अमात्यसम्पदोपेतो निसृष्टार्थः, पादगुणहीनः परिमितार्थः, अर्धगुणहीनः शासनहरः।

सुप्रतिविहितयानवाहनपुरुषपरिवापः प्रतिष्ठेत। शासनमेवं वाच्यः परः, स वक्ष्यत्येवं, तस्येदं प्रतिवाक्यम्, एवमतिसन्धातव्यम् इत्यधीयानो गच्छेत्। अटव्यन्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेत्। अनीकस्थानयुद्धप्रतिग्रहापसारभूमीरात्मनः परस्य चावेक्षेत। दुर्गराष्ट्रप्रमाणं सारवृत्तिगुप्तिच्छिद्राणि चोपलभेत। पराधिष्ठानमनुज्ञातः प्रविशेत्। शासनं च यथोक्तं ब्रूयात् प्राणाबाधेऽपि दृष्टे। परस्य वाचि वक्त्रे दृष्ट्यां च प्रसादं वाक्यपूजनमिष्टपरिप्रश्नं गुणकथासङ्गमासन्नमासनं सत्कारमिष्टेषु स्मरणं विश्वासगमनं च लक्षयेत् तुष्टस्य, विपरीतमतुष्टस्य। तं ब्रूयात्–दूतमुखा वै राजानस्त्वं चान्ये च। तस्मादुद्यतेष्वपि शस्त्रेषु यथोक्तं वक्तारः। तेषामन्तावसायिनोऽप्यवध्याः, किमङ्ग पुनर्ब्राह्मणाः। परस्यैतद् दूतधर्मः इति।

दूतप्रणिधिरिति सूत्रम्। दूता नाम निसृष्टार्थाः परिमितार्थाः शासनहरा इति त्रिप्रकाराः, तेषां प्रणिधानं परेषु सन्देशदानपूर्वं प्रेषणमिहाभिधीयत इति सूत्रार्थः।

उद्धृतेति। दूतप्रणिधिः दूतस्य प्रणिधानम्, उद्धृतमन्त्रः उद्धृतः निर्धारितार्थः मन्त्रः यस्मिन् स तथाभूतः, भवति। मन्त्रार्थनिर्धारणोत्तरकालकार्यं दूतसम्प्रेषणमित्यर्थः। एवञ्च मन्त्रकथानन्तरं दूतसम्प्रेषणप्रस्तावः सङ्गत इत्यभिप्रायः। पूर्वोक्तजानपदत्वाद्यमात्यसम्पद्युक्तो दूतो निसृष्टार्थः, तस्मात् पादगुणप्रत्यवरः परिमितार्थ, अर्धगुणप्रत्यवरः शासनहरः इत्याह–**अमात्यसम्पदे**त्यादि।

दूतकरणीयमाह–**सुप्रतिविहितेति**। सुप्रतिविहितं सम्यक् सज्जीकृतं यानं शिबिकान्दोलिकादि वाहनमश्वादि पुरुषाः शुश्रूषादिकर्मकराः परिवापः शय्यास्तरणगोणिकादिश्च यस्य सः सुप्रतिविहितयानवाहन-पुरुषपरिवापः, तथाभूतः सन् प्रतिष्ठेत, दूतः शत्रुविषयं प्रति। शत्रुः स्वामिसन्देशमित्थं बोधनीयः, बोधितः स एवं वदिष्यति, तथा वदत ईदृशं प्रत्युत्तरं वक्तव्यं, शत्रोरतिसन्धानमित्थं कर्तव्यमित्येवञ्जातीयमर्थं पुनःपुनरनुसन्दधानो गच्छेदित्याह–**शासनमित्यादि**। **अटवीति**। अटव्यन्तपालपुरराष्ट्रमुख्यैश्च अटवी-पालान्तपालपुरमुख्यराष्ट्रमुख्यैश्च प्रतिसंसर्गं सख्यं गच्छेत्। दूत्यायात्मप्रयाणं तेभ्यो निवेद्य वा गच्छेदित्यर्थः। परविषयं गतस्य कर्माह–**अनीकेति**। आत्मनः, परस्य च अनीकस्थानयुद्धप्रतिग्रहापसारभूमीः अनीकस्य

सैन्यस्य निवेशयोग्यभूमिं युद्धस्वीकारार्हभूमिम् अपसरणानुकूलभूमिं च, अन्वेक्षेत जानीयात्। दुर्गराष्ट्रप्रमाणं दुर्गराष्ट्रयोरियत्तां, सारवृत्तिगुप्तिच्छिद्राणि सारं धान्यस्वर्णाद्युत्पत्तिं वृत्तिं जनानां जीविकां गुप्तिं रक्षां छिद्रं शत्र्वाक्रमणद्वारं च, उपलभेत। सारवृत्तिशब्दस्थाने सारवत्ताशब्दपाठः कामन्दकेन नूनं दृष्टः। अत एव स आह–"सारवत्तां च राष्ट्रस्य दुर्गं तदगुप्तिमेव च। छिद्रं च शत्रोर्जानीयाद्" इति। पराधिष्ठानं शत्रुगृहम्, अनुज्ञातः प्रविशेत् परानुज्ञानानन्तरं प्रविशेत्। शासनं स्वामिसन्देशं च, प्राणाबाधेऽपि दृष्टे यथोक्तं ब्रूयात् प्राणभयेऽप्युपस्थिते स्वस्वामिसन्दिष्टप्रकारं कथयेत्, नतु स्वप्राणरक्षार्थमप्यन्यथा कथयेदित्यर्थः। परतुष्टातुष्टत्वस्य तदनुगुणव्यवहारार्थं लक्षणीयत्वादाह–परस्येत्यादि। वाग्वदनदर्शनेषु प्रसन्नत्वं, दूतोच्यमानवाक्यादरः, स्वामिगतसर्वकुशलप्रश्नः, स्वामिगुणप्रस्तावेऽवधानदानं, दूतान्तिकोपदेशनं, दूतविषयो बहुमानः, स्वादुभोग्यफलादिसंविभागे दूतस्मरणं, दूतं प्रति विश्वासोपगम इत्येतैश्चिह्नैः शत्रोस्तुष्टत्वं विपरीतैरतुष्टत्वं च विदित्वा व्यवहरेदित्यभिप्रायः। तमित्यादि। तं ब्रूयात् अतुष्टं परं वक्ष्यमाणरीत्या ब्रूयात्। दूतमुखाः दूतो मुखं स्वाभिप्रायनिवेदनद्वारं येषां ते। तस्मात् दूतानां स्वस्वामिवदनस्थानीयत्वात्। उद्यतेष्वपि वधार्थमुद्धृतेष्वपि सत्सु। वक्तारः अर्थाद् दूताः। तेषां दूतानां मध्ये। अन्तावसायिनोऽपि चण्डाला अपि। किमङ्ग पुनर्ब्राह्मणाः ब्राह्मणा अवध्या इति किमु वक्तव्यमित्यर्थः।

The messenger is one who has understood the deliberations of the council. One who has the ability of a minister is called Nisṛṣṭārtha (to whom the management of an affair is entusted). One whose ability is less by a quarter is called Parimitārtha (an agent entrusted with a specific mission). One who has only a half of the ability is called Śāsanahara (one who conveys the royal writs).

The messenger shall set out on his mission after having made suitable arrangements for carriage, conveyance, servants and other paraphernalia (like cushions, ladder etc.) He should deliberate over the procedure of his mission (in the following lines) "The message should be conveyed to the enemy thus"; "then he will give his answer thus"; "Then this should be our reply to his words" and "thus he will have to be prevailed upon". The messenger shall proceed having decided upon his course of action. He should make friends with the officers in charge of forests, of border regions, of cities and prominent citizens (of the opposite country). He shall properly notice and evaluate the military cantonment, place suitable for battle and for withdrawal from the war front (if needed). He shall ascertain the size and area of the fortification and of the state as well as places for safe keeping of valuables and precious things (for the benefit of own people). He shall enter into the regions of enemy after obtaining the necessary permission. Then he shall convey the exact message of his master even if his life is at stake. If the enemy is well-disposed one could notice happiness in words, face and eyes, cordial reception of the message, enquiry about the well being, narration of virtues, provision of seat close to him, respectful treatment, remembrance of friends and satisfaction at the

completion of the mission and if the enemy is unhappy everything will be the reverse of these. A displeased enemy should be told that "messengers are the mouth pieces of kings and this is equally applicable to you and for others. Hence even at the face of the raised sword they convey their messages as they are instructed. Even the low caste of the messengers should not be killed not to speak of Brahmin messengers. The speech that I now deliver belongs to another. Conveying of the same is the duty of the messenger."

वसेदविसृष्टः, पूजया नोत्सिक्तः, परेषु बलित्वं न मन्येत, वाक्यमनिष्टं सहेत, स्त्रियः पानं च वर्जयेत्, एकःशयीत, सुप्तमत्तयोर्हि भावज्ञानं दृष्टम्। कृत्यपक्षोपजापमकृत्यपक्षे गूढप्रणिधानं रागापरागौ भर्तरि रन्ध्रं च प्रकृतीनां तापसवैदेहकव्यञ्जनाभ्यामुपलभेत। तयोरन्तेवासिभिश्चिकित्सकपाषण्डव्यञ्जनोभयवेतनैर्वा, तेषामसम्भाषायां याचकमत्तोन्मत्त-सुप्तप्रलापैः पुण्यस्थानदेवगृहचित्रलेख्यसंज्ञाभिर्वा चारमुपलभेत। उपलब्धस्योपजापमुपेयात्। परेण चोक्तः स्वासां प्रकृतीनां परिमाणं नाचक्षीत। सर्वं वेद भवानिति ब्रूयात्, कार्यसिद्धिकरं वा।

वसेदिति। अविसृष्टः वसेत् यावद्विसर्जनम्। पूजया नोत्सिक्तः गर्वितो न भवेत्। परेषु बलित्वं न मन्येत अहं बलवानिति मतिं शत्रुसकाशे न प्रकाशयेत्। अनिष्टं वाक्यं परोक्तं सहेत। स्त्रियः, पानं मद्यसेवनं च वर्जयेत्। एकः असहायः शयीत। पानवर्जनैकशयनयोः कारणमाह–हि यस्मात्, सुप्तमत्तयोः, भावज्ञानं स्वप्नप्रलापमदप्रलापाभ्यां हृदयवेदनं दृष्टं प्रत्यक्षानुभूतम्। कृत्यपक्षेति। कृत्यपक्षोपजापं कृत्यवर्गस्य भेदनम्, अकृत्यपक्षे, गूढप्रणिधानं तीक्ष्णरसदसामादिप्रयोगं, प्रकृतीनाम् अमात्यादीनां भर्तरि रागापरागौ रन्ध्रं च द्वेषस्थानं च, तापसवैदेहकव्यञ्जनाभ्यां संस्थाभ्याम्, उपलभेत। तयोरिति। तयोरन्तेवासिभिः तापसवैदेहकयोः शिष्यैः, चिकित्सकपाषण्डव्यञ्जनोभयवेतनैर्वा भिषग्वेषैः पाषण्डवेषैः उभयवेतनैश्च पूर्वोक्तैर्वा, चारम् उपलभेत परचर्यां विद्यात्। तेषामसम्भाषायां तापसव्यञ्जनादीनां सम्भाषणासौकर्ये, याचकमत्तोन्मत्तसुप्तप्रलापैः तेषां भैक्षकालभवैः प्रलापैः मत्तसाधारणैरुन्मत्तसाधारणैः सुप्तसाधारणैश्च प्रलापैः, पुण्यस्थानदेवगृहचित्र-लेख्यसंज्ञाभिर्वा पुण्यस्थानेषु नदीतीरजपमण्डपमुनिगृहादिषु देवगृहेषु च गूढपुरुषान्योन्यसम्पातयोग्येषु भित्त्यर्पिताभिरालेख्यविशेषसंज्ञाभिरक्षरविशेषसंज्ञाभिर्वा, चारमुपलभेत। उपलब्धस्य परवृत्तस्य, उपजापम् उपेयाद् उपलब्धपरवृत्तानुरूपं भेदोपायं प्रयुञ्जीत, यथापेक्षम्। परेण, इयत्तां सारफल्गुतां वा, नाचक्षीत। तत्र किमुत्तरं प्रतिपद्येत, तत्राह–सर्वमिति। भवान् सर्वं वेद चारचक्षुषा भवता न किञ्चिदत्राविदितमस्तीत्यर्थः, इति ब्रूयात् स्तुयात्। यदि स्तुत्या परो न परितुष्यति तदा किं कर्तव्यं तत्राह–कार्यसिद्धिकरं वा ब्रूयात् परिमाणं यावद् उच्यमानं दूतकार्यसिद्धिकरं स्यात्, तावद् ब्रूयात् न कृत्स्नमित्यर्थः।

Until the messenger is permitted to return, he should stay there; he should not get puffed up with the cordiality shown to him; he should not think that the enemy is mighty and powerful; he should withstand the words of insult used towards him; he should avoid women and liquour; he should sleep alone; since the intention of those who are asleep and under the intoxication of liquor are likely to be gathered by the enemy.

He shall gather information regarding the loyalty among favourably disposed parties as well as information on inimical people through spies in the guises of ascetics or their disciples. Information on intrigues against his master shall be gathered from the disciples of ascetics, spies disguised as physicians, mendicants and those who draw remuneration from both states. In case these is no chance to talk with these people he should gather information from the loose talk of beggars and lunatics. Such information can also gathered from holy places, temples, by deciphering paintings and secret writings. The messenger shall employ means of dissension among the enemies in accordance with the information he has gathered. He should not reveal the strength of his people to others when asked by them. He may just say that everything is known to you (and that there is nothing more); nor he shall reveal the means adopted by his master to obtain the result.

कार्यस्य सिद्धावुपरुध्यमानस्तर्कयेत् किं भर्तुर्मे व्यसनमासन्नं पश्यन्, स्वं वा व्यसनं प्रतिकर्तुकामः, पार्ष्णिग्राहासारावन्तःकोपमाटविकं वा समुत्थापयितुकामः, मित्रमाक्रन्दं वा व्यापादयितुकामः, स्वं वा परतो विग्रहमन्तःकोपमाटविकं वा प्रतिकर्तुकामः, संसिद्धं मे भर्तुर्यात्राकालम- भिहन्तुकामः, सस्यकुप्यपण्यसङ्ग्रहं दुर्गकर्म बलसमुत्थानं वा कर्तुकामः, स्वसैन्यानां वा व्यायामदेशकालावाकाङ्क्षमाणः, परिभवप्रमदाभ्यां वा, संसर्गानुबन्धार्थी वा मामुपरुणद्धीति। ज्ञात्वा वसेदपसरेद् वा। प्रयोजनमिष्टमवेक्षेत वा। शासनमनिष्टमुक्त्वा बन्धवधभयादविसृष्टोऽप्यपगच्छेद् अन्यथा नियम्येत।

यदि परो दूतोपक्षिप्तं सन्ध्यादिकार्यमुचितकालेऽप्यसाधयन् 'स्थीयतां तावदिह त्वया कञ्चित् कालम्। अभिमतं ते करिष्यामी'त्युक्त्वा दूतं स्वपुरे चिरमुपरुन्धे, तदा दूतः किं कुर्यात्, तत्राह—कार्यस्येत्यादि। कार्यस्यासिद्धाविति पाठे परः कार्यं च दूतस्य न साधयति, प्रतिजिगमिषु च दूतं न विसर्जयतीति रीत्यावतरणिका बोद्धव्या। तर्कयेद् उपरोधकारणं विकल्प्य चिन्तयेत्। तर्कणप्रकाराः 'किं भर्तुरि'त्यादयः। परो, मे भर्तुः स्वामिनः, व्यसनं प्रकृतिगतम्, आसन्नं सन्निकृष्टं पश्यन्, माम् उपरुणद्धि किं न विसर्जयति किम्। एवमुत्तरत्र प्रथमान्तेषु क्रिया योज्या। अथवा स्वं व्यसनं प्रतिकर्तुकामः प्रशमयितुमिच्छुः। अथवा पार्ष्णिग्राहासारौ पार्ष्णिग्राहः शत्रुमित्रभूतः स्वामिशत्रुः आसारः शत्रुमित्रमित्रं तौ समुत्थापयितुकामः स्वामिद्रोहार्थमुद्योजयितुकामः। अथवा अन्तःकोपं मन्त्र्यादिप्रकोपम् उपजापादिनोत्पादयितुकामः। अथवा आटविकं युद्धार्थमुद्योजयितुकामः, अथवा मित्रं स्वामिनः पुरस्तान्मित्रम्, आक्रन्दं स्वामिनः पृष्ठतोमित्रं वा व्यापादयितुकामः हन्तुकामः। अथवा स्वं परतो विग्रहं परेण विग्रहमुपस्थितं स्वम् अन्तःकोपं मन्त्र्यादिप्रकोपं, स्वम् आटविकं कुपितं, प्रतिकर्तुकामः। अथवा संसिद्धं सुकरतयोपनतं, मे भर्तुः यात्राकालं शत्र्वभियानकालम् अभिहन्तुकामः। सस्यकुप्यपण्यसंग्रहं कर्तुकामः आरब्धे युद्धे सस्यादिपरिक्षयो मा मां बाधिष्टेति। अथवा दुर्गकर्म भिन्नस्फुटितदुर्गसंस्कारं कर्तुकामः। अथवा बलसमुत्थानं सैन्यवृद्धिं सैन्यस्य तत इतो विप्रकीर्णस्य समाहरणं वा कर्तुकामः। अथवा स्वसैन्यानां व्यायामदेशकालौ आकाङ्क्षमाणः शत्रुषु विक्रमणयोग्यौ देशकालावुदीक्षमाणः, मामुपरुणद्धि किम्। अथवा परिभवप्रमदाभ्यां परिभवेन मन्त्र्याद्यन्तःकोपोत्पादनादिजनितेनानादरेण, प्रमदेन

सहसंवासप्रीत्या च मामुपरुणद्धि किम्। अथवा संसर्गानुबन्धार्थी संसर्गो विवाहादिनिमित्तः सम्बन्धः तदर्थी अनुबन्धो दोषोत्पादः तदर्थी च, माम् उपरुणद्धि किम्। इति एवं रीत्या तर्कयेदिति सम्बन्धः। **ज्ञात्वेति।** ज्ञात्वा तर्कणपूर्वं कारणं निश्चित्य, वसेत् स्नेहनिमित्तमुपरोधनमिति निश्चये सति, अपसरेद् वा अविसृष्टोऽपि अन्यथा निश्चये सति। अथवा इष्टं प्रयोजनं स्वाम्यर्थम् अवेक्षेत स्वाम्यर्थसिद्धिमवेक्ष्य वसेत् शत्रुपुर एव वसन् स्वामिनं प्रति गूढसन्देशप्रेषणेन शत्रुदुरभिसन्धीनां प्रतिविधानं कारयेदित्यभिप्रायः। **शासनमिति।** अनिष्टं शासनं शत्रुद्विष्टं स्वामिसन्देशम्, उक्त्वा, दूतः अविसृष्टोऽपि शत्रुणा, बन्धवधभयाद् आत्मनो बन्धनं वधं वा शत्रुः करिष्यतीति शङ्कया, अपगच्छेत्। अन्यथा अनपगमने नियम्येत नियन्त्र्येत शत्रुणा।

If he could not gather the desired information after having been detained in the enemy's state he may ponder over several possibilities in the following lines. Is it possible that the enemy king is detaining me since our forces are on the advance and nearing the border? Is he trying to avert his own danger by keeping me under restraint? Is he trying to incite the forest chiefs against my ruler? In he trying to prevent the marches of my ruler about which he has definite information? Is he trying to accomplish the gathering of grains and vegetables, repair the fortification to strengthen it or trying to increase his forces by fresh recruitement? Is he waiting for the time and opportunity for the completion of the training and exercises of his own army? Is he trying to restrain me on account of contempt or by own carelessness? Is he trying to bring about any fresh alliiance? After ascertaining these points the messenger may think of remaining there or getting out of the place. He may think of any useful purpose in this regard. After having informed the message which is not favourable to the enemy he may try to get out, if not permitted, by apprehending his own danger; of being put under restriction in jails.

प्रेषणं सन्धिपालत्वं प्रतापो मित्रसङ्ग्रहः।
उपजापः सुहृद्भेदो दण्डगूढातिसारणम्।।
बन्धुरत्नापहरणं चारज्ञानं पराक्रमः।
समाधिमोक्षो दूतस्य कर्म योगस्य चाश्रयः।।
स्वदूतैः कारयेदेतत् परदूतांश्च रक्षयेत्।
प्रतिदूतापसर्पाभ्यां दृश्यादृश्यैश्च रक्षिभिः।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
षोडशोऽध्यायः दूतप्रणिधिः।।

श्लोकद्वयेन दूतकर्म संगृह्णाति—**प्रेषणमिति**, **बन्धुरत्नेति** च। प्रेषणं शत्रुदेशगतागतं शत्रौ स्वामिशासननिवेदनार्थं स्वामिनि शत्रुदेशवृत्तान्तस्य स्वावगतस्य निवेदनार्थं च, सन्धिपालत्वं कृतसन्धिरक्षणं, प्रतापः यथापेक्षं शत्रौ विक्रमणं, मित्रसंग्रहः, उपजापः कृत्यभेदनं, सुहृद्भेदः, दण्डगूढातिसारणं दण्डस्य सेनायाः गूढानां तीक्ष्णरसदादीनां चाक्रामणम्। गूढदण्डेत्यपि पाठः। बन्धुरत्नापहरणं बन्धूनां रत्नानां च

स्वीकरणं, चारज्ञानं चाराणां गूढपुरुषाणामनुष्ठानसौष्ठवपरिज्ञानं, पराक्रमः अवसरे विक्रमणं, समाधिमोक्षः सन्धिविश्वासार्थमहितः पुत्रादिः तस्य मोचनं, योगस्य आश्रयश्च औपनिषदकोक्तस्य मारणादेः सेवनं च, दूतस्य कर्म भवति।

स्वदूतैरिति। एतद् उक्तं सर्वं कर्म, स्वदूतैः कारयेत्, अर्थाद् राजा। प्रतिदूतापसर्पाभ्यां प्रतिदूत-प्रतिचाराभ्यां, दृश्यादृश्यैः रक्षिभिश्च दृश्यैः स्वदेशस्थैः अदृश्यैः शत्रुविषये तत्सेवकच्छद्मभिः रक्षिपुरुषैश्च, परदूतान् रक्षयेच्च यथा परदूताः स्वदेशे मित्रसंग्रहादिकर्म न कुर्युस्तथा तच्चेष्टितानि यत्नेन गवेषयेच्चेत्य-भिप्रायः।।

।। इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे षोडशोऽध्यायः दूतप्रणिधिः।।

Sending of messengers, maintenance of treaties (already concluded), issue of ultimatum, acquirement of friends, entering into intrigues, sowing dissension among friends, bringing in secret forces of poisoners etc; stealing of clothes and jewels, knoweldge of the activities of other spies, resort to bravery, entering into treaties and escape from it, use of sorcery in need etc; are the ingredients of the duties of messengership.

The King shall accomplish all these by his own messengers in addition to protecting the life of the messengers of the enemy rulers. While one shall employ messengers, in other states and gather information, one should make it sure that such activities are not taking place in one's own regions by enemy messengers.

Thus the sixteenth chapter of the Arthaśāstra of Kauṭalya called Employment of Messengers' comes to an end.

Chapter 17

13. प्रक० राजपुत्ररक्षणम्।

Section 13 : Protection of Princes

रक्षितो राजा राज्यं रक्षत्यासन्नेभ्यः परेभ्यश्च। पूर्वं दारेभ्यः पुत्रेभ्यश्च।

दाररक्षणं निशान्तप्रणिधौ वक्ष्यामः।

पुत्ररक्षणं–जन्मप्रभृति राजपुत्रान् रक्षेत्। कर्कटकसधर्माणो जनकभक्षाः राजपुत्राः।

तेषामजातस्नेहे पितर्युपांशुदण्डः श्रेयानिति भारद्वाजः।

नृशंसमदृष्टबधः क्षत्रविनाशश्चेति विशालाक्षः। तस्मादेकस्थानावरोधः श्रेयानिति।

अहिभयमेतदिति पाराशराः। कुमारो हि विक्रमभयान्मां पिता रुणद्धीति ज्ञात्वा तमेवाङ्के कुर्यात्। तस्मादन्तपालदुर्गे वासः श्रेयानिति।

राजपुत्ररक्षणमिति सूत्रम्। राजपुत्रेभ्यो राज्ञो रक्षणमभिधीयत इति सूत्रार्थः। पूर्वं चतुर्वर्णाश्रमतद्धर्माणां रक्षणं राज्ञा कर्तव्यमित्युक्तं, तस्य तु रक्षणं नोक्तम्। तदधुनोच्यते।

राजा स्वबन्धुभ्यः परेभ्यश्च रक्षितः स्वप्रजास्तेभ्यो रक्षितुं प्रभवतीत्याह–**रक्षित** इत्यादि। बन्धुभ्यः केभ्यः, दारेभ्यः पुत्रेभ्यश्च, पूर्वमित्यनेन दारपुत्रा एव प्रथमं विपत्तिस्थानं राज्ञ इति दर्शयति।

दाररक्षणमित्यादि। स्पष्टम्।

पुत्ररक्षणमिति। उच्यत इति शेषः। **जन्मप्रभृतीत्यादि**। **कर्कटकसधर्माणः** कुलीरसमानस्वभावाः। तमेव धर्मं जनकमारकत्वरूपमाह–**जनकभक्षा** इति। कर्कटका हि जनकं मारयन्त एव जायन्त इति प्रसिद्धिः, अत एव कुलिनं जनकमीरयन्ति नाशयन्तीति व्युत्पत्त्या ते कुलीरा उच्यन्ते।

अत्र भारद्वाजमतमाह–**तेषामित्यादि**। यावत् पितुः पुत्रेषु जातेषु स्नेहो नोदेति तावत् तेषां रहसि वधः प्रशस्ततर इत्यर्थः।

निरपराधशिशुमारणमिदं महते पापाय भवति क्षत्रियकुलपरिक्षयाय चेति कृत्वा राजपुत्राणामन्तःपुरे क्वचिदवरोधनं श्रेय इति विशालाक्षो मन्यत इत्याह–**नृशंसमित्यादि**।

एतत् सर्पसहवासवद् भयावहमिति माराशरा मन्यन्त इत्याह–**अहीति**। भयस्थानत्वमेवोपपादयति–**कुमार** इत्यादि। विक्रमभयात् स्ववधभयात्। तमेवाङ्के कुर्यात् विक्रममेवायत्नप्राप्ये समीपप्रदेशे स्वगृहे

कुर्यात्। अन्तपालदुर्गे राष्ट्रसीमपालकाधिष्ठिते दुर्गे। तत्रस्थेन दूरविप्रकर्षाद् विक्रमो गृह इव न सुकर इति भावः।

Having assured of his personal safety from his own wives and sons, the king is in a position to protect the country against immediate enemies as well as from the neighbouring kings.

The topic of 'protection of wives' shall be dealt with in the chapter entitled 'responsibilities towards the harem.'

Coming to the protection of princes, one shall protect them from the very birth. The sons of kings share the features of crabs in that they devour the begetter.

Bhāradvāja is of the view that when the sons are wanting in filial affection it is better to annihilate them in secret.

Viśālākṣa maintains that it is sheer cruellty to kill the young ones and further it will contribute to the destruction of the Kṣatriya race itself. Hence it is better to confine them to a guarded place.

The school of Pārāśara terms it as akin to the the fear from a lurking serpent (ahibhayam = a king's apprehension of treachery). The boy may think that his father is afraid of him and hence he is likely to kill the falter for self-protection. It is better to put the son in a fort in the bordering locality of the state.

औरभ्रकं भयमेतदिति पिशुनः। प्रत्यापत्तेर्हि तदेव कारणं ज्ञात्वान्तपालसखः स्यात्। तस्मात् स्वविषयादपकृष्टे सामन्तदुर्गे वासः श्रेयानिति।

वत्सस्थानमेतदिति कौणपदन्तः। वत्सेनेव हि धेनुं पितरमस्य सामन्तो दुह्यात्। तस्मान्मातृबन्धुषु वासः, श्रेयानिति।

ध्वजस्थानमेतद् इति वातव्याधिः। तेन हि ध्वजेनादितिकौशिकवदस्य मातृबान्धवा भिक्षेरन्। तस्माद् ग्राम्यधर्मेष्वेनमवसृजेयुः। सुखोपरुद्धा हि पुत्राः पितरं नाभिद्रुह्यन्तीति।

तावद्दूरस्थितादपि कुमाराद् भेतव्यमेवेति नारदो मन्यत इत्याह–औरभ्रमकमिति। उरभ्रस्य मेषस्येदं कर्म औरभ्रम् औरभ्रमिव औरभ्रकम्। यथा मेषस्य पुरस्थं प्रतिमेषं मूर्ध्ना जिघट्टयिषोर्दूरापसरणं पुरस्तादभिपतने शक्त्यतिशयाधायकत्वाद् भयस्थानं, तथा राजपुत्रस्य दूरान्तपालदुर्गावरोधनमिदं पितृजिघांसोरनुबलाधानाय कल्पमानं भयस्थानं भवतीत्यभिप्रायः। भयस्थानत्वमेव विशदयति–प्रत्यापत्तेरित्यादि। प्रत्यापत्तेः पितृद्रोहप्रकृत्यनिवर्तनात्। तदेव कारणं विक्रमणशङ्कारूपम्। अन्तपालसखः अन्तपालसहायः। एतेनानुबल-सम्पत्तिरुक्ता। तस्मादित्यादि। स्वविषयादपकृष्टे स्वजनपदाद् दूरस्थे। सामन्तदुर्गे विषयानन्तरस्य राज्ञो दुर्गे।

तदिदं सामन्तदुर्गलक्षणं कुमारवासस्थानं गोवत्सबन्धनस्थानतुल्यम्। तं हि कुमारं गोवत्सस्थानीयं

व्याजं कृत्वा धेनुस्थानीयतत्पितृसकाशात् सामन्तः स्वाभीप्सितमर्थजातं क्षीरस्थानीयं पुनः पुनर्हरेदित्यतः कारणात् कुमारस्य मातृबान्धवेषु निवेशनं प्रशस्ततरं कौणपदन्तो मन्यत इत्याह–**वत्सेत्यादि।**

इदं मतमुद्धवो दूषयतीत्याह–**ध्वजेत्यादि।** एतद् ध्वजस्थानं ध्वजसादृश्यम्, अर्थात् कुमारस्य। तद् विशदयति–**तेन हीति।** तेन ध्वजेन जीविकाचिह्नेन। **अदितिकौशिकवदिति।** नानादेवप्रकृतिप्रदर्शनेन भैक्षमर्जयन्ती या जीवति सा भिक्षुकी देवाविर्भावकत्वसादृश्याददितिरित्युच्यते कौशिको व्यालग्राही अदितिवत् कौशिकवच्च। यथाहि अदितयो देवप्रतिकृतीः कौशिकाश्च सर्पान् ध्वजान् कृत्वान्नादिकं भिक्षन्ते, तथा मातृबान्धवाः कुमारं निमित्तं कृत्वा स्वाभीष्टमर्थं याचेरन्निति वाक्यार्थः। **तस्मादित्यादि।** तस्माद् एनं ग्राम्यधर्मेषु स्त्रीसेवादिषु अवसृजेत् यथेच्छसञ्चाराय। अवसर्गस्य फलमाह–**सुखेत्यादि।** सुखोपरुद्धाः वैषयिकानन्द-यथेच्छानुभवसंनिधानेनानरुद्धाः।

According to Piśuna, it is like the fear of one sheep placed in the midst of a flock of sheep (aurabhrakam bhayam). Once the prince realises that he is rusticated, he may join hands with the guards of the boundary (against his own father). Hence it is better to confine him in a fort belonging to a vassal king far away from his own state.

This view is not agreed to by Kauṇapadanta who opines that it is like the cowpen where the calf is stationed. The vassal king is likely to fleece the the father of the prince as if he is a calf to milk the cow. Hence it is better to put the prince in the family of the mother or her relatives.

Vātavyādhi could not agree to this view since the prince will be reduced to the position of a flag. As in the cases of Aditi and Kauśika the maternal relations of the prince may go on begging pointing out his presence with them. They may force the princes to dissipate their lives by excessive sexual activities in the hope that princes enjoying constant sensual pleasures are not likely to harm their father.

जीवन्मरणमेतदिति कौटल्यः। काष्ठमिव हि घुणजग्धं राजकुलमविनीत-पुत्रमभियुक्तमात्रं भज्येत। तस्माद् ऋतुमत्यां महिष्याम् ऋत्विजश्चरुमैन्द्रबार्हस्पत्यं निर्वपेयुः। आपन्नसत्त्वायां कौमारभृत्यो गर्भभर्मणि प्रजने च वियतेत। प्रजातायाः पुत्रसंस्कारं पुरोहितः कुर्यात्। समर्थं तद्विदो विनयेयुः।

स्वतमतमाह–**जीवदिति।** एतद् जीवन्मरणम् इदं ग्राम्यधर्मावसर्जनं राजपुत्रस्य जीवत एव मरणं, शास्त्राद्यविनीतत्वाद् व्यसनोपहतबुद्धिसत्त्वशरीरत्वाच्च मरणतुल्यम्। यथा वम्रिचर्वितं दारु स्पृष्टमात्रमकृतभञ्जनयत्नमपि भग्नं भवति, तथा शास्त्रसदाचाराशिक्षितकुमारं राजकुलं परेण जिगीषितमात्रम् अप्रयुक्तविक्रममपि परिध्वस्तं भवतीत्याह–**काष्ठमिवेत्यादि।** सर्वेष्वेषु पक्षेषु दोषदर्शनात् पुत्रगुणवत्त्वाय दृष्टादृष्टार्थाः प्रयत्ना गर्भाधानप्राक्कालात् प्रभृति आस्थेया इत्याह–**तस्मादित्यादि।** ऋतुमत्याम् ऋतुः आर्तवदर्शनादिषोडशनिशात्मकः कालो गर्भाधानयोग्यः तद्वत्याम्। ऐन्द्राबार्हस्पत्यं चरुं निर्वपेयुः इन्द्राबृहस्पतिद्वन्द्वदेवताकं हविः साधयेयुः हविर्द्रव्यकमिष्टिविशेषं कुर्युरित्यर्थः। तत्रेन्द्रप्रीणनमैश्वर्यप्रतापाद्यर्थं बृहस्पतिप्रीणनं बुद्धिविद्याद्यर्थं बोद्धव्यम्। आपन्नसत्त्वायां जातगर्भायाम्। कौमारभृत्यः शिशुवैद्यः। गर्भभर्मणि

गर्भपोषणे। प्रजने प्रसवे। वियतेत विशिष्य यत्नं कुर्यात्। प्रजाताया: प्रसूताया:। समर्थं विनयेयु: ग्रहणधारणपटुं विद्यासु शिक्षयेयु:। के, तद्विद: शिक्षणज्ञा:।

Kauṭalya holds that it is virtual death even though one is alive (to all appearance). Such a royal family with an unrestrained prince is likely to dissipate like timber eaten by worms. Hence when the queen attains puberty and becomes fit for procreation, the priests shall be enjoined to perform sacrificial rites in which the oblations to Indra (for prosperity and authority) and Bṛhaspati (for the development of intelligence). When the queen becomes pregnant, the king shall observe the instructions of midwifery with reference to gestation and delivery (of the child). After the delivery the priests shall be enjoined to perform the purificatory ceremonies of the child. When the boy is ready (to recieve instructions) experts in various disciplines shall be engaged to train him in these.

सत्रिणामेकश्चैनं मृगयाद्यूतमद्यस्त्रीभि: प्रलोभयेत्–पितरि विक्रम्य राज्यं गृहाणेति। तदन्य: सत्री प्रतिषेधयेद् इत्याम्भीया:।

महादोषमबुद्धबोधनमिति कौटल्य:। नवं हि द्रव्यं येन येनार्थजाते- नोपदिह्यते तत्तदाचूषति, एवमयं नवबुद्धिर्यद्यदुच्येत तत्तच्छास्त्रोपदेश- मिवाभिजानाति। तस्माद् धर्ममर्थं चास्योपदिशेन्नाधर्ममनर्थं च।

सत्रिणस्त्वेनं तव स्म: इति वदन्त: पालयेयु:। यौवनोत्सेकात् परस्त्रीषु मन: कुर्वाणम् आर्याव्यञ्जनाभि: स्त्रीभिरमेध्याभि: शून्यागारेषु रात्रावुद्वेजयेयु:। मद्यकामं योगपानेनोद्वेजयेयु:। द्यूतकामं कापटिकै: पुरुषैरुद्वेजयेयु:। मृगयाकामं प्रतिरोधकव्यञ्जनैस्त्रासयेयु:। पितरि विक्रमबुद्धिं तथेत्यनुप्रविश्य भेदयेयु:– अप्रार्थनीयो राजा, विपन्ने घात:, सम्पन्ने नरकपात:, संक्रोश: प्रजाभिरेकलोष्टवधश्चेति।

विनीतस्य कुमारस्य पितृद्रोहनिवृत्त्युपायम् आम्भाचार्यानुयायिमतेनाह–**सत्रिणाम्** इत्यादि। मृगयाद्यूतमद्यस्त्रीभि: प्रलोभनसाधनै:। प्रलोभयेत् प्रलोभ्योपदिशेत्। अन्य: प्रलोभकादपर:।

तद् दूषयति–**महेति**। अबुद्धबोधनं महादोषम् अज्ञातस्य पितृद्रोहरूपस्य पापकर्मण उपदेश: परमानर्थ:। **नवमिति**। हिशब्दो दृष्टान्ते। यथा नवं द्रव्यं मृद्भाण्डादिकं, येन येन अर्थजातेन जलघृतादिना, उपदिह्यते लिप्यते, तत्तद् आचूषति आपिबति अन्तर्गृह्णाति, एवम् अनेन प्रकारेण, नवबुद्धि: सदसद्व्यवहाराप्रविष्टबुद्धि:, अयं राजपुत्र:, यद्यद् उच्येत, तत्तत् तत् सर्वं, शास्त्रोपदेशमिव, अभिजानाति हृदये निवेशयति। **तस्मादिति**। तस्माद् यथोक्तात् कारणात्, अस्य धर्मम् अर्थं च उपदिशेत्, अधर्मं पितुद्रोहादिम्, अनर्थं मृगयाद्यूतपानादिकं च, नोपदिशेत्।

यदि स्वत एव राजपुत्र: परस्त्रीमद्यादिषु कामनां कुर्यात्, तदा तन्निवारणार्थं सत्रिणस्तमुपासीरन्नित्याह–**सत्रिण** इत्यादि। तव स्म इति वदन्त: त्वत्सेवका वयमिति विश्वासयन्त:। पालयेयु: परस्त्रीमद्यादिप्रवृत्तेर्वारयेयुरित्यर्थ:। पालनप्रकारानाह–**यौवनेत्यादि**। यौवनोत्सेकाद् यौवनमदात्। आर्याव्यञ्जनाभि: अभिजातस्त्रीवेष-

धारिणीभिः। अमेध्याभिः स्वभावादशुचिभिः स्त्रीभिः करणैः उद्वेजयेयुः जुगुप्सयेयुः, परस्त्रीरतादित्यार्थम्। योगपानेन विरसद्रव्ययुक्तेन मद्येन। कापटिकैः छलदेवनदक्षैः। प्रतिरोधकव्यञ्जनैः चौरवेषैः। विक्रमबुद्धिं विक्रमे विक्रम्य हनने बुद्धिर्यस्य तम्। तथेत्यनुप्रविश्य भेदयेयुः तथा कुर्म इति वाङ्मात्रेण तच्छन्दानुवृत्त्या ततो निवर्तयेयुः। अप्रार्थनीय इत्यादिर्निवर्तनार्थम् उपदेशः। राजा, अप्रार्थनीयः अर्थयितुम् एषितुं योग्यः अर्थनीय एष्टव्यः तद्विपरीतः प्रार्थनीयः अनेष्टव्यः द्वेष्य इति यावत्, प्रशब्दस्येह प्रस्मरतीत्यादाविव धात्वर्थ-विपरीतद्योतकत्वात्, प्रार्थनीयो न भवतीत्यप्रार्थनीयः अद्वेष्य इत्यर्थः। विपन्ने घातः पितृवधसमुद्यमे विफलिते सति तव वधो भवेत्, सम्पन्ने नरकपातः फलिते सति पितृवधघातकिनस्ते नरके पतनं, संक्रोशः लोकनिन्दा, प्रजाभिः एकलोष्टवधश्च प्रजाभिः समुदिताभिः कर्त्रीभिः एकैकमृत्खण्डप्रक्षेपेण घातश्च तव भवेत्।

According to the school of (political thought) Āmbhīyas, one of the classmate spies shall allure him by hunting, dice-play, liquor and women and instigate him to seize the country from the king who is none other than his father. Another spy of the same class shall object to the suggestion (to test his attitude).

Kauṭalya is of the opinion that such instruction with allurement (temptation) is unwarranted and will cause wicked impressions in an innocent mind. A fresh material imbibes the qualities of those with which it is brought into close assocaition. Hence if (the boy is) given the proper education when his mind is fresh he will learn righteousness. This being the case the boy shall be given instructions in righteousness (dharma) and wealth (artha) but not unrighteousness and non-wealth.

Classmate spies shall put him on the right path saying that "we are with you." If under the temptation of carnal desire he gets interested in women, impure women under the guise of noble ones shall at night drew him to lonely places and terrify him. If he gets interested in liquor he may be given contaminated liquor so that he gets dejected with its bad taste. If he is attracted by dice-play, he shall be terrified by spies under the disguise of gamblers of fraudulent nature. When he is fond of hunting, he shall be terrfied by spies in the disguises of hunters and highway thieves.

When he is under the temptation of attacking his own father, he may be warned of its consequences of such attempts pointing out the safety measures resorted to by the king and telling that any failure in the attempt will lead to self-destruction. If at all he succeeds in his atempt he is destined for hell and will be despised by the people of the state. Further the peeople will kill him by stoning him to death.

विरागं प्रियमेकपुत्रं वा बध्नीयात्। बहुपुत्रः प्रत्यन्तमन्यविषयं वा प्रेषयेद् यत्र गर्भः पण्यं डिम्बो वा न भवेत्। आत्मसम्पन्नं सैनापत्ये यौवराज्ये वा स्थापयेत्।

बुद्धिमानाहार्यबुद्धिर्दुर्बुद्धिरिति पुत्रविशेषाः। शिष्यमाणो धर्मार्थावुपलभते चानुतिष्ठति च बुद्धिमान्। उपलभमानो नानुतिष्ठत्याहार्यबुद्धिः। अपायनित्यो धर्मार्थद्वेषी चेत दुर्बुद्धिः।

एवं कृतेऽपि यः पितरि निःस्नेह एव पितुः प्रिय एकश्च पुत्रो भवेत्, तदा तं बध्नीयादित्याह–विरागमित्यादि। बहुपुत्रश्चेद् राजा यथोक्तं पुत्रं कर्शयेदित्यभिप्रायेणाह–**बहुपुत्र** इत्यादि। प्रत्यन्तं म्लेच्छदेशम्। अन्यविषयं वा अन्यदेशं वा। यत्र गर्भः पण्यं डिम्बो वा न भवेत् यस्मिन् देशे गर्भः अत्रं राजपुत्रोचितं, पण्यं तादृशं वसनादिकमापणलभ्यं भोग्यवस्तु, डिम्बो राजपुत्रनिमित्तः प्रकृतीनां विप्लवश्च, न स्यात्। गर्भ इत्यस्य स्थाने गर्व इत्यपि पाठः। तदा त्वर्थः स्फुट एव। गुणसम्पन्नपुत्रविषये त्वाह–**आत्मसम्पन्नमित्यादि**।

पुत्रं विभजते–**बुद्धिमानित्यादि**। पुत्रविशेषाः पुत्रभेदाः। उपदिश्यमानधर्मार्थज्ञानानुष्ठाननिष्ठो बुद्धिमान्। तज्ज्ञानमात्रवांस्तदनुष्ठानविमुख आहार्यबुद्धिः, नित्यप्रमादी धर्मार्थद्वेषणशीलश्च दुर्बुद्धिरिति त्रयाणां लक्षणमाह–**शिष्यमाण** इत्यादि।

If the only son dear to the father is proven to be disloyal, then he should be put under chains. If there are more than one son (in this category) then some of them should be sent out to a distant region (of the country) where there is no heir-apparent, nor a child just born or in the form of an embrio. But when there is a son possessed of noble qualities he may either be chosen as the commander-in-chief or may be installed as the heir apparent.

Sons are of (three kinds) as naturally intelligent, those with mild intelligence and those of perverted intelligence. He who puts into practice what has been instructed in matters like righteousness and wealth is the intelligent one. He who does not practice what is learnt is called a man of stagnant intelligence. The perverted one always goes wrong and hates righteousness and prosperous ways.

स यद्येकपुत्रः पुत्रोत्पत्तावस्य वियतेत। पुत्रिकापुत्रानुत्पादयेद् वा। वृद्धस्तु व्याधितो वा राजा मातृबन्धकुल्यगुणवत्सामन्तानामन्यतमेन क्षेत्रे बीजमुत्पादयेत्। न चैकपुत्रमविनीतं राज्ये स्थापयेत्।

बहूनामेकसंरोधः पिता पुत्रहितो भवेत्।
अन्यत्रापद ऐश्वर्यं ज्येष्ठभागि तु पूज्यते।।
कुलस्य वा भवेद् राज्यं कुलसङ्घो हि दुर्जयः।
अराजव्यसनाबाधः शश्वदावसति क्षितिम्।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
सप्तदशोऽध्यायः राजपुत्ररक्षणम्।।

स इति। स दुर्बुद्धिः, एकपुत्रो यदि एक एव राज्ञः पुत्रश्चेत्, अस्य दुर्बुद्धेः, पुत्रोत्पत्तौ पुत्रस्य राज्यार्हस्योत्पत्तौ वियतेत विशेषेण यत्नं कुर्यात्। अथवा पुत्रिकापुत्रान् पुत्रिकायाः 'अस्यां यो जायते पुत्रः स

मे पुत्रो भविष्यति' इति परिभाषापूर्वं वराय दत्ताया: सुताया: पुत्रान्, उत्पादयेद् राज्यार्थम्। अदुहितृको वृद्धभावाद् व्याधेर्वा गर्भाधानाक्षमश्चेद् राजा, तदा मातृबन्धो: स्वकुलजातस्य गुणवत्सामन्तस्य वा नियोगेन स्वमहिष्यां बीजमुत्पादयेदित्याह–वृद्धस्त्वित्यादि। सर्वथा तु अशिक्षितमेकं पुत्रं राज्ये न निवेशयेदित्याह–न चेत्यादि।

बहूनामिति। बहूनां पुत्राणां मध्ये, एकसंरोध: एकस्य दुर्बुद्धे: संरोध: प्रत्यन्तादिष्ववरोध:, कर्तव्य इति शेष:। पिता, आपदोऽन्यत्र अनापदि पुत्रहित: पुत्रानुकूलवृत्ति: भवेत्। पुत्रेषु बहुषु पितृप्रियेषु विद्यमानेषु कस्य राज्यभाक्त्वमित्यत्राह–ऐश्वर्यं राजत्वं, ज्येष्ठभागि तु ज्येष्ठपुत्राश्रयमेव, पूज्यते प्रशस्यते।।

पक्षान्तरमाह–कुलस्येति। अथवा राज्यं कुलस्य बहुपुत्रसङ्घस्य भवेत् बहुपुत्रसङ्घनेतृकं कार्यमित्यर्थ:। तथा करणे गुणमाह–कुलसङ्घ: कुलात्मको राज्यनेता सङ्घ:, दुर्जय: जेतुमशक्य: शत्रुणा भवति। गुणान्तरमाह–अराजव्यसनाबाध: राजव्यसनदोषनिमित्त आबाधो जनपीडा राजव्यसनाबाध: तस्याभाव:, शश्वत् सर्वदा क्षितिम् आवसति भूमिमधितिष्ठति राज्येऽनुवर्तत इत्यर्थ:। नेतृसङ्घस्यावयव एकस्मिन् व्यसनविनष्टेऽप्यन्यै: सम्यक् प्रजापरिपालननिर्वर्तनादिति भाव:।।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
सप्तदशोऽध्याय: राजपुत्ररक्षणम्।।

If he happens to have only a son of the last type (the perverted) then efforts should be taken to have a son by that fellow or sons may be generated in his daughters. If the king is too old (to have a son) or suffering from diseases, he may authorise one from his maternal family, or blood relation or any one of his vassals to procreate a son in his own wife. One should never allow a wicked son to ascend the throne.

A king having many sons should take care to segregate the wicked son away from his capital. When things are normal a king should cooperate with and help out his son. It he has several sons whom he likes, he shall choose the senior most son as heir apparent.

One may even share the country among several reighteous sons if he is inclined to do so. When several sons thus look after the affairs of the country no enemy will dare to attack the kingdom. A country where there is no anarchy is poised for eternal fame and stability.

Thus the seventeenth chapter of the Arthaśāstra of Kauṭalya called Protection of princes comes to an end.

Chapter 18

14, 15. प्रक० अवरुद्धवृत्तम्, अवरुद्धे च वृत्तिः।

Sections 14 & 15 : Prince Put Under Restraint and Treatment of a Restrained Prince

राजपुत्रः कृच्छ्रवृत्तिरसदृशे कर्मणि नियुक्तः पितरमनुवर्तेत, अन्यत्र प्राणाबाधकप्रकृतिकोपपातकेभ्यः। पुण्यकर्मणि नियुक्तः पुरुषमधिष्ठातारं याचेत। पुरुषाधिष्ठितश्च सविशेषमादेशमनुतिष्ठेत्। अभिरूपं च कर्म फलमौपायनिकं च लाभं पितुरुपनाययेत्।

तथाऽप्यतुष्यन्तमन्यस्मिन् पुत्रे दारेषु वा स्निह्यन्तमरण्याय आपृच्छेत। बन्धवधभयाद् वा यः सामन्तो न्यायवृत्तिर्धार्मिकः सत्यवागविसंवादकः प्रतिग्रहीता मानयिता चाभिपन्नानां तमाश्रयेत। तत्रस्थः कोशदण्डसम्पन्नः प्रवीरपुरुषकन्यासम्बन्धमटवीसम्बन्धं कृत्यपक्षोपग्रहं वा कुर्यात्।

अवरुद्धवृत्तमिति सूत्रम्। अवरुद्धो नाम राज्ञा स्वसन्निधेर्विवासितः, तेन राज्ञि कथं व्यवहर्तव्यमित्येतदिहोच्यत इति सूत्रार्थः। आत्मसम्पन्नः राजपुत्रः सैनापत्यादौ स्थाप्य इत्युक्तं प्राक्। तत्रात्मसम्पन्नेष्वनेकेष्वेकश्चेत् सेनापतिर्युवराजो वा क्रियेत, तदान्यो राजपुत्रो विजिगीषुः सम्पन्न इति तस्य वृत्तमभिधानीयमिति सम्बन्धः।

अवरुद्धो राजपुत्रः क्लेशनिर्वर्त्यदेहयात्रः स्वाननुरूपे कर्मणि पित्रा चोदितो यथापितृनियोगं कर्मानुतिष्ठेत्, तच्चेत् कर्म स्वप्राणसंशयकरं प्रकृतिकोपनं पातकजनकं वा न भवेदित्याह–**राजपुत्र** इत्यादि। अनुष्ठानप्रकारमाह–**पुण्ये**त्यादि। अधिष्ठातारं पुरुषं याचेत कर्मनेतारं कमपि स्वाधश्चरपुरुषं पितुसकाशाद् याचित्वा लभेत। आदेशं पितृनियोगम्। सविशेषमनुतिष्ठेत् विशेषो गुणवत्ता तद्युक्तं तथा भवति तथा चरेत्। अभिरूपं हृद्यं प्रशस्तम्। कर्मफलं स्वकर्मोत्पादितं धान्यादिकम्। औपायनिकं लाभं च कर्षकादिभ्य उपायनात्मना लब्धं द्रव्यं च। पितुरुपनाययेत् पितुः सकाशं प्रापयेत् तत्परितोषार्थं, न तु स्वयमुपयुञ्जीत।

तथापीत्यादि। तथापि अतुष्यन्तं कर्मफललाभोपनायनेनाप्यात्मनि तुष्टिमकुर्वन्तं पितरम्। दारेषु स्वमातृव्यतिरिक्तायां पत्न्याम्। अरण्याय आपृच्छेत 'तपसे वनं गन्तुं मेऽनुज्ञां देही'त्यर्थयेत। यथोक्तापृच्छादैन्यप्रकाशनेऽप्यार्जवमप्रतिपद्यमाने पितरि आत्मबन्धनहननशङ्कायां वा जातायां तं गत्यन्तराभावादभिद्रोग्धुं गुणवत्सामन्तसाहाय्यम्पादने वियतेतेत्याह–**बन्धवधभया**दित्यादि। अविसंवादकः अविप्रलम्भकः अभिपन्नानां प्रतिग्रहीता मानयिता च शरणगतानां स्वीकर्ता सत्कर्ता च। तं सामन्तमाश्रित्य

तिष्ठन् कोशदण्डाभ्यां स्वार्जिताभ्यां युक्तो भूत्वा प्रकृष्टवीरपुरुषकन्यकाया: परिणयं स्वपितृजनपदाटविकसख्यं स्वपितृकृत्यवर्गस्वीकरणं च सहायोपचयार्थं कुर्यादित्याह--तत्रस्थ इत्यादि। अटवीसम्बन्धमित्यटवीशब्द-स्तात्स्थ्यादाटविके वर्तते।

A prince under restraint may follow the directions of his father and engage himself in activities which may not be to his liking unless such actions he shall try to please the one who supervises enrage people, cause calamities and bring harm to his life. If engaged in righteous activities prompt him in such meritorious actions. Under such supervision he shall perform his actions in such a way to earn praise at his hands (and cause him to report favourably to the king). Proportional profit of such actions shall be presented to the king (to prove his success).

Despite this, if the king is not pleased with him and is seen favouring other sons or wives, he may consult the problem with his father and seek his indulgence to choose the life of a forest-living mendicant. In case he is afraid of being killed or put into a prison, he may approach a vassal king who is just, righteous, truthful not given to dispute, who welcomes guests and those who seek refuge. Living there he may provide himself with men and wealth, get married to the daughter of a powerful and brave person and acquire friendship with tribals in addition to winning over the officers of the state (of his father).

एकचर: सुवर्णपाकमणिरागहेमरूप्यपण्याकरकर्मान्तानाजीवेत्। पाषण्डसङ्घद्रव्य-मश्रोत्रियभोग्यं देशद्रव्यमाढ्यविधवाद्रव्यं वा गूढमनुप्रविश्य सार्थयानपात्राणि च मदनरसयोगे-नातिसन्धायावहरेत्। पारग्रामिकं वा योगमातिष्ठेत्। मातु: परिजनोपग्रहेण वा चेष्टेत। कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपाषण्डच्छद्मभिर्वा नष्टरूपस्तद्व्यञ्जनसख: छिद्रे प्रविश्य राज्ञ: शस्त्ररसाभ्यां प्रहृत्य ब्रूयात्–अहमसौ कुमार:, सहभोग्यमिदं राज्यमेको नार्हति भोक्तुं, तत्र ये कामयन्ते भर्तुं तानहं द्विगुणेन भक्तवेतनेनोपस्थास्ये इति। इत्यवरुद्धवृत्तम्।।

असहायविषय आह–**एकचर** इति। एकचर: एकाकी अलब्धकोशदण्डादिसहाय:, सुवर्णपा-कमणिरागहेमरूप्यपण्याकरकर्मान्तान् सुवर्णपाकं पुटपाकेन लोहादे: सुवर्णत्वापादनकर्म रसतन्त्रप्रयोगमिति यावत्, मणिरागहेमरूप्यपण्यानि वज्रवैदूर्यमौक्तिकादिर्मणि: लाक्षादिरञ्जनद्रव्यं राग: हेम स्वर्णं रूप्यं रजतम् इत्येतद्रूपाणि पण्यानि विक्रेयपदार्थान् आकरकर्मान्तं रत्नादिखनिव्यापारं च, आजीवेत् उपजीवेत्। एष कोशार्जनेऽभ्युपाय:। उपायान्तरमाह–**पाषण्ड**ेति। पाषण्डसङ्घद्रव्यं पाषण्डै: स्वसङ्घार्थं सङ्गृह्य स्थापितं धनम्, अश्रोत्रियभोग्यं देशद्रव्यं छान्दसब्राह्मणभोग्यातिरिक्तं देश्यजनसमुदायद्रव्यम्। देवद्रव्यमित्यपि पाठ:। आढ्यविधवाद्रव्यं वा अढ्या: समृद्धधना या विधवास्तासां द्रव्यं वा, गूढं द्रव्यापजिहीर्षागुप्तिपूर्वं, अनुप्रविश्य अनुकूलाचरणेन वशयित्वा अर्थात् पाषण्डादीन् अवहरेत्। किञ्च सार्थयानपात्राणि सार्थस्य वणिक्सङ्घस्य यानपात्राणि पोतान् पण्ययुक्तान्, मदनरसयोगेन मदकररसदानोपायेन, अतिसन्धाय वञ्चयित्वा अर्थाद् वणिक्सङ्घम्, अवहरेत्। **पारग्रामिक**मिति। अथवा पारग्रामिकं योगं 'विजिगीषु: परग्राममवाप्तुकाम'

इत्यादिना दुर्गलम्भोपायाधिकरणे वक्ष्यमाणम् उपायम्, आतिष्ठेत् आद्रियेत। अथवा मातुः, परिजनोपग्रहेण सेवकजनानुकूलनेन, चेष्टेत वियतेत स्ववृद्ध्यर्थम्। अथवा, कारुशिल्पिकुशीलवचिकित्सकवाग्जीवन-पाषण्डच्छद्मभिः कारवः तक्षायस्काराः शिल्पिनः चित्रकारादयः कुशीलवा गायनाः चिकित्सका वैद्याः वाग्जीवनाः पुरावृत्तकथनोपजीविनः पाषण्डाः क्षपणकबौद्धभिक्षुप्रभृतयो वेदबाह्याः तद्वेषैः सह, नष्टरूपः छन्नस्वरूपः, तद्व्यञ्जनसखः कार्वादिवेषपुरुषतुल्यः, राज्ञः पितुः, छिद्रे अपकारस्थाने, प्रविश्य, शस्त्ररसाभ्यां प्रहृत्य राजानं हत्वा, ब्रूयाद्, अर्थात् सचिवादीन्। अहमित्यादिर्वचनप्रकारः। कुमारः राजपुत्रः। सहभोग्यं ससहायनिर्वेश्यं ससहायशासनीयं वा। भर्तुम् अमात्यादिपदेष्वधिकर्तुम्। तान् भर्तुकामान्। द्विगुणेन मत्पितृदत्ताद् द्विरावृत्तेन। उपस्थास्ये पूजयिष्यामि। इत्यवरुद्धवृत्तं वर्णितमिति शेषः।।

If he is alone (without men and means) he may seek livelihood by working in gold mines, ruby mines, or by manufacturing gold and silver ornaments or any other similar engagements. Having gained close intimacy with heretics, rich widows or sea-faring merchants, he may, by using intoxicative liquor rob them of their wealth by deception. Or he may resort to such measures to rob the neighbouring villages (of the bordering state); acquire wealth by enlisting the help of the maternal relations. He may disguise himself as a painter, a carpenter, a court-bard, a physician, a jester, or heretic or enlisting the help of the spies using such guises, gain entrance to the chamber of the king armed with weapons and poison and announce that' "I am the heir apparent, it is not proper for you alone to enjoy the kingdom which is equally due to me by right, and hence I should not be kept away by force when I too am fit for enjoyment of the kingdom. Those who obey me shall receive twice as much salary as what you have been receiving from my father." These are the mearues that a prince under restraint could resort to.

अवरुद्धं तु मख्यपुत्रापसर्पाः प्रतिपाद्यानयेयुः, माता वा प्रतिगृहीता। त्यक्तं गूढपुरुषाः शस्त्ररसाभ्यां हन्युः। अत्यक्तं तुल्यशीलाभिः स्त्रीभिः पानेन मृगयया वा प्रसज्य रात्रावुपगृह्यानयेयुः।

अवरुद्धे च वृत्तिरिति सूत्रम्। अवरुद्धं पुत्रादिं प्रति विजिगीषोर्वृत्तमिति सूत्रार्थः। विजिगीषोरवरुद्धावस्थायां वृत्तमुक्तम्, अवरोद्ध्रवस्थायां वृत्तमधुनोच्यते।

अवरुद्धमिति। मुख्यपुत्रापसर्पाः मुख्यानाममात्यादीनां ये पुत्राः तद्रूपा अपसर्पाः चाराः, प्रतिगृहीः। माता वा राजपूजिता स्वमाता वा, अवरुद्धं राजपुत्रं, प्रतिपाद्य 'पिता ते योवराज्यं दद्यात् त्वं चेत् तदनुकूलवृत्तिरि'ति भाषया पितृहितवृत्तिमभ्युपगमय्य, आनयेयुः पितुरन्तिकम्। कथञ्चिदपि विधेयतानासादनात् पित्रा परित्यक्तं राजपुत्रम् आयुधविषप्रयोगाभ्यां गूढपुरुषा हन्युः, अविधेयत्वेऽप्येकपुत्रत्वादपत्यस्नेहाद् वा अपरित्यक्तं तं समानस्वभावाभिः स्त्रीभिः मद्येन खेटनेन वा प्रसक्तिं कारयित्वा बद्ध्वा रात्रौ राजान्तिकं प्रापयेयुरित्याह—त्यक्तमित्यादि।

A prince under restraint shall be brought to the kingdom by the spies

of other sons (who are favoured by the king) after explaining their views; or by the messengers of the mother. It he is not amenable then he may be killed by secret emissaries using weapons or poison. But if he is not dangerous to the father, he may be caught hold of at night by employing women who are competent to ensnare such men by the use of liquor or by prompting him to go on a hunt at night and seize him to be brought back to the capital.

उपस्थितं च राज्येन मदूर्ध्वमिति सान्त्वयेत्।
एकस्थमथ संरुन्ध्यात् पुत्रवान् वा प्रवासयेत्।।

।। इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
अष्टादशोऽध्यायः अवरुद्धवृत्तमवरुद्धे च वृत्तिः।।

उपस्थितमिति। उपस्थितं तथा प्राप्तम् अवरुद्धम् अर्थाद् धार्मिकं, राज्येन मदूर्ध्वमिति सान्त्वयेत् राज्यमिदं मदुत्तरकाले त्वदीयं भविष्यतीति राज्येन निमित्तेनानुनयेत्। अथ एकस्थम् अभ्रातृकं पुत्रम् अर्थादधार्मिकं सन्तं, संरुन्ध्यात् कारागृहे निवेशयेत्। पुत्रवान् वा प्रवासयेत् बहुपुत्रसद्भावपक्षे अधार्मिकं पुत्रं हन्यादित्यर्थः।।

।। इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकारिके
प्रथमाधिकरणे अष्टादशोऽध्यायः अवरुद्धवृत्तम् अवरुद्धे च वृत्तिः।।

If such a prince is righteous he may be pacified by the king saying that he is to inherit the kingdom soon. Then he may be put under chains (to ensure the safety of the king.} Or if the king has many sons, the unruly son may be banished.

Thus the eighteenth chapter of the Arthaśāstra of Kautalya dealing with the topics of 'prince put under restraint and treatment of a restrained prince comes to an end.

Chapter 19

16. प्रक० राजप्रणिधिः।

Section 16 : The Royal Duties

राजानमुत्तिष्ठमानमनूत्तिष्ठन्ते भृत्याः। प्रमाद्यन्तमनुप्रमाद्यन्ति। कर्माणि चास्य भक्षयन्ति। द्विषद्भिश्चातिसन्धीयते। तस्मादुत्थानमात्मनः कुर्वीत। नालिकाभिरहरष्टधा रात्रिं च विभजेत्। छायाप्रमाणेन वा त्रिपौरुषी पौरुषी चतुरङ्गुला चच्छाया मध्याह्न इति चत्वारः पूर्वे दिवसस्याष्टभागाः। तैः पश्चिमा व्याख्याताः।

तत्र पूर्वे दिवसस्याष्टभागे रक्षाविधानमायव्ययौ च शृणुयात्। द्वितीये पौरजानपदानां कार्याणि पश्येत्। तृतीये स्नानभोजनं सेवेत, स्वाध्यायं च कुर्वीत। चतुर्थे हिरण्यप्रतिग्रहमध्यक्षांश्च कुर्वीत। पञ्चमे मन्त्रिपरिषदा पत्रसंप्रेषणेन मन्त्रयेत, चारगुह्यबोधनीयानि च बुध्येत। षष्ठे स्वैरविहारं मन्त्रं वा सेवेत। सप्तमे हस्त्यश्वरथायुधीयान् पश्येत्। अष्टमे सेनापतिसखो विक्रमं चिन्तयेत्। प्रतिष्ठितेऽहनि सन्ध्यामुपासीत।

राजप्रणिधिरिति सूत्रम्। राज्ञः प्रणिधिः प्रणिधानं व्यापार उच्यत इति सूत्रार्थः। इन्द्रियजयप्रकरणे 'उत्थानेन योगक्षेमसाधनम्' इत्युक्तम्, उत्थानस्वरूपं त्वनुक्तमिहाभिधीयते।

राजा स्वकर्मणि व्याप्रियते चेद्, अमात्यसमाहर्तृसन्निधातृप्रभृतयो भृत्याः स्वस्वकर्मसु व्याप्रियन्ते, स चेदालस्यान्न व्याप्रियते तेऽपि न व्याप्रियन्ते, राज्ञः कार्याणि च नाशयन्ति, तथाभूतोऽसौ राजा शत्रुभिर्वञ्च्यते च। तस्मादात्मनो व्यापारं राजानुतिष्ठेदित्याह—**राजानमित्यादि**। अनुष्ठेयानां कर्मणां कालविभागनियमं वक्तुमाह—**नालिकाभिरिति**। अहश्च रात्रिं च, नालिकाभिरष्टधा विभजेत् नालिका घटिका षष्टिविनाडिकात्मिका नालिकाप्रमाणेनाह्नो रात्रेश्च प्रत्येकमष्टौ भागान् कल्पयेत्। तत्रैकोऽष्टमभागः पादोननालिकाचतुष्टयात्मको मुहूर्ताख्यः सुप्रसिद्धः। दिवसस्याष्टावष्टमभागान् दर्शयति—**छायेत्यादि**। त्रिपौरुषी पुरुषत्रयपरिमाणा छाया, पौरुषी एकपुरुषपरिमाणा, चतुरङ्गुला अङ्गुलचतुष्टयपरिमाणा चेति त्रयः, मध्याह्नश्चतुर्थः, इति छायाप्रमाणेन एवम्प्रकारेण पुरुषच्छायामानेन, दिवसस्य, पूर्वे अष्टभागाः आदिमा अष्टमभागाः, चत्वारो भवन्ति। तैः उक्तैः पूर्वैरष्टभागैः, पश्चिमाः व्याख्याताः उत्तरा अष्टभागा उक्तप्रायाः, चतुरङ्गुला पौरुषी त्रिपौरुषी दिनान्त इत्येवं चत्वार इत्यूहितुं शक्या इत्यर्थः।

दिवसस्याष्टभागेष्वष्टसु क्रमेणानुष्ठेयानि कर्माणि दर्शयति—**तत्र पूर्व इत्यादि**। रक्षाविधानं रात्र्यनुष्ठितम्। आयव्ययौ गताहोरात्रवृत्तौ। पश्येत् विमृशेत्। स्नानभोजनं स्नानं च भोजनं च। स्वाध्यायं वेदाध्ययनम्।

हिरण्यप्रतिग्रहं गतदिवसोत्थितधनस्वीकारम्। अध्यक्षान् कुर्वीत कार्यविशेषेषु नियुञ्जीत। पत्रसम्प्रेषणेन मन्त्रयेत लेख्यद्वारकसंवादेन कार्यमालोचयेत्। चारगुह्यबोधनीयानि बुध्येत चारेभ्यो रहसि उपदेश्यानि कार्याणि अवगच्छेत्। स्वैरविहारं स्वच्छन्दावस्थानं विश्रमार्थम्। हस्त्यश्वरथायुधीयान् हस्त्यादियुक्तान् पदातीन्। सेनापतिसखः सेनापतिसमेतः। प्रतिष्ठिते अवसिते।

If a king is active (in his affairs) his employees too will be active. If he falters they too will falter. They default in their duties. Enemies will easily deceive such a king. Hence he should always be active in his functions and duties. He shall divide both the day and the night into eight Nālikas (1½ hours) or according to the length of a shadow (cast by a Puruṣa (man) standing in the sun), the shadow of three Puruṣas; of one Puruṣa, or four angulas (3 inches) and absence of shadow denoting midday are the four one-eight divisions of the fore-noon. Likewise the period of afternoon may also be divided into four divisions (in the reverse order).

Of these divisions in the first one-eighth part of the forenoon he shall attend to the reports regarding income and expenditure after posting a watchman (to avoid disturbance). In the second unit of time he shall look into the affairs concerned with the citizens and people of the villages. In the third unit of time the shall take his bath and food besides attending to the studies. In the fourth part he shall receive gold (brought in as revenue) and appoint the officers concerned. In the fifth part he shall deliberate issues with the council of ministers by way of correspondence, in addition to gathering information from the spies already engaged. On the sixth part of the day he may spend time taking rest or by engaging in counselling. In the seventh part he shall inspect the forces consisting of elephants, cavalry, chariots as well as weapons. During the eighth part of the day he shall deliberate with the chief of the army in regard to military operations. When the day comes to a close he shall attend to the evening prayer.

प्रथमे रात्रिभागे गूढपुरुषान् पश्येत्। द्वितीये स्ननानभोजनं कुर्वीत स्वाध्यायं च। तृतीये तूर्यघोषेण संविष्टः चतुर्थपञ्चमौ शयीत। षष्ठे तूर्यघोषेण प्रतिबुद्धः शास्त्रमितिकर्तव्यतां च चिन्तयेत्। सप्तमे मन्त्रमध्यासीत, गूढपुरुषांश्च प्रेषयेत्। अष्टमें ऋत्विगाचार्यपुरोहितसखः स्वस्त्ययनानि प्रतिगृह्णीयात्, चिकित्सकमाहानसिकमौहूर्तिकांश्च पश्येत्। सवत्सां धेनुं वृषभं च प्रदक्षिणीकृत्योपस्थानं गच्छेत्।

आत्मबलानुकूल्येन वा निशाहर्भागान् प्रतिविभज्य कार्याणि सेवेत।

रात्रिभागेष्वनुष्ठेयानि कर्माण्याह–**प्रथम** इत्यादि। तृतीये तूर्यघोषेण संविष्टः तृतीये रात्रिभागे गीतवाद्यश्रवणसुखमनुभवन्नेव शयितः। चतुर्थपञ्चमौ शयीत चतुर्थे पञ्चमे च रात्रिभागे कृत्स्ने स्वप्यात्। शास्त्रम् अर्थशास्त्रम्। इतिकर्तव्यतां कालोचितकार्यपरिपाटीम्। प्रेषयेद् यथाविषयं प्रणिदध्यात्।

ऋत्विगाचार्यपुरोहितसखः ऋत्विग् याजकः आचार्यः विद्योपदेष्टा पुरोहितः मन्त्रिपुरोहितोत्पत्ति-प्रकरणोपवर्णितगुणः एषां सखा। स्वस्त्ययनानि माङ्गलिकमन्त्रपाठपूर्वाण्याशीर्वचनानि। **चिकित्सकमाहान-सिकमौहूर्तिकांश्च पश्येदिति।** चिकित्सकदर्शनं देहावस्थापरिज्ञानार्थम् महानसाधिकृतदर्शनं कल्पनीयेष्टाहारकथनार्थम् मौहूर्तिकदर्शनं तदहर्ग्रहशुभाशुभचिन्तनार्थम्। उपस्थानम् आस्थानमण्डपम्।

त इमे निशाहर्भागा औत्सर्गिकाः, वैशेषिका अपि तु कार्यद्रष्ट्रा कल्प्यमाना न दुष्यन्तीत्याह—आत्मेत्यादि। वा अथवा। आत्मबलानुकूल्येन आत्मनो यद् बलं कार्यानुष्ठानशक्तिस्तदानुगुण्येन।

Similarly during the first one-eighth part of the night he shall meet with emissaries. In the second part he may take bath and food in addition to continuing his studies. He shall enter the bed chamber listening to the sound of trumpets and enjoying sleep during the fourth and fifth part of the night. In the sixth part of the night he shall wake up to the sound of trumpets and recall to his mind the sciences and deliberate upon the duties of the ensuing day. On the seventh part of the night he shall learn the counselling and engage spies. In the eighth part of the night shall receive benedictions in the company of sacrificial priest, teacher, and high priest. Now he shall give audience to his physician, chief cook and astrologers. He shall proceed to the royal court after circumambulating a cow with its calf and a bull.

Or he may himself divide the day and night into suitable divisions and fix a time table befitting his capacity, and look into his duties.

उपस्थानगतः कार्यार्थिनामद्वारासङ्गं कारयेत्। दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः कार्यते। तेन प्रकृतिकोपमरिवशं वा गच्छेत्। तस्माद् देवताश्रमपाषण्डश्रोत्रियपशुपुण्यस्थानानां बालवृद्धव्याधितव्यसन्यनाथानां स्त्रीणां च क्रमेण कार्याणि पश्येत्, कार्यगौरवादात्ययिक-वशेन वा।

**सर्वमात्ययिकं कार्यं शृणुयान्नातिपातयेत्।
कृच्छ्रसाध्यमतिक्रान्तमसाध्यं वा विजायते।।
अग्न्यगारगतः कार्यं पश्येद् वैद्यतपस्विनाम्।
पुरोहिताचार्यसखः प्रत्युत्थायाभिवाद्य च।।
तपस्विनां तु कार्याणि त्रैविद्यैः सह कारयेत्।
मायायोगविदां चैव न स्वयं कोपकारणात्।।**

उपस्थानेत्यादि। अद्वारासङ्गं कारयेत् द्वारे, आसङ्गः सक्तिर्निरोध इति यावत् तदभावं कारयेत्, सुलभदर्शनो भवेदित्यभिप्रायः। दुर्लभदर्शनत्वे दोषमाह—**दुर्दर्श** इत्यादि। कार्याकार्यविपर्यासं कार्याकार्ययोरकरणं व्युत्क्रमकरणं वा। आसन्नैः अन्तिकसेवकैः। तेन कार्याकार्यविपर्यासनेन। प्रकृतिकोपम् अमात्यादिरोषम्। अरिवशं शत्रुगोचरम्। कार्यदर्शने क्रममाह—तस्माद् देवताश्रमेत्यादि। अत्राश्रमशब्दो मुन्युपलक्षकः। व्यसनिशब्दो दुःखाभिभूतपरः। शेषं स्पष्टम्। कार्यगौरवाद् आत्ययिकवशेन वा कार्याणि

पश्येत् कार्यस्य महत्त्वापेक्षया वा अमहत्त्वेऽप्यतिपातित्वापेक्षया वा कार्याणि चिन्तयेत्, क्रमं यथोक्तमनादृत्यापीत्यभिप्रायः।

सर्वमिति। सर्वं गुरु लघु च, आत्ययिकं कार्यं, शृणुयात्, श्रुत्वानुतिष्ठेत्, नातिपातयेत् नातिक्रामयेत्। अतिक्रान्तम् अतिपातितकालं किमपि सद्यस्सुकरं कार्यं, कृच्छ्रसाध्यं असाध्यं वा भवति, कालान्तरे।।

अग्न्यगारेत्यादि। अग्न्यगारगतः अग्निहोत्रशालागतः। वैद्यतपस्विनां विदुषां तापसानां च।।

तपस्विनामित्यादि। त्रैविद्यैः सह त्रयीविद्याविद्भिः साकं, त्रैविद्यसाहित्यवचनं कार्यनिर्णये प्रत्ययार्थम्। मायायोगविदां मायाप्रयोगाभिज्ञानाम्। न स्वयम् एकाकी सन् न कारयेत्, कुतः, कोपकारणात् कोपान्निमित्तात्।।

Reaching the royal court he should see to that no visitor or supplicant is prevented at the door. The king who refuses to see the people performs the work either satisfactory or otherwise through the officers of his immediate vicinity. This will result in estranging his own people, prompting them to go to the side of his enemy. Hence he shall perform the business of gods, hermits, heretics, learned Brahmins, cows and holy places in addition to looking after the requirements of youngsters, old men, afflicted with disease and helpless women, realising the gravity of the situation or contingency.

One should listen to all immediate requirements without getting delayed; what was easy at the beginning may prove to be beyond one's ability by the lapse of time. One should listen to the business of physicians and ascetics while remaining in the sacrificial house in the company of the high priest and teacher after receiving the supplicant by going forward with benediction. The matters relating to mendicants may be accomplished by enlisting the help of persons proficient in the three Vedas. One should carry out the matters of those possessed of witchcraft and Yogic powers lest they become offended.

राज्ञो हि व्रतमुत्थानं यज्ञः कार्यानुशासनम्।
दक्षिणा वृत्तिसाम्यं च दीक्षितस्याभिषेचनम्।।
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्।।
तस्मान्नित्योत्थितो राजा कुर्यादर्थानुशासनम्।
अर्थस्य मूलमुत्थानमनर्थस्य विपर्ययः।।
अनुत्थाने ध्रुवो नाशः प्राप्तस्यानागतस्य च।
प्राप्यते फलमुत्थानाल्लभते चार्थसम्पदम्।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
एकोनविंशोऽध्यायः राजप्रणिधिः।।

राज्ञ इति। उत्थानम् उद्योगः, यज्ञः क्रत्वनुष्ठानं, कार्यानुशासनं व्यवहारनिर्णयः, दक्षिणा दानं, वृत्तिसाम्यं शत्रौ मित्रे च गुणदोषापेक्षया तुल्यं व्यवहरणं, दीक्षितस्य अभिषेचनम् अवभृथनिवर्तनं च राज्ञो व्रतम्।।

प्रजासुख इति। प्रजासुखे सति, राज्ञः सुखम्, अस्ति। प्रजानां हिते च सति राज्ञो हितम्, अस्ति। राज्ञः आत्मप्रियं हितं न भवति, किं तर्हि, प्रजानां प्रियं तु हितं प्रजानां प्रियमेव हितं भवति।।

तस्मादिति। तस्माद् उक्तात् कारणात्, राजा नित्योत्थितः नित्योद्योगी सन्, अर्थानुशासनम् अर्थव्यवहारं, कुर्यात्। उत्थानम् उद्यमः, अर्थस्य मूलं सिद्ध्युपायः, विपर्ययः अनुत्थानम् अनर्थस्य मूलम्।।

अनुत्थान इति। अनुत्थाने आलस्यादुद्योगाकरणे, प्राप्तस्य पूर्वसिद्धस्य, अनागतस्य सेत्स्यतश्च अर्थस्य, नाशः, ध्रुवः निश्चितः। उत्थानात् फलं प्राप्यते, अर्थात् सद्यः, अर्थसम्पदं लभते च अर्थस्य प्राप्तस्य रक्षणसिद्ध्या अप्राप्तस्य प्राप्तिसिद्ध्या च समृद्धिं प्राप्नोति च। उत्थानस्यैवं त्रैकाल्यहितत्वं समर्थितम्।।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
एकोनविंशोऽध्यायः राजप्रणिधिः।।

Readiness to action should be the vow of a king : discharge of duties forms his sacrifice. Treatment of all with equality is his fees and consecration should be his ablution. A king finds happiness in the well being of his people; and he finds his welfare in that of his people. Self-satisfaction is not dear to a king but the satisfaction of the people alone is his own satisfaction. Hence a king constantly active shall endeavour to administer the country; for it is this kind of endeavour that brings prosperity and wealth and its absence brings opposite result. With lack of endeavour the destruction is definite not only of what is already earned but also that which is sought to be accomplished. It is by endeavour that one gets favourable results including prosperity.

Thus the nineteenth chapter of the Arthaśāstra of Kauṭalya called 'the royal duties' comes to an end.

Chapter 20

17. प्रक० निशान्तप्रणिधिः।

Section 17 : Duty Towards the Harem

वास्तुकप्रशस्ते देशे सप्राकारपरिखाद्वारमनेककक्ष्यापरिगतमन्तःपुरं कारयेत्।

कोशगृहविधानेन वा मध्ये वासगृहं, गूढभित्तिसञ्चारं मोहनगृहं तन्मध्ये वा वासगृहं, भूमिगृहं वा आसन्नकाष्ठचैत्यदेवतापिधानद्वारमनेकसुरुङ्गासञ्चारम्। प्रासादं वा गूढभित्तिसोपानं, सुषिरस्तम्भप्रवेशापसारं वा। वासगृहं यन्त्रबद्धतलावपातं कारयेद् आपत्प्रतीकारार्थम्। आपदि वा कारयेत्। अतोऽन्यथा वा विकल्पयेत् सहाध्यायिभयात्।

निशान्तप्रणिधिरिति सूत्रम्। निशान्तं राजभवनं तस्य प्रणिधिः, तत्सम्बद्धमनुष्ठानमुच्यत इति सूत्रार्थः। 'दाररक्षणं निशान्तप्रणिधौ वक्ष्याम इत्युक्तं राजपुत्ररक्षणे। तदिदानीमभिधीयते।

वास्तुकेत्यादि। वास्तुकप्रशस्ते वास्तुविद्याभिज्ञश्लाघिते। सप्राकारपरिखाद्वारं प्राकारः सालः परिखा दुर्गवेष्टनखातिका द्वाराणि अपवरकाणि एतैर्युक्तम्। अनेककक्ष्यापरिगतम् अनेकाभिः कक्ष्याभिः प्रकोष्ठकैः परिगतम् अन्तःपुरं कारयेत्।

कोशेति। कोशगृहविधानेन कोशगृहनिर्माणविधया सन्निधातृनिचयकर्मप्रकरणे वक्ष्यमाणया, मध्ये अन्तःपुरमध्ये, स्वस्य वासगृहं गर्भागारं कारयेद्, राजा। गूढभित्तिसञ्चारं गूढः अनन्यलक्ष्यः भित्तिसञ्चारः भित्त्यन्तरस्थो गतागतमार्गो यस्य तथाभूतं, मोहनगृहं मार्गव्यामोहकरत्वाद् मोहनसंज्ञं किमपि वृत्ताकारं गृहं, कारयेत्। भूमिगृहं वा कारयेद् भूमिं खात्वा तदन्तः कृतसन्निवेशं गृहं कारयेद्, अर्थान्मोहनगृहस्य मध्ये। कीदृशं भूमिगृहम्, आसन्नकाष्ठचैत्यदेवतापिधानद्वारम् आसन्नकाष्ठे चैत्ये निकटदिग्वर्तिनि देवालये या देवता प्रसिद्धा तदन्या वा रौद्री तद्रूपं पिधानम् उत्कीर्णतद्देवताप्रतिमाङ्कं दारुलोहादिमयमाच्छादनं यस्य तत् तथाभूतं द्वारं यस्य तादृशम्। देवतापिहितद्वारे तस्मिन् गतागतमार्गसंविधानमाह–अनेकसुरुङ्गासञ्चारम् अनेकाः सुरुङ्गासञ्चाराः तिर्यग्भूखातात्मकाः सञ्चरणमार्गा यस्य तत् तादृशम्। किञ्च प्रासादं, गूढभित्तिसोपानं गूढानि अन्याविदितानि भित्तिसोपानानि भित्त्यन्तरगतानि आरोहणानि यस्य तं तथाभूतम्, अथवा सुषिरस्तम्भप्रवेशापसारं वा अन्तः सुषिरवता स्तम्भेन स्तम्भमार्गेण प्रवेशः अपसारो निर्गमश्च यस्मिंस्तं तथाभूतं वा कारयेत्। प्रकारान्तरमाह–**वासगृहमि**ति। वासगृहं, यन्त्रबद्धतलावपातं यन्त्रबद्धं तलावपातं च यन्त्रेणोपरिभूमौ धारितं यन्त्रस्रंसने सत्यधोदेशनिपातुकं च कारयेत्। किमर्थम्, आपत्प्रतीकारार्थं शत्रुभयप्रतिक्रियार्थम् अधःस्थितशत्रु-मारणार्थमित्यर्थः। आपदि वा कारयेत् पूर्वमतादृशमप्यापत्समये वा तादृशं कारयेत्। उक्तं वासगृहकापट्यप्रकारं शत्रुरपि तुल्यशास्त्रवेत्ता विज्ञाय चेष्टेतेति यदि शङ्का स्यात्, तदा प्रकारान्तरेण स्वबुद्धिप्रतिभातेन वासगृहं विकल्पयेदित्याह–**अतोऽन्यथा वे**त्यादि।

On a plot selected by the architects, the king shall construct the harem surrounded by fortifications, ditches and consisting of many apartments and provided with a single door.

Residential house shall be constructed as in the case of the treasury-house, in a central place; or there can be a Mohanagṛha (a chamber which could delude the entrants) having stairs within its walls, in the centre of which the kings chamber could be built, or an apartment underground in the proximity of house deities with a closing door carved with figurines through which one may enter into several underground passages. A palatial house in several storeys with hidden stair cases could also be planned, with hollow pillars through which one may get in and get out as and when required. The residential apartment may be provided with shutters with mechanical contrivance that could be caused to fall down when needed in dangerous occasions. (If such a device is not already there) one may construct the same when one expects danger. Or other similar contrivances may be planned apprehending danger from his own classmates.

मानुषेणाग्निना त्रिपरसव्यं परिगतमन्तःपुरमग्निरन्यो न दहति, न चात्रान्योऽग्निर्ज्वलति, वैद्युतेन भस्मना मृत्संयुक्तेन करकवारिणावलिप्तं च।

जीवन्तीश्वेतामुष्ककपुष्पवन्दाकाभिरक्षीवे जातस्याश्वत्थस्य प्रतानेन वा गुप्तं सर्पा विषाणि वा न प्रसहन्ते। मार्जारमयूरनकुलपृषतोत्सर्गः सर्पान् भक्षयति। शुकः शारिका भृङ्गराजो वा सर्पविषशङ्कायां क्रोशति। क्रौञ्चो विषाभ्याशे माद्यति, ग्लायति जीवञ्जीवकः, म्रियते मत्तकोकिलः, चकोरस्याक्षिणी विरज्येते। इत्येवम् अग्निविषसर्पेभ्यः प्रतिकुर्वीत।

निर्मितस्य निशान्तस्याग्निभयपरिहारोपायमाह–मानुषेणेति। मानुषेणाग्निना शत्रुनिहतस्य वा शूलारोपणमारितस्य वा मनुष्यस्यास्थ्नि कल्माषवेणुना मथनादुत्थितेनाग्निना, त्रिः अपसव्यं परिगतं त्रीन् वारान् वामावर्तेन परीतं, परिगमनस्य अथर्वोक्तमन्त्रोच्चारणपूर्वकत्वं तु साम्प्रदायिकमर्थगम्यम्। अन्तःपुरम् अन्योऽग्निर्न दहति। अत्र अन्तःपुरे, अन्योग्निर्न च ज्वलति। मृत्संयुक्तेन वल्मीकमृत्तिकासंमिश्रेण, वैद्युतेन भस्मना विद्युदुद्भूताग्निदग्धद्रुमभवेन भसितेन, करकवारिणा वर्षोपलजलयुक्तेन सता, अवलिप्तं च कृतलेपनमन्तःपुरं च, अन्योऽग्निर्न दहति, न चात्र ज्वलति।

विषप्रतीकारमाह–जीवन्तीति। जीवन्तीश्वेतामुष्ककपुष्पवन्दाकाभिः जीवन्ती गुडूची श्वेता शङ्खिनी मुष्को लोध्रभेदः पुष्पवन्दाका करवीरोपरिजाता वृक्षरुहा ताभिः अर्थात् तासां मूलैः पत्रैश्च गुम्फिताभिर्मालाभिः गृहनिवेशिताभिः, अक्षीवे शिग्रौ जातस्य अश्वत्थस्य पिप्पलस्य, प्रतानेन च तत्पत्रनिर्मितेन माल्येन च गृहनिवेशितेन, गुप्तं गृहं सर्पाः, विषाणि दारदादीनि स्थावरविषाणि वा, न प्रसहन्ते न बाधन्ते। मार्जारमयूरनकुलपृषतोत्सर्गः सर्पान् भक्षयति बिडालकेकिबभ्रुमृगाः गृहे निर्यन्त्रणविसृष्टाः सर्पान् नाशयन्ति। शुकः, शारिका पक्षिभेदः, भृङ्गराजो वा धूम्याटोऽलिभेदो वा, सर्पविषशङ्कायां क्रोशति क्रन्दति। विषाभ्याशे विषसान्निध्ये, क्रौञ्चः पक्षिविशेषः, माद्यति विह्वलति। जीवञ्जीवकः पक्षिभेदः ग्लायति क्षीणहर्षो भवति।

मत्तकोकिल: म्रियते। चकोरस्य चन्द्रिकाप्रियस्य पक्षिण:, अक्षिणी विरज्येते विरागं प्राप्नुत: स्ववर्णं त्यजत इत्यर्थ:। इत्येवम् उक्तप्रकारं वस्तुतत्त्वं विदित्वा, अग्निविषसर्पेभ्य:, प्रतिकुर्वीत रक्षां विदधीत।

The house may be protected from catching fire if it is circumambulated thrice from right to left by a fire of human contrivance (mānuṣeṇāgninā = churned fire which engulfs the human bones of dead or killed culprits using the hymns of Atharvaveda). If the walls of the harem are plastered with mud mixed with ashes produced by lighining and wetted by hail water, no other kind of fire can burn the same.

Snakes or poisons could not affect such buildings protected by medicinal plants like Jīvantī (Cocculus cordifolius), Śvetā (Achyranthes Atropurpurea), Muṣkaka (a species of tree the ashes of which are used as cautery), Puṣpavandākā (a creeper encircling the plant Oleander), as also by Aśvattha (Ficus Religiosa) sprouting on the tree of Moringa Pterygosperma, all of which form a canopy over the walls. Cats, peacocks, mongooses and spotted deer (let loose) will eat up snakes. Parrots, Minas (Sārika) and Bhṛṅgarājas (a species of bird, a kind of large bee) shriek when they (smell the presence of poison. The krauñca bird (the heron) gets intoxicated at the proximity of poison; Jīvañjīvaka (the pheasant) gets distressed; the mattakokila (the intoxicated cuckoo) dies and the eyes of Cakora (partridge) become all the more reddened. Taking these into account one should take precautions against fire, poison and snakes.

पृष्ठत: कक्ष्याविभागे स्त्रीनिवेशो गर्भव्याधिवैद्यप्रत्याख्यातसंस्था वृक्षोदकस्थानं च। बहि: कन्याकुमारपुरम्। पुरस्तादलङ्कारभूमि: मन्त्रभूमिरुपस्थानं कुमाराध्यक्षस्थानं च। कक्ष्यान्तरेष्वन्तर्वंशिकसैन्यं तिष्ठेत्।

पृष्ठत इति। पृष्ठत: कक्ष्याविभागे राजावसथस्य पश्चाद्भागे पृथङ्निर्मितायां कक्ष्यायां, स्त्रीनिवेश: देवीवासस्थानं भवति। तस्य पृष्ठत: कक्ष्याविभागे, गर्भव्याधिवैद्यप्रत्याख्यातसंस्था: गर्भसंस्था देवीनां गर्भावस्थायां वासार्था तस्या: पृष्ठतो व्याध्यवस्थायां वासार्था व्याधिसंस्था तस्या: पृष्ठत: अचिकित्सनीयरोगा इति वैद्येन परित्यक्तानां देवीनां वासार्था वैद्यप्रत्याख्यातसंस्था चेत्येतास्तिस्र: संस्था:। तासां पृष्ठत: वृक्षोदकस्थानं च उद्यानतटाकादिकं च भवति। बहि: उक्तेभ्यो बहिर्देशे, कन्याकुमारपुरं कन्यानिवेश: अप्राप्तयौवनराजपुत्रनिवेशश्च भवति। इत्थं पृष्ठसन्निवेश: उक्त:। पुरस्तात्सन्निवेशमाह–पुरस्तादिति। पुरस्ताद् वासभावनस्यासन्ने कक्ष्याविभागे, अलङ्कारभूमि: दृष्टिविलोभनविचित्रमण्डनयुक्त: प्रासाद:, ततो मन्त्रभूमि: मन्त्रसभा, तत उपस्थानम् आस्थानमण्डप:, तत: कुमाराध्यक्षस्थानं कुमारस्थानं यूनां राजपुत्राणां स्थानम् अध्यक्षस्थानं सन्निधातृसमाहर्तृप्रभृतीनां कार्याध्यक्षाणां स्वकर्मानुष्ठानस्थानं च, भवति। कक्ष्यान्तरेषु कक्ष्याणां मध्येषु अन्तर्वंशिकसैन्यम् अन्त:पुराधिकृतानां कञ्चुकिप्रभृतीनां गण:, तिष्ठेत्।

In the rear part of the harem there shall be the apartments for ladies provided with medicines connected with mid-wifery, pot herbs and a water-reservoir. Outside these apartments shall be located houses for

maidens and young princes. Towards the front portion of the harem there shall be pleasure house with well decorated terraces, council chamber, youth hostel and offices for administrators. In between the various apartments there shall be an army of chamberlain to guard the harem.

अन्तर्गृहगतः स्थविरस्त्रीपरिशुद्धां देवीं पश्येत्। न काञ्चिदभिगच्छेत्। देवीगृहे लीनो हि भ्राता भद्रसेनं जघान, मातुः शय्यान्तर्गतश्च पुत्रः कारूशम्। लाजान् मधुनेति विषेण पर्यस्य देवी काशिराजं, विषदिग्धेन नूपुरेण वैरन्त्यं, मेखलामणिना सौवीरं, जालूथमादर्शेन वेण्यां गूढं शस्त्रं कृत्वा देवी विडूरथं जघान। तस्मादेतान्यास्पदानि परिहरेत्।

मुण्डजटिलकुहकप्रतिसंसर्गं बाह्याभिश्च दासीभिः प्रतिषेधयेत्। नचैनाः कुल्याः पश्येयुरन्यत्र गर्भव्याधिसंस्थाभ्यः। रूपाजीवाःस्नानप्रघर्षशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येयुः। आशीतिकाः पुरुषाः पञ्चाशत्काः स्त्रियो वा मातापितृव्यञ्जनाः स्थविरवर्षवराभ्यागारिकाश्चावरोधानां शौचाशौचं विद्युः स्थापयेयुश्च स्वामिहिते।

अन्तर्गृहेत्यादि। अन्तर्गृहगतः स्ववासगृहस्थितः, नतु देवीगृहगतः, स्थविरस्त्रीपरिशुद्धाम् आप्तवृद्धपरिचारिकया परिशोधितां, देवीं पश्येत्। काञ्चिद् नाभिगच्छेत् कामपि देवीमुद्दिश्य स्वयं तद्गृहं न गच्छेत्। देवीगृहाभिगमने दोषं निदर्शयति–देवीगृह इत्यादि। भ्राता कलिङ्गेश्वरस्य भद्रसेनस्य राज्ञः सोदर्यः वीरसेननामा। स हि तद्भार्यया कृतसंजल्पस्तद्गृहैकदेशनिलीनो राज्यं च जिहीर्षुर्भद्रसेनं जघानेति इतिहासः। कारूशं करूशदेशाधिपतिम्। वृद्धस्त्रीजनापरिशोधितदेवीदर्शने दोषं निदर्शयति–लाजानिति। देवी, मधुनेति मधुना माक्षिकेण मिश्रिताः इति वदन्ती, लाजान् विषेण पर्यस्य मिश्रयित्वा भोजयित्वा च, काशिराजं युद्धविजितदेवीबन्धूपरोधापराधिनं, जघान। वैरन्त्यं तन्नामकं वनवासिदेशेश्वरं, देवी सपत्नीमिथ्याभिशंसनमन्युवशंवदा, विषदिग्धेन स्पर्शवेधिगरलोपलिप्तेन, नूपुरेण जघान क्रीडाभिघातमिषेण मारितवतीत्यर्थः। सौवीरं तद्देशपतिं परन्तपाख्यं मेखलामणिना काञ्चीरत्नेन विषदिग्धेन, देवी अतिवाक्पारुष्यतापिता, जघान। जालूथं राजानम् अयोध्याधिपतिं, देवी पतिदारान्तरासक्तिमन्यूपतप्ता, आदर्शेन मुकुरेण विषदिग्धेन, जघान आदर्शस्पर्शेन मुखे विसर्पमुत्पाद्य व्यापादयामास। देवी शस्त्रं वेण्यां गूढं कृत्वा विडूरथं राजानं जघान। तस्माद् एतानि आस्पदानि व्यापत्तिनिमित्तानि, परिहरेत्।

मुण्डेत्यादि। मुण्डजटिलकुहकैः मुण्डैः बौद्धभिक्षुक्षपणकादिभिः जटिलैः शैवपाशुपतादिभिः कुहकैः मायाप्रयोक्तृभिश्च प्रतिसंसर्गं परिचयम् अर्थाद् देवीनां, प्रतिषेधयेद् वारयेत्। बाह्याभिः दासीभिश्च प्रतिषेधयेद् अर्थात् प्रतिसंसर्गम्। नचेति। कुल्याः देवीबान्धवाः, एनाः देवीः, गर्भव्याधिसंस्थाभ्योऽन्यत्र प्रसवव्याध्यनुमरणकालेभ्योऽन्यस्मिन् काले, न पश्येयुः। रूपेत्यादि। रूपाजीवाः वेश्याः। स्नानप्रघर्षशुद्धशरीराः स्नाने कायमघर्षणेन च शुद्धदेहाः। पश्येयुः, राजानं परिचर्यार्थम्। देवीनां शौचाशौचगवेषणपूर्वं पथि स्थापनं बन्धुकरणीयं के कुर्युस्तत्राह–आशीतिका इति। मातापितृव्यञ्जनाः मातापितृसधर्माणः, आशीतिका अशीतिवयस्काः, पुरुषा, पञ्चाशत्काः पञ्चाशद्वयस्काः, स्त्रियो वा, स्थविरवर्षवराभ्यागारिकाश्च वृद्धाः षण्डाश्च येऽभ्यागारिकाः कुटुम्बचिन्तकास्ते च, अवरोधानाम् अन्तःपुरस्त्रीणां शौचाशौचं विद्युः स्वामिहिते स्थापयेयुश्च, अर्थादवरोधान्।

Remaining in his own apartment the king shall meet the queen after

she having been frisked by an elderly woman and found clean. The king himself shall not go out to meet the queen (in her chamber since it involves personal risk.) Bhadrasena was killed by the brother of his queen in whose chamber the fellow remained concealed; the king of the country of Kārūśa was killed by his own son who got into the bed of the mother. The queen of the king of Kāśi killed him by mixing poison as though with honey, into the bowl of fried rice; the queen of Vairantya killed him by the touch of her anklets soaked with poisons; the king of Sauvīra was killed by the touch of the poisonus gem adorning the waist band (girdle) of his queen; the king of Jālūtha (the ruler of Ayodhya) was killed by his queen by cutting him with the sharp edge of the mirror; king Vidūratha was killed by his queen who hid the weapon in her braided hair. Hence such possibilities should be avoided.

The queen should be prevented from having contact with shaven-headed mendicants, ascetics with matted hair, jugglers and outside maid servants (of questionable character). Even close relative should not be encouraged to meet her except on occasions of delivery, laiden with disease etc. Prostitutes or courtesans having personal cleanliness effected by fresh bath, fresh clothes and ornaments shall attend on the queen inside the harem. A group of eighty men and fifty women under the guises of close relatives like father and mother, aged men and enuchs shall be engaged in the inner apartments of the harem to check out the people engaged in various errands by the king.

स्वभूमौ च वसेत् सर्वः परभूमौ न सञ्चरेत्।
न च बाह्येन संसर्गं कश्चिदाभ्यान्तरो व्रजेत्।।
सर्वं चावेक्षितं द्रव्यं निबद्धागमनिर्गमम्।
निर्गच्छेदधिगच्छेद् वा मुद्रासङ्क्रान्तभूमिकम्।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
विंशोऽध्यायः निशान्तप्रणिधिः।।

स्वभूमाविति। सर्वः देवीजनोऽन्तर्वंशिकजनश्च, स्वभूमौ आत्मनः क्लृप्ते स्थाने, वसेत्, परभूमौ न सञ्चरेत्। आभ्यन्तरः कश्चिद् जनः बाह्येन जनेन संसर्गं नच व्रजेद् गच्छेत्।।

सर्वमिति। निबद्धागमनिर्गमम् अमुकस्थानादागतममुकस्थानं गमिष्यतीति पुस्तकार्पितागमनिर्गमं, मुद्रासंक्रान्तभूमिकं मुद्राभिरागमनिर्गमस्थानसम्बन्धिनीभिः संक्रान्ता अङ्किता भूमिः आधारभाण्डं यस्य तत् तथाभूतं, सर्वं द्रव्यं धनम्, अवेक्षितं स्वयं साक्षाद् दृष्टं सत्, निर्गच्छेद् अधिगच्छेद्वा निर्गमयेत् स्वीकुर्याद्वा।।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
विंशोऽध्यायः निशान्तप्रणिधिः।

All should stay in their own regions and shall never go out into the localities of the enemy (or stranger). None engaged in the harem should have contact with any outsider. All materials brought in and sent out of the harem shall be checked carefully and stamped with identification marks.

Thus the twentieth chapter of the Arthaśāstra of Kauṭalya called 'duty towards the harem' comes to an end.

Chapter 21

18. प्रक० आत्मरक्षितकम्।

Section 18 : Self-Protection

शयनादुत्थितः स्त्रीगणैर्धन्विभिः परिगृह्येत, द्वितीयस्यां कक्ष्यायां कञ्चुकोष्णीषिभिर्वर्षवराभ्यागारिकैः, तृतीयस्यां कुब्जवामनकिरातैः, चतुर्थ्यां मन्त्रिभिः सम्बन्धिभिर्दौवारिकैश्च प्रासपाणिभिः।

पितृपैतामहं महासम्बन्धानुबन्धं शिक्षितमनुरक्तं कृतकर्माणं जनमासन्नं कुर्वीत, नान्यतोदेशीयमकृतार्थमानं स्वदेशीयं वाप्यपकृत्योपगृहीतम्। अन्तर्वंशिकसैन्यं राजानमन्तःपुरं च रक्षेत्।

गुप्ते देशे माहानसिकः सर्वमास्वादबाहुल्येन कर्म कारयेत्। तद् राजा तथैव प्रतिभुञ्जीत पूर्वमग्नये वयोभ्यश्च बलिं कृत्वा।

आत्मरक्षितकमिति सूत्रम्। आत्मनो रक्षणमुच्यत। इत्यर्थः। राज्ञः पुत्रदारेभ्यो रक्षणमुक्तं, तदन्येभ्य इदानीमभिधीयते।

शयनादित्यादि। धन्विभिः धनुष्पाणिभिः। परिगृह्येत परिवार्येत। कञ्चुकोष्णीषिभिः वारवाणशिरस्त्राणधारिभिः। वर्षवराभ्यागारिकैः षण्डैः सजगृहकार्यचिन्तकैश्च। कुब्जवामनकिरातैः गडुलैः खर्वैर्म्लेच्छजातिविशषैश्च। प्रासपाणिभिः कुन्तहस्तैः।

अङ्गरक्षकमाह–**पित्रित्यादि।** पितृपैतामहं वंशपारम्पर्यप्राप्तम्। महासम्बधानुबन्धं महान् प्रशस्तः सम्बन्धोऽन्वयः येषां ते महासम्बन्धाः महाकुलाः तैरनुबन्धः सम्बन्धानुवृत्तिर्यस्य तम्। शिक्षितं कृतविद्यम्। कृतकर्माणं कृतं दृष्टं कर्म अनुरक्तपुरुषोचितं यस्य तम्। आसन्नं कुर्वीत निकटवर्तिनं कुर्वीत स्वदेहरक्षार्थम्। वैदेशिकमकृतधनहिरण्यादिदानसत्कारं सन्तं, स्वदेशीयमपि वा पूर्वमपकृत्य पश्चात् स्वीकृतं जनम् आसन्नं न कुर्यादित्याह–**नान्यतोदेशीयमित्यादि। अन्तरिति।** अन्तर्वंशिकसैन्यं कञ्चुकिनिर्मुण्डकादिगणः, राजानम् अन्तःपुरं च रक्षेत्।

अभ्यवहाररक्षार्थमाह–**गुप्ते** इति। माहानसिकः पाकशालानियुक्तः, गुप्ते अन्यादृश्ये देशे, सर्वं कर्म सर्वप्रकारं पाककर्म, आस्वादबाहुल्येन कारयेत् बहुलमास्वाद्य साधयेत्, अथवा आस्वादः स्वादुता तदतिशययुक्तं कारयेत्। राजा, तत् साधितमन्नादिकं, तथैव तेनैव रूपेण युक्तं नतु यातयामतया वैरूप्यमापन्नं, प्रतिभुञ्जीत। किं कृत्वा, पूर्वं स्वयमभ्यवहरणात् प्राक्, अग्नये बलिं कृत्वा वैश्वदेवं कृत्वा; वयोभ्यश्च बलिं कृत्वा पक्षिभ्यश्च बलिं दत्त्वा। तदुभयं विहितानुष्ठानार्थं च बोद्धव्यम्।

The king getting up from the bed (after sleep) shall be accorded welcome by women holding bows and arrows (while in the first chamber of the harem); in the second chamber he shall be attended by chamberlains and enuchs wearing turbans (headdress); in the third chamber he is to be surrounded by dwarfish attendants and bearers of arms, and in the fourth he shall be received by ministers, and appointed door-keepers holding barbed missiles.

He shall engage as personal attendants those whose fathers and grandfathers had been holding such positions earlier and those having some relationship with him in addition to have been trained and loyal having rendered good service. Such people should not be strangers (coming from a different locality), or local who have a displeasure (or grudge) or those who have been found guilty (on an earlier occasion.) Such guards employed should protect the harem as well as the king (who moves about the apartments).

The chief cook should prepare the food in a secluded place tasting the quality and eat such food after making an oblation in the fire with a part o it and also as offering to birds.

अग्नेर्ज्वालाधूमनीलता शब्दस्फोटनं च विषयुक्तस्य, वयसां विपत्तिश्च। अन्नस्योष्मा मयूरग्रीवाभः शैत्यमाशु क्लिष्टस्येव वैवर्ण्यं सोदकत्वमक्लिन्नत्वं च। व्यञ्जनानामाशुशुष्कत्वं च क्वाथः श्यामफेनपटलविच्छिन्नभावो गन्धस्पर्शरसवधश्च। द्रवेषु हीनातिरिक्तच्छायादर्शनं फेनपटलसीमन्तोर्ध्वराजीदर्शनं च। रसस्य मध्ये नीला राजी, पयसस्ताम्रा, मद्यतोययोः काली, दध्नः श्यामा, मधुनःश्वेता। द्रव्याणामार्द्राणाम् आशुप्रम्लानत्वमुत्पक्वभावः क्राथनीलश्यावता च। शुष्काणामाशुशातनं वैवर्ण्यं च। कठिनानां मृदुत्वं मृदूनां कठिनत्वं च। तदभ्याशे क्षुद्रसत्त्ववधश्च। आस्तरणप्रावरणानां श्याममण्डलता तन्तुरोमपक्ष्मशातनं च। लोहमणिमयानां पङ्कमलोपदेहता स्नेहरागगौरवप्रभाववर्णस्पर्शवधश्च। इति विषयुक्त-लिङ्गानि।

विषयुक्तचिह्नान्याह—आग्नेरिति। विषयुक्तस्य विषदूषितान्नसंपृक्तस्य, अग्नेः, ज्वालाधूमनीलता ज्वालाधूमयोर्नीलत्वं, शब्दस्फोटनं च चटचटाशब्दश्च भवति। विषयुक्तानां वयसां विषसंस्पृष्टान्नभक्षिणां पक्षिणां, विपत्तिश्च मरणं च भवति। **अन्नस्येति।** अन्नस्य विषमिश्रस्य, ऊष्मा बाष्पः, मयूरग्रीवाभः मयूरकण्ठवद् मेचकः, आशु शैत्यं सद्यः शीतत्वं, क्लिष्टस्येव वैवर्ण्यं करसंपिष्टस्येव वर्णवैरूप्यं, सोदकत्वं सिक्थैकीभावः अवैशद्यं वा, अक्लिन्नत्वं च असम्यक्पाकत्वं च भवति। **व्यञ्जनानामिति।** व्यञ्जनानां सूपादीनाम्, आशुशुष्कत्वं शीघ्रशोषः, क्वाथः अग्नियोगे तक्रादेरिवोत्क्वथनं, श्यामफेनपटलविच्छिन्नभावः श्यामस्य जायमानस्य फेनमण्डलस्य विच्छिन्नत्वं व्यञ्जनाद् विभक्तया स्थितिः, गन्धस्पर्शरसवधश्च गन्धस्पर्शरसानां नाशश्च, भवति। **द्रवेष्विति।** द्रवेषु यूषादिषु विषयुक्तेषु, हीनातिरिक्तच्छायादर्शनं हीनाया अतिरिक्ताया वा स्वीयच्छायाया दर्शनं, फेनपटलसीमन्तोर्ध्वराजीदर्शनं फेनपटलस्य दर्शनं सीमन्तदर्शनं विभागदर्शनम्—अर्थात् फेनपटलस्य

यूषादिभ्यो विभक्तताऽवस्थानदर्शनम्–ऊर्ध्वराजीदर्शनम् उपरिरेखादर्शन च, भवति। रसस्येति। रसस्य ताम्रा राजिः, मद्यतोययोः सुराजलयोः मध्ये काली राजिः, दध्नः श्यामा वैदूर्यवर्णा राजिः, मधुनः माक्षिकस्य श्वेता राजिः, भवति। द्रव्याणामिति। आर्द्राणां द्रव्याणाम् आम्रदाडिमफलादीनां विषयुक्तानाम्, आशुप्रम्लानत्वम्, उत्पक्वभावः अतिपक्वस्येव पूतीभावः, क्वाथनीलश्यावता च क्वाथे निष्पाके नीलत्वं कार्ष्ण्यं श्यावत्वं कापिश्यं च भवति। शुष्काणां द्रव्याणाम् आशुशातनं चूर्णीभावः, वैवर्ण्यं च भवति। कठिनानां द्रव्याणां विषयुक्तानां मृदुत्वं, मृदूनां कठिनत्वं च भवति। तदभ्याश इति। तदभ्याशे क्षुद्रसत्त्ववधाश्च विषयुक्तद्रव्यसमीपे चरतां क्षुद्रजन्तूनां पिपीलिकादीनां मरणं च भवति। आस्तरणेत्यादि। आस्तरणप्रावरणानाम् आसनशयनकम्बलानां नीशाराणां च कार्पासतन्त्वाविकादिमयानां विषस्पृष्टानां, श्याममण्डलता विवर्णमण्डलायुक्तता, तन्तुरोमपक्ष्मशातनं च तन्तूनां रोम्णां च यानि पक्ष्माणि सूक्ष्मांशाः तेषां शातनं भ्रंशनं च, भवति। लोहेत्यादि। लोहमणिमयानां लोहः सुवर्णादिः मणिः स्फटिकादिः तन्मयानां वस्तूनां विषयुक्तानां, पङ्कमलोपदेहता पङ्कमलेनोपदेहो लेपनं यस्मिंस्तत्ता, स्नेहरागगौरवप्रभाववर्णस्पर्शवधश्च स्नेहः स्निग्धत्वं रागः त्विट् गौरवं गुरुत्वं प्रभावः स्वकार्यसाधनशक्तिः वर्णः शुक्लादिः स्पर्शः श्लक्ष्णखरादिस्पर्शगुणः एतेषां नाशश्च भवति। इति विषयुक्तलिङ्गानि विषयुक्तवस्तुलक्षणानि, विज्ञेयानीति शेषः।

If the food is contaminated by poison the flame of the fire will appear blue with smoke and crackle, while the birds which eat them will die. The colour of the vapour arising from cooked rice will resemble the blueness of the neck of a peacock. Soon the food will become cold, discoloured, watery and hard. Such (poisoned) vegetables will soon become dry and will be hard to cook. Dark layers from the vegetables will tear of producing a blackish foam and there will be an unnaturalness in smell, touch and taste. Liquids will appear having lesser or greater colour than natural and possess upward streaks on its surface. (Poisoned) liquids (like ghee, oil etc.) will contain streaks of different hues, as for intance ghee and oil contain blue streaks. Copper coloured lines for milk, black lines for liquor and water, dark-blue for curd and white for honey. Watery preparations (if contaminated with poison) will represent a parched and over cooked state and appear blue and swollen. Dry objects will shrink too much and show a change of colour. Hard things will be softened and soft things will be hardened (by poison) and minute beings (such as ants and flies) will die at their contact. Bed-spreads and covers show dark circles (by getting into contact with poison) and threads and hair get dissipated. Metalic vessels studded with gems appear jaded as though by roasting losing their polish, colour, shine and softness. These signs are indicative of the contamination with poison.

विषप्रदस्य तु शुष्कश्यावववक्त्रता वाक्सङ्गः स्वेदो विजृम्भणं चातिमात्रं वेपथुः प्रस्खलनं वाक्यविप्रेक्षणमावेशः कर्मणि स्वभूमौ चानवस्थानमिति।

तस्मादस्य जाङ्गलीविदो भिषजश्चासन्नाः स्युः।

विषप्रदयस्य निग्रहाय लिङ्गान्याह—विषेत्यादि। शुष्कश्यावक्त्रता शुष्ककपिशमुखत्वम्। वाक्सङ्गः वाचि प्रतिबन्धः। प्रस्खलनम् अविषमेऽपि देशे। वाक्यविप्रेक्षणं वाक्ये येनकेनाप्युच्यमानेऽवधानदानम्। आवेशः परवशता। कर्मणि अनवस्थानं स्वव्यापारेऽनवस्थितिः आरब्धं कर्मानिर्वर्त्यैवान्यत्र प्रवृत्तिः। स्वभूमौ अनवस्थानं च प्रथमादिकक्ष्यानियुक्तस्य तां विहाय द्वितीयादिकक्ष्यागमनं च।

तस्मादित्यादि। अस्य राज्ञः। जाङ्गलीविदः विषविद्याभिज्ञाः। भिषजश्च विषेतरचिकित्सकाश्च।

The one who administers poison will be seen parched, emaciated, having dry mouth, stuttering in speech, with excessive perspiration, yawning, with trembling limbs, faltering in steps, evading in conversation, inability to do the errands and will be moving about to and fro being unable to remain at a place.

Hence (to protect the king) physicians with expertise in detecting poison and other experts should always be available nearby.

भिषग् भैषज्यागारादास्वादविशुद्धमौषधं गृहीत्वा पाचकपेषकाभ्यामात्मना च प्रतिस्वाद्य राज्ञे प्रयच्छेत्। पानं पानीयं चौषधेन व्याख्यातम्।

कल्पकप्रसाधकाः स्नातशुद्धवस्त्रहस्ताः समुद्रमुपकरणमन्तर्वंशिकहस्तादादाय परिचरेयुः।

स्नापकसंवाहकास्तरकरजकमालाकारकर्म दास्यः कुर्युः, ताभिरधिष्ठिता वा शिल्पिनः। आत्मचक्षुषि निवेश्य वस्त्रमाल्यं दद्युः, स्नानानुलेपनप्रघर्षचूर्णवासस्नानीयानि च स्ववक्षोबाहुषु च। एतेन परस्मादागतकं च व्याख्यातम्।

भिषगिति। भिषग्, भैषज्यागाराद् औषधशालायाः, आस्वादविशुद्धं स्वयमास्वादेन निर्दोषतयावगतम्, औषधं गृहीत्वा, पाचकपेषकाभ्याम् औषधपक्तृपेष्टृभ्याम्, आत्मना च, प्रतिस्वाद्य राजसमक्षं स्वादयित्वा, राज्ञे प्रयच्छेद् दद्यात्। पानमिति। पानं मद्यं, पानीयं च जलं च, औषधेन व्याख्यातम् औषधदानोक्तविधिना शोधयित्वा दातव्यमित्युक्तप्रायमित्यर्थः।

कल्पकेत्यादि। कल्पकप्रसाधकाः कल्पका नापिताः श्मश्रुशिल्पिनः प्रसाधका अलङ्कर्तारश्च, स्नातशुद्धवस्त्रहस्ताः सन्तः स्नाताः शुद्धवस्त्राः शुद्धहस्ताश्च सन्तः, समुद्रं मुद्राङ्कितम् उपकरणं क्षुरवस्त्राभरणमञ्जूषादिकम्, अन्तर्वंशिकहस्ताद् आदाय तदुपनेतृकञ्चुहिस्ताद् गृहीत्वा, परिचरेयुः, राजानम्।

स्नापकेत्यादि। तत्र संवाहकः अङ्गमर्दकः। आस्तरकः आसनशयनकल्पकः। शेषाः प्रसिद्धाः। स्नापकादिकर्म दास्यः सुपरीक्षिताः कुर्युः। ताभिः दासीभिः, अधिष्ठिता अध्यक्षिताः, शिल्पिनो वा स्नापकादिशिल्पिनो वा, कुर्युः। आत्मेत्यादि। वस्त्रमाल्यम् आत्मचक्षुषि, निवेश्यं विषयोगशुद्धिबोधनार्थं निधाय, दद्युः राज्ञे। स्नानानुलेपनप्रघर्षचूर्णवासस्नानीयानि च स्नानं गन्धामलकादि अनुलेपनं चन्दनादि प्रघर्षः पञ्चकषायादि चूर्णवासः पटवासकादि स्नानीयं स्नाने शिरसि देयं चूर्णम् एतानि च, स्ववक्षोबाहुषु स्ववक्षःसहितेषु भुजेषु, चाद् उक्ते च, निवेश्य दद्युः। एतेनेति। परस्मादागतकं च परदेशात् प्राप्तं भोग्यवस्तु च, एतेन उक्तेन वस्त्रादिदानविधिना, व्याख्यातं प्रतिपादितदानविधानं, बोद्धव्यमिति शेषः।

The physicians shall collect medicinal properties from the store, satisfy himelf after experimenting, and get it prepared with the help of the decoctioner and the purveyor Before administering the same all of them shall test the same by consuming a part of it. In the matter of liquor and beverages too the same procedure shall be followed.

Those engaged for haircut and dressing up the king shall take their bath, wear clean dresses and receive the materials kept under seal for their work from the officers of the harem and perform their function.

The shampooer, the man in charge of preparing the bed, washerman and garland maker and others shall perform their function under the direction of a maid or the maid herself may perform these functions. Before handing over clothes and garlands the same may be touched by their eyes, while unguents, scents, fragrant powders and other articles of toilets may be placed in their chest and arms (to prove that they are not contaminated by poison.) The same rule applies to articles procured form outside the state or from a stranger.

कुशीलवाः शस्त्राग्निरसवर्जं नर्मयेयुः। आतोद्यानि चैषामन्तस्तिष्ठेयुः, अश्वरथद्विपालङ्काराश्च।

मौलपुरुषाधिष्ठितं यानवाहनमारोहेत्, नावं चाप्तनाविकाधिष्ठिताम्। अन्यनौप्रतिबद्धां वातवेगवशां च नोपेयात्। उदाकान्ते सैन्यमासीत। मत्स्यग्राहविशुद्धमवगाहेत। व्यालग्राहपरिशुद्धमुद्यानं गच्छेत्।

लुब्धकैः श्वगणिभिरपास्तस्तेनव्यालपराबाधभयं चललक्षपरिचयार्थं मृगारण्यं गच्छेत्।

आप्तशस्त्रग्राहाधिष्ठितः सिद्धतापसं पश्येद्, मन्त्रिपरिषदा सामन्तदूतम्। सन्नद्धोऽश्वं हस्तिनं रथं वारूढः सन्नद्धमनीकं गच्छेत्।

कुशीलवा इति। कुशीलवाः लङ्घनप्लवनादिनर्मवृत्तयो मनुष्यजातिभेदाः, शस्त्राग्निरसवर्जम् आयुधवह्निविषाणि प्रेक्षणीयाङ्गानि वर्जयित्वा तदन्यैरुपकरणैरित्यर्थः, नर्मयेयुः क्रीडां दर्शयेयुः, राजान्तिके। एषां कुशीलवानाम्, आतोद्यानि च वाद्यानि च, अन्तः राजभवनाभ्यन्तरे, तिष्ठेयुः, विषशङ्कापरिहारार्थं, नर्मप्रदर्शनावसरे परं तैर्गृह्येरन्नित्यभिप्रायः। अश्वरथद्विपालङ्काराश्च अश्वादीनां त्रयाणाम् अलङ्काराश्च, अन्तस्तिष्ठेयुरिति सम्बध्यते।

मौलेत्यादि। मौलपुरुषाधिष्ठितम् आप्तप्रधानपुरुषकृताध्यक्ष्यं, यानवाहनं शिबिकादिकमश्वादिकं च, आरोहेत्। नावं च, आप्तनाविकाधिष्ठितां विश्वस्ततारकाध्यक्षितां सतीम्, आरोहेत्। अन्यनौप्रतिबद्धाम् अन्यया नावा सहैव नेतव्यां यथा स्यात् तथान्यस्यां नावि सूत्रबद्धां, नावं, वातवेगवशां वातायत्तगमनां नावं च, नोपेयात् नारोहेत्। नावा गच्छतश्च रक्षार्थमुभयतीरयोः सैन्यं तिष्ठेदित्याह–**उदकान्त** इति। **मत्स्येत्यादि।** मत्स्यग्राहविशुद्धं मत्स्यग्राहाः कैवर्ताः तैर्विशुद्धं परिशोधितम्, अर्थान्निश्चिततिमिनक्रादिहिंस्रजन्त्वसान्निध्यं, जलम्, अवगाहेत स्नानार्थम्। व्यालेत्यादि। व्यालग्राहपरिशुद्धं व्यालग्राहाः सर्पग्राहिणः तैः परिशोधितम्, उद्यानं गच्छेत्।

लुब्धकैरिति। लुब्धकैः व्याधैः, श्वगणिभिः श्वगणजीविभिश्च, अपास्तस्तेनव्यालपराबाधभयं निरस्तचोरव्याघ्राद्युपद्रवभयं, मृगारण्यं, चललक्षपरिचयार्थं हरिणादिषु चललक्ष्येषु वेधाभ्यासार्थं, गच्छेत्।

अपूर्वं सिद्धतापसं दिदृक्षुमागतम् आप्तशस्त्रिगुप्त एव सन् पश्येत् शत्रुप्रणिहितत्वभयादित्यभिप्रेत्याह– **आप्तेत्यादि। मन्त्रीत्यादि।** मन्त्रिपरिषदा, अधिष्ठित इत्यार्थं, सामन्तदूतं पश्येत्। **सन्नद्ध इति।** सन्नद्धः शिरस्त्राणाद्यामोचनसम्भगयुद्धोचितवेषः, अश्वं हस्तिनं रथं वा आरूढः सन्, सन्नद्धम् अनीकं युद्धसज्जं सैन्यं, गच्छेत्।

Actors shall amuse the king with such kinds of entertainments in which weapons, fire and poison are not made use of. Musical instrumetns as also the ornaments of horse, chariot and elephants shall invariably be kept in the harem.

He shall ride the chariots and mount the beasts only after the hereditary driver has occupied his place; as aslo the canoe after the dependable navigator has taken over the responsibility of he navigation. He should ride a canoe attached to a similar one or one which is dependent on the wind only. On both sides of the waterway there shall be soldiers (to watch the movement). He shall plunge only in such water which is free from large fishes or crocodiles. He shall ramble only in such forest regions which are free from crocodiles (and which are cleared by snake charmers).

He shall engage himself in hunting to gain proficiency in shooting a moving object only after the wild region has been cleared from the fear of highway robbers, huge serpents and enemies by experienced hunters.

He shall meet an accomplished ascetic only when he is attended by trustworthy body guards armed with weapons, and listen to a messenger of the vassals when he is in the company of his council of ministers. Only attired in the proper military garment and riding horse, elephant or chariot, he shall go to see his well-equipped army.

निर्याणेऽभियाने च राजमार्गमुभयतः कृतारक्षं दण्डिभिरपास्तशस्त्रहस्तप्रव्रजितव्यङ्गं गच्छेत्। न पुरुषसम्बाधमवगाहेत। यात्रासमाजोत्सवप्रवहणानि च दशवर्गिकाधिष्ठितानि गच्छेत्।

यथा च योगपुरुषैरन्यान् राजाधितिष्ठति।
तथायमन्यबाधेभ्यो रक्षेदात्मानमात्मवान्।।

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
एकविंशोऽध्यायः आत्मरक्षितकम्। एतावता कौटलीयस्यार्थशास्त्रस्य
विनयाधिकारिकं प्रथममधिकरणं समाप्तम्।।

निर्याण इति। निर्याणे देशान्तरं प्रति गमने, अभियाने प्रवेशे च, राजमार्गम् उभयतः

राजमार्गस्योभयपार्श्वयोः, दण्डिभिः वेत्रिभिः, कृतारक्षं कृतरक्षाविधानं यथा भवति तथा, अपास्तशस्त्रहस्तप्रव्रजितव्यङ्गं शस्त्रहस्ताः प्रव्रजिताः संन्यासिनः व्यङ्गाः अङ्गविहीनाश्च अपास्ताः राजदृष्टिगोचरादुत्सारिताः यस्मिन् कर्मणि तद् यथा भवति तथा, गच्छेत्। न पुरुषेत्यादि। पुरुषसम्बाधं जनसङ्कुलं प्रदेश, नावगाहेत न प्रविशेत्। यात्रेत्यादि। यात्रासमाजोत्सवादिः, प्रवहणम् उद्यानभोजनादि एतानि, दशवर्गिकाधिष्ठितानि गच्छेद् दशवर्गिकेण दशभटनायकेन अधिष्ठितानि कृत्वा गच्छेद् न त्वेकाकी परिमितपरिवारो वेत्यर्थः।

अध्यायप्रान्ते श्लोकमाह—यथा चेति। यथा, अयं राजा विजिगीषुः, योगपुरुषैः कापटिकैः गूढपुरुषैः, अन्यान् नृपतीन्, अधितिष्ठति बाधत इत्यर्थः, तथा, अन्यबाधेभ्यः तत्प्रकारेभ्यः अन्यनृपोत्पादितेभ्यः योगपुरुषोपद्रवेभ्यः, आत्मानम्, आत्मवान् प्रयत्नवान् सन् रक्षेत्।।

व्याख्यायामर्थशास्त्रस्य कौटल्यमुनिजन्मनः।
आद्याधिकरणं पूर्त्तिं गाणपत्यामुपागमत्।।

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य
श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्यायगणपतिशास्त्रिणः कृतिषु
कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
एकविंशोऽध्यायः आत्मरक्षितकम्। विनयाधिकारिकं
प्रथममधिकरणं समाप्तम्।।

On the occasions of going out and entering into his capital, both sides of the highway should be protected by army equipped in military array holding long sticks. The path should be freed from the presence of armed persons, ascetics and cripples. He shall not enter into a crowd of people. He may attend to festivals, communal functions and garden parties surrounded by a chosen platoon of body guards consisting of ten soldiers.

As this king becomes a threat for the enemy kings by his own sorcerer and spies, he himself should see that he is protected from the similar forces employed by the enemy rulers.

Thus the twenty first chapter of the First Book called 'on discipline' of the Arthaśāstra of Kauṭalya entitled 'self-protection' comes to an end.

अध्यक्षप्रचारः—द्वितीयमधिकरणम्।

BOOK TWO : AUTHORITIES

Chapter 22

१९. प्रक० जनपदनिवेशः।

Section 19 : Arrangement of Villages

भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेत्।

शूद्रकर्षकप्रायं कुलशतावरं पञ्चशतकुलपरं ग्रामं क्रोशद्विक्रोशसीमानमन्योन्यारक्षं निवेशयेत्। नदीशैलवनगृष्टिदरीसेतुबन्धशाल्मलीशमीक्षीरवृक्षानन्तेषु सीम्नां स्थापयेत्।

अष्टशतग्राम्या मध्ये स्थानीयं, चतुश्शतग्राम्या द्रोणमुखं, द्विशतग्राम्याः कार्वटिकं, दशग्रामीसङ्ग्रहेण सङ्ग्रहणं स्थापयेत्।

अथाध्यक्षप्रचाराख्यं द्वितीयमधिकरणमारभ्यते। यथोक्तगुणसम्पन्नो राजा सर्वाणि कार्याणि तत्तदध्यक्षद्वारेणैवाध्यक्षयितुं प्रभवतीत्यतोऽध्यक्षांस्तद्व्यापारांश्च प्राधान्येनाभिधातुमिदमधिकरणम्। तत्रेदं प्रथमं सूत्रं -जनपदनिवेश इति जनश्चतुर्वर्णाश्रमजातिलक्षणः, पदं तस्य स्थानं स्थानीय-द्रोणमुखकार्वटिक-संग्रह-ग्रामादिकं, तस्य निवेशः रचनात्राभिधीयत इति सूत्रार्थः। 'स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतिरि'त्युक्तं, तत्र स्वाम्यमात्यप्रकृती प्रतिपादिते, जनपदप्रकृतिरिदानीमभिधीयते।

भूतेत्यादि। भूतपूर्वं पूर्वं स्थितम्, अभूतपूर्वम् अभिनवं वा, जनपदं, परदेशापवाहनेन परदेशाज्जनानयनेन, स्वदेशाभिष्यन्दवमनेन वा अभिष्यन्दोऽतिवृद्धिः वमनमाहरणं स्वदेशे जनानामतिवर्धनादाधारा-पर्याप्तिदोषादन्यत्राहरणेन वा, निवेशयेद् रचयेत्।

शूद्रेत्यादि। ग्रामं, शूद्रकर्षकप्रायं शूद्रकृषीवलबहुलं, कुलशतावरं गृहशतान्यूनं, पञ्चशतानधिकगृहयुक्तं, क्रोशद्विक्रोशसीमानं क्रोशसीमानं द्विक्रोशसीमानं वा एकस्माद् ग्रामाद् ग्रामान्तरस्य क्रोशदूरव्यवधानं क्रोशद्वयव्यवधानं वा यथा भवेत् तथा क्लृप्तमित्यर्थः, अन्योन्यमारक्षतीत्यन्योन्यारक्षं परस्परसाहाय्यकरणक्षमं, निवेशयेत्। नदीत्यादि। सीम्नाम् अन्तेषु, नदी, शैलः शिलाकूटः, वनं, गृष्टिर्बदरानामौषधिर्वृक्षविशेषो वा, दरी श्वभ्रं, सेतुबन्धः, शाल्मली स्थिरायुराख्यो वृक्षः, शमी सक्तुफला, क्षीरवृक्षः वटादिरित्येतान् स्थापयेत् सीमरक्षार्थम्।

अष्टशतेत्यादि। अष्टशतग्राम्याः अष्टशतानां ग्रामाणां समूहस्य, मध्ये, स्थानीयं तदाख्यं तावद्ग्रामजनतायाः क्रयविक्रयादिकर्मणोपजीव्यं रमणीयं महाग्रामं, स्थापयेत् निवेशयेत्, चतुश्शतग्राम्याः

मध्ये, द्रोणमुखं तदाख्यं स्थानीयप्रत्यवरं ग्रामभेदं स्थापयेत्, द्विशतग्राम्या मध्ये, कार्वटिकं तदाख्यं कर्वटापरपर्यायं द्रोणमुखप्रत्यवरं स्थापयेत्, दशग्रामीसंग्रहेण ग्रामदशकसंग्रहणेन, संग्रहणं तदाख्यं कर्वटादधमं महाद्रङ्गापरपर्यायं स्थापयेत्।

The king may formulate villages either on new sites or on old dilapidated ruins either by inducing people from a foreign state to immigrate (in large numbers) or by causing thickly populated centres of his own to send the excessive population to a new site.

Villages may be constructed in such a way that each may consist of not less than fifty families or more than five hundred families populated by Śūdras of agricultural activities. The boundaries shall extend as far as a krośa (2,2250 yards) or two and they should be capable of protecting each other. The boundaries may be demarcated either by a river, hills, forests, bulbous plants, caves, artificial water tanks, or by trees such as Śālmalī (silk cotton tree), Śamī (Mimosa suma) and Kṣīravṛkṣas (the milky trees Nyagrodha, Udumbara, Aśvattha and Madhūka used for Ayurvedic medicines).

In the centre of a cluster of eight hundred villages shall be located a Sthānīya (a town or a large village). A Droṇamukha is to consist of four hundred villages clustering around it. A Karvāṭika is the place in the centre of two hundred villages while a group of ten villages clustered around one is referred to as Saṅgrahaṇa.

अन्तेष्वन्तपालदुर्गाणि जनपदद्वाराण्यन्तपालाधिष्ठितानि स्थापयेत्। तेषामन्तराणि वागुरिकशबरपुलिन्दचण्डालारण्यचरा रक्षेयुः।

ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यो ब्रह्मदेयान्यदण्डकराण्यभिरूपदायकानि प्रयच्छेत्। अध्यक्षसङ्ख्यायकादिभ्यो गोपस्थानिकानीकस्थचिकित्स- काश्वदमकजङ्घाकरिकेभ्यश्च विक्रयाधानवर्जम्।

अन्तेष्विति। अन्तेषु जनपदावसानेषु, अन्तपालदुर्गाणि, अन्तपालाधिष्ठितानि अन्तपालैरनुष्ठिताध्यक्ष्याणि, जनपदद्वाराणि जनपदप्रवेशमार्गभूतानि च स्थापयेत्। तेषाम् अन्तराणि अन्तपालदुर्गाणामन्तरालदेशान्, वागुरिकशबरपुलिन्दचण्डालारण्यचराः वागुरिकाः मृगबन्धनजीविनः शबराः शूद्राद् भिल्ल्यां जाताः पुलिन्दाः निष्ट्यात् किरात्यां जाताः चण्डालाः श्मशानपालाः अरण्यचराः वनचारिणश्च, रक्षेयुः।

ऋत्विगित्यादि। ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यः याजकाध्यापकपुरोधश्छान्दसेभ्यः, अदण्डकराणि दण्डो नाम द्वि कृषिक्लृप्तौ त्रिःकृष्यनुष्ठानादिनिमित्तः कुल्यादिजलात्युपयोगादिनिमित्तो वा दमः करः कृषिफलषष्ठांशः तदुभयरहितानि, अभिरूपदायकानि अभिरूपेभ्यः अर्हेभ्यः पुत्रादिभ्यो दायः दानं येषां तानि तथाभूतानि वंशपारम्पर्यभोग्यानीत्यर्थः यथेच्छविनियोगयोग्यानीति वा, ब्रह्मदेयानि ब्राह्मणेभ्यो देयानि •अर्थात् क्षेत्राणि, प्रयच्छेद् दद्यात्। अध्यक्षेत्यादि। विक्रयाधानवर्जं मूल्यमादाय दानं विक्रयः आधीकरणमाधानं

तदुभयाधिकारवर्जं केवलोपभोगायेत्यर्थः, अध्यक्षसंख्यायकादिभ्यः अध्यक्षाः सुवर्णाध्यक्षादयः सङ्ख्यायकाः गणकाः तत्प्रभृतिभ्यः, गोपस्थानिकानीकस्थचिकित्सकाश्वदमकजङ्घाकरिकेभ्यश्च गोपः दशग्रामीपञ्च-ग्राम्याद्यधिकारी स्थानिको नगरचतुर्भागाधिकारी अनीकस्थः हस्तिशिक्षाविचक्षणः चिकित्सको वैद्यः अश्वदमकः अश्वशिक्षाभिज्ञः जङ्घाकरिकः जाङ्घिको दूरदेशगतागतजीवी एतेभ्यश्च, क्षेत्रं प्रयच्छेदिति सामर्थ्यलभ्यम्।

On the boundaries of the villages which is the extremity of the kingdom) there should be forts manned by officers of the boundaries who guard the gateway to the country. The inner regions of these forts shall be protected by Vāgurikas (who sets a trap or net), Śabaras (archers) Pulindas (hunters), Caṇḍālas (low caste servants) and Āraṇyacara (wild forest tribes).

Peoples belonging to the class of Rtvig (performer of sacrifice), Ācārya (preceptor), Purohita (high-priest), and Śrotriyas (Vedic Brahmins) shall be granted land designated as Brahmadeya yielding sufficient produces for livelihood and without collecting taxes and fines. Others like Adhyakṣas (superintendents), Sankhyāyaka (accountants) Gopas (supervisor of group of villages), Sthanikas (the protector of the one fourth of a city), Anīkasthas (trainers of elephants), Cikitsakas (physicians), Aśvadamakas (trainers of horses) and Jaṅghākārikas (messengers on the move) may be given lands with out having any right to alienate by sale or mortgage.

करदेभ्यः कृतक्षेत्राण्यैकपुरुषिकाणि प्रयच्छेत्। अकृतानि कर्तृभ्यो नादेयात्।

अकृषतामाच्छिद्यान्येभ्यः प्रयच्छेत्। ग्रामभृतकवैदेहका वा कृषेयुः। अकृषन्तोऽवहीनं दद्युः। धान्यपशुहिरण्यैश्चैनाननुगृह्णीयात्। तान्यनु सुखेन दद्युः।

अनुग्रहपरिहारौ चैभ्यः कोशवृद्धिकरौ दद्यात्। कोशोपघातिकौ वर्जयेत्। अल्पकोशो हि राजा पौरजानपदानेव ग्रसते। निवेशसमकालं यथागतकं वा परिहारं दद्यात्। निवृत्तपरिहारान् पितेवानुगृह्णीयात्।

करदेभ्य इति। करदेभ्यः राजभागदायिभ्यः, कृतक्षेत्राणि कृतानि क्षेत्राणि पूर्वसिद्धसौष्ठवान् व्रैहेयशालेयादीन् केदारान्, ऐकपुरुषकाणि एकेनैव ग्रहीतृपुरुषेण भोग्यानि, प्रयच्छेत्। अकृतानि साध्यसौष्ठवानि अर्थात् क्षेत्राणि, कर्तृभ्यो नादेयात् सौष्ठवसाधकेभ्यः करदेभ्यो न गृह्णीयात्, सर्वविधस्वाम्येन तेष्वेव स्थापयेदित्यर्थः। इह आदेयादित्यात्मनेपदाकरणमार्षम्।

अकृषतामिति। अकृषतां कृषिमकुर्वतां, क्षेत्राणीति शेषः, आच्छिद्य हृत्वा, अन्येभ्यः प्रयच्छेत्। तदभावे ग्रामभृतकवैदेहकाः ग्रामाधिकारिणो वणिजश्च, कृषेयुः। अकृषन्तः अभ्युपेत्य कृषिमकुर्वन्तः, अवहीनं नष्टं, दद्युः। अनुपायाच्चेदकर्षणं तदा कथमित्याह-धान्यपशुहिरण्यैश्च कृष्यनुष्ठानापेक्षितैः, एनान् अभ्युपेतकृषीन् अनुगृह्णीयात्। अनु पश्चात् कृषिफलप्राप्त्यनन्तरं, तानि, धान्यादीनि सुखेन आत्मवृत्त्यपीडया, दद्युः, कर्षका राज्ञे।

अनुग्रहेत्यादि। एभ्यः कृषिकर्तृभ्यः, अनुग्रहपरिहारौ च स्वस्थवृद्ध्यर्थं दीयमानं द्रव्यमनुग्रहः दौस्थ्यपरिहारेण स्वास्थ्यसिद्ध्यर्थं दीयमानं द्रव्यं परिहारः तौ, कोशवृद्धिकरौ दद्यात् आत्मकोशवर्धने यथा पर्यवस्येतां तथा दद्यात्। कोशोपघातिकौ कोशक्षयफलौ अनुग्रहपरिहारौ, वर्जयेत्। कुतः, हि यतः अल्पकोशः राजा पौरजानपदानेव, ग्रसते पीडयति, स्वकोशपूरणार्थम्। निवेशेत्यादि। निवेशसमकालं परिहारं निवेशः इदम्प्रथमकुलस्थापनं तत्तुल्यकालं परिहारं तत्काले क्लृप्तो यः स्वास्थ्यसिद्ध्यर्थ उपकारस्तमित्यर्थः, दद्यात्। यथागतकं वा दद्यात् आगतानतिक्रमेण च दद्यात् नवनवागतकुलेभ्योऽपि दद्यादित्यर्थः। निवृत्तेत्यादि। निवृत्तपरिहारान् प्रत्यर्पितपरिहारद्रव्यान्, पितेव, अनुगृह्णीयाद् वृद्ध्यर्थमनुग्रहद्रव्यं दत्त्वोपकुर्यात्।

Cultivable land may be bestowed to taxpayers to be enjoyed for the duration of his own life only. Land under preparation for agriculture should not be taken away from the farmers.

Lands uncultivated should be taken away from the farmers and be given to others for cultivation or they may be permitted to be cultivated by villagers or traders as the case may be. Those who refuse to cultivate the land may be required to make up for the loss of revenue to the state. In case the cultivators pay up their tax dues in time they should be favourably supplied with grains, cattle and gold (money) so that the farmers gladly pay up the dues in time.

The favours and remissions bestowed on cultivators should not cause to deplete the treasury, but increase the revenue. No action should be initiated (by way of remission and grant) so as to drain the treasury of the wealth.

A king with depleted treasury is likely to tax the resources of the citizens and people of the country. Hence the remission and grant should be commensurate with the income that accrues to the treasury. Those who have failed to settle in spite of remissions should be treated with fatherly kindeness.

आकरकर्मान्तद्रव्यहस्तिवनव्रजवणिक्पथप्रचारान् वारिस्थलपथपण्यपत्तनानि च निवेशयेत्।

सहोदकमाहार्योदकं वा सेतुं बन्धयेत्। अन्येषां वा बध्नतां भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात्, पुण्यस्थानारामाणां च। सम्भूयसेतुबन्धादपक्रामतः कर्मकरबलीवर्दाः कर्म कुर्युः। व्ययकर्मणि च भागी स्याद्, न चांशं लभेत।

आकरेत्यादि। आकरकर्मान्तद्रव्यहस्तिवनव्रजवणिक्पथप्रचारान् आकरकर्मान्तः आकरव्यापारस्थानं द्रव्यवनं दारुचन्दननिर्यासाद्युपकरणप्रसवक्षमं वनं हस्तिवनं गजवनं व्रजप्रचारः गोध्यक्षवक्ष्यमाणः वणिक्पथप्रचारः वणिक्पथव्यापारः एतान्, वारिस्थलपथपण्यपत्तनानि च जलपथस्थलपथपण्य-क्रयविक्रयस्थानानि च, निवेशयेत् कारयेत्। पत्तनशब्दस्य क्रयविक्रयस्थानवाचित्वमाश्रित्येत्थं व्याख्यातम्। नावेकगम्यपुरवाचित्वाश्रयणे तु पण्यपत्तनं पण्यप्रधानं नौमात्रगम्यं पुरमिति व्याख्येयम्। पट्टनशब्दपाठे पुनः

पण्यपट्टनं पण्यप्रधानं पट्टनं शकटैरश्वैर्नौभिश्च गम्यं पुरमित्यर्थः, 'पट्टनं शकटैर्गम्यं घोटकैर्नौभिरेव च' इति यादवाभिधानात्।

सहोदकमिति। सहोदकं नित्यप्रवृत्तोदकं नद्यादौ, सेतुं वारणं, बन्धयेत् कुल्यादिद्वारेण कृष्याद्यर्थम्। आहार्योदकं नद्यादितो वर्षासु तुङ्गस्थलेभ्यश्च समानेयजलं सेतुं वा बन्धयेत्। बध्नतां सेतुं रचयताम्, अन्येषां वा जनानां च, भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात् भूमिः प्रभूतजलावरोधयोग्यं स्थलं मार्गः जलप्रवेशनिर्गमसरणिः वृक्षोपकरणं सारदार्वादिकम् एतैरनुग्रहम् एतद्दानोपकारं कुर्यात्। पुण्यस्थानारामाणां च निर्मीयमाणानां विषये, भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात्। **सम्भूयेत्यादि।** सम्भूयसेतुबन्धाद् जनैः सङ्घीभूय क्रियमाणात् सेतुबन्धाद्, अपक्रामतः अपसरतः अनिच्छया स्वीयं कर्मांशमकुर्वतो जनस्य, कर्मकरबलीवर्दाः भृत्याः उक्षाणश्च, कर्म कुर्युः राजा बलात् तैः कर्म कारयेदित्यभिप्रायः। अपक्रामतोऽन्यमपि दण्डमाह—**व्ययकर्मणीति।** व्ययकर्मणि च भागी अंशभाक् स्यात्, अंशं च न लभेत्, अर्थात् सेतुबन्धानन्तरभवे तत्फले।

He shall set up and initiate mining operations and manufactures, exploit timber, elephants, forest produces, cattles and business centres in addition to the creation of waterways, roadways and bazārs.

He shall dig lakes having natural water or provided with water drawn from other sources. He should also help others who create roadways, plant tress and put up constructions of holy places and groves. When people join together to create a large lake lazy servants and their bullocks should be asked by the king to cooperate in the effort. Though they have to share the expenses, they shall not have any claim for the profit.

मत्स्यप्लवहरितपण्यानां सेतुषु राजा स्वाम्यं गच्छेत्। दासाहितबन्धूननुशृण्वतो राजा विनयं ग्राहयेत्। बालवृद्धव्याधितव्यसन्यनाथांश्च राजा बिभृयात्, स्त्रियमप्रजातां प्रजातायाश्च पुत्रान्।

बालद्रव्यं ग्रामवृद्धा वर्जयेयुरा व्यवहारप्रापणाद्, देवद्रव्यं च। अपत्यदारान् मातापितरौ भ्रातॄनप्राप्तव्यवहारान् भगिनीः कन्या विधवाश्चाबिभ्रतः शक्तिमतो द्वादशपणो दण्डोऽन्यत्र पतितेभ्यः, अन्यत्र मातुः।

पुत्रदारमप्रतिविधाय प्रव्रजतः पूर्वः साहसदण्डः, स्त्रियं च प्रव्राजयतः। लुप्तव्यवायः प्रव्रजेदापृच्छ्य धर्मस्थान्, अन्यथा नियम्येत।

मत्स्येत्यादि। सेतुषु, उत्पद्यमानानामिति शेषः, मत्स्यप्लवहरितपण्यानां मत्स्याः प्रसिद्धाः प्लवाः कारण्डवाः जलजलजविहारिणः हरितानि पद्मोत्पलकशेरुकादीनि एषां पण्यवस्तूनां, स्वाम्यं स्वामित्वं, राजा गच्छेत्, नतु सम्भूयसेतुकारिणोऽपि। **दासेत्यादि।** अननुशृण्वतः स्वरक्षकनिदेशावधीरिणः, दासाहितकबन्धून् दासान् गर्भदास-गृहजात-क्रीत-लब्ध-दायोपगतादीन् आहितकान् स्वामिना धनग्रहणेनाधितां नीतान् बन्धून् पुत्रादींश्च, राजा, विनयं प्रणतिं, ग्राहयेत्। बालवृद्धव्याधितव्यसन्यनाथांश्च अनाथा ये बालादयः तांश्च, बिभृयात् पोषयेत्। अप्रजातां वन्ध्यां स्त्रियं, प्रजातायाः पुत्रांश्च, बिभृयात्, सा च ते च यद्यनाथा इत्यार्थम्।

बालेत्यादि। बालद्रव्यं बालस्य अप्राप्तव्यवहारस्य नाथहीनस्य द्रव्यं, ग्रामवृद्धाः, वर्जयेयुः नोपयुञ्जीरन् तथैव स्थापयेयुर्वर्धनार्हं चेद् वर्धयेयुश्चेत्यभिप्रायः। कियन्तं कालम्, आव्यवहारप्रापणात् व्यवहारप्राप्तिकालं यावत्। देवद्रव्यं च देवालयद्रव्यं च, ग्रामवृद्धा वर्जयेयुः, अवधेरयोगान्नित्यम्।

अपत्येत्यादि। अपत्यदारान् अपत्यं दारांश्च। दारमिति पाठे समाहारद्वन्द्वः। अप्राप्तव्यवहारान् भ्रातॄन् बालान् सोदर्यान्। कन्याः भगिनीः विधवा भगिनीश्च। शक्तिमतः रक्षणोपायवतः। पतितेभ्योऽन्यत्र पतितव्यतिरेकेण, अपत्यादीनामपतितानामेवारक्षणे दण्डो नतु पतितानाम्। पतितेष्वपि प्रतिप्रसवमाह—अन्यत्र मातुरिति। माता तु पतितापि रक्षणीयैवेत्यर्थः।

पुत्रेत्यादि। पुत्रदारमप्रतिविधाय प्रव्रजतः पुत्राणां दाराणां च जीवनोपायमदर्शयित्वा सन्न्यस्यतः, स्त्रियं प्रव्राजयतश्च प्रव्रजन्तीं प्रयोजयतश्च, पूर्वःसाहसदण्डः प्रथमः साहसदण्डः 'पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः' इति मनूक्तलक्षणः कर्तव्यः। लुप्तेत्यादि। लुप्तव्यवायः निश्शेषनष्टमैथुनशक्तिः पुरुषः, धर्मस्थान् धर्मशास्त्रानुसारेण व्यवहारनिर्णयेऽधिकृतान् प्राड्विवाकादीन्, आपृच्छ्य अनुज्ञाप्य, प्रव्रजेत् परिव्रजेत् सन्न्यस्येत्, अन्यथा नियम्येत अनेवंप्रव्रजन् कारागृहे निवेश्येत।

The king shall have exclusive right in the matter of fishing, ferrying and trading vegetables in such waterways, or reservoirs. The king should see to that his servants, slaves and hirelings as well as their relatives obey his order explicitly. He shall provide for orphans, aged people, afflicted and helpless people as well as destitute women and their children in poor circumstances.

The wealth of a child should be protected by the elders of the village till they attain their age and this applies to the wealth of the god (temple) also.

If one is capable of providing, one should look after the livelihood of the sisters, maidens and widows, the failure of this invites a fine of twelve Panams in case they are not fallen from their caste. But in the case of the mother even if she is fallen from the caste she needs protection.

When a person embraces asceticism without providing for the maintenance of son and wives he shall be inflicted with the first degree punishment of fine; like wise he who prompts a lady to embrace asceticism may be punished. He who has lost his virility may embrace asceticism after informing the judicial authorities and getting their permission, otherwise such a person should be put into custody.

वानप्रस्थादन्यः प्रव्रजितभावः, सुजातादन्यः सङ्घः, सामुत्थायकादन्यः समयानुबन्धो वा नास्य जनपदमुपनिविशेत।

न च तत्रारामा विहारार्थाः शालाः स्युः। नटनर्तनगायनवादकवाग्जीवनकुशीलवा वा न कर्मविघ्नं कुर्युः, निराश्रयत्वाद् ग्रामाणां, क्षेत्राभिरतत्वाश्च पुरुषाणां कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवतीति।

अथ जनपदवासानर्हानाह—वानेत्यादि। वानप्रस्थादन्यः प्रव्रजितभावः वैखानसादतिरिक्तः प्रव्रजितावस्थः, अर्थाच्चतुर्थाश्रमी, अस्य राज्ञो जनपदं नोपनिविशेत नाध्यासीत। प्रतिषेधनिमित्तं तु अभिशङ्कनीय- शीलत्वमुक्तप्रायम्। सुजातादन्यः सङ्घः सुष्ठु जातात् राजराज्यक्षेमायोत्पन्नात् जनसङ्घाद् अन्यो दुर्जातः जनसङ्घः, अस्य जनपदं नोपनिविशेत। सामुत्थायकादन्यः समयानुबन्धो वा· समुत्थायकाः सम्भूयसेतुबन्धादिराजप्रजानुकूलकर्मकारिणः तेषां सम्बन्धी सामुत्थायकः सामुत्थायकात् समयानुबन्धाद् अन्यः राजजनपदद्रोहफलः समयानुबन्धः सङ्केतरचना च, अस्य जनपदं नोपनिविशेत।

न चेति। तत्र जनपदे, आरामाः विहारार्थाः सर्वजनविनोदस्थानान्युपवनानि, शालाश्च प्रेक्षणीय- प्रयोगशालाश्च, न स्युः। आरामशालाप्रतिषेधस्य फलमाह—नटेत्यादि। नटनर्तनगायनवादकवाग्जीवनकुशीलवा वा, कर्मविघ्नं कृष्याद्यनुष्ठानविघ्नं न कुर्युः, नाट्यनृत्तगानवादनकथावर्णननर्मक्रियासु स्ववृत्तिषु न चेष्टेरन्निति भावः। कस्मात्, ग्रामाणां निराश्रयत्वाद् नाट्यादिप्रयोगयोग्यशालारहितत्वात्। एवञ्च सिद्धं परमफलमाह— क्षेत्रेत्यादि। पुरुषाणां क्षेत्राभिनत्वाद् विनोदस्थानाभावेन स्वस्वकर्मस्थानासक्तत्वात्, कोशविष्टिद्रव्यधान्य- रसवृद्धिर्भवति कोशस्य, विष्टेः हठकारयितव्यस्य कर्मणः, द्रव्यस्य दुभवस्य दार्वादिपदार्थस्य, धान्यस्य, रसस्य तैलेक्षुरसादेश्च वृद्धिः भवति। इति एवम्प्रकारं फलम् उन्नेयमित्यर्थः।

No one other than a finest hermit embracing asceticism, no one other than a well-wisher and nobleman and no one other than an enterprising or belonging to a guild of cooperation shall occupy the village of the kingdom. There should not be a sporting ground or groves or halls for recreation. Actors, dancers, musicians instrumentalists, orators and bards shall not be allowed to make any disturbance to the work of the villagers, since these villagers are helpless and are dependent on the fileds to earn living by way of procurement of grains and other commodities including liquids.

परचक्राटवीग्रस्तं व्याधिदुर्भिक्षपीडितम्।
देशं परिहरेद् राजा व्ययक्रीडाश्च वारयेत्।।
दण्डविष्टिकराबाधै रक्षेदुपहतां कृषिम्।
स्तेनव्यालविषग्राहैर्व्याधिभिश्च पशुव्रजान्।।
वल्लभैः कार्मिकैः स्तेनैरन्तपालैश्च पीडितम्।
शोधयेत् पशुसङ्घैश्च क्षीयमाणं वणिक्पथम्।।
एवं द्रव्यद्विपवनं सेतुबन्धमथाकरान्।
रक्षेत् पूर्वकृतान् राजा नवांश्चाभिप्रवर्तयेत्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
प्रथमोऽध्यायः जनपदनिवेशः, आदितो द्वाविंशः।।

परचक्रेति। राजा परचक्राटवीग्रस्तं परचक्रं शत्रुकपटः शत्रुसैन्यं वा अटवी तात्स्थ्याद् अटवीपालः ताभ्यां ग्रस्तं, व्याधिदुर्भिक्षपीडितं, देशं परिहरेत् परचक्रादिभ्यो दूरीकुर्यादित्यर्थः। व्ययक्रीडाश्च धनव्ययहेतुभूताः क्रीडाश्च वारयेत्।।

दण्डविष्टीति। दण्डविष्टिकराबाधैः दण्डविष्टिकराणामतिरेचननिमित्ताभिः पीडाभिः, उपहतां कृषिं रक्षेत्, युक्तदण्डविष्टिकरो भूत्वेत्यार्थम्। स्तेनव्यालविषग्राहैः व्याधिभिश्च उपहतान् पशुव्रजांश्च रक्षेत् स्तेनादिभिरुपघातो यथा न भवेत् तथा पालयेत्।।

वल्लभैरित्यादि। वल्लभैः राजदयितैः, कार्मिकैः राजशुल्काधिकृतैः, स्तेनैः, अन्तपालैः, पशुसङ्घैश्च व्याघ्रादिसङ्घैश्च, पीडितम्, अत एव क्षीयमाणं वणिक्प्रचारैरित्यात्, वणिक्पथं शोधयेत् रक्षेत् वल्लभादिपीडापरिहारद्वारेण।।

एवमित्यादि। स्पष्टार्थः श्लोकः।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
प्रथमोऽध्यायः जनपदनिवेशः, आदितो द्वाविंशः।।

A king should avoid a region which is under the constant occupation of the enemies and wild tribes, as also troubled by diseases and famine, in addition to avoiding expensive sports there.

He should protect agricultural activities by waiving excessive fines and taxes. The cattles should be protected from thieves, snakes and poisonous diseases. The roadways should be kept under constant watch from being oppressed by his officers, labourers and keepers of the boundaries in addition to protecting the herds of cattles from diseases.

Thus the king shall protect reservoirs and other wealth like elephants, forests etc., handed down (by his predecessors) in addition to setting up new ones.

Thus the twenty second chapter of the Arthaśāstra of Kauṭalya dealing with the arrangement of villages comes to an end. Here ends the first chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 23

20. प्रक० भूमिच्छिद्रविधानम्।

Section 20 : Division of Land

अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेत्। प्रदिष्टाभयस्थावरजङ्गमानि च ब्राह्मणेभ्यो ब्रह्मसोमारण्यानि, तपोवनानि च तपस्विभ्यो गोरुतपराणि प्रयच्छेत्। तावन्मात्रमेकद्वारं खातगुप्तं स्वादुफलगुल्मगुच्छमकण्टकिद्रुममुत्तानतोयाशयं दान्तमृगचतुष्पदं भग्नखदंष्ट्रव्यालं मार्गायुकहस्तिहस्तिनीकलभं मृगवनं विहारार्थं राज्ञः कारयेत्।

सर्वातिथिमृगं प्रत्यन्ते चान्यन्मृगवनं भूमिवशेन वा निवेशयेत्।

कुप्यप्रदिष्टानां च द्रव्याणामेकैकशो वा वने निवेशयेद्, द्रव्यवनकर्मान्तानटवीश्च द्रव्यवनापाश्रयाः।

भूमिच्छिद्रविधानमिति सूत्रम्। भूमिच्छिद्रं सस्याद्युत्पत्त्यनर्हा भूमिः तस्य विधानं सफलत्वसम्पादनप्रकारः उच्यत इति सूत्रार्थः। वणिक्पथप्रचारान् निवेशयेदित्युक्तमधस्तात्, निवेशनस्थानं त्वधुनाभिधीयते।

अकृष्यायामिति। अकृष्यायां भूमौ मालगर्तशैलशर्करिलप्रायतया कृषिरहितायां भूमौ, पशुभ्यो गोमहिषमेषेभ्यः विवीतानि प्रयच्छेत् तृणजलवन्ति स्थलानि विसृजेत्। **प्रदिष्टेत्यादि।** किञ्च, प्रदिष्टाभयस्थावरजङ्गमानि दत्ताभयानि स्थावरजङ्गमानि स्थावराणि वृक्षलतादीनि जङ्गमानि सौम्यमृगादीनि च येषु तानि तथाभूतानि, गोरुतपराणि गव्यूतिपरमपरिमाणानि, ब्रह्मसोमारण्यानि वेदाध्ययनसोमयागाद्यनुष्ठा-नार्थानि वनानि, ब्राह्मणेभ्यः प्रयच्छेत् ब्राह्मणसमुदायोपयोगाय विसृजेत्, तपोवनानि च यथोक्तविशेषणानि, तपस्विभ्यः प्रयच्छेत्। **तावदिति।** तावन्मात्रं गोरुतपरम्, एकद्वारं, खातगुप्तं परिखापरिक्षिप्तं, स्वादुफलगुल्म-गुच्छं मनोज्ञफललताप्रतानस्तबकम्, अकण्टकिद्रुमं कण्टकशून्यवृक्षयुक्तम्, उत्तानतोयाशयम् अगम्भीरजलाधारं, दान्तमृगचतुष्पदं दान्ताः मनुष्यपरिचयविश्वस्ता मृगाश्चतुष्पदाश्चान्ये यस्मिंस्तत् तथाभूतं, भग्ननखदंष्ट्रव्यालं भग्ननखदंष्ट्राः उद्धृतनखदंष्ट्रा व्याला व्याघ्रादिमृगाः यस्मिंस्तत् तथाभूतं, मार्गयुकहस्तिहस्तिनीकलभं मृगयुकर्मयोग्याः करिकरिणीकरिपोताः यस्मिंस्तत् तथाभूतं, मृगवनं, राज्ञः विहारार्थं कारयेत्। मार्गयुक शब्दः आर्हीयठगन्तः। मार्गायुकेति मातृकापाठेषु द्वितीयस्याचो दीर्घत्वं साध्यम्।

सर्वेत्यादि। प्रत्यन्ते समीपे, भूमिवशेन वा योग्यभूम्युपलम्भानुसारेणाप्रत्यन्ते वा, सर्वातिथिमृगं सर्वे अतिथिमृगा यस्मिन् देशान्तराल्लुब्धकोपद्रुता आगत्य वसन्ति तत् सर्वातिथिमृगं नाम, अन्यद् मृगवनं निवेशयेत्।

कुप्येति। कुप्यप्रदिष्टानां कुप्याध्यक्षप्रकरणोक्तानां, द्रव्याणां शाकतिनिशादिसारदारुवर्गस्य उटजचिमिगादिवेणुवर्गस्य मालतीगूर्वादिवल्कवर्गस्य चेत्येतेषाम् एकैकशो वा वनं निवेशयेत् एकैकस्य एकैकं वनं कल्पयेत्। द्रव्यवनकर्मान्तान् अटवीश्च द्रव्यवनसम्बद्धानि कर्माणि वनानि च, द्रव्यवनापाश्रयाः द्रव्यवनोपजीविनः पुरुषाः, निवेशयेयुरिति विपरिणामेन सम्बन्धः विदध्युरित्यर्थः।

Uncultivable lands may be set apart by the king as pastures for the cattle. Regions provided with forests and safe from wild beings may be assigned to brahmins for the purposes of Brahma (study of Upaniṣads) and Śama (performance of sacrifices like Jyotiṣṭoma), and hermitages of a length of two krośas shall be given to ascetics. That much of land having only a single way of escape, with ditches dug around and full of sweet fruits, creepers, trees without thorns, large lakes full of potable water, full of harmless animals, beasts of prey like tigers, male and female elephants, and bisons all rendered harmless by extracting their teeth or horns, shall be formed for the king to go on a hunt or pleasure trip.

Nearby there shall be another forest for game with game beasts and the same is to be located near the borders of the kingdom.

For the collection and stock of forest produces there shall be separate forest enclosures along with manufactories to produce items out of the forest produces.

प्रत्यन्ते हस्तिवनमटव्यारक्षं निवेशयेत्। नागवनाध्यक्षः पार्वतं नादेयं सारसमानूपं, च नागवनं विदितपर्यन्तप्रवेशनिष्कसनं नागवनपालैः पालयेत्। हस्तिघातिनं हन्युः। दन्तयुगं स्वयंमृतस्याहरतः सपादचतुष्पणो लाभः।

नागवनपाला हस्तिपकपादपाशिकसैमिकवनचरकपारिकर्मिकसखा हस्तिमूत्रपुरीषच्छन्नगन्धा भल्लातकीशाखाप्रतिच्छन्नाः पञ्चभिः सप्तभिर्वा हस्तिबन्धकीभिः सह चरन्तः शय्यास्थानपद्यालण्डकूलपातोद्देशेन हस्तिकुलपर्यग्रं विद्युः।

प्रत्यन्ते इति। प्रत्यन्ते जनपदावसानदेशे, हस्तिवनं नागवनम्, अटव्यारक्षम् अटव्या आरक्षाः परिरक्षका यस्मिंस्तत् तथाभूतं, निवेशयेत्। नागवनाध्यक्षः, पार्वतं नादेयं सारसम् आनूपं च पर्वताश्रयं नद्याश्रयं सरोव्यपाश्रयं साम्बुदेशाश्रयं च, नागवनं, विदितपर्यन्तप्रवेशनिष्कसनं विज्ञातपरिसराभिगमनिर्गमं कृत्वा, नागवनपालैः पालयेत्। हस्तिघातिनं शबरपुलिन्दादिं, हन्युः। स्वयंमृतस्य अर्थाद्धस्तिनः, दन्तयुगम्, आहरतः उपनयतः वनेचरजनस्य, सपादचतुष्पणो लाभः पारितोषिकं, देय इति शेषः।

नागवनेत्यादि। नागवनपालाः, हस्तिपकपादपाशिकसैमिकवनचरकपारिकर्मिकसखाः हस्तिपक आधोरणः पादपाशिकः पादपाशबन्धनकुशलः सैमिकः सीमाधिकृतः वनचरकः वनवासी पारिकर्मिकः हस्तिपरिचरणचतुरः एतैः सहिताः, हस्तिमूत्रपुरीषच्छन्नगन्धाः हस्तिमूत्रपुरीषगन्धन्यक्कृतगन्धान्तराः, भल्लातकीशाखाप्रतिच्छन्नाः अरुष्कराख्यवृक्षविटपावच्छादिताः, पञ्चभिः सप्तभिर्वा हस्तिबन्धकीभिः सह गजबन्धनशिक्षिताभिर्वशाभिः सह, चरन्तः सन्तः, शय्यास्थानपद्यालण्डकूलपातोद्देशेन शयनावस्थानपदपङ्क्ति विष्ठावप्राघातप्रदेशदर्शनेन, हस्तिकुलपर्यग्रं गजयूथसञ्चारपरमावधिं विद्युः।

In the extreme limit of the country shall be located a forest for elephants separated from other wild tracts. The superintendent of elephants shall be familiar with the region as to where it is hilly, marshy etc., and as regards passages for entrance into the region and exit from the place, so that be could guard the place along with his assistants in a proper manner. A poacher who kills an elephant shall be put to death. He who brings the tusks of an elephant which died of natural causes shall be rewarded with an amount of four and a half paṇas.

The keepers of the elephant forests such as those who rear elephants, put chains to its legs, guards of the boundary, foresters and trainers shall proceed to locate the presence of the elephants anointed with the urine and dungs left by the elephants and concealed under the branches of the Bhallātaki (Semicarpus Anacardium) to deceive the wild elephant). Moving with five or seven female elephants to help tether the wild ones, they should proceed by following the course of urine and dungs left by the wild elephants and ascertain where it stood and rested or where it destroyed the banks of the rivers and so on.

यूथचरमेकचरं निर्यूथं यूथपतिं हस्तिनं व्यालं मत्तं पोतं बद्धमुक्तं च निबन्धेन विद्युः। अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिनो गृह्णीयुः। हस्तिप्रधानो हि विजयो राज्ञाम्। परानीकव्यूहदुर्गस्कन्धावारप्रमर्दना ह्यतिप्रमाणशरीराः प्राणहरकर्माणो हस्तिन इति।

कलिङ्गाङ्गगजाः श्रेष्ठाः प्राच्याश्चेदिकरूशजाः।
दाशार्णाश्चापरान्ताश्च द्विपानां मध्यमा मताः।।
सौराष्ट्रिकाः पाञ्चनदास्तेषां प्रत्यवराः स्मृताः।
सर्वेषां कर्मणा वीर्यं जवस्तेजश्च वर्धते।।

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वितीयोऽध्यायः भूमिच्छिद्रविधानम्, आदितस्त्रयोविंशः।।

यूथेत्यादि। यूथचरं यूथेनैव सह चरति नत्वेकाकी यस्तम्, एकचरम् एक एव चरति नतु यूथेन सह यस्तं, निर्यूथं यूथनिर्गतं, यूथपतिं, व्यालं क्रूरस्वभावं, मत्तं प्रभिन्नं, पोतं दशवर्षकं, बद्धमुक्तं च हस्तिनं, निबन्धेन विद्युः यूथचरादिहस्तीयत्तादिकं गणनपुस्तके समारोप्य तेन जानीयुरित्यर्थः। अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिशिक्षाविचक्षणैः प्रमाणभूतैः श्लाघितलक्षणचर्यान् हस्तिनः, गृह्णीयुः, राजार्थे। हि यस्मात् कारणाद्, राज्ञां विजयः शत्रुजयः हस्तिप्रधानः हस्तिमुख्यसाधनकः। हस्तिनां मुख्यसाधनत्वं विशदयितुमाह—परेत्यादि। अतिप्रमाणशरीराः महाप्रमाणदेहाः अत एव प्राणहरकर्माणः, हस्तिनः, परानीकव्यूहदुर्गस्कन्धावारप्रमर्दनाः परेषां शत्रूणां सैन्यविन्यासस्य प्राकारादिदुर्गस्य राजधान्याश्च विध्वंसकाः खलु। इतिर्हेतुवचनः गृह्णीयुरित्यनेन सम्बन्धनीयः।

गजेषूत्तममध्यमाधमान् श्लोकाभ्यामाह—**कलिङ्गेत्यादिना सौराष्ट्रिका** इत्यादिना च। कलिङ्गाङ्गजाः

कलिङ्गाङ्गदेशोद्भवा गजाः। दाशार्णाः दशार्णदेशभवाः, आपरान्ताः पश्चिमदेशजाः। प्रत्यवराः अधमाः। श्रेष्ठादीनां त्रयाणां वीर्यवेगप्रतापाः क्रियया वर्धन्त इत्याह–**सर्वेषामित्यादि**।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वितीयोऽध्यायः भूमिच्छिद्रविधानम्, आदितस्त्रयोविंशः॥

They shall ascertain by consulting the book on elephantology whether the elephant on whose trail they proceed, the fact whether a herd of elephants or an elephant roaming in single, or a stray elephant, or a leader of herds, a tusker, or a rogue elephant or an elephant in rut, or a young elephant or one which has escaped from captivity. Only elephants of noble features as certified by a trainer of elephants need be captured. The success of a king (in battle) depends mainly upon elephants. It is specifically so since the elephants could throw an army into disarray by a frontal attack, smash the gate of a fort and destroy encampments with its huge body capable of destroying the lives.

Elephants procured from the regions of Kalinga, Anga, Karūśa and the East are among the best, while those from the regions of Daśārṇa and the western countries are of middle quality. Elephants of Saurāṣṭra and Pañcanada countries are of low quality. But by training one could improve the might, speed and vigour of all or them.

Thus the twenty third chapter of the Arthaśāstra of Kanṭalya called the division of land comes to an end. Here ends the second chapter of the second Adhikaraṇa, called Adhyakṣapracāra.

Chapter 24

21. प्रक० दुर्गविधानम्।

Section 21 : Construction of Forts

चतुर्दिशं जनपदान्ते साम्परायिकं दैवकृतं दुर्गं कारयेद्, अन्तर्द्वीपं स्थलं वा निम्नावरुद्धमौदकं, प्रास्तरं गुहां वा पार्वतं, निरुदकस्तम्बमिरिणं वा धान्वनं, खञ्जनोदकं स्तम्बगहनं वा वनदुर्गम्। तेषां नदीपर्वतदुर्गं जनपदारक्षस्थानं, धान्वनवनदुर्गमटवीस्थानम् आपद्यपसारो वा।

जनपदमध्ये समुदयस्थानं स्थानीयं निवेशयेद् वास्तुकप्रशस्ते देशे नदीसङ्गमे ह्रदस्य वा अविशोषस्याङ्के सरसस्तटाकस्य वा वृत्तं दीर्घं चतुरश्रं वा वास्तुकवशेन प्रदक्षिणोदकं पण्यपुटभेदनमंसवारिपथाभ्यामुपेतम्। तस्य परिखास्तिस्रो दण्डान्तराः कारयेत् चतुर्दश द्वादश दशेति दण्डान् विस्तीर्णाः विस्तारादवगाधाः पादोनमर्धं वा त्रिभागमूलामूले चतुरश्राः पाषाणोपहिताः पाषाणेष्टकाबद्धपार्श्वा वा तोयान्तिकीरागन्तुतोयपूर्णा वा सपरिवाहाः पद्मग्राहवतीः।

दुर्गविधानमिति सूत्रम्। दुर्गरचनोच्यत इति सूत्रार्थः। जनपदप्रकृतिरुक्ता, दुर्गप्रकृतिरधुनाभिधीयते।

चतुर्दिशमिति। जनपदान्ते, चतुर्दिशं चतसृषु दिशासु व्यापकं, साम्परायिकं युद्धोचितं, दैवकृतं दुर्गं कारयेत् स्वभावविषमस्थलं दुर्गत्वेनाश्रयेत्। किंरूपं तत् कारयेदित्यत्राह–अन्तरित्यादि। अन्तर्द्वीपं मध्यगतद्वीपम् अर्थात् समन्तान्नदीपरिवेष्टनमित्येकं, निम्नावरुद्धं स्थलं वा निम्नैः सरोभिः समन्ताद् वेष्टितं स्थलं वेत्यपरम्, औदकं जलपरिवेष्टनदुर्गमत्वादौदकपदव्यपदेश्यं दुर्गम्। प्रास्तरं गुहां वा पर्वतप्रस्तरमयमित्येकं देवखातबिलात्मकं वेत्यपरम्, पार्वतं पर्वतकृतं दुर्गम्। निरुदकस्तम्बम् इरिणं वा जलतृणसङ्घातशून्यमित्येकम् ऊषरं वेत्यपरम्, धान्वनं धन्वकृतं दुर्गम्। खञ्जनोदकं खञ्जनं पङ्किलत्वाद् गतिवैक्लब्यकरमुदकं यस्मिंस्तत् तथाभूतमित्येकं स्तम्बगहनं वा अप्रकाण्डद्रुमदुष्प्रवेशं वेत्यपरं, वनदुर्गं तदाख्यम्। तदेवमौदकाद्येकैक-द्वैविध्यादष्टौ दुर्गाणि सिद्धानि। तेषामिति। तेषां दुर्गाणां मध्ये, नदीपर्वतदुर्गं पर्वतदुर्गं च, आपदि जनपदारक्षस्थानं जनपदस्य रक्षाहेतुः, भवति, धान्वनवनदुर्गम् अटवीस्थानं धान्वनदुर्गं वनदुर्गं च आटविकरक्षास्थानमापदि, अपसारो वा, आपदि अपसरणस्थानं वा, अर्थाद् राज्ञः।।

दुर्गविधानमुक्त्वा स्थानीयादिकमाह–जनपदेत्यादि। जनपदमध्ये, समुदयस्थानं धनोत्पत्तिस्थानभूतं, स्थानीयं महाग्रामादिकं पूर्वोक्तं निवेशयेत्। कीदृशे प्रदेशे, वास्तुकप्रशस्ते वास्तुविद्याभिज्ञनिर्दिष्टे देशे,

नदीसङ्गमे नद्युपश्लेषे, अविशोषस्य सदाजलस्य, ह्रदस्य सरसः, तटाकस्य पद्माकरस्य वा अङ्के समीपे वा। कीदृशं निवेशयेत्, वास्तुकवशेन वास्तुस्थित्यनुसारेण वृत्तं वर्तुलाकारं, दीर्घं, चतुरश्रं वा, प्रदक्षिणोदकं प्रदक्षिणवाहिसलिलं, पण्यपुटभेदनं पण्यपुटानां पण्यकरण्डानां तत्तत्पण्योत्पत्तिस्थानेभ्यः प्रहितानां भेदनं बन्धविस्रंसनम् अनन्यत्रकार्यतया सङ्केतितं यस्मिंस्तत् तथाभूतम्, अंसवारिपथाभ्यामुपेतं स्थलमार्गजलमार्गाभ्यां गम्यम्।। तस्येति। तस्य स्थानीयस्य, तिस्रः प्रथममध्यमतृतीयाः, परिखाः कारयेत्, कीदृशीः, दण्डान्तराः द्विचत्वारिंशदङ्गुल एको हस्त इति गणनया देशकालमानप्रकरणोक्तया चत्वारो हस्ता एको दण्डः दण्डमितम् अन्तरं परस्परव्यवधानं यासां ताः तथोक्ताः, चतुर्दशदण्डान् द्वादशदण्डान् दशदण्डान् इत्येवंक्रमेण विस्तीर्णाः, विस्ताराद् विस्तारपरिमाणात् पादोनं चतुर्भागहीनम्, अर्धं वा, अवगाधाः निम्नाः, तदुभयानुपपत्तावाह– त्रिभागमूला वा विस्तारत्रिभागमानं मूलम् अधस्तलं निम्नत्वं यासां तास्तथाभूताः, मूले चतुरश्राः सम्यग्बद्धाः, पाषाणोपहिताः शिलारचिताः, पाषाणेष्टकाबद्धपार्श्वा वा, तोयान्तिकीः आजलोदयदेशखाताः स्वतः सम्पन्नजला इत्यर्थः, आगन्तुतोयपूर्णा वा नद्याद्यागतजलसम्भृता वा, सपरिवाहा जलनिर्गममार्गोपेताः, पद्मग्राहवतीः नलिननक्रयुक्ताः।

On all the four sides of the country there shall be fortifications to protect from the attack of the enemy, for which natural facilities may be made use of. Audaka—a water fortification is that wherein a place is surrounded by natural lakes or a hollow place which is not easily accessible. Pārvata is that part where the place is surrounded by stones or pebbles or a cave in a mountain. Dhānvana is that type where there is no water available or overgrown with thickets growing in barren soil. Vanadurga—is a forest fortification where the place is mostly marshy being full of mire or full of thickets which makes movement difficult. Of these the fortification related to river (water) and forest (stones) provide security for villages while (the other two) Dhānvana and Vanadurga are to be resorted to in times or emergency. In the centre part of the kingdom, the king shall locate the cluster of villages with offices to collect the revenue. These should be built in an architecturally ideal place or on the confluence of rivers or on the proximity of a lake with unending water sources or on the banks of large ponds and tanks. These constructions should be circular, rectangular or square in shape surrounded by an artificial canal of water always flowing towards the right direction and connected with land and water paths. It should be surrounded by three rows of ditches with a distance of one daṇḍa (six feet) between each of them. The respective width of these three are fourteen, twelve and ten daṇḍas, and with depth less by one quarter or one half of their width, square at the bottom and one-third as wide as at their top, with sides built of stones or bricks filled with perennial flowing water or with water drawn from some other source and having lotus plants and crocodiles.

At a distance of four daṇḍas (24 feet) from the first or inner most ditch,

a rampart having a height of six daṇḍas and breadth of twice as much shall be erected by heaping mud upwards. At the bottom it shall be square-shaped with an oval shape at the centre made hard by the trampling of elephants and bulls and shall be planted with thorny and poisonous plants in bushes. In between the walls of the rampart one may fill them up with the mud left over or by the waste of building collected from the city.

चतुर्दण्डावकृष्टं परिखायाः षड्दण्डोच्छ्रितमवरुद्धं तद्द्विगुणविष्कम्भं खाताद् वप्रं कारयेद् ऊर्ध्वचयं मञ्चपृष्ठं कुम्भकुक्षिकं वा हस्तिभिर्गोभिश्च क्षुण्णं कण्टकिगुल्मविषवल्लीप्रतानवन्तम्। पांसुशेषेण वास्तुच्छिद्रं वा पूरयेत्।

वप्रस्योपरि प्राकारं विष्कम्भद्विगुणोत्सेधमैष्टकं द्वादशहस्तादूर्ध्वमोजं युग्मं वा आ चतुर्विंशतिहस्तादिति कारयेत्। रथचर्यासञ्चारं तालमूलमुरजकैः कपिशीर्षकैश्चाचिताग्रं पृथुशिलासंहितं वा शैलं कारयेद्, न त्वेव काष्ठमयम्, अग्निरवहितो हि तस्मिन् वसति।

विष्कम्भचतुरश्रमट्टालकमुत्सेधसमावक्षेपसोपानं कारयेत्, त्रिंशद्दण्डान्तरं च।

वप्रविधानमाह–**चतुर्दण्डावकृष्टमिति**। खाताद् वप्रं कारयेत् परिखातादुद्धृतया मृदा प्राकाराधारभूतं चयं निर्मापयेत्। कथम्भूतं, परिखायाः चतुर्दण्डावकृष्टं षोडशहस्तविप्रकृष्टं, षड्दण्डोच्छ्रितं चतुर्विंशतिहस्तोन्नतम्, अवरुद्धं मृद्गलनं यथा न भवेत् तथाधस्तात् कृतसंरोधं, तद्द्विगुणविष्कम्भम् उच्छ्रयद्विगुणविस्तारम्, ऊर्ध्वचयम् अधःस्थूलोपरिकृशमूर्ध्वचयाख्यं, मञ्चपृष्ठम् उपर्यधस्ताच्च तुल्यवैपुल्यं मञ्चपृष्ठाख्यं, कुम्भकुक्षिकं वा ऊर्ध्वाधःकृशंमध्यस्थूलं कुम्भकुक्षिकाख्यं वा, हस्तिभिर्गोभिश्च क्षुण्णं प्रघातदृढीकृतं, कण्टकिगुल्मविषवल्लीप्रतानवन्तं कण्टकवद्भिस्तृणसङ्घातैः विषलताप्रतानैश्च युक्तम्। **पांस्वित्यादि**। पांसुशेषेण वप्रविनियुक्तावशिष्टया मृदा, वास्तुच्छिद्रं नगरवास्तुगर्तं राजवास्तुगर्तं च, पूरयेद्वा पूरयेच्च।

प्राकारविधानमाह–**वप्रस्येति**। विष्कम्भद्विगुणोत्सेधं स्वविस्तारद्विगुणोच्छ्रयम्। ऐष्टकं पक्वेष्टकचितम्। उत्सेधमानं विशदयन्नाह–द्वादशहस्तादूर्ध्वम् ओजं युग्मं वा त्रयोदशपञ्चदशादिविषमसंख्यहस्तप्रमाणोत्सेधं चतुर्दशषोडशादिसमसंख्यहस्तप्रमाणोत्सेधं वेत्यर्थः। उत्सेधमानस्य परमावधिमाह–आ चतुर्विंशतिहस्तात् चतुर्विंशतिहस्तोत्तमपरिमाणोत्सेधमित्यर्थः। उत्सेधं केचिद् विषमसंख्यमिच्छन्ति समसंख्यमपरे, तत्रान्यतरनिर्बन्धोऽकिञ्चित्कर इत्योजयुग्मोभयोक्त्या सूचयति। इति एवम्प्रकारं, प्राकारं, वप्रस्योपरि कारयेत्। अनुक्तविशेषणकथनपूर्वं प्राकारस्य प्रकारान्तरमाह–**रथेत्यादि**। रथचर्यासञ्चारं रथचर्यया रथगत्या सञ्चारो रथिगतागतं यस्मिंस्तं तथाभूतम् उपरि रथगतागतपर्याप्तविस्तारयुक्तत्वमनेनोक्तं, तालमूलमुरजकैः कपिशीर्षकैश्च आचिताग्रं तालवृक्षमूलप्रतिकृतिभिर्मुरजप्रतिकृतिभिः कपिशीर्षप्रतिकृतिभिश्च शिलेष्टकाचूर्णनिर्मिताभिः समन्विताग्रं, पृथुशिलासंहितं शैलं वा विपुलशिलाबद्धम् ऐष्टकविलक्षणं शिलामयं वा, कारयेद्, अर्थात् प्राकारम्। काष्ठमयं तु प्राकारं, नैव कारयेत्। कुतः, हि यतः, तस्मिन् काष्ठमये, अग्निः अवहितः सन् वसति।

विष्कम्भेत्यादि। अट्टालकं प्राकाराग्रे रणगृहं, कारयेत्। कीदृशं, विष्कम्भचतुरश्रं विस्तारस्यानुरूपम् अर्थादायामे चोत्सेधे च, उत्सेधसमावक्षेपसोपानम् उत्सेधानुरूपावरोहसोपानं, त्रिंशद्दण्डान्तरं च त्रिंशद्दण्डप्रमाणमिथोव्यवधानं च।

There shall be parapets over the rampart in odd or even numbers with a space in between each from twelve to twenty four hastas. They shall be built of baked bricks and raised to a height of twice their breadth. The passage for chariots shall be made of trunks of palm trees with slabs of stones with their top resembling the head of monkeys in shape or covered by huge stones. It is particularly noted that it shall not be made of wood since the presence of fire is always there (is the timber).

Towers with square shape with ladders having the flexibility of shifting with equal height shall be provided with a distance of thity daṇḍas in between them.

द्वयोरट्टालकयोर्मध्ये सहर्म्यद्वितलामध्यर्धायामां प्रतोलीं कारयेत्।

अट्टालकप्रतोलीमध्ये त्रिधानुष्काधिष्ठानं सापिधानच्छिद्रफलकसंहितमितीन्द्रकोशं कारयेत्।

अन्तरेषु द्विहस्तविष्कम्भं पार्श्वे चतुर्गुणायाममनुप्राकारम् अष्टहस्तायतं देवपथं कारयेत्।

दण्डान्तरा द्विदण्डान्तरा वाचार्याः कारयेद्, अग्राह्ये देशे प्रधावितिकां निष्कुहद्वारं च।

द्वयोरिति। द्वयोरट्टालकयोर्मध्ये, सहर्म्यद्वितलां हर्म्यं धवलगृहमिति ख्यातमैष्टकं गृहं तेन तदीयेन च द्वितलेन सहिताम्, अध्यर्धायामां विस्तारात् सार्धगुणपरिमाणदैर्घ्यां, प्रतोली गृहविशेषं, कारयेत्।

अट्टालकप्रतोलीमध्य इति। अट्टालकप्रतोल्योर्मध्ये, इन्द्रकोशं खट्वाविशेषं कारयेत्। कथम्भूतं, त्रिधानुश्काधिष्ठानं त्रयाणां धानुष्काणां धन्विनां स्थितिपर्याप्तं, सापिधानच्छिद्रफलकसंहितं सापिधानानि अवच्छादसाधनोपेतानि छिद्राणि यस्मिंस्तेन तथाभूतेन फलकेन संहितं कृतसन्धानं च।

अन्तरेष्विति। अनुप्राकारम्, अन्तरेषु अट्टालकप्रतोलीन्द्रकोशानामन्तरालेषु, द्विहस्तविष्कम्भं द्विहस्तविस्तारं, पार्श्वे अर्थात् प्राकारस्य, चतुर्गुणायामम् अष्टहस्तायतमित्यर्थः, देवपथं देवपथ इव देवपथः रहस्यमार्गः तं, कारयेत्, मातृकायाम् 'अष्टहस्तायतमि'त्यपि पठ्यते। तत्तु पुनरुक्तं द्रष्टव्यम्।

दण्डेत्यादि। दण्डान्तराः दण्डप्रमाणविष्कम्भाः, द्विदण्डान्तरा वा, चार्याः आरोहावरोहभूमीः कारयेत्। अग्राह्य इति। अग्राह्ये ग्रहणायोग्ये देशे, प्रधावितिकां प्रतिपक्षैर्बाणे प्रयुज्यमाने तद्गोचरपरिहारेण भटस्य सुखतिरोधानार्थः क्षुद्रो वरणः प्रधावितिका तां, कारयेत्, प्रकारोपरि। निष्कुहद्वारं च कोटरविवरं च प्राकारवहिर्वर्तिप्रतिपक्षचेष्टितगूढदर्शनार्थं, कारयेत् प्रधावितिकान्तिके।

In between the two lofty towers (where there is an intermediate space measuring 30 daṇḍas) may be formed a street having two-storeyed buildings covered over with a roof. The size shall be two and a half times as long as it is broad.

In between the towers and the rows of two storeyed buildings there shall be Indrakośas (scaffold, a projection on the roof of a house, a kind of balcony) with timber doors which could be opened and closed towards the street and in which three archers could occupy themselves.

Inside the streets there shall be Devapatha (a passage for the gods—a concealed way for safe exit) which shall measure two hastas inside and four times as much as the sides. These shall be built into each of the ramparts.

With a distance of one daṇḍa or two there shall be there shall be space for getting into or getting out from the ramparts. Over the top of the ramparts there shall be niches (for the just enough to be out of the reach of the enemy arrows, and small cavities through which they could direct the arrows against the enemies.

बहिर्जानुभञ्जनीत्रिशूलप्रकरकूपकूटावपातकण्टकप्रतिसराहिपृष्ठतालपत्रशृङ्गाटकश्वदंष्ट्रार्गलोपस्कन्दनपादुकाम्बरीषोदपानकैः छन्नपथं कारयेत्।

प्राकारमुभयतो मण्डपकमध्यर्धदण्डं कृत्वा प्रतोलीषट्तलान्तरं द्वारं निवेशयेत् पञ्चदण्डादेकोत्तरवृद्ध्याष्टदण्डादिति चतुरश्रम्। द्विदण्डं वा। षड्भागमायामादधिकमष्टभागं वा।

बहिरिति। बहिः परिखाबहिर्भूमिषु, जानुभञ्जनीत्रिशूलप्रकरणकूपकूटावपातकण्टकप्रतिसराहिपृष्ठतालपत्रशृङ्गाटकश्वदंष्ट्रार्गलोपस्कन्दनपादुकाम्बरीषोदपानकैः छन्नपथं कारयेत् सारदारुलोहनिर्मितानां तीक्ष्णत्रिशृङ्गाणामायुधविशेषाणां समूहः कूपा अन्धवः कूटा अयश्शलाकाः अवपातास्तृणादिच्छन्ना गर्ताः कण्टकप्रतिसराः आयसाः कण्टकाचिता रज्जुविशेषाः अहिपृष्ठानि निर्मांससर्पपृष्ठास्थिसदृशाकाराण्ययोमयानि तीक्ष्णाग्राणि तालपत्राणि तथाविधान्येव तालपत्राकाराणि शृङ्गाटकानि त्रिकोटिकानि लौहयन्त्राणि श्वदंष्ट्रास्तदाकारा यन्त्रभेदाः अर्गलानि विष्कम्भाकाराणि यन्त्राणि उपस्कन्दनानि स्वखलनार्थानि काष्ठानि पादुकाः एकपादमात्रपातपर्याप्ताः पङ्कपूरिता गर्ताः अम्बरीषाणि अग्निसम्भृततप्तभ्राष्ट्रगर्भा गर्ताः उदपानकानि दुष्पीतोदकाः कुपुष्करिण्यः एतैश्छन्नं पन्थानं कारयेत्।

इत्थं परिखावप्रप्राकाराणां विधानमुक्त्वा द्वारविधानमाह–**प्राकारमुभयत** इत्यादि। अस्यार्थः–यत्र द्वारं निर्मित्सितं तत्र प्राकारोभयभागयोः अध्यर्धदण्डविस्तारं मण्डपं परिकल्प्य प्रतोलीषट्तलैरवच्छादितं तदाधारभूतैः षड्भिस्तोरणस्तम्भैर्युक्तं द्वारं निवेशयेत् कारयेत्। पञ्चदण्डात् प्रभृति एकोत्तरवृद्ध्या अष्टदण्डपरमावधिकेन विस्तारेण प्राकारानुरूपेण युक्तं चतुरश्रं निवेशयेदिति। **द्विदण्डं वेति।** दण्डद्वयविस्तारयुक्तं वा द्वारं निवेशयेत्। इदमेकीयपक्षे। पक्षान्तरमाह–**षड्भागमिति।** आयामाद् दैर्घ्येण, षड्भागमष्टभागं वाधिकम् आश्रितविस्तारमानापेक्षया तदीयषष्ठांशाधिकं तदीयाष्टमांशाधिकं वा निवेशयेत्। इदमेवं विवृण्वन्ति–पञ्चदण्डचतुरश्रस्य षड्भागः साष्टाङ्गुलं हस्तत्रयम्, अष्टभागस्तु सार्धं हस्तद्वयं, चतुर्विंशत्यङ्गुल एको हस्तः, हस्तचतुष्टयमेको दण्ड इति चाश्रयणादिति। एवं षड्दण्डचतुरश्रादिषूह्येयम्।

Outside the ramparts passages for the movements (of enemies) shall be closed with concealed objects to form obstruction such as Jānu-bhañjanī (knee-breaker), Triśūla (a trident, a spike fitted at the tip of wooden arrows), pits, thorny bushes filled into pits, replicas of snakes and palm leaves made of iron (to hurt the feet), triangles, obstacles resembling the

teeth of dogs, rods, ditches filled with thorny objects covered with sand, frying pans and water pools.

In both the sides of the rampart there should be a projection in the shape of a niche to the extent of a daṇḍa and a half. Now an entrance gate is to be made (to the fort). It shall be one sixth as broad as the width of the street (in front). A square shape can be effected by successive addition of one daṇḍa each upto eight daṇḍas commencing from five, or in the proportion, one-sixth of the length to one-eighth.

पञ्चदशहस्तादेकोत्तरमष्टादशहस्तादिति तुलोत्सेधः।

स्तम्भस्य परिक्षेपाः षडायामा द्विगुणो निखातः चूलिकायाश्चतुर्भागः।

आदितलस्य पञ्च भागाः शाला वापी सीमागृहं च। दशभागिकौ समत्तवारणौ द्वौ प्रतिमञ्चौ अन्तरम् आणिः। हर्म्यं च समुच्छ्रयादर्धतलं स्थूणावबन्धश्च। आर्धवास्तुकमुत्तमागारं त्रिभागान्तरं वा, इष्टकावबद्धपार्श्वं, वामतः प्रदक्षिणसोपानं गूढभित्तिसोपानमितरतः।

पञ्चदशेत्यादि। एतद् व्याचक्षते–द्वादशहस्तोत्सेधस्य प्राकारसभागृहस्य पञ्चदशहस्तोत्सेधांस्तुलास्तम्भान् कुर्यात्। एवं तद्धस्तचतुर्भागाश्रयेण एकोत्तरवृद्ध्या अष्टादशहस्तपर्यन्तमुत्सेधं कुर्यात्। स एष तुलोत्सेध इति। तलोत्सेध इति पाठे उक्तमानैस्तुलास्तम्भैरुपलक्षितस्यादितलस्योच्छ्रय इत्यर्थः।

स्तम्भस्येति। स्तम्भस्य परिक्षेपाः परिधयः षडायामाः स्तम्भोत्सेधषड्भागदीर्घाः, पञ्चदशहस्तोत्सेधस्य स्तम्भस्य परिधिमानं सार्धद्विहस्तं कल्पनीयमिति भावः। निखातो द्विगुणः स्तम्भस्य निखातायामः परिक्षेपायामद्विगुणः, पञ्चदशहस्तोत्सेधस्य पञ्चहस्त इति भावः। चूलिकायाश्चतुर्भागः चूलिका नाम स्तम्भशिखा तस्या आयामः परिक्षेपायामचतुर्भाग इत्यर्थः।

आदीत्यादि। अयमर्थः–प्रतोलिकात्रितलेषु मध्ये प्रथमतलं पञ्चधा विभज्य तेषु पञ्चसु भागेषु शाला वापी सीमागृहं च कार्याणीति। इदं विवृण्वन्ति–मध्यमे भागे वापीं वापीप्रान्तभागयोः दीर्घचतुरश्रे द्वे शाले शालाप्रान्तयोः सीमागृहं च कारयेदिति। सीमागृहं नाम शालाद्वयप्रान्तयुगलगते पञ्चभागे क्रियमाणं चतुष्कोणं कोष्ठगृहमित्याहुः। **दशभागिकाविति।** दशभागिकौ शालादशभागविस्तारौ, समत्तवारणौ निर्यूहयुक्तौ, द्वौ प्रतिमञ्चौ मञ्चप्रतिकृती ऐष्टकौ सन्निवशविशेषौ, कार्यौ, अर्थाच्छालायाः प्रान्ततः। अन्तरं शालासीमागृहयोरन्तरालं कार्यम्। आणिः कार्यः। स च क्षुद्रं द्वारमित्याहुः। **हर्म्यं चेति।** हर्म्यम् उपरितलं चन्द्रशाला तच्च, समुच्छ्रयादर्धतलम् उत्सेधेन प्रथमतलस्यार्धं प्रथमतलोत्सेधापेक्षयार्धोत्सेधं कार्यम्। आणिहर्म्यमिति पाठे आणिः सीमा तत्रत्यं हर्म्यं सीमागृहवदुपरितले सीमनिर्मिता चन्द्रशालेत्यर्थः। स्थूणावबन्धश्च क्षुद्रस्तम्भनिवेशाश्च अर्थाद् द्वितीयतले। **आर्धवास्तुकमिति।** उत्तमागारं तृतीयतलम्, आर्धवास्तुकं त्रिदण्ड एको वास्तुरिति परिभाषया वास्तोरर्धं सार्धदण्डः तत्प्रमाणकं कार्यम्, अर्थात् पञ्चदण्डचतुरश्रस्य द्वारस्य त्रिभागान्तरं वा पञ्चदण्डत्रिभागोऽन्तरमवकाशो यस्य तत् तथाभूतं वा, उत्तमागारं कार्यम्। इह वाशब्दात् त्रिभागद्वयान्तरपक्षार्धान्तरपक्षयोरपि संग्रह इत्याहुः। इष्टकावबद्धपार्श्वं, वामतः प्रदक्षिणसोपानम्, इतरतो दक्षिणतः, गूढभित्तिसोपानं च कार्यम्। तृतीयतलविधिरयमधस्तेऽपि योज्यः।

The height of the supporting pillars shall be fifteen hastas. It could be increased by additions of one hasta each up to eighteen hastas.

The circumference of the pillar shall be one sixth length of its height (circumference of two and a half hastas). It shall be imbedded in a pit of double the same (five hastas) and the size of the top of the pillar shall be one-fourth of the circumference.

In a building consisting of three floors (storeys) five parts of the first floor may be taken up for the creation of a hall, a well and a boundary house. Two tenths of it may be used for the formation of two platforms opposite to each other. The corridor between the hall and the boundary house should have a small door. The second floor shall be as high as its width and shall have several small pillars. The third storey shall be one and a half daṇḍa with the square shape or it may be one third of five daṇḍa, and built up by bricks on both the side walls. On the left side there shall be a winding staircase as also a concealed staircase (in case of emergency).

द्विहस्तं तोरणशिरः, त्रिपञ्चभागिकौ द्वौ कवाटयोगौ, द्वौ द्वौ परिघौ, अरत्निरिन्द्रकीलः, पञ्चहस्तमणिद्वारं, चत्वारो हस्तिपरिघाः।

निवेशार्धं हस्तिनखः मुखसमः। सङ्क्रमोऽसंहार्यो वा भूमिमयो वा निरुदके।

प्राकारसमं मुखमवस्थाप्य त्रिभागगोधामुखं गोपुरं कारयेत्। प्राकारमध्ये कृत्वा वापीं पुष्करिणीद्वारं, चतुश्शालमध्यर्धान्तराणिकं कुमारीपुरं, मुण्डहर्म्यं द्वितलं मुण्डकद्वारं, भूमिद्रव्यवशेन वा। त्रिभागाधिकायामा भाण्डवाहिनीः कुल्याः कारयेत्।

द्विहस्तमिति। तोरणशिरः द्वारशीर्षं, द्विहस्तं, कार्यम्। त्रिपञ्चभागिकौ त्रयः पञ्चभागा अनयोरिति तथाभूतौ, द्वौ कवाटयोगौ कार्यौ। द्वौ द्वौ परिघौ अर्गले, कार्यौ। इन्द्रकीलः कवाटधारणार्थः प्रधानः कीलविशेषः, अरत्निः निष्कनिष्ठमुष्टिकहस्तदीर्घः कार्यः। अणिद्वारं क्षुद्रद्वारम् अर्थान्महाकवाटमध्यगं, पञ्चहस्तं कार्यम्। हस्तिपरिघाश्चत्वारः गजार्गलानि लक्षणया गजगतिद्वाराणि चत्वारि कार्याणि, कृत्स्नो द्वारमण्डपावकाशश्चतुर्गजप्रवेशपर्याप्त कार्य इत्यभिप्रायः।

निवेशार्धमिति। हस्तिनखः दुर्गावतरणार्थः क्रमनिम्नो हस्तिनस्वाभो मृत्कूटः, निवेशार्धं द्वारसन्निवेशस्यार्धमानः पञ्चदण्डचतुरश्रस्य सार्धद्विदण्डोत्सेधमाान इत्यर्थः, मुखसमः द्वारसमानविस्तारश्च, कार्यः तथाविधो वा, निरुदके भूमिमयो वा, कार्यः।

इत्थं महाद्वारविधानमभिधाय द्वारान्तरविकल्पमाह–**प्राकारे**त्यादि। प्राकारसमं मुखमवस्थाप्य प्राकारतुल्यमानं निस्सरणं परिकल्प्य, त्रिभागगोधामुखं त्रिभागः विस्तारतृतीयांशस्तत्प्रमाणं गोधामुखं गोधामुखाकारं द्वारं यस्य तत् तथाभूतं गोपुरं पुरद्वारं, कारयेत्। **प्राकारमध्य** इति। प्राकारमध्ये वापीं कृत्वा पुष्करिणीद्वारं वापीयोगवशेन पुश्करिण्याख्यं द्वारं कारयेत्। अध्यर्धान्तराणिकम् अन्तरम् अणिश्च पूर्वोक्तादध्यर्धाधिकं यस्य तत् तथाभूतं, चतुश्शालं शालाचतुष्टयं, कृत्वा, कुमारीपुरं कुमारीपुराख्यं द्वारं कारयेद्, अर्थाद् यथोक्तचतुश्शालयुक्तं द्वारमेव कुमारीपुरसंज्ञं बोद्धव्यम्। द्वितलं द्विभूमं, मुण्डहर्म्यं निश्शृङ्गं हर्म्यं, वृत्तमालिकामित्यन्ये, कृत्वा, मुण्डकद्वारं मुण्डहर्म्ययोगान्मुण्डकाख्यं द्वारं, कारयेत्। भूमिद्रव्यवशेन

वा भूमिद्रव्यसम्पदनुरोधेन वा, कारयेद्, अर्थाद् यथोक्तमेकैकं द्वारम्। त्रिभागेत्यादि। त्रिभागाधिकायामाः त्रिभागाधिकः स्वविस्तारमानापेक्षया तृतीयांशाभ्यधिकमानः आयामो दैर्घ्यं यासां तास्तथाभूताः, भाण्डवाहिनीः कर्मोपकरणगतागतव्यवहारार्थाः, कुल्याः कारयेत्।

The upper part of the ornamental arches should have a width and height of two hastas. There shall be two door panels having three sections each of which are divided into five sub-sections. Two and two crossbars shall be provided to close the door An iron bolt of a length of an Aratni (24 angulas) should be provided to the door. The centre part of the door should be of five hastas. There shall be a total of five gates for the movement of elephants to and fro (in the plot where the palace in located). Turrets out side the rampart (= hastinakha = elephant's nail, a sort of turret or raised mound of earth or masonry protecting the access to the gate of a city or fort) shall be or the height of half the door. It may be made difficult to tress pass, made of logs or shaped by mud if there is no water.

The front door shall be as high as the boundary wall. There shall be a gate tower of the shape of an allegator having a height up to the three fourths of the boundary wall. Inside the boundary there shall be a deep lotus pool with a flight of steps to descend. Near by there shall be located a Catuśśālā (= a structure with halls on four sides around a central courtyard) in which there shall be a door to Kumārīpuram (women's quarters) having its external area one and a half times a broad as that of its innermost room. Then there shall be a two-storeyed building without any ornamental dome with an appropriate door according to the availability of the building materials. A structure having one-third of the length of the rampart may be built with several rooms to deposit various weapons.

तासु पाषाणकुद्दालकुठारीकाण्डकल्पनाः।
मुसृण्ठिमुद्गरा दण्डचक्रयन्त्रशतघ्नयः।।
कार्याः कार्मारिकाः शूलवेधनाग्राश्च वेणवः।
उष्ट्रग्रीव्योऽग्निसंयोगाः कुप्यकल्पे च यो विधिः।।

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे तृतीयोऽध्यायः
दुर्गविधानम्, आदितश्चतुर्विंशः।।

कुल्यासु निवेशनीयानि भाण्डानि श्लोकद्वयेनाह–**तास्वित्यादि, कार्या** इत्यादि च। काण्डः बाणः, कल्पना गजोपकरणं, मुसृण्ठिर्गदा सायःकीला दारुमयी मुद्गरः दीर्घगदाकारं स्थूलाग्रमायुधम्, दण्डः क्षेपणीयो लगुडविशेषः, चक्रं सारवृत्तमायुधं, यन्त्रं जामदग्न्यभैमादि, शतघ्निः लोहकण्टकाचितं चतुस्तालप्रमाणमायुधम्। कार्मारिकाः कर्मारोऽयस्कारः तच्छिल्पसाध्याः तोमरादयः, उष्ट्रग्रीवाकाराः शस्त्र्यः, अग्निसंयोगाः अग्निः संयुज्यते विपक्षदाहार्थमेष्वित्यग्निसंयोगाः गुल्गुलुमदनसर्जरश्रीवेष्टगन्धपाषाणादयः, कुप्यकल्पे च यो विधिः

कुप्याध्यक्षप्रकरणे यो विधीयते स च, तासु कुल्यासु, कार्यः। स तु शाकतिनिशादिदारुवर्गः उटजचिमियादिवेणु वर्गः गोधासेरकद्वीपिप्रभृतिचर्मवसादिश्चेति बोद्धव्यम्। स्पष्टमन्यत्।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
तृतीयोऽध्यायः दुर्गविधानम्, आदितश्चतुर्विंशः।।

In these store rooms weapons like sharp stones, spades, daggers, arrows, housings of elephants, clubs, hammers with long handles, cudgels, discuss, mechanical devices, Śataghnis (cylindrical piece of wood studded with iron spikes), other weapons made by iron-smiths, bamboos with sharpened tips, weapons resembling the neck of camels and explosives may be deposited as also other items of armoury detailed in the section on weapons.

Thus the Twentyfourth chapter of the Arthaśāstra of Kauṭalya known as the construction of forts comes to an end. Here ends the third chapter of the second Adhikaraṇa called Adhyaksapracāra.

Chapter 25

22. प्रक० दुर्गनिवेशः।

Section 22 : Buildings within the Fort

त्रयः प्राचीना राजमार्गास्त्रय उदीचीना इति वास्तुविभागः। स द्वादशद्वारो युक्तोदकभूमिच्छन्नपथः।

चतुर्दण्डान्तरा रथ्याः। राजमार्गद्रोणमुखस्थानीयराष्ट्रविवीतपथाः संयानीयव्यूहश्मशानग्रामपथाश्चाष्टदण्डाः। चतुर्दण्डः सेतुवनपथः। द्विदण्डो हस्तिक्षेत्रपथः। पञ्चारत्नयो रथपथश्चत्वारः पशुपथो द्वौ क्षुद्रपशुमनुष्यपथः।

प्रवीरे वास्तुनि राजनिवेशश्चातुर्वर्ण्यसमाजीवे। वास्तुहृदयादुत्तरे नवभागे यथोक्तविधानमन्तःपुरं प्राङ्मुखमुदङ्मुखं वा कारयेत्। तस्य पूर्वोत्तरं भागमाचार्यपुरोहितेज्यातोयस्थानं मन्त्रिणश्चावसेयुः। पूर्वदक्षिणं भागं महानसं हस्तिशाला कोष्ठागारं च। ततः परं गन्धमाल्यधान्यरसपण्याः प्रधानकारवः क्षत्रियाश्च पूर्वां दिशमधिवसेयुः। दक्षिणपूर्वं भागं भाण्डागारमक्षपटलं कर्मनिषद्याश्च। दक्षिणपश्चिमं भागं कुप्यगृहमायुधागारं च। ततः परं नगर धान्यव्यावहारिककार्मान्तिकबलाध्यक्षाः पक्वान्नसुरामांसपण्याः रूपाजीवास्तालावचरा वैश्याश्च दक्षिणां दिशमधिवसेयुः। पश्चिमदक्षिणं भागं खरोष्ट्रगुप्तिस्थानं कर्मगृहं च। पश्चिमोत्तरं भागं यानरथशालाः। ततः परम् ऊर्णासूत्रवेणुचर्मवर्मशस्त्रावरणकारवः शूद्राश्च पश्चिमां दिशमधिवसेयुः, उत्तरपश्चिमं भागं पण्यभैषज्यगृहम्, उत्तरपूर्वं भागं कोशो गवाश्वं च। ततः परं नगरराजदेवता लोहमणिकारवो ब्राह्मणाश्चोत्तरां दिशमधिवसेयुः। वास्तुच्छिद्रानुलासेषु श्रेणीप्रवहणिकनिकाया आवसेयुः।

दुर्गनिवेश इति सूत्रम्। दुर्गं परिखावप्रप्राकाराट्टालप्रतोलीन्द्रकोशदेवपथादिकं यथोक्तं तस्मिन् निवेशः राजमार्गादिविभजनपूर्वं योग्यदेशरचनीयं राजामात्यादि-दुर्गान्तर्निवासिप्रकृतिभवनसंस्थानं, तदिहोच्यत इति सूत्रार्थः।

राजमार्गाः प्राक्प्रत्यगायतास्त्रयो दक्षिणोत्तरायतास्त्रय इत्येवं षोढा वास्तुर्विभक्तव्य इत्याह—**त्रय** इत्यादि। स इति। स वास्तुविभागः, द्वादशद्वारः दिशिदिशि द्वारत्रिकक्रमेण द्वादशभिर्द्वारैर्युक्तः, युक्तोदकभूमिच्छन्नपथः उदकं वापीकूपादि भूमिर्जलनिर्गममार्गः छन्नपथः गूढसुरुङ्गामार्गः ते युक्ता वास्तुविस्तारानुरूपा यस्मिन् स तथाभूतः, कार्यः इति शेषः।

चतुरित्यादि। रथ्या अल्पमार्गाः उपवीथ्य इत्यर्थः, चतुर्दण्डान्तराः चतुर्दण्डविस्तराः। राजमार्गद्रोणमुखस्थानीयराष्ट्रविवीतपथाः राजमार्गो द्रोणमुखपथः स्थानीयपथः राष्ट्रपथः विवीतपथ इत्येते, संयानीयव्यूहश्मशानग्रामपथाश्च संयानीयं क्रयविक्रयव्यवहारप्रधानं पट्टनं तत्पथः व्यूहपथः शत्रुपरिवेष्टनावसरे प्राकारेषु समन्तात् सद्यो गन्तुमुपकल्पितः सैन्यस्य मार्गः श्मशानपथः ग्रामपथ इत्येते च, अष्टदण्डाः कार्याः। सेतुवनपथः सेतुपथो वनपथश्च, चतुर्दण्डः। हस्तिक्षेत्रपथः हस्तिपथः क्षेत्रपथश्च, द्विदण्डः। रथपथः पञ्चारत्नयः निष्कनिष्ठमुष्टिकहस्तपञ्चकविस्तार इत्यर्थः पशुपथः गोमहिषादिमार्गः, चत्वारोऽरत्नयः अरत्निचतुष्टयप्रमाणः, क्षुद्रपशुमनुष्यपथः मेषादिक्षुद्रपशुमार्गः मनुष्यमार्गश्च, द्वौ अरत्नी।

प्रवीर इति। प्रवीरे प्रकर्षेण वीर्ययुक्ते, चातुर्वर्ण्यसमाजीवे वर्णचतुष्टयोपजीव्यगुणसम्पन्ने, वास्तुनि, राजनिवेशः राजभवनं, कार्यम्। वास्त्वित्यादि। एकाशीतिपदात्मकस्य वास्तुनो मध्यमो नवभागो वास्तुहृदयं, वास्तुहृदयाद्, उत्तरे नवभागे, यथोक्तविधानं निशान्तप्रणिधिप्रतिपादितप्रकारम्, अन्तःपुरं, प्राङ्मुखम् उदङ्मुखं वा कारयेत्। तस्येति। आचार्यपुरोहितेज्यातोयस्थानम् आचार्यपुरोहितयोर्यज्ञस्थानं तोयस्थानं च, मन्त्रिणश्च, तस्य अन्तःपुरस्य, पूर्वोत्तरं भागमावसेयुः पूर्वोत्तरे भागे स्थितिं कुर्युरित्यर्थः। महानसं पाकशाला, हस्तिशाला हस्तिपृष्ठाकारं सभागृहं, कोष्ठागारं च अन्तर्गृहमपवरकाख्यं च, पूर्वदक्षिणं भागम्, आवसेयुरिति सम्बध्यते आश्रयेयुरिति च तदर्थः। तत इति। ततः परं राजभवनाद् बहिः, गन्धमाल्यधान्यरसपण्याः गन्धपण्याः माल्यपण्याः धान्यपण्याः रसपण्याश्च, प्रधानकारवः मुख्यशिल्पिनः, क्षत्रियाश्च, पूर्वां दिशमधिवसेयुः। भाण्डागारम्, अक्षपटलं रूप्याद्यायव्ययगणनस्थानं, कर्मनिषद्याश्च स्वर्णरजतशिल्पस्थानानि च, दक्षिणपूर्वं भागम्, अधिवसेयुः आश्रयेयुः। कुप्यगृहं स्वर्णरजतशिल्पस्थानानि च, दक्षिणपूर्वं भागम्, अधिवसेयुः आश्रयेयुः। कुप्यगृहं स्वर्णरजतेतरस्थानम्, आयुधागारं च, दक्षिणपश्चिमं भागम् आश्रयेत्। ततः परमिति। ततः परं, नगरधान्यव्यावहारिककार्मान्तिकबलाध्यक्षाः नगरव्यावहारिकः धान्यव्यावहारिकः कार्मान्तिकः आकरादिकर्मान्ताधिकृतः बलाध्यक्षः सेनाध्यक्ष इत्येते, पक्वान्नसुरामांसपण्याः पक्वान्नादिविक्रेतारः, रूपाजीवा वेश्याः, तालावचरा नटाः, वैश्याश्च, दक्षिणां दिशम् अधिवसेयुः। खरोष्ट्रगुप्तिस्थानं गर्दभक्रमेलककारागृहाणि, कर्मगृहं च यत्र गृहादिकं निर्मीयते च ध्वंस्यते च परीक्षाद्यर्थं तत् स्थलं च, अथवा खरोष्ट्रादिव्यापारशाला च, पश्चिमदक्षिणं भागम्, आश्रयेत्। यानरथशालाः शिबिकादियानशाला रथशालाश्च, पश्चिमोत्तरं भागम्, आश्रयेयुः। ततः परमिति। ततः परं ततः परस्तात्, पश्चिमां दिशम्, ऊर्णासूत्रवेणुचर्मवर्मशस्त्रावरणकारवः ऊर्णावानकारवः कार्पासतन्तुवानकारवः वेणुवानकारवः चर्मकारवो वर्मकारवः शस्त्रावरणकारव इत्येते, शूद्राश्च, अधिवसेयुः। पण्यभैषज्यगृहं पण्यगृहम् औषधशाला च, उत्तरपश्चिमं भागम्, अधिवसेत्। कोशः धान्यादिसंग्रहस्थानं, गवाश्वं च गावोऽश्वाश्च, उत्तरपूर्वं भागम् अधिवसेत्। तत इति। ततः परं, नगरराजदेवताः नगरदेवताः राजकुलदेवताश्च, लोहमणिकारवः अयस्कारवैकटिकाः, ब्राह्मणाश्च, उत्तरां दिशमधिवसेयुः। वास्त्वित्यादि। श्रेणीप्रवहणिकनिकायाः श्रेणी रजकतन्तुवायतुन्नवायादयः प्रवहणिकाः विदेशागता वणिजः तेषां समूहाः, वास्तुच्छिद्रानुलासेषु वास्तुच्छिद्रावकाशेषु आवसेयुः। वसेयुरिति श्रेयान् पाठः।

The ground inside the fort shall be demarcated by three royal paths from west to east and another three from south to north. There shall be twelve gates for the demarcated area provided with land roads, water ways and a secret passage.

Minor streets should have a width of four daṇḍas. Rājamārga (royal paths) road leading to Droṇamukha (cluster of four hundred villages), road to Sthānīya (cluster of eight hundred villages), Rāṣṭrapatha (the highway) Vivītapatha (road to pastures), as well as roads to Samyānīya (commercial

township, bazaar), Vyūhapatha (road to facilitate the movement of the army when an enemy is approaching), Śmasānapatha (road to cremation grounds) and Grāmapatha (village roads) should have a width or eight daṇḍas (48 feet). Setupatha and Vanapatha (roads to dams and forests) shall have a width of four daṇḍas (24 fet). Hastipatha and Kṣetrapatha (roads to ride the elephants and those leading to fields) shall have a width of two daṇḍas (12 feet). Rathapatha (road to move the chariot) shall have five Aratnis (seven and a half feet). Paśupatha (roads to drive cattles) shall have four Aratnis (aratni = length from the elbow to the tip of the little finger; an ell) Roads for quadrupeds and men shall have a breadth of two Aratnis.

The most excellent ground fit for the occupation of the four castes may be chosen to locate the royal house. In the top portion of the centre of Vāstumaṇḍala (which has eighty one square cells formed by multiplication of nine there are nine cells. In that part located to the north of the ground the king's palace with doors on the eastern and northern side shall be built. Towards the north-east of the king's palace, shall occupy royal teachers, priests, sacrificial place, water reservoir and ministers. In the south-east of the palace shall be located the royal kitchen, elephant stables and store house. On the eastern side of the royal house shall be located merchants trading scents, garlands, grains and liquids as also artisans having expertise and Kṣatriyas with their habitations. South-east region is to locate the treasury, court of law and manufactories (of gold and silver). South west region is set apart for factories to make metallic vessels and for armoury. To the south of the city shall live superin-tendents of the city, of grains, of commerce, of manufactories and of the army as also traders in cooked food, liquor and flesh, besides courtezans, musicians and people of the caste of Vaiśyas. The south-west region is to be earmarked for the stable of asses and camels as also a working place. Sheds for keeping conveyances and chariots are to be located to the north-west of the plot. To the west artisans manufacturing worsted threads, cotton threads, bamboo-mats, skins, armours, weapons and gloves as well as the people of the Śūdra caste shall have their residences. To the north by west is the place for shops and hospitals. To the north by east is to be located the treasury and stables for cows and horses. To the north of the plot the tutelary deity of the king affording protection to the city, iron smiths, artisans working on precious stones as well as Brahmins shall have their dwellings. In the corners of the different locality shall live guilds and workmen.

अपराजिताप्रतिहतजयन्तवैजयन्तकोष्ठकान् शिववैश्रवणाश्विश्रीमदिरागृहं च पुरमध्ये

कारयेत्। कोष्ठकालयेषु यथोद्देशं वास्तुदेवताः स्थापयेत्। ब्राह्मैन्द्रयाम्यसैनापत्यानि द्वाराणि। बहिः परिखाया धनुश्शतावकृष्टा- श्चैत्यपुण्यस्थानवनसेतुबन्धाः कार्याः, यथादिशं च दिग्देवताः।

अपराजितेत्यादि। अपराजिताप्रतिहतजयन्तवैजयन्तकोष्ठकान् अपराजिता दुर्गा अप्रतिहतो विष्णुः जयन्तः सुब्रह्मण्यः वैजयन्त इन्द्रः एतेषामालयान्, शिववैश्रवणाश्विश्रीमदिरागृहं च शिवादीनां मदिरान्तानां पञ्चानां गृहं च, पुरमध्ये कारयेत्। कोष्ठकेत्यादि। कोष्ठकालयेषु पूर्वोक्तेषु, यथोद्देशं स्वस्वदेशानतिक्रमेण, वास्तुदेवताः स्थापयेत्। ब्राह्मेत्यादि। ब्राह्मैन्द्रयाम्यसैनापत्यानि ब्राह्मं ब्रह्मदेवताकमुत्तरम् ऐन्द्रं पूर्वं याम्यं दक्षिणं सैनापत्यं पश्चिममित्येतानि, द्वाराणि, अर्थात् पुरस्य। बहिरिति। परिखाया बहिः, धनुश्शतावकृष्टाः दण्डशतविप्रकृष्टाः, चैत्यपुण्यस्थानवनसेतुबन्धाः चैत्य उद्देशवृक्षः पुण्यस्थानं तीर्थादिकं वनं सेतुबन्ध इत्येते, कार्याः। दिग्देवताश्च, यथादिशं स्वस्वदिगनुरोधेन कार्याः।

In the centre of the city the temples for Aparājtā (goddess Durgā), Apratihata (god Viṣṇu), Jayanta (Subrahamaṇya) and Vaijayanta (Indra) as well as minor shrines for Śiva, Vaiśravana (Kubera), Aśvinī (the twin gods), Śrī (goddess of prosperity) and Madira (wife of Varuṇa) are to be located. In the corner places of the different direction the guardian deities of the ground are to be installed. There shall be (four) principal gates such as Brāhma (in the north), Aindra (in the east), Yāmya (in the south) and Saināṇya (related to Senāni = Subrahmaṇya), in the west. At a distance of a hundred dhanus (= 96 angulas form a dhanus) Caityas (sacred fig trees), holy spots, groves and causeways may be built, and guardian deities of the locations may be appropriately installed.

उत्तरः पूर्वो वा श्मशानवाटः, दक्षिणेन वर्णोत्तमानाम्। तस्यातिक्रमे पूर्वः साहसदण्डः।

पाषण्डचण्डालानां श्मशानान्ते वासः।

कर्मान्तक्षेत्रवशेन वा कुटुम्बिनां सीमानं स्थापयेत्। तेषु पुष्पफलवाटषण्डकेदारान् धान्यपण्यनिचयांश्च अनुज्ञाताः कुर्युः दशकुलीवाटं कूपस्थानम्। सर्वस्नेहधान्यक्षार- लवणभैषज्यशुष्कशाकयवसवल्लूरतृणकाष्ठलोह- चर्माङ्गारस्नायुविषविषाणवेणुवल्क- लसारदारुप्रहरणावरणाश्मनिचयाननेकवर्षोपभोगसहान् कारयेत्। नवेनानवं शोधयेत्।

उत्तर इत्यादि। वर्णोत्तमानां शूद्राणाम्। वर्णोत्तराणामित्यपि पाठः। पूर्वः साहसदण्डः सार्धद्विशत- पणलक्षणः।

पाषण्डेत्यादि। पाषण्डचण्डालानां कापालिकादीनां प्लवपुल्कसादीनां च।

कर्मान्तेत्यादि। कुटुम्बिनां दुर्गान्तवासयितव्यानां वर्णावराणां, कर्मान्तक्षेत्रवशेन कर्मनिर्वृत्तेः क्षेत्रस्य चानुरूप्येण, सीमानं तदुपयोक्तव्यक्षेत्रमर्यादां, स्थापयेत्। वाशब्दश्चस्थाने वाक्यभूषणम्। तेष्विति। तेषु क्षेत्रेषु पुष्पफलवाटषण्डकेदारान् पुष्पफलवाटः पुष्पफलदायकं वनं षण्डः पद्मादिसङ्घातः केदारो धान्योत्पादभूमिः एतान्, धान्यपण्यनिचयांश्च धान्यपण्यसंग्रहांश्च, अनुज्ञाताः कुर्युः, अर्थात् तत्कर्मार्हाः। ते च सीताध्यक्षो

विवीताध्यक्षो दुर्गसीमवासिनः कुटुम्बिनश्च। दशकुलीत्यादि। दशकुलीवाटं मध्यमहलद्वयकर्षणीया भूमिः कुलं दशानां कुलानां समाहारो दशकुली दशगवकृष्या भूमिरित्यपरे। तावत्प्रमाणं वाटं, कूपस्थानं कूपमातृकं, कुर्युः एकैकस्य दशकुलीवाटस्यैकैकं कूपं पोषणार्थं कुर्युरिति भावः। निचेतव्यद्रव्याण्याह–सर्वस्नेहेत्यादि। सर्वविधस्नेहादिद्राविंशतिनिचयान् बहुवर्षोपभोगक्षमान् निवेशयेद् दुर्गेषु। तत्र शाकं वृक्षसम्बन्धि मूलपत्रकरीराग्रफलकाण्डाधिरूढकत्वक्पुष्पकवकात्मकं दशकम्। यवसं धान्यपलालम्। वल्लूरं शुष्कमांसम्। अङ्गारो निर्वाणाग्निकमिन्धनम्। स्नायुर्वस्नसा। प्रहरणं खड्गादि। स्पष्टमन्यत्। नवेनेति। नवेन अनवं शोधयेत् नूतने यथोक्तद्रव्यजाते लब्धे पुराणं तद् व्ययेत्।

The cremation ground shall be located either in the northern region or east, but for those of the higher caste it shall be in the south. The infringement of this rule invites with the first amercement.

Pāṣaṇḍas (heretics) and Caṇḍalas (low-caste) shall have their dwellings beyond the burial grounds. Families belonging to the working class may be provided with sites suitable to their occupation and type of work. In such places they may be permitted to make flower garden, plant the trees brearing fruits, lotus ponds, and fields for cultivation besides collecting grains and other merchandise in abundance, after getting the necessary permission from the concerned authorities. For every ten families there shall be a well to collect water (for drinking and watering plants). Things to be collected and preserved (inside the fort) for the use of an year shall include (items like) oils of different kinds, grains, molasses, salt, medicinal items, dried vegetabels, fodder, dried flesh, dried grass, timbers, metals, skins (leather), charcoal, tendons, poison, horns, bamboo, fibrous garments (bark-garments), strong timber, weapons, armour and stones. In these old ones may be replaced by new ones periodically.

हस्त्यश्वरथपादातमनेकमुख्यमवस्थापयेत्। अनेकमुख्यं हि परस्परभयात् परोपजापं नोपैतीति।

एतेनान्तपालदुर्गसंस्कारा व्याख्याताः।
न च बाहिरिकान् कुर्यात् पुरराष्ट्रोपघातकान्।
क्षिपेज्जनपदस्यान्ते सर्वान् वा दापयेत् करान्।

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे चतुर्थोऽध्यायः
दुर्गनिवेशः, आदितः पञ्चविंशः।।

हस्तीत्यादि। हस्त्यश्वरथपादातं चतुरङ्गं सैन्यम्, अनेकमुख्यम् अनेके मुख्या बलप्रधाना यस्मिंस्तत् तथाभूतम्, अवस्थापयेद्, दुर्गेषु। बलप्रधानानां बहुत्वे गुणमाह–अनेकेत्यादि। एकश्चेद् बलप्रधानः स समानपुरुषान्तराभावान्निर्भयो लोभादिना परोपजापमङ्गीकृत्य कृत्स्नं बलं स्वाधिष्ठीयमानं भेदयेत्, बहवश्चेद् बलप्रधानाः ते परस्पराभिशङ्किताः परोपजापं नोपगच्छेयुरिति बहुप्रधानाधिष्ठितं बलं पराभेद्यं भवतीति भावः।

एतेनेति। एतेन यथोक्तेन पुरदुर्गसंस्कारविधिना, अन्तपालदुर्गसंस्कारा: व्याख्याता: जनपदसीमापालाधिष्ठितानां दुर्गाणां गुणाधानान्युक्तप्रायाणि, ते पुरदुर्गसंस्कारवद् विधातव्या इत्यर्थ:।

अध्यायान्ते श्लोकमाह--न चेति। बाहिरिकान् कितववञ्चकनटनर्तकादीन्, न च कुर्यात् पुरे नैव वासयेदित्यर्थ:, अर्थाद् राजा। तत्र हेतुसमर्पकं विशेषण पुरराष्ट्रोपघातकानिति, यतस्ते पौरान् जानपदांश्च कापथपवर्तनयोपघ्नन्ति तस्मादित्यर्थ:। यदि वासयेत् तदा विधिमाह–जनपदस्य, अन्ते सीमायाम् 'जनपदे चैतानि'त्यपपाठ:। क्षिपेद् वासयेद्, बाहिरिकान्। सर्वान् वा सर्वानिव जनपदान्तवास्तव्यानन्यान् कौटुम्बिकानिवेत्यर्थ:, करान् दापयेद् बाहिरिकान्। इहाणिकर्तृणां बाहिरिकाणां णौ कर्मत्वमपाणिनीयं, जल्पतिप्रभृतित्वकल्पनया वा ददातेर्गैपसंख्यानिकं तत् साध्यम्।।

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्थोऽध्याय: दुर्गनिवेश:, आदित: पञ्चविंश:।।

Army consisting of elephants, cavalry, chariots and intantry shall be placed inside the fort with many an officer for each category. When there are several chiefs they are under the fear of betrayal and desist from entering into intrigues with an enemy.

This also applies to the engagements of boundary chiefs and repairers of fortifications. Bāhirikas (deceitful persons) who are dangerous to the well-being of the city should not be permitted to live inside the fort. Such people shall be relegated to the border limits of the country and made to pay (heavy) taxes.

Thus the twenty-fifth chapter of the Arthaśāstra of Kauṭalya entitled 'buildings within the fort' comes to an end. Here ends the fourth chapter of the second Adhekaraṇa called Adhyakṣapracāra.

Chapter 26

23. प्रक० सन्निधातृनिचयकर्म।

Section 23 : Duties of Treasury Officer

सन्निधाता कोशगृहं पण्यगृहं कोष्ठागारं कुप्यगृहमायुधागारं बन्धनागारं च कारयेत्।

चतुरश्रां वापीमनुदकोपस्नेहां खानयित्वा पृथुशिलाभिरुभयतः पार्श्वं मूलं च प्रचित्य सारदारुपञ्जरं भूमिसमत्रितलमनेकविधानं कुट्टिमदेशस्थानतलमेकद्वारं यन्त्रयुक्तसोपानं देवतापिधानं भूमिगृहं कारयेत्। तस्योपर्युभयतोनिषेधं सप्रग्रीवमैष्टकं भाण्डवाहिनीपरिक्षिप्तं कोशगृहं कारयेत् प्रासादं वा। जनपदान्ते ध्रुवनिधिमापदर्थमभित्यक्तैः पुरुषैः कारयेत्।

सन्निधातृनिचयकर्मेति सूत्रम्। सन्निधाता द्रव्यं सञ्चित्य निधाता भाण्डागाराधिपतिः तस्य निचयकर्म द्रव्यसंग्रहरक्षणकर्म, तदोच्यत इति सूत्रार्थः। निचेयद्रव्यप्रसङ्गान्निचेतृव्यापाराभिधानम्।

सन्निधातेति। सन्निधाता, कोशगृहं रत्नस्वर्णादिनिधानस्थानं, पण्यगृहं विक्रेयद्रव्यनिवेशस्थानं, कोष्ठागारम् उदरोपयोगिधान्यस्नेहादिनिक्षेपस्थानं, कुप्यगृहं सारदारुवेणुवल्लीवर्गादिरक्षणस्थानाम्, आयुधागारं, बन्धनागारं च कारागृहं च, कारयेत्।

कोशगृहनिर्माणप्रकारमाह—**चतुरश्रामि**ति। चतुरश्रां, वापीं तदाकारं गर्तम्, अनुदकोपस्नेहाम् उदकोपक्लेदरहितां, खानयित्वा, उभयतः समन्तात्, पार्श्वं मूलं च, पृथुशिलाभिः, प्रचित्य, सारदारुपञ्जरं सारदारुमयपञ्जरयुक्तं, भूमिसमत्रितलं भूमिसमानि भूम्यानुरूप्यनिर्मितानि त्रीणि तलानि उपरितलमध्यम-तलाधस्तलानि यस्य तत् तथाभूतम्, अनेकविधानम् अनेकानि विधानानि कोष्ठकादिरचनाः यस्मिंस्तत् तथा भूतं, कुट्टिमदेशस्थानतलं देश उपरितलं स्थानं मध्यतलं तलम् अधोभूमिका इत्येतानि कुट्टिमानि दृढनिबद्धानि यस्य तत् तथाभूतम्, एकद्वारं, यन्त्रयुक्तसोपानं यन्त्रे युक्तानि यथावसरनिवेशनापसरणक्षमतया संश्लिष्टानि सोपानानि यस्य तत् तथाभूतं, देवतापिधानम् उत्कीर्णदेवताप्रतिमाङ्कं पिधानं दार्वादिमयमाच्छादनं यस्य तत् तथाभूतं, भूमिगृहं कारयेत्। तस्येति। तस्य भूमिगृहस्य, उपरि, उभयतोनिषेधं बहिरन्तश्चार्गलयुक्तं, सप्रग्रीवं प्रग्रीवेण मुखशालया सहितम्, ऐष्टकं पक्वेष्टकामयं, भाण्डवाहिनीपरिक्षिप्तं द्रव्याधारशालापरिवृतं, कोशगृहं प्रासादं वा उपरिगृहमिव कारयेत्। जनपदेत्यादि। आपदर्थं विपत्कालोपयोगार्थं, ध्रुवनिधिम् अनपायनिधिकम् अर्थात् प्रासादं, जनपदान्ते, अभित्यक्तैः वध्यैः पुरुषैः, कारयेत्। वध्यपुरुषा हि राज्ञा यत्नरक्षिताः निधिगुप्तिस्थानविधानरहस्यं निर्माणकाले नोद्भिन्द्युः, निर्माणनिर्वृत्त्युत्तरकाले च सद्यो मारिता भवन्तीति सोऽयं ध्रुवनिधिरनन्यवेद्यो वेदितव्यः।

The treasury officer shall see to the construction of a treasury, trading

house, store house of grains, store-house of forest produces, armoury and the jail.

(To build a treasury house) one should arrange to dig up a square well not too deep enough to be moistened with water, and using granite stones pave the floor and sides and construct in that cage-like under ground chamber a three-storeyed structure with its top touching the ground level. Each of the three storeys shall have several strong compartments of various designs with a single door fixed to a contrivance so that it could be moved to open and shut. The door should have the emblem of a deity carved to its panel and there shall be a movable staircase also. Above the ground level the treasury house or a mansion having bolts to close and open from both inside and outside is to be built using bricks for walls and a stony platform at the floor level to keep things stored.

At the end of the city near the boundary a storehouse to keep valuables and wealth to be used in exigency is to constructed utilising the services of condemned persons (who are likely to be put to death and as such the construction details will remain unknown to others).

पक्केष्टकास्तम्भं चतुश्शालमेकद्वारमनेकस्थानतलं विवृतस्तम्भापसारमुभयतः पण्यगृहं, कोष्ठागारं च, दीर्घबहुलशालं कक्ष्यावृतकुड्यमन्तः कुप्यगृहं, तदेव भूमिगृहयुक्तमायुधागारं, पृथग् धर्मस्थीयं महामात्रीयं विभक्तस्त्रीपुरुषस्थानमपसारतः सुगुप्तकक्ष्यं बन्धनागारं कारयेत्।

सर्वेषां शालाखातोदपानवच्च स्नानगृहाग्निविषत्राणमार्जारनकुलारक्षाः स्वदैवपूजनयुक्ताः कारयेत्।

पण्यगृहादिविधिमाह–पक्वेत्यादि। पक्वेष्टकास्तम्भं पक्वेष्टकामयैः स्तम्भैर्युक्तं, चतुश्शालं चतस्रश्चतुर्दिग्गता अन्योन्यसम्मुखीनाः शाला यस्मिंस्तत् तथाभूतम्, एकद्वारम्, अनेकस्थानतलम् अनेकैः कोष्ठैर्भूमिकाभिश्च युक्तम्, उभयत उभयपार्श्वयोः, विवृतस्तम्भापसारं विवृतस्तम्भः विस्तृतस्तम्भः अपसारोऽलिन्दो यस्य तत् तथाभूतं, पण्यगृहं, कोष्ठागारं च कारयेत्। दीर्घवहुलशालं, कक्ष्यावृतकुड्यं कक्ष्याभिः प्रकोष्ठकैः वृतं परीतं कुड्यं यस्मिंस्तत् तथाभूतं, कुप्यगृहम्, अन्तः कारयेत्। भूमिगृहयुक्तं, तदेव कुप्यगृहमेव, आयुधागारं कारयेत्। बन्धनागारं, धर्मस्थीयं महामात्रीयं पृथक् कारयेद् धर्मस्थीयमित्येकं महामात्रीयमित्यपरं च प्रत्येकं निर्मापयेत्। तत्र धर्मस्था व्यवहारनिर्णेतारः तत्सम्बन्धि धर्मस्थीयं व्यवहारार्थमागतानामवस्थित्यर्थं व्यवहारपराजितनिरोधार्थं च स्थानमित्यर्थः। महामात्राः सन्निधातृसमाहर्तृप्रभृतयोऽर्थाधिकारिणः तत्सम्बन्धि महामात्रीयं विश्वासाधित्वेन गृहीतानां युद्धप्रगृहीतादीनां च जनानां निवेशस्थानमित्यर्थः। बन्धनागारं कीदृशं, विभक्तस्त्रीपुरुषस्थानम्, अपसारतः सुगुप्तकक्ष्यम् अपसरणमार्गमनुसृत्य सुष्ठु रक्षितकक्ष्यम्।

सर्वेषामिति। सर्वेषां कोशगृहादीनां षण्णां, शालाखातोदपानवत् शालापरिखाकूपैस्तुल्यं स्नानगृहाग्निविषत्राणमार्जारनकुलारक्षाः स्नानगृहम् अग्नित्राणं मानुषाग्निना त्रिरपसव्यपरिगमनरूपं

निशान्तप्रणिध्युक्तं विषत्राणं मार्जारनकुलौ विषत्राणभूतौ मार्जारनकुलौ वा आरक्षां रक्षिपुरुषैर्गुप्तिं च, स्वदैवपूजनयुक्ताः स्वस्वदैवतार्चनयुक्ताः, कारयेत्। तत्र कोशगृहस्य धनदो देवता, पण्यकोष्ठागारयोः श्रीदेवी, कुप्यगृहस्य विश्वकर्मा, आयुधबन्धनागारयोर्यमवरुणाविति विवेकः।

The trading house as well as the mansion shall have pillars of burnt bricks, shall be a Catuśśālā (a structure with hall on four sides around a central courtyard with a single door for entrance with many compartments divided by a row of pillars on both sides. Similarly the store house shall have many long halls covered by brick walls dividing the same into several rooms. The same pattern with under ground cellars applies to the armoury. There shall be separate structures to form the court-rooms, offices for the ministers provided with separate accommodation for ladies and gentelmen. The jail shall have well protected rooms (to put culprits in different places).

For all these (six type of structures) there shall be ditches around, water-wells, bath rooms, precautionary measures against fire, poison, cats, and mongooses in addition to facilities for the worship of different deities (who preside over the structures like Kubera for treasury, goddess of prosperity for trading house and mansion, Viśvakarmā for storehouse, and Yama and Varuṇa for prisons).

कोष्ठागारे वर्षमानमरत्निमुखं कुण्डं स्थापयेत्।

तज्जातकरणाधिष्ठितः पुराणं नवं च रत्नं सारं फल्गु कुप्यं वा प्रतिगृह्णीयात्। तत्र रत्नोपधावुत्तमो दण्डः कर्तुः कारयितुश्च, सारोपधौ मध्यमः, फल्गुकुप्योपधौ तच्च तावच्च दण्डः।

रूपदर्शकविशुद्धं हिरण्यं प्रतिगृह्णीयाद्, अशुद्धं छेदयेत्। आहर्तुः पूर्वः साहसदण्डः।

शुद्धं पूर्णमभिनवं च धान्यं प्रतिगृह्णीयात्। विपर्यये मूलद्विगुणो दण्डः।

तेन पण्यं कुप्यमायुधं च व्याख्यातम्।

सर्वाधिकरणेषु युक्तोपयुक्ततत्पुरुषाणां पणद्विपणचतुष्पणाः, परमपहारेषु पूर्वमध्यमोत्तमवधा दण्डाः।

कोष्ठेत्यादि। कोष्ठागारे, वर्षमानं वर्षं वृष्टिर्मीयतेऽनेनेति तथाभूतम्, अरत्निमुखम् अरत्निचतुरश्रमुखं, कुण्डं गर्तं, स्थापयेत् खानयेत्।

तज्जातेत्यादि। पुराणं नवं च, विविच्येति शेषः, रत्नं मणिमुक्तादिकं, सारं चन्दनादि, फल्गु वस्त्रादि, कुप्यं वा दारुचर्मवेणुवल्ककोष्ठोपकरणादिकं वा, तज्जातकरणाधिष्ठितः रत्नादितत्तद्वस्तुव्यवहारिवंश्यैः कायस्थैश्चोपेतः सन्, प्रतिगृह्णीयात् संगृह्णीयात्। तत्रेति। तत्र, रत्नोपधौ निर्गुणरत्नं प्रतिनिधाय गुणवद्रत्नहरणे, कर्तुः कारयितुश्च, उत्तमो दण्डः पणसाहस्ररूप उत्तमसाहसः। सारोपधौ, मध्यमः मध्यमसाहसः। फल्गुकुप्योपधौ, तच्च तावच्च दण्डः यद् द्रव्यं हृतं तच्च तत्समपरिमाणं तज्जातीयमपरं चेत्युभयं दण्डो भवति।

रूपेत्यादि। हिरण्यं प्रणीतमुद्राङ्कं स्वर्णं रजतं च दीनारादिकं, रूपदर्शकविशुद्धं रूपपरीक्षकमुखेन विज्ञातशुद्धिकं, प्रतिगृह्णीयात्। अशुद्धं कूटप्रणीतं, हिरण्यं, छेदयेत् भञ्जयेद् अपुनरुपयोगाय। आहर्तुः कूटहिरण्यानेतुः, पूर्वः साहसदण्डः।

शुद्धमिति। शुद्धं निर्बुसं, पूर्णम् अनूनमानम्, अभिनवं च धान्यं, प्रतिगृह्णीयाद्, धान्यग्रहणाधिकृतः। विपर्यये अतथाविधधान्यप्रतिग्रहे, मूलद्विगुणो दण्डः।

पण्यकुप्यायुधप्रतिग्रहेऽपि धान्योक्त एव न्याय इत्याह–तेनेत्यादि।

सर्वेत्यादि। सर्वाधिकरणेषु सर्वेष्वभिकारस्थानेषु, युक्तोपयुक्ततत्पुरुषाणां युक्तः प्रधानः उपयुक्तस्तत्सहकारी तत्पुरुषाः तयोरधश्चराः तेषां, पणद्विपणचतुष्पणाः एकः पणः द्वौ पणौ चत्वारः पणाश्च, दण्डाः, अपहारेषु पूर्वोक्तजातीयेषु। परमपहारेषु सकृद्दण्डनात् परतोऽपहारेषु, पूर्वमध्यमोत्तमवधा दण्डाः पूर्वसाहसो मध्यमसाहस उत्तमसाहसो वधश्च दण्डाः। तत्राद्यास्त्रयो दण्डा यथाक्रमं प्रयोक्तव्याः, वधदण्डस्तु ततोऽपि परस्तादपहारेषु प्रयोक्तव्य इति बोद्धव्यम्।

In front of the mansion there shall be a device to measure the rainfall in the form of a pit (into which a square vessel with an opening of an aratni (length of 24 angulas; an ell) is to be inserted).

The officer in charge of the store shall receive (with the assistance of experts) old and new gems, (and pearls), valuable substances (like sandal), garments, forest produces (like timber, bamboo, barks of trees etc.). In case of deception in regard to gold both the seller and the receiver shall be punished with highest armercement, while in the case of valuable substances both these parties shall be awarded the middle most amercement. In the case of clothes and forest produces the deceiver and abetter shall be asked to make good by replacing the articles in addition to paying a fine equal to the cost of the articles.

Gold may be procured after ascertaining its purity by a competent examiner of coins. Counterfeit coins shall be cut into pieces. The one who tires to give away such a coin shall be punished with the first amercement. In receiving grains freshness and purify should be examined before measuring them in full. Any failure in this regard may be punished with a fine of twice the value of the grains.

These rules shall apply to the purchases of merchandise, forest produces and weapons.

In all matters the chief of administration, the clerical assistant and servants shall be respectively punished to the extent of one paṇam, two paṇams and four paṇams. In the case of defalcation for a second time (or for a second offence) the punishments respectively shall be first amercement, middle amercement and the highest amercement. A further crime is to invite the punishment by death.

कोशाधिष्ठितस्य कोशावच्छेदे घातः। तद्वैयावृत्त्यकाराणामर्धदण्डः। परिभाषणमविज्ञाते। चोराणामभिप्रधर्षणे चित्रो घातः।

तस्मादाप्तपुरुषाधिष्ठितः सन्निधाता निचयाननुतिष्ठेत्।
बाह्यमाभ्यन्तरं चायं विद्याद् वर्षशतादपि।
यथा पृष्टो न सज्जेत व्ययशेषं च दर्शयेत्।।

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे पञ्चमोऽध्यायः
सन्निधातृनिचयकर्म, आदितः षड्विंशः।।

कोशेत्यादि। कोशाधिष्ठितस्य कोशाधिष्ठातुः भाण्डागाराध्यक्षस्य, कोशावच्छेदे कोशस्य सुरुङ्गाद्युपायेनापहारे, घातः वधदण्डः। तद्वैयावृत्त्यकाराणां तस्य वैयावृत्त्यकाराः विशेषेण आ समन्ताद् वर्तत इति व्यावृत्तः परिचारकः तस्य कर्म वैयावृत्त्यं परिचर्या तत् कुर्वन्तः परिचारकाः तेषाम्, अर्धदण्डः। अविज्ञाते सति अर्थात् कोशाधिष्ठातृकृते कोशावच्छेदे, परिभाषणं तद्वैयावृत्त्यकाराणां सनिन्दोपालम्भः। **चोराणामिति।** चोराणाम् अभिप्रधर्षणे कुड्यसन्धिच्छेदादिना धनापहरणे, चित्रो घातः।

तस्मादित्यादि। स्पष्टम्।

बाह्यमिति। बाह्यं जनपदोत्थम्, आभ्यन्तरं नगरोत्थं च, आयं, विद्यात्, सन्निधाता। कथं विद्यात्, यथा वर्षशतादपि पृष्टः अतीतं वर्षशतमधिकृत्यापि आयं चोदितः, न सज्जेत न सक्तो भवेत् निष्प्रतिबन्धं वदेदित्यर्थः, व्ययशेषं दर्शयेच्च व्ययितावशिष्टं द्रव्यं दृष्टिगोचरं कारयेच्च, भाण्डागारे।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चमोऽध्यायः सन्निधातृनिचयकर्म, आदितः षड्विंशः।।

If the officer in charge of the treasury steals the money he shall be put to death. His attendants who join him in the offence shall receive a milder punishment. If the loss of the treasury is due to ignorance the fellow shall be chastised and dismissed. Robbers who commit the theft of treasury shall be tortured to death.

Hence the collector of revenue assisted by dependable persons shall procure wealth and materials for the treasury.

The superintendent of treasuries shall have perfect knowledge of the income accrued from the villages as well as from the city. He shall answer queries regarding the income and expenses of the treasury for a hundred years or more without any doubt. He shall always show the balance of income or materials under his custody without fail.

Thus the twentysixth chapter of the Arthaśāstra of Kauṭalya concerning the duties of the treasury officer comes to an end. Here ends the fifth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 27

24. प्रक० समाहर्तृसमुदयप्रस्थापनम्।

Section 24 : Collection of Wealth by the Collector

समाहर्ता दुर्गं राष्ट्रं खनिं सेतुं वनं व्रजं वणिक्पथं चावेक्षेत।

शुल्कं दण्डः पौतवं नागरिको लक्षणाध्यक्षो मुद्राध्यक्षः सुरा सूना सूत्रं तैलं घृतं क्षारः सौवर्णिकः पण्यसंस्था वेश्या द्यूतं वास्तुकं कारुशिल्पिगणो देवताध्यक्षो द्वारबाहिरिकादेयं च दुर्गम्।

सीता भागो बलिः करो वणिक् नदीपालस्तरो नावः पट्टनं विवीतं वर्तनी रज्जूश्चोररज्जूश्च राष्ट्रम्।

समाहर्तृसमुदयप्रस्थापनमिति सूत्रम्। समाहर्ता विषयबल्यध्यक्षः तेन करणीयं समुदयप्रस्थापनं धनोत्पत्तिप्रवर्तनमुच्यत इति सूत्रार्थः। अर्थोपधाशुद्धः सन्निधातृकर्मणि समाहर्तृकर्मणि च नियोक्तव्य इत्युक्तं प्राक्। तद्व्यापार इदानीमभिधीयते।

दुर्गादिसप्तकं समाहर्त्रा चिन्तीयमित्याह–**समाहर्तेत्यादि**।

दुर्गपदार्थं विवृणोति–**शुल्कमित्यादि**। शुल्कं घट्टदेयं, दण्डः दम उत्तमसाहसादिः, पौतवं तुलामानपरिच्छेदः, नागरिको नगराध्यक्षः, लक्षणाध्यक्षः क्षेत्रारामादिसीमाचिह्नाध्यक्षः, मुद्राध्यक्षः, सुरा मद्याध्यक्षः, सूना प्राणिवधाध्यक्षः, सूत्रं सूत्राध्यक्षः, तैलं तद्विक्रयी, घृतं तद्विक्रयी, क्षारः गुडविक्रयी, सौवर्णिकः सुवर्णनियुक्तः, पण्यसंस्था पण्यनिवेशशाला, वेश्याः, द्यूतं, वास्तुकम् आवसथनिर्मातारस्तक्षादयः, कारुशिल्पिगणः कारवः स्थूलशिल्पकाराः शिल्पिनः सूक्ष्मशिल्पकाराः तेषां गणः, देवताध्यक्षः देवालयकार्यधूर्वहः, द्वारबाहिरिकादेयं च द्वारबाहिरिकसम्बन्धि आदेयं पुरादिद्वारपालैर्भृतित्वेन ग्राह्यं बाहिरिकेभ्यो नटनर्तकादिभ्यो राज्ञा ग्राह्यं चेति यावत्, दुर्गं शुल्कादिद्वाविंशत्युपायलभ्यं द्रव्यं दुर्गशब्दितमित्यर्थः।

सीतादित्रयोदशकं राष्ट्रशब्दितमित्याह–**सीतेत्यादि**। सीता कृषिः, भागः धान्यषड्भागाः, बलिः उपहारः भिक्षा वा, करः फलवृक्षादिसम्बद्धं राजदेयं, वणिक् वणिग्द्वारेणादेयं, नदीपालः तीर्थरक्षकद्वारेणादेयं, तरः नदीतरणवेतनं, नावः नावध्यक्षद्वारलभ्यं, पट्टनम् अल्पनगरलभ्यं, विवीतं विवीताध्यक्षद्वारेणादेयं, वर्तनी मार्गः तल्लभ्यम् अर्थादन्तपालद्वारलभ्यं, रज्जूः विषयपालादेयमित्याहुः, चोरज्जूः चोरग्राहकाय ग्रामदेयमित्याहुः।

The collector shall supervise the income from forts, country, mines, groves, forests, herds of cattle and roads for traffic.

Under the head of forts there are (twentytwo) items like śulka (toll), daṇḍa fine), pautava (weights and measures), nāgarika (civil servant), lakṣaṇādhyakṣa (superintendent of groves and boundaries), mudrādhyakṣa (superintendent of seals), surā (liquor), sūna (superintendent of slaughter house), sūtra (weaver), taila (oil vendor), ghṛtam (vendor of ghee), kṣāra (molasses), sauvarṇika (goldsmith), paṇyasamsthā (store house of merchandise), veśyā (prostitute), vāstuka (construction workers like carpenters), kāru (masons in general), śilpin (expert in handicraft) devatādhyakṣa (superintendent of temples) dvārabāhirikas (gatekeepers and tax collector of artistes.

By rāṣṭra is meant (thirteen) items like sīta (agriculture), bhāga (portion or produce payable to government which consists of one-sixth of the grains), baliḥ (religious tax or a complimentary gift), karaḥ (tax paid in money on account of usufructs), vaṇik (income due from businessmen), nadīpālāḥ (superintendent of rivers), taraḥ (income from ferries), nāvaḥ (income from boats) paṭṭanam (income from small town), vivītam (due from pasture grounds), vartanī (road-cess collected by border authorities) rajju (due from coir products) and corarajju (ropes to bind the thieves).

सुवर्णरजतवज्रमणिमुक्ताप्रवालशङ्खलोहलवणभूमिप्रस्तररसधातवः खनिः।

पुष्पफलवाटषण्डकेदारमूलवापाः सेतुः।

पशुमृगद्रव्यहस्तिवनपरिग्रहो वनम्।

गोमहिषमजाविकं खरोष्ट्रमश्वाश्वतराश्च व्रजः।

स्थलपथो वारिपथश्च वणिक्पथः।

इत्यायशरीरम्। मूलं भागो व्याजी परिघः क्लृप्तं रूपिकमत्ययश्चायमुखम्।

खनिमाह–सुवर्णेत्यादि। वज्रः हीरकः, मणिर्मरतकादिः। भूमिधातुः प्रस्तरधातुः रसधातुश्च। स्पष्टमन्यत्। सुवर्णादिद्वादशकं खननलभ्यत्वात् खनिशब्दवाच्यम्।

सेतुमाह–पुष्पेत्यादि। पुष्पवाटः कुङ्कुकादिवनं, फलवाटः वार्ताकोर्वारुकादिवाटी, अनयोः पुष्पफलशब्दाभ्यां ग्रहणं वाटशब्देन तु इक्षुवाटस्य, षण्डं कदलीक्रमुकादि, केदारः धान्यक्षेत्रं, मूलवापः आर्द्रकहरिद्रालामज्जाद्युत्पत्तिस्थलम्। पुष्पवाटादयः षट् सेतुशब्दिताः।

वनमाह–पशुमृगेत्यादि। पशुवनमृगवनद्रव्यवनहस्तिवनानां परिग्रहो वनमिति शब्द्यत इत्यर्थः। तत्र पशुर्गवयादिः, मृगो हरिणादिः, द्रव्यं शाकतिनिशादि, हस्ती कालिङ्गादिः।

गवाद्यष्टकं व्रजशब्दितमित्याह–गोमहिषमित्यादि। अजाश्छागाः। अविका मेषाः। खरा गर्दभाः। अश्वतराः वेसराः। स्पष्टमन्यत्।

वणिक्पथं द्विविधमाह–स्थलेत्यादि।

इतीति। इति आयशरीरम् उक्तसप्तषष्टिप्रकारं दुर्गादिसप्तकं धनागमस्थानम्। उक्त आयशरीरे

मूलादिसप्तकं प्रधानत्वाद् मुखस्थानीयमित्याशयेनाह—मूलमित्यादि। मूलं धान्यफलादिविक्रयलब्धं धनम्। मूल्यमित्येव पाठः क्वचित्। भागः षड्भागः, व्याजी विंशतिभागः पुनर्माने मा भूदूनतेत्यधिकं गृह्यमाणः, परिघः आतरद्रव्यं, क्लृप्तम् अमुकग्रामस्यैतावदिति प्रतिनियतं हिरण्यं धान्यं च, रूपिकं लवणाध्यक्षेण तद्विक्रयिभ्यः प्रस्थशतस्याष्टशो गृह्यमाणो लवणभागः, अत्ययश्च अध्यक्षप्रचार-धर्मस्थीय- कण्टकशोधनोक्त-विधया गृह्यमाणमपराधदण्डद्रव्यं च, आयमुखम्। अत्र संग्रहश्लोकान् पठन्ति—

By Khani is meant (twelve) materials obtained from mines (as a result of digging) like suvarṇa (gold), rajata (silver), vajra (diamonds), maṇi (gems); muktā (pearls), pravāla (corals), śaṅkha (conch shells), loha (metals), lavaṇa (salt), bhūmidhātu (minerals extracted from planes), prastaradhātuḥ (minerals from mountain slopes) and rasadhātu (quick silver).

Setu stands for (six) items like puṣpa (flower), phala (fruit), vāṭa (vegetable gardens), ṣaṇḍa (plantains, arecanut etc.), kedāra (paddy fields), and mūlavāpaḥ (where crops are grown by sowing seeds like ginger, and turmeric).

By Vanam is meant the (four) kinds of forests like those of paśu (like gavaya), mṛga (like deer), dravya (like śāka = potherb, tiniśa = tamarind) and hasti (water-melon).

The term Vraja signifies the (eight) abodes for animals like go (cow), mahiṣa (buffalo) ajā (goat) avika (sheep), khara (ass), uṣṭra (camel), aśva (horses), and aśvatara (a female mule).

Vaṇikpatha (roads of traffic) is of two kinds as sthalapatha (land road) and vāripatha (water way).

These are the body of income.

Āyamukha (the mouth from which the income is to originate) consists of (seven items as) mūla (capital), bhāga (share), vyājī (twenty per cent), parigha (fare for being ferried over a river), klpta (fixed taxes), rūpika (eight percent of the sales proceed) and atyaya (fixed fines).

देवपितृपूजादानार्थं स्वस्तिवाचनमन्तःपुरं महानसं दूतप्रावर्तिमं कोष्ठागारमायुधागारं पण्यगृहं कुप्यगृहं कर्मान्तो विष्टिः पत्त्यश्वरथद्विपपरिग्रहो गोमण्डलं पशुमृगपक्षिव्यालवाटाः काष्ठतृणवाटश्चेति व्ययशरीरम्।

राजवर्षं मासः पक्षो दिवसश्च व्युष्टम्। वर्षाहेमन्तग्रीष्माणां तृतीय सप्तमा दिवसोनाः पक्षाः, शेषाः पूर्णाः। पृथगधिमासक इति कालः।

"शरीरं सप्तधायस्य तावन्त्येव मुखानि च।
प्रभेदाः सप्तषष्टिः स्युर्व्यये द्वाविंशतिः स्थिताः॥

द्वाविंशतिविधं दुर्गं राष्ट्रभेदास्त्रयोदश।
खनिर्द्वादशधा तत्र सेतवश्चैव षड्विधाः।।
वनं चतुर्विधं ज्ञेयं व्रजभेदोऽपि चाष्टधा।
द्विधा वणिक्पथश्चैवं शरीरं सप्तषष्टिधा।।" इति।

अथ व्ययशरीरमाह–देवेत्यादि। देवपितृपूजादानार्थं देवपितृपूजादानप्रयोजनकं, तत्र देवपूजा देवाराधनं पितृपूजा श्राद्धकर्म दानं पर्वसु ब्राह्मणबालवृद्धातुरानाथादिभ्यो दीयमानं, स्वस्तिवाचनं शान्तिकपौष्टिकार्थे पुरोहिताय दीयमानम्, अन्तःपुरं देवीभोगिनीराजपुत्रेभ्यो देयं, महानसं पाकशालार्थो व्ययः, दूतप्रावर्तिमं दूतस्य परविषयगतागतप्रवर्तनार्थो व्ययः, कोष्ठागारं भोज्यद्रव्यावस्थानगृहं तन्निर्माणादिनिमित्तो व्ययः, आयुधागारम् आयुधनिर्माणशाला तद्रक्षणशाला च, पण्यगृहं पण्यगृहार्थो व्ययः, कुप्यगृहं तत्सम्बद्धं धनं शाकतिनिशादिसारदारुवेणुवल्लीवल्कादिच्छेदनानयनरक्षणादिविषयो व्यय इति यावत्, कर्मान्तः कृष्यादिव्यापारवयय:, विष्टिः हठकारितकर्मार्थो व्ययः, पत्त्यश्वरथद्विपपरिग्रहः पत्त्यादिचतुष्टयार्थो व्ययः, गोमण्डलं गोमहिषमेषाद्यर्थो व्ययः, पशुमृगपक्षिव्यालवाटाः पशवो वन्यपशवः मृगा हरिणादयः पक्षिणः शुकशारिकादयः व्यालाः सिंहव्याघ्रादयः एषां वाटाः रक्षणस्थानानि तन्निमित्तो व्यय इत्यर्थः, काष्ठतृणवाटः काष्ठतृणवाटार्थो व्ययः, चशब्दादावश्यकव्ययान्तरपरिग्रहः, त एते द्वाविंशतिर्व्ययाः व्ययशरीरम्।

राजेत्यादि। राजवर्षम् वा राजराज्याभिषेकादारब्धः संवत्सरः, मासः, पक्षः, दिवसश्च, व्युष्टं राजवर्षादिचतुष्टयं व्युष्टसंज्ञमित्यर्थः। एतच्च अमुकराजवर्षेऽमुकमासेऽमुकपक्षेऽमुकदिवसेऽमुकपुरुषेणानीतमेतावद् धनम्, अद्यामुकपुरुषार्थैतावद् दत्तमिति रीत्या निबन्धपुस्तकादिषु लेख्यमिति बोद्धव्यम्। वर्षाहेमन्तेत्यादेरयमर्थः–राजवर्षस्य त्रिधा विभक्तस्य सिंहकन्यातुलावृश्चिकाश्चत्वारो रविमासा वर्षर्तुरित्येको भागः, धनुर्मकरकुम्भमीनाख्याश्चत्वारो हेमन्त इति द्वितीयः, मेषवृषभमिथुनकुलीराख्याश्चत्वारो ग्रीष्म इति तृतीयः इत्येतेषां त्रयाणां भागानां ये प्रत्यैकमष्टौ पक्षास्तेषु तृतीयपक्षे सप्तमपक्षे चैकैको दिवसो हीयते, अवशिष्टास्तु पक्षा अनूनदिवसा इति। पृथगिति अधिमासकः अधिकः सौरमासादतिरिक्तः शुक्लप्रतिपदादिर्दर्शावसानश्चान्द्रो मासः, पृथग्, इति कालः उक्तप्रकारो व्यवहारार्थः कालो विज्ञेयः।

Vyayaśarīra (the body of expenditure) consists of the following (twenty two) items (of expenditure) as expenses for worship of god, propitiation of manes, offerings to manes, gifts to Brahmins; svastivācana (wealth given to priests for expiatory rites); antaḥpura (money given to ladies of the harem as well as to the sons); mahānasa (expenses of the kitchen); dūta prāvartima (expenses to the envoy going to the country of the enemy as well as the one returning from that country), koṣṭhāgāra (maintenance of store-house), āyudhāgāra (making and preservation of weapons in the armoury); paṇyagṛha (expenses to repair the warehouse); kupygṛha (expenses in collecting and keeping vegetables, raw materials etc.); karmānta (manufactories and agricultural activities); viṣṭiḥ (for compulsory labour and slaves); maintenance of infantry; cavalry; chariots; and elephants; gomaṇḍalam (expenses for cows, buffaloes and sheep) paśu-mrga-pakṣi-vyālavāṭah (museum or shelter of beasts, deer, birds and snakes) and kāṣṭha-tṛṇavāṭa (for storage of fire-wood and fodder).

Rājavarṣa (royal year or regnal year), māsa (month), pakṣa (the fortnight and divasa (day) constitute what is called a Vyuṣṭa (a measure of time). The third and seventh pakṣas of the (three seasons) Varṣa (the rainy season), Hemanta (the winter season) and Grīṣma (the summer season) have one day less while in other its is complete (14 days and 15 days respectively). Separately there is another calculation as Cāndramāsa (lunar month) as against 'Sauramāsa (solar month) for the sake of reference with regard to the divisions of time.

करणीयं सिद्धं शेषमायव्ययौ नीवी च।

संस्थानं प्रचारः शरीरावस्थापनमादानं सर्वसमुदयपिण्डः सञ्जातम् एतत् करणीयम्।

कोशार्पितं राजहारः पुरव्ययश्च प्रविष्टं, परमसंवत्सरानुवृत्तं शासनमुक्तं मुखाज्ञप्तं चापातनीयम्, एतत् सिद्धम्।

सिद्धिप्रकर्मयोगः दण्डशेषमाहरणीयं, बलात्कृतप्रतिस्तब्धमवसृष्टं च प्रशोध्यम्, एतच्छेषमसारमल्पसारं च।

करणीयादिषट्कमुद्दिशति–**करणीयमित्यादि**।

करणीयं षड्विधमाह–**संस्थानमित्यादिना**। तत्र संस्थानम् अमुकग्रामादियदादेयमिति क्लृप्तिः, प्रचारो देशः, शरीरावस्थापनं जनपदनगरयोरायशरीरमेतावदिति निश्चयः, आदानं धान्यहिरण्यादेर्यथा-कालग्रहणं, सर्वसमुदयपिण्डः सर्वेषां समुदयानां पिण्डः प्रतिग्रामं प्रतिनगरं चोत्पन्नानां धनानां सङ्घातः तज्ज्ञानमित्यर्थः, सञ्जातं सर्वोपायलब्धधनेयत्ताज्ञानम्, एतद् उक्तं षट्कं, करणीयम् अवश्यकार्यत्वात् करणीयशब्दितम्।

सिद्धमाह–**कोशेत्यादि**। कोशार्पितं भाण्डागारिकहस्तेऽर्पितं, राजहारः राज्ञा स्वीयकार्यार्थं समाहर्तृसकाशाद् गृहीतं, पुरव्ययश्च पुरे शालानिर्माणाद्यर्थं व्ययितं धनं च, प्रविष्टं प्रविष्टशब्दितम्। परमसंवत्सरानुवृत्तम् अतीतवर्षसम्बद्धमप्रविष्टतया स्थितं, शासनमुक्तं राजाज्ञालेखनिरस्तं, मुखाज्ञप्तं राजवाग्विश्राणितं च, आपातनीयम् आपातनीयशब्दितं समुदयाद् व्यवकलनीयमिति कृत्वा। एतत् प्रविष्टत्रिकमापातनीयत्रिकं चेत्युभयरूपं षट्कं, सिद्धं सिद्धशब्दितम्।

षड्विधं शेषमाह–**सिद्धीत्यादि**। सिद्धिप्रकर्मयोगः सिद्धो सिद्धान्यादौ प्रकर्मयोगः स्वायत्तीकरण-प्रवृत्तिरदत्तकरप्रवेशनार्था, दण्डशेषं सैन्योपयुक्तावशिष्टद्रव्यं च, आहरणीयं सुखेनाहर्तुं शक्यत्वादाहरणीयसंज्ञम्। बलात्कृतप्रतिस्तब्धं राजवल्लभाद्याश्रयबलाददत्तं देयं प्रतिस्तब्धापरपर्यायम्, अवसृष्टं च पुरमुख्यैः कामचारादत्तं च, प्रशोध्यं प्रयत्नसाध्यत्वात् प्रशोध्यसंज्ञम्। एतद् उक्तमाहरणीयद्विकं प्रशोध्यद्विकं चेतीदं चतुष्टयमित्यर्थः, असारं प्रवेशनार्थे कृतेऽपि व्यये निष्फलम्, अल्पसारं च बहुव्ययसाध्याल्पफलं च, शेषं तत्संज्ञम्।

One should also know the (six) concepts of Karaṇīya (what is to be done), Siddha (what has been accomplished), Śeṣa (the balance), Āya (income), Vyaya (expenditure) and Nīvī (capital or principal stock).

Of these Karaṇīya is constituted of (six kinds of activities like)

Samsthānam (fixation of work like this much is to be taken from such and such a place), Pracāraḥ (location or region), Śarīrāvasthāpanam (fixation of the quantity to be collected from a city and a village), Ādānam (collection of grains, gold etc.), Sarvasamudayapiṇḍa (collection of wealth from various sources like towns, cities, villages etc.), and Sañjātam (knowledge of the complete stock of wealth).

Under the category of Siddha is to be included (the six items), Kośārpitam (credited to the treasury), Rājahāra (received by the king for his personal expenses), Puravyaya (spent for the construction of halls in the city)—these three being known as Praviṣṭa—accounted for (or entered into the register. Paramasamvatsarānuvṛttam (carried over from the previous year and not entered into the register), Śāsanamuktam (spent without any written order of the king) and Mukhājñapta (sanctioned by oral order) constitute Āpātanīya (contingency expenditure) are reckoned as Siddha (accomplished.)

Seṣa (the balance of expenditure is again of six categories) as follows. Siddhiprakarmayoga (charging of interest by way of grains), Daṇḍaśeṣa (balance of wealth after paying the army) both of which are called Āharaṇīya (easy to collect); Balātkṛtapratistabdham (unpaid on account of one's influence with authorities) and Avasṛṣṭam (dues paid irregularly by citizens at their will and pleasure) both of which are termed as Praśodhya (that could be realised only persuasion). Asāra (where the expenditure do not justify the collection since it will be negligent) and Alpasāra (where the collection charges will be more than the revenue accrued)—all these six come under Seṣa.

वर्तमानः, पर्युषितोऽन्यजातश्चायः। दिवसानुवृत्तो वर्तमानः। परमसांवत्सरिकः परप्रचारसङ्क्रान्तो वा पर्युषितः। नष्टप्रस्मृतमायुक्तदण्डः पार्श्वं पारिहीणिकमौपायनिकं डमरगतकस्वमपुत्रकं निधिश्चान्यजातः। विक्षेपव्याधितान्तरारम्भशेषश्च व्ययप्रत्यायः। विक्रये पण्यानामर्घवृद्धिरुपजा मानोन्मानविशेषो व्याजी क्रयसङ्घर्षे वा वृद्धिरित्यायः।

आयं त्रेधा विभज्य व्युत्पादयति–**वर्तमान** इति। आयः, वर्तमानः पर्युषितः अन्यजातश्च इति त्रिविधः। तत्र दिवसानुवृत्तः नित्यः, वर्तमानः। परमसांवत्सरिकः अतीतवर्षग्राह्यः वर्तमानवर्षे गृहीतः, परप्रचारसंक्रान्तः भूतपूर्वाध्यक्षकालप्रविष्टः यद्वा शत्रुविषयादागतः, वाशब्दः समुच्चये, पर्युषितः तदाख्यः। नष्टप्रस्मृताद्यष्टक-मन्यजात इत्याह–**नष्टे**त्यादि। नष्टप्रस्मृतं विस्मृताभिज्ञातमिति भाषाटीका। प्रशब्द इह प्रकर्षे नतु धात्वर्थविपरीतत्वे इति तत्पक्षे वक्तव्यम्। नष्टमपगतं प्रस्मृतं विस्मृतमिति तु कोष्ठागाराध्यक्षप्रकरणे भट्टस्वामी। आयुक्तदण्डः तत्तत्कार्याध्यक्षेभ्योऽपराधिभ्यो गृहीतो दण्डः, पार्श्वं करातिरेचनलक्षणवक्रोपायलब्धं धनम्। प्रभुत्वाधिगम्यमिति केचित्। पारिहीणिकं चतुष्पदविनाशितसस्यदण्डाधिगम्यं धनम्, औपायनिकम् उपायनत्वेन गृहीतं, डमरगतकस्वं डमरः शत्रुकलहविप्लवः तदवसरे शत्रुसैन्यादपह्यतं धनम्, अपुत्रकम् अविद्यमानदायादकं

धनं, निधिश्च निधिलाभश्च, अन्यजात: अष्टावेतेऽन्यजातशब्दिता:। आयस्य प्रकारान्तरमाह–विक्षेपेत्यादि। विक्षेपव्याधितान्तरारम्भशेषश्च विक्षेपशेष: किञ्चित्कार्यसाधनाय नियुक्तस्य सैन्यस्यार्थे व्ययितावशिष्टं धनं व्याधितशेष: भेषजशालाव्ययितशिष्टम् अन्तरारम्भशेष: दुर्गप्रासादादिनिमित्तव्ययितावशिष्टम् इत्येतत् त्रिकं, व्ययप्रत्याय: तदाख्ययोच्यते। पुनरप्यायस्य पाञ्चविध्यमाह–विक्रय इत्यादिना। विक्रये पण्यानामर्घवृद्धि: क्लृप्ताभ्यधिकेन मूल्येन पण्यविक्रयाल्लब्धमधिकं धनं विक्रेतृसकाशादुपस्थापितम्, उपजा प्रतिषिद्धविक्रय-लब्धं, मानोन्मानविशेष: मानोन्मानयोर्विशेषकरणेन मेयाधिक्यसम्पादनाल्लब्धं, व्याजी विंशतिभाग: पुनर्मीयमानमेयोनतापरिहारार्थमधिकतया गृह्यमाण: क्रयसंघर्षे वृद्धि: स्पर्धया मूल्यवर्धनाल्लब्धं, वाशब्दश्चकारार्थ:। इत्याय: उक्तप्रकारेणायो व्याख्यात:। भाषाटीका तु नष्टप्रस्मृतादिकमन्तरारम्भ-शेषान्तमेकादशकमन्यजातभेद इति, व्ययप्रत्यायादिषट्कमायस्य प्रकारान्तरमिति च व्याचष्टे। तत्तु 'विक्षेपव्याधितान्तरारम्भशेषं च व्ययप्रत्याय:' इति कोष्ठागाराध्यक्षवक्ष्यमाणग्रन्थेन विरुध्यते।

Āya (income) is of three kinds as Vartamāna (current), paryuṣita (previous balance), and anyajāta (received from other source). Of these Vartamāna is that which is received day after day (without break). Paryuṣita is accrued from previous years or from a previous accountant (who did not make upto date). The category called anyajāta includes the income of various (eight types of) sources as naṣṭaprasmṛta (what has been lost and forgotten by others and remembered and reinstated later); āyuktadaṇḍa (collected as fine from the previous incumbent officer), pārśva (marginal income by a recalculation of account), pārihīṇikam (revenue collected as fine for the loss of grains caused by the cattle to an agriculturalist), aupāyanikam (presentations to the king), ḍamaragatakasvam (the wealth obtained from an enemy on the occasions of battles or clashes), aputrakam (wealth appropriated from persons who have no heir to bequeath at their demise), and nidhi (treasure troves).

Vyayapratyāya (the balance of expenditure already incurred is of three kinds as) Vikṣepaśeṣa (balance got from the expenditure on account of the army sent on a specific purpose), Vyādhitaśeṣa (balance after spending for medicines in the hospital) and Antarārambhaśeṣa (balance of expenditure on account of maintaining, repairing etc., of the forts). Āya (income) is again of the (five) kinds as Paṇyānāmarghavṛddhiḥ (income got by the increase over the merchandise which is appropriated by the authority), Upajā (income from selling of the prohibited items), Mānonmānaviśeṣah (income obtained as a result of the use of different kinds of weights and measures than originally fixed), Vyāji (twenty per cent collected to compensate the loss in using weights and measures while selling a merchandise), and Krayasaṅgharṣa (income due to the increase in the price on account of scarcity or competition in selling a merchandise).

नित्यो नित्योत्पादिको लाभो लाभोत्पादिक इति व्ययः। दिवसानुवृत्तो नित्यः। पक्षमाससंवत्सरलाभो लाभः। तयोरुत्पन्नो नित्योत्पादिको लाभोत्पादिक इति।

व्ययसंजातादायव्ययविशुद्धा नीवी प्राप्ता चानुवृत्ता चेति।

अथ व्ययमाह–नित्य इति। नित्यो नित्योत्पादिकः लाभो लाभोत्पादिक इति चतुर्विधो व्ययः। तत्र दिवसानुवृत्तः प्रात्यहिको व्ययः नित्यः। **पक्षमाससंवत्सरलाभ** इति तादर्थ्यात् ताच्छब्द्यं, पक्षलाभार्थो मासलाभार्थः संवत्सरलाभार्थश्च व्ययः, लाभः लाभशब्दितः। तयोर्नित्यलाभयोः, उत्पन्नः तत्र नित्योत्पन्नो लाभोत्पन्नश्च व्ययः, नित्योत्पादिको लाभोत्पादिक इति व्यपदिश्यत इति शेषः। यथाक्रमं च संबन्धः। क्लृप्तवेतनातिरेकेण एतावतो नित्यव्ययस्यैतावदिति विशेषतः कर्मकरेभ्यो यद् दीयते स व्ययो नित्यव्ययोत्पन्नत्वान्नित्योत्पादिकशब्दितः, एतावतो लाभनिमित्तव्ययस्यैतावदिति विशेषतस्तेभ्यो यद् दीयते स लाभाख्यव्ययोत्पन्नत्वाल्लभोत्पादिकशब्दित इति विवेक्तव्यम्।

सर्वव्ययावशेषो नीवीत्याह–**व्ययेत्यादि**। व्ययसञ्जाताद् व्ययसमष्टेः सर्वव्ययद्वारेभ्य इत्यर्थः, उत्थितेति शेषः, आयव्ययविशुद्धा आयव्ययसम्यग्गणनपरिनिश्चिता, नीवी नीवीशब्दितं द्रव्यमित्यर्थः। सा च द्विप्रारा प्राप्ता चानुवृत्ता चेति। तत्र प्राप्ता भाण्डागारं प्रविष्टा, अनुवृत्ता तत्प्रवेशाय प्रस्थितेति ज्ञेयम्।

Vyaya (the expenditure) is of (four) kinds as Nitya, Nityotpādita, Lābha and Lābhotpādika. What is spent on a daily basis is called Nitya. The gain is what is accrued (lābha) as profit of a fortnight, month or an year. Nityotpādika and Lābhotpādika are the resultants from the above. (Labhotpādika is due to incentives given to the labourers over and above fixed salaries as a result of excessive profit).

What is left over after meeting all kinds of expenditure forming the net balance of the merchandise is called Nīvī which is (of two kinds as) known by the terms of Praptā (deposited or entered into the treasury accounts) and Anuvṛtta (that which is prepared and got ready for deposit).

एवं कुर्यात् समुदयं वृद्धिं चायस्य दर्शयेत्।
ह्रासं व्ययस्य च प्राज्ञः साधयेच्च विपर्ययम्।।

।। इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे षष्ठोऽध्यायः समाहर्तृसमुदयप्रस्थापनम्, आदितः सप्तविंशः।।

अध्यायान्ते श्लोकमाह–**एवमिति**। एवम् उक्तैः प्रकारैः, समुदयं धनोत्पत्तिं, कुर्यात्, आयस्य वृद्धिं च, व्ययस्य ह्रासं च दर्शयेत्, समाहर्ता। स कीदृशः, प्राज्ञः प्रजानुपपीडयायवृद्धिप्रदर्शने कर्मकरानुपपीडया व्ययह्रासप्रदर्शने च निपुणः। विपर्ययं च साधयेत् आयव्यययोर्वृद्धिह्रासवैपरीत्यं यदि यदृच्छयोपनमेत् तदपि वारयेदित्यर्थः, यद्वा विपर्ययं व्ययवृद्धिमपरिहार्यतया प्रसक्तां कालान्तरभाव्यायवृद्ध्युपायनिश्चयेन समर्थयेदपीत्यर्थः।।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे षष्ठोऽध्यायः समाहर्तृसमुदयप्रस्थापनम्, आदितः सप्तविंशः।।

Thus one should earn wealth (to the treasury) and try to increase the same. A wise one should spend less and see to that expenditure shall be within the income accrued.

Thus the twentyseventh chapter of the Arthaśāstra of Kauṭalya called collection of wealth by the collector comes to an end. Here ends the sixth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 28

25. प्रक० अक्षपटले गाणनिक्याधिकारः।

Section 25 : Counting of Coins and Maintenance of Accounts

अक्षपटलमध्यक्षः प्राङ्मुखमुदङ्मुखं वा विभक्तोपस्थानं निबन्धपुस्तकस्थानं कारयेत्।

तत्राधिकरणानां सङ्ख्याप्रचारसञ्जाताग्रं, कर्मान्तानां द्रव्यप्रयोगे वृद्धिक्षयव्यय-प्रयामव्याजीयोगस्थानवेतनविष्टिप्रमाणं, रत्नसारफल्गुकुप्याना- मर्घप्रतिवर्णकप्रतिमान-मानोन्मानभाण्डं, देशग्रामजातिकुलसङ्घानां धर्मव्यवहारचारित्रसंस्थानं, राजोपजीविनां प्रग्रहप्रदेशभोगपरिहारभक्तवेतनलाभं, राज्ञश्च पत्नीपुत्राणां रत्नभूमिलाभं निर्देशौत्पादिक-प्रतीकारलाभं, मित्रामित्राणां च सन्धिविक्रमप्रदानादानं निबन्धपुस्तकस्थं कारयेत्।

अक्षपटले गाणनिक्याधिकार इति सूत्रम्। अक्षपटले अक्षाणां द्रव्याणां पटले गणनपुस्तकलेखनादि-कर्मानुष्ठानदेशे, गाणनिक्याधिकारः गाणनिका गणननियुक्तास्तेषां कर्म गाणनिक्यं तस्याधिकारः प्रस्ताव इह क्रियत इति सूत्रार्थः। अर्थोपधाशुद्धा अर्थसम्बद्धे कर्मणि नियोक्तव्या इत्युक्तमधस्तात्। स पुनरर्थव्यापार इदानीमभिधीयत इति सम्बन्धः।

अक्षेत्यादि। अध्यक्षः आयुक्तप्रधानः, अक्षपटलं तत्तदध्यक्षाणां सम्भूयस्वस्वकर्मानुष्ठानदेशं कारयेत्। कीदृशं, प्राङ्मुखमुदङ्मुखं वा, दिग्द्वयोपादानं तन्मुखस्य माङ्गलिकत्वद्योतनयायातादृशस्य वैपरीत्यद्योतनाय च। पुनः कीदृशं, विभक्तोपस्थानं विभक्तानि उत्तममध्यमाधमानामध्यक्षाणां पृथक्स्थित्यनुकूलतया विभज्यविहितानि उपस्थानान्यन्तःकक्ष्याः यस्मिंस्तत् तथाभूतम्। पुनः कथम्भूतं, निबन्धपुस्तकस्थानं गणकपुस्तकनिवेशाधिष्ठानभूतम्।

निबन्धपुस्तकेषु लेखनीयं वस्तुजातमाह—**तत्रेति।** तत्र अक्षप्टले, अधिकरणानां संख्याप्रचारसञ्जाताग्रं द्रव्योत्पत्तिस्थानानां संख्यां नामतः परिगणनं प्रचारसञ्जातयोरग्रं च प्रचारो जनपदः सञ्जातं सर्वोत्पत्तिसमुदायः तयोरियत्तां च, निबन्धपुस्तकस्थं कारयेत् एतावद्द्रव्य उत्पत्तिस्थानेभ्य इयत्परिमाणे जनपदे प्रत्यब्दमेतावद् धनमुत्पद्यत इति निबन्धपुस्तके लेखयेदित्यर्थः। कर्मान्तानां द्रव्यप्रयोगे कर्मान्ताः खनिधान्योत्पत्तिभूमिपण्य-रूप्यादिकर्मस्थानानि तत्सम्बद्धे द्रव्यप्रयोगे तत्तत्कर्मकरेभ्यो द्रव्याणां विनियोग इत्यर्थः, वृद्धिक्षयव्यय-प्रयामव्याजीयोगस्थानवेतनविष्टिप्रमाणं वृद्धिं क्षयव्ययादीनामष्टानां प्रमाणं च, निबन्धपुस्तकस्थं कारयेत्। तत्र वृद्धिः कुसीदं, क्षयः युग्यपुरुषविनियोगः, व्ययः धान्यहिरण्यविनियोगः, प्रयामः सिद्धधान्यराशिः

क्रयादरो वा, व्याजी तुलादण्डसम्बद्धा दण्डव्याजी प्रस्थमानसम्बद्धा मानव्याजी चेत्युभयविधा, योगो द्रव्यापद्रव्यमिश्रणं, स्थानं ग्रामादिकं, वेतनं कर्मकरभृतिः विष्टिः बलकारितं कर्म। रत्नसारफल्गुकुप्यानामर्घ-प्रतिवर्णप्रतिमानमानोन्मानभाण्डं रत्नादीनां चतुर्णामर्घादिषट्कं, निबन्धपुस्तकस्थं कारयेत्। तत्र अर्घं मूल्यं, प्रतिवर्णको वर्गगुणः, प्रतिमानं माषगुञ्जादि, मानम् आकृतिपरिच्छेदः, उन्मानमूर्ध्वमानं, भाण्डं मूलधनम्। देशग्रामजातिकुलसङ्घानां देशः पूर्वदेशमध्यमदेशादिः ग्रामः प्रसिद्धः जातिर्ब्राह्मणादिः कुलं गोत्रं सङ्घगणः एषां पञ्चानां, धर्मव्यवहारचारित्रसंस्थानं धर्मः यजनादिः स्मृत्युक्तः व्यवहारो दायभागः चारित्रं समुदाचारो देशादिप्रतिनियतो मातुलकन्यापरिणयादिलक्षणः तेषां संस्थानमविचालनं यद्वा स्वरूपं, निबन्धपुस्तकस्थं कारयेत्। राजोपजीविनां, प्रग्रहप्रदेशभोगपरिहारभक्तवेतनलाभं प्रग्रहः पूजा मन्त्रिपुरोहितादीन् प्रति प्रत्युद्गमनबहुमानः प्रदेशो वासस्थानं भोग उपायनं परिहारः करमुक्तिः भक्तम् अश्वगजपदात्यभ्यवहारः वेतनं भृतिः इत्येषां लाभं, निबन्धपुस्तकस्थं कारयेत्। राज्ञः, पत्नीपुत्राणां च पत्नीनां पुत्राणां च, रत्नभूमिः लाभं तदुपयुज्यमानानां रत्नानां भूमीनां स्थानीयादीनां च लाभं, निबन्धपुस्तकस्थं कारयेत्। निर्देशौत्पादिकप्रतीकारलाभं निर्देशं राजतत्पत्नीपुत्राणां नित्यदेयातिरिक्तं देयं सामन्तव्यपदेशाख्यम् औत्पादिकाभम् उत्सवादिभवं धनलाभं प्रतीकारलाभं व्याध्यादिप्रशमननिमित्तं धनलाभं च, निबन्धपुस्तकस्थं कारयेत्। औत्पत्तिकेति पाठे भूकम्पनिर्घाताद्युत्पातदोषशान्त्यर्थं धनलाभमित्यर्थो बोद्धव्यः। मित्रामित्राणां, सन्धिविक्रमप्रदानादानं च मित्रेषु सन्धाय प्रदीयमानं धनम् अमित्रेषु विक्रमय विगृह्य आदीयमानं धनं च, निबन्धपुस्तकस्थं कारयेत्।

The superintendent shall see to that the offices of the accountant is constructed with its door facing either east or north with enclosures for their seats and account books separately.

Therein the number of the various departments (from which wealth and materials of different kinds accrue); accounts relating to manufactories with regard to the (eight) items of vṛddhi (profit) kṣaya (loss), vyaya (expenses), prayāma (stock of grains or materials), vyāji (premia realised from the two kinds of measurements using balances to weigh), yoga (mixing of materials both genuine and spurious), sthāna (place of procurement like village etc.), vetana (remuneration for labour), viṣṭī (free labour as per agreement); the real value of the (four items) ratna (gold), sāra (valuables), phalgu (substances) and kupya (forest produces) by way of argha (price); prativarṇaka (quality in the form of colour), pratimāna (weight using materials like māṣa (black gram), gunja (a red black berry) etc. Māna (size), unmāna (height) and bhāṇḍa (capital value); the history of customs, professions and traditions of deśa (regions), of grāma (village), jātī (caste like Brahmins etc), kula (family) and sangha (group)—["dharma (sacrifices etc), vyavahāra (mode of inheritance) and caritra (customs like matrilineal order wherein the daughter of an uncle is to be married."] details regarding the benefits given to the courtiers of the king in the form of due respect, tax-exempted residential plots, remission of taxes, payment of provisions and salaries etc; benefits given to the queen and sons of the

king like gems, land, prerogatives and provisions to compensate (in the form of allowances for festivals) contingent expenses, remedies to portents (like disease etc.); wealth given to friendly kings (after concluding treaties) and appropriated from enemy kings (after defeating them in battles; all these shall be regularly entered in the perscribed registers.

ततः सर्वाधिकरणानां करणीयं सिद्धं शेषमायव्ययौ नीवीम् उपस्थानं प्रचारचरित्रसंस्थानं च निबन्धेन प्रयच्छेत्। उत्तममध्यमावरेषु च कर्मसु तज्जातिकमध्यक्षं कुर्यात्, सामुदायिकेष्ववक्लृप्तिकं यमुपहत्य न राजानुतप्येत।

सहग्राहिणः प्रतिभुवः कर्मोपजीविनः पुत्रा भ्रातरो भार्या दुहितरो भृत्याश्चास्य कर्मच्छेदं वहेयुः।

त्रिशतं चतुःपञ्चाशच्चाहोरात्राणां कर्मसंवत्सरः। तमाषाढीपर्यवसानमूनं पूर्णं वा दद्यात्। करणाधिष्ठितमधिमासकं कुर्यात्। अपसर्पाधिष्ठितं च प्रचारम्। प्रचारचरित्रसंस्थानान्यनुपलभमानो हि प्रकृतः समुदयमज्ञानेन परिहापयति, उत्थानक्लेशासहत्वादालस्येन, शब्दादिष्विन्द्रियार्थेषु प्रमादेन, सङ्क्रोशाधर्मानर्थभीरुर्भयेन, कार्यार्थिष्वनुग्रहबुद्धिः कामेन, हिंसाबुद्धिः कोपेन, विद्याद्रव्यवल्लभापाश्रयाद् दर्पेण, तुलामानतर्कगणिकान्तरोपधानाल्लोभेन।

तत इति। सर्वाधिकरणानां सर्वेषां कर्मस्थानानाम् अर्थात् तदध्यक्षाणां, करणीयं सिद्धं शेषम् आयव्ययौ नीवीं करणीयादिषट्कं पूर्वाध्यायोक्तलक्षणम्, उपस्थानं कायस्थानां स्वस्वकार्यदर्शनार्थसन्निधानकालं, प्रचारचरित्रसंस्थानं च प्रचारो जनपदः चरित्रमाचारः संस्थानं पूर्वस्थितिरित्येतत्त्रिकं च, निबन्धेन प्रयच्छेत् निबन्धपुस्तके विलिख्य दद्यात्। **उत्तमे**त्यादि। उत्तममध्यमावरेषु कर्मसु, तज्जातिकं तदनुरूपम्, अध्यक्षं कुर्यात्। तत्रोत्तमं कर्म धनसंग्रहणं भाण्डागाराधिकारश्च, मध्यमं कोष्ठागारायुधागारादिगतं कर्म, अवरं सुरासूनाद्यध्यक्षकर्म। तज्जातिकानां बहुत्वे व्यवस्थार्थमाह–**सामुदायिकेष्विति**। सामुदायिकेषु एककर्मसाधकसमुदायान्तर्गतेषु बहुषु कर्मकरेषु मध्ये, अवक्लृप्तिकम् अवक्लृप्तिर्नाम असावदः कर्माध्यक्षयितुं क्षम इति नैपुणगुणकीर्त्युपलम्भमूला सम्भावना सास्मिन्नस्तीत्यवक्लृप्तिकस्तं यथोक्तसम्भावनाविषयमित्यर्थः। अयमभिप्रायः–कर्मकरेषु नैपुणयुक्तं समनैपुणेषु किं सर्वमेवाध्यक्षं कुर्यात्, नेत्याह–**यमुपहत्य न राजानुतप्येतेति**। राजा, यम् उपहत्य अपराधवशाद दण्डयित्वा, नानुतप्येत पश्चात्तप्तो न भवेत्, तं तथाविधमवक्लृप्तिकमध्यक्षं कुर्यादिति सम्बन्धः। एतेन ब्राह्मणात्मकबन्धुमहासम्बन्धिनां व्युदासः सिद्धः।

अपचरदध्यक्षविषयं सामान्यन्यायमाह–**सहग्राहिण** इति। अस्य कर्मच्छेदम् अनेनाध्यक्षेणादत्तं देयशेषं, सहग्राहिणः सहहर्तारः, प्रतिभुवो लग्नकाः, कर्मोपजीविनः कर्मकराः संख्यायकाः, पुत्राः, भ्रातरः, भार्याः, दुहितरः, भृत्याश्च इत्येतेऽष्टौ, वहेयुः पूर्वपूर्वाभावे यथोत्तरं दद्युरित्यर्थः।

त्रिशतमिति। अहोरात्राणां त्रिशतं चतुष्पञ्चाशच्च कर्मसंवत्सरः चतुष्पञ्चाशदधिकत्रिशतसंख्याका दिवसाः सर्वकर्मविषय एकः संवत्सरो गण्यते। तत्र दिवसषट्कोनता ऋतावृतावेकदिवसह्रासाद् बोद्धव्या। तं कर्मसंवत्सरम् आषाढीपर्यवसानं दद्यात् आषाढमासपूर्णिमान्तम् अर्थाच्छ्रावणमासोपक्रमं कल्पयेत्। ऊनं पूर्णं वा दद्यात् तं चाध्यक्षस्यान्तरालकालापगमे तावत्पर्यन्तमपूर्णं गणयेत्, पूर्णकालस्थितिपक्षे तु पूर्णं गणयेत कर्मभृतिशोधनादावित्यर्थः। अधिमासकं करणाधिष्ठितं गणकाधिष्ठितं गणकद्वारेण गणितं, कुर्यात्। प्रचारं

च जनपदं च, अपसर्पाधिष्ठितं चारावेक्षितं, कुर्यात्। अपसर्पाप्रणिधाने दोषमाह–प्रचारेत्यादि। प्रचारचरित्र-संस्थानानि देशवृत्तान्तान् तत्पूर्वस्थितीश्च, अनुपलभमानः अपसर्पद्वारेणाविजानन्, प्रकृतः अध्यक्षः, अज्ञानेन हेतुना, समुदयं धनोत्पत्तिं, परिहापयति परिहीयमानं प्रयोजयति। पुनः केन केन हेतुनेत्येतद् उत्थानेत्यादिनाभिधीयते। उत्थानक्लेशासहत्वादालस्येन उद्यमखेदासहनत्वनिमित्तयालसतया, शब्दादिषु इन्द्रियार्थेषु प्रमादेन गीतकामिन्यादिषु विषयेष्वनवधानप्रवृत्त्या, संक्रोशाधर्मानर्थभीरुर्भयेन निन्दाधर्मलोपानर्थोपनिपातशङ्कित्वमूलेन साध्वसेन, कार्यार्थिषु अनुग्रहबुद्धिः कामेन कार्यार्थिनोऽनुग्रहोष्यामीत्येवंबुद्धिमूलया स्वेच्छया, हिंसाबुद्धिकोपेन नृशंसत्वनिमित्तेन क्रोधेन, विद्याद्रव्यवल्लभापाश्रयाद् दर्पेण विद्याद्रव्य-राजवल्लभव्यपाश्रयनिमित्तेन मदेन, तुलामानतर्कगणिकान्तरोपधानाल्लोभेन तुलान्तरेण उन्मानदण्डविशेषेण मानान्तरेण प्रस्थादिमानसाधनविशेषेण तर्कान्तरेण संभावनाविशेषेण गणिकान्तरेण गणनविशेषेण च यदुपधानं छलनं तत्प्रयोजकेन लोभेनेत्यर्थः। तदेवमज्ञानालस्यप्रमादभयकामकोपदर्पलोभात्मका अष्टौ दोषाः समुदयपरिहापननिमित्तभूता वेदितव्याः।

The superintendent shall furnish the details of the accounts, works to be carried out, work already completed, the balance of work, income, expenditure, balance of stock of materials, the time fixed for the clerks to attend to personal matters, history of the region as well as customs—all in the form of a written report. To undertake the works of high, middling and low nature superintendents with appropriate qualification may be engaged; this being the case the king will not have to regret that he had to punish the officer for his failure.

The loss sustained due to the failure of action has to be compensated by the officers of the category (of eight types) of men like those who performed together, sureties, accountants, sons, brothers, wives, daughters and servants in that order.

A working year is calculated as three hundred and fifty four days and nights. The year of labour is to be upto the end of the month of āṣāḍha (about the middle of July) and as such whether year is complete or incomplete can be decided. An additional or intercalarly month shall be (sparately) calculated (for the sake of keeping accounts). Officers should constantly watch the people or subordinates through espionage. An officer who is ignorant of the activities of the people is likely to cause the loss of revenue to the government. His laziness will result in the absence of progress. Inadvertence in perceiving sound and other objects of sense; timidness in the criticism of people who find fault with his righteousness;undue favour towards supplicants on account of selfish-desire; tendency to be cruel because of anger, lack of dignity when he is in the company of a host of learned and needy sycophants; and greediness by making use of false balance and wrong calculation are blemishes (of an administrator).

तेषामानुपूर्व्या यावानर्थोपघातः तावानेकोत्तरो दण्ड इति मानवाः। सर्वत्राष्टगुण इति पाराशराः। दशगुण इति बार्हस्पत्याः। विंशतिगुण इत्यौशनसाः। यथापराधम् इति कौटल्यः।

परिहापितसमुदयानां दण्डचिन्तायामाह–तेषामिति। तेषाम् उक्तदोषयुक्तानामष्टानाम्, आनुपूर्व्या क्रमेण, यावान् अर्थोपघातः तत्तद्दोषवशादुपहतो यत्परिमाणोऽर्थः, तावान् एकोत्तरः तत्परिमाण एकादिगुणाधिकोऽर्थः, दण्ड इति, मानवाः मनुशिष्याः, वदन्तीति शेषः। सर्वेषु दोषेष्वविशेषादष्टगुण इति पाराशराः, दशगुण इति बार्हस्पत्याः, विंशतिगुण इति शुक्रशिष्याश्च मन्यन्त इत्याह–सर्वत्रेत्यादि। स्वमतमाह–यथेत्यादि। यथापराधम् अपराधानुसारेण अपराधमहत्त्वाल्पत्वादिपर्यालोचनया दण्डः कल्पनीय इत्यभिप्रायः।

According to the sequence of these (eight) blemishes a fine equal to the loss of revenue may be imposed on the offender, multiplied by the serial number of circumstances, say the followers of Manu. The followers of Parāśara prescribe an eightfold fine of the actual loss in all the cases. The school of Bṛhaspati states that it should be ten times. Followers of Uśanas prescribe twenty times of the loss. Kauṭalya is of the view that it should be proportionate with the guilt.

गाणनिक्यान्याषाढीमागच्छेयुः। आगतानां समुद्रपुस्तभाण्डनीवीकानामेकत्रासम्भाषावरोधं कारयेत्। आयव्ययनीवीनामग्राणि श्रुत्वा नीवीमवहारयेत्। यच्चाग्रादायस्यान्तरवर्णे नीव्या वर्धेत, व्ययस्य वा यत् परिहापयेत्, तदष्टगुणमध्यक्षं दापयेत्। विपर्यये तमेव प्रति स्यात्।

अथाध्यक्षाणां वार्षिकगणितप्रदर्शनकाल उच्यते–गाणनिक्यानीति। गाणनिक्यानि गणनाः अर्थात् तत्प्रदर्शकाः अध्यक्षाः आषाढीम् आगच्छेयुः गणनप्रदर्शनार्थमाषाढमासि आगच्छेयुः। समुद्रपुस्तभाण्डनीवीकानां समुद्रं मुद्रायुक्तं पुस्तभाण्डं निबन्धपुस्तकपेटी नीवी व्ययितशिष्टधनं च येषां तथाविधानाम्, आगतानाम् अध्यक्षाणाम्, एकत्रासम्भाषावरोधं पुस्तकदर्शनस्थलेऽन्योन्यमन्त्रणशून्यमवरुध्य रक्षणं कारयेत्। आयव्ययनीवीनाम्, अग्राणि इयत्ताः, श्रुत्वा मुखत आकर्ण्य, नीवीम्। अवहारयेत् उपनाययेत्। यच्चेति। नीव्याः, अन्तरवर्णे व्ययितावशेषस्यावहारितस्य प्रकारवर्णनपुस्तके, यद् धनम्, आयस्याग्राद् अध्यक्षोक्ताद्, वर्धेत अधिकतया विभाव्येत, व्ययस्य वा अग्राद् अध्यक्षोक्ताद्, यद् धनं, परिहापयेद् परिहीणं कुर्यात्, तद् अष्टगुणम्, अध्यक्षं दापयेद् अध्यक्षसकाशाद् गृह्णीयादित्यर्थः। विपर्यय इति। आयस्य यथाप्राप्तादधिकतया लेखनं व्ययस्य यथाकृतादूनतया लेखनं व्ययितावशेषस्य यथास्थितादाधिक्येन लेखनं वा विपर्ययः तस्मिन् पुस्तकदृष्टे सति, तमेव प्रति स्यात् अधिकमध्यक्षस्यैव भागः अध्यक्षायैव देयं नतु तस्य दण्डः कश्चिदित्यर्थः। 'लक्षणेत्थम्भूते'त्यादिना भागे प्रतेः कर्मप्रवचनीयता।

In the month of Āṣāḍha the accountants shall present themselves (for annual verification of accounts). Those who arrive with sealed books and registers, commodities and net revenue shall not be allowed to converse with each other by permitting them to be in a single place. Having heard the totals of income, expenditure and net balance, the net amount of the revenue may be received. The reported income and expenditure should

be written down at first. When the actual amount is paid if the written account is less, eight times of the difference should be realised from the superintendent. On the other hand if the written amount is more and the actual remittance is less due to oversight the increase may be returned to him.

यथाकालमनागतानामपुस्तनीवीकानां वा देयदशबन्धो दण्डः। कार्मिके चोपस्थिते कारणिकस्याप्रतिबध्नतः पूर्वः साहसदण्डः विपर्यये कार्मिकस्य द्विगुणः।

प्रचारसमं महामात्राः समग्राः श्रावयेयुरविषममात्राः। पृथग्भूतो मिथ्यावादी चैषामुत्तमदण्डं दद्यात्।

अकृताहोरूपहरं मासमाकाङ्क्षेत। मासादूर्ध्वं मासद्विशतोत्तरं दण्डं दद्यात्। अल्पशेषनीवीकं पञ्चरात्रमाकाङ्क्षेत ततः परम्।

क्लृप्तकालेऽनागतानां पुस्तकनीवीविरहेणागतानां चाध्यक्षाणां देयदशगुणो दण्ड इत्याह– **यथाकालमित्यादि। कार्मिक** इति। कार्मिके अध्यक्षे उपस्थिते पुस्तदर्शनार्थं यथाकालं सन्निहिते सति, अप्रतिबध्नतः अप्रतियुज्यमानस्य असम्बध्नतः, कारणिकस्य गणनाधिकृतस्य, पूर्वः साहसदण्डः। विपर्यये अप्रतियोगदोषे कार्मिकगते सतीत्यर्थः, कार्मिकस्य द्विगुणः पूर्वः साहसदण्डः।

प्रचारेत्यादि। महामात्राः राज्ञः प्रधानभूताः कर्मसहायाः, समग्राः, आवेषणमात्राः परस्परानुकूलाः प्रवृत्तीः संगता आयव्ययनीवीयत्ता या प्रचारसमं श्रावयेयुः प्रचारो जनपदः तात्स्थ्याज्जानपदाः तत्साधारणं यथा भवति तथा श्रावयेयुः, जानपदान् सदसि मेलयित्वा बोधयेयुरित्यर्थः। एषां महामात्राणां मध्ये, पृथग्भूतः विसंवादी, मिथ्यावादी च, उत्तमदण्डम् उत्तमसाहसदण्डं, दद्यात्।

अकृतेत्यादि। अकृताहोरूपहारं कृते क्लृप्ते अहोरूपे दिवसे हर्तव्यं यो हरत्युपनयति स कृताहोरूपहरः उपहर्तव्यद्रव्यग्यथाकालोपहर्ता स न भवतीत्यकृताहोरूपहरः तं, तथाविधमध्यक्षं, मासम् आकाङ्क्षेत प्रतीक्षेत, हर्तव्यहरणार्थमेकमासावधिं तस्मै दद्यादित्यर्थः। मासावधावहर्तुर्दण्डमाह–**मासादिति।** मासाद् ऊर्ध्वम् अनुपहरणे, मासद्विशतोत्तरं मासस्यैकैकस्य द्वे शते उत्तरे यस्य तं तथाभूतं, दण्डं पूर्वोक्तं, दद्यात्। अल्पशेषार्पणीयनीवीके विशेषमाह–**अल्पेत्यादि।** अल्पशेषनीवीकं, ततः परं मासात् परतः, पञ्चरात्रं रात्रिपञ्चकमधिकम्, आकाङ्क्षेत। तत ऊर्ध्वमप्यनुपहरणे दण्डं दद्यादित्यर्थं सिद्धम्।

Those accountants who fail to arrive at the proper time with account books and cash balance (net revenue) shall be fined ten times of the amount due from them. When the accountant arives (with proper records) the officer in charge who fails to receive the accounts shall be punished with the first amercement. In the reverse case (when the officer is ready and the accountant refuses to present the accounts) the latter shall pay a fine of double the first amercement.

All the ministers shall join together to hear the accounts pertaining to each department in the presence of the citizens. Among them, if any

one disagrees or utters a falsehood he shall be punished with the highest amercement.

The accountant who has not completeed the register of accounts by entering the daily revenue may be given a month's time to complete the same. After that period (if he still fails) he may be fined two hundred coins for each month of delay. If the accountant has to write only a small portion in the register, he may be allowed five more nights to complete the record book.

कोशपूर्वमहोरूपहरं धर्मव्यवहारचरित्रसंस्थानसङ्कलननिर्वर्तनानुमानचारप्रयोगैरवेक्षेत।

दिवसपञ्चरात्रपक्षमासचातुर्मास्यसवत्सरैश्च प्रतिसमानयेत् व्युष्टदेशकालमुखोत्पत्त्यनुवृत्तिप्रमाणदायकदापकनिबन्धकप्रतिग्राहकैश्चायं समानयेत्। व्युष्टदेशकालमुखलाभकारणदेययोगपरिमाणाज्ञापकोद्धारकनिधातृकप्रतिग्राहकैश्च व्ययं समानयेत्। व्युष्टदेशकालमुखानुवर्तनरूपलक्षणपरिमाणनिक्षेपभाजनगोपायकैश्च नीवीं समानयेत्।

कोशेत्यादि। कोशपूर्वम् अहोरूपहरम् अर्पणीयनीवीधनपुरस्सरं क्लृप्तदिवसपुस्तकोपनेतारम् अध्यक्षं, धर्मव्यवहारचरित्रसंस्थानसंकलननिर्वर्तनानुमानचारप्रयोगै: अवेक्षेत धर्मप्रयोगादिभिरष्टभि: प्रकारै: परीक्षेत–किमसो वस्तुत एव सद्वृत्त: उत दाम्भिक इति। तत्र धर्म: स्मृतिविहित:, व्यवहार: पूर्वपक्षोत्तरपक्षलक्षण:, चरित्रं लोकाचार:, संस्थानं पूर्वस्थिति:, सङ्कलनं सर्वधनैकीकारगणना, निर्वर्तनं कार्यनिष्पत्ति:, अनुमानं कृतेनाकृताभ्यूह:, चारागूढपुरुषा:।

गणनलेखनपरिपाटीमाह–**दिवसेत्यादि**। दिवसपञ्चरात्रपक्षमासचातुर्मास्यसंवत्सरैश्च प्रतिसमानयेत् दिवस: पञ्चरात्रं पक्षो मासश्चातुर्मास्यं संवत्सर इत्येभिर्विभागै: संख्याय सम्पादयेत् अर्थात् आयव्ययनीवी:। अयं भाव:–संवत्सरस्यादिमे मासि पूर्वपक्षस्य प्रतिपदमारभ्या पञ्चम्या: दैनन्दिनी: आयव्ययनीवी: पृथग् गणनपुस्तकेषु विलिख्य पञ्चमीपर्यन्तदिवसपञ्चकाङ्कान् संकलय्य निवेशयेत्। एवं षष्ठ्यादिदशम्यन्तदिवसपञ्चकाङ्कान् एकादशयादिपञ्चकाङ्कानेकीकृत्य पक्षाङ्कं, पूर्वापरपक्षद्वयाङ्कैकीकरणेन मासाङ्कं च सम्यक् संख्याय सम्पादयेदिति। आयव्ययनीवीनां साधारणविधिवचनानन्तरं प्रातिस्विकविधिष्वभिधानीयेषु प्रथममायस्य व्ययनीवीनिमित्तत्वेन प्राधान्यात् तं दर्शयति–**व्युष्टेत्यादि**। व्युष्टदेशकालमुखोत्पत्त्यनुवृत्तिप्रमाणदायकदापकनिबन्धकप्रतिग्राहकै: आयं समानयेत् व्युष्टादिविवरणयुक्ताम् आयगणनां सम्पादयेदित्यर्थ:। तत्र व्युष्टं राजवर्षमासपक्षदिवसा:, देश:, कालो वर्षादि:, मुखम् आयमुखमायशरीरं च, उत्पत्ति: तदुत्पन्नं शुल्कादि, अनुवृत्ति: स्थानान्तरसंक्रान्ति:, प्रमाणं, दायक: करस्य दाता, दापक: दापयिता राजपुरुष:, निबन्धको लेखक:, प्रतिग्राहको ग्रहीता। व्ययसमानयनविधिमाह–**व्युष्टदेशकालमुखलाभेत्यादि**। तत्र व्युष्टदेशकालमुखानि पूर्वोक्तानि, लाभ: 'पक्षमाससंवत्सरलाभो लाभ' इति गताध्यायोक्त: कारणं निमित्तं, देयं दानीयद्रव्यं, योगो द्रव्यापद्रव्यमिश्रणं, परिमाणमियत्ता, आज्ञापक: चोदक:, उद्धारक: ऋणग्राही ऋणं वा, निधातृक: भाण्डागारिक:, प्रतिग्राहक: ब्राह्मणादि:। नीवीविधिमाह–**व्युष्टदेशकालमुखानुवर्तनेत्यादि**। तत्र रूपं द्रव्यस्य स्वरूपं, लक्षणं तच्चिह्नं, परिमाणं तन्मानं, निक्षेपभाजनं द्रव्यनिधानभाण्डं, गोपायकस्तद्रक्ष:, शेष: प्रतीतम्।

After that expiry of five days the officer—the accountant who arrives

on the stipulated day with the net revenue shall be checked by the means (which are eightfold) like dharma (righteousness), vyavahāra (transaction both precedent and antecedent), caritra (customs), samsthāna (precedent), sankalana (arithmetical process of addition), nivartana (performance), anumāna (inference) and cāraprayoga (employment of espionage).

The accounts shall (be noted from the new years day) contain statements (of receipt, expenditure and balance) with regard to each day, five days, fortnights, months, pertaining to every four months, and year. The receipt of income shall be noted with reference to the new year period, place, time, source, origin (like tax), previous balance, authority, the payee, the one who caused the payment, the one who demanded in writing and the officer who accepted it. The expenditure shall be noted down with reference to the new year period and shall contain (details of) place, year, time, source, gain, season, things payable, mixture of materials both genuine and spurious, volume, the one who prompted, one who received it, treasurer who paid, the receiver (like Brahmin). The balance shall also have reference to the new year, place, time, source, previous carry over, nature of article, identification mark, volume, vessel in which it was put and the one who is to guard it.

राजार्थे कारणिकस्याप्रतिबध्नतः प्रतिषेधयतो वाज्ञां निबन्धादायव्य- यमन्यथा वापि कल्पयतः पूर्वः साहसदण्डः।

क्रमावहीनमुक्तममविज्ञातं पुनरुक्तं वा वस्तुकमवलिखतो द्वादशपणो दण्डः।

नीवीमवलिखतो द्विगुणः, भक्षयतोऽष्टगुणः, नाशयतः पञ्चबन्धः प्रतिदानं च। मिथ्यावादे स्तेयदण्डः। पश्चात् प्रतिज्ञाते द्विगुणः प्रस्मृतोत्पन्ने च।

अथ यथासम्भवं सामान्यदण्डमाह–राजार्थ इति। राज्ञो धनहिरण्यादिलाभरूपे प्रयोजने, अप्रतिबध्नतः असम्बध्नतः राजार्थं पुस्तकेष्वलिखत इत्यर्थः, आज्ञां, प्रतिषेधयतो वा अननुतिष्ठतश्च, आयव्ययं, निबन्धात् क्लृप्तनियमाद्, अन्यथा प्रकारान्तरेण, कल्पयतोऽपि वा, कारणिकस्य पूर्वः साहसदण्डः।

क्रमेत्यादि। वस्तुकं, क्रमावहीनमवलिखतः उत्तममध्यमाधमेषु क्रमहीनं लिखतः, उत्क्रममवलिखतः पूर्वमधमं पश्चादुत्तममिति व्युत्क्रमं लिखतः, अविज्ञातमवलिखतः वेदितुमनर्हया रीत्या लिखतः, पुनरुक्तमवलिखतो वा लिखितं पुनर्लिखतो वा, द्वादशपणो दण्डः।

नीवीमिति। नीवीम्, अवलिखतः अवहीनं लिखतः, द्विगुणः पणचतुर्विंशतिः, दण्डः। नीवीं भक्षयतः, अष्टगुणः पणषण्णवतिः, दण्डः। नीवीं नाशयतः नटनर्तकादिभ्यो दत्त्वा लोपयतः, पञ्चबन्धः पञ्चगुणः षष्टिपणो दण्डः, प्रतिदानं च नाशितपुनर्दानं च, भवति। मिथ्यावादे स्तेयदण्डः असत्यवचने चौर्यदण्डः। पश्चात् प्रतिज्ञाते पूर्वमलिखित एव गणनपरिशोधनायां विज्ञाते विषये, प्रस्मृतोत्पन्ने च पूर्वं विस्मृत्य पश्चाच्चिन्तिते च विषये, द्विगुणः स्तेयदण्डाद्विगुणः, दण्डः।

The officer who omits to write down the dues to the king, or prevents

the accountant from noting the same, or disregards the order of the king and thereby renders the receipts and expenditure otherwise than prescribed shall be punished with the first amercement.

In writing down receipt, expenditure and balance he who reverses the sequence even unknowingly, due to ignorance or who commits duplication shall be punished with a fine of twelve paṇas.

A willful decrease of the closing balance invites double the usual (= 12 paṇas) fine (which comes to 24 paṇas). He who misappropriates the balance shall be punished with a fine of eight times (= 96 paṇas) and he who destroys the balance (by wrong payments to others) deserves five times fine (= 60 paṇas) and further he is reimburse the amount (spent wrongly). A wrong statement is treated as theft and shall be punished accordingly. A correction made later on recollection of a forgotten statement deserves a double punishment.

अपराधं सहेताल्पं तुष्येदल्पेऽपि चोदये।
महोपकारं चाध्यक्षं प्रग्रहेणाभिपूजयेत्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तमोऽध्याय: अक्षपटले गाणनिक्याधिकार:, आदितोऽष्टाविंश: ।।

श्लोकमाह–अपराधमिति। अल्पमपराधं सहेत, अर्थादध्यक्षस्य। अल्पेऽपि उदये आयवृद्धौ अर्थादध्यक्षोपपादितायां, तुष्येत्। महोपकारम् अध्यक्षं, चशब्दस्त्वर्थे, प्रग्रहेण प्रकृष्टग्रहणेन यावज्जीवपरिग्रहेण, अभिपूजयेत् बहुमानयेत्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तमोऽध्याय: अक्षपटले गाणनिक्याधिकार:, आदितोऽष्टाविंश: ।।

The king shall forgive an offence which is trifle in nature and shall feel happy even at the slightest increase of revenue. He shall honour and reward the officers who strive for his benefit.

Thus the twenty-eighth chapter of the Arthaśāstra of Kauṭalya entitled counting of coins and maintenance of accounts comes to an end. Here ends the seventh chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 29

26. प्रक० समुदयस्य युक्तापहृतस्य प्रत्यानयनम्।

Section 26 : Detection of Embezzled Revenue

कोशपूर्वाः सर्वारम्भाः। तस्मात् पूर्वं कोशमवेक्षेत।

प्रचारसमृद्धिश्चरित्रानुग्रहश्चोरग्रहो युक्तप्रतिषेधः सस्यसम्पत् पण्यबाहुल्यमुपसर्गप्रमोक्षः परिहारक्षयो हिरण्योपायनमिति कोशवृद्धिः।

प्रतिबन्धः प्रयोगो व्यवहारोऽवस्तारः परिहापणमुपभोगः परिवर्तनमपहारश्चेति कोशक्षयः।

सिद्धीनामसाधनमनवतारणम् प्रवेशनं वा प्रतिबन्धः। तत्र दशबन्धो दण्डः।

समुदयस्य युक्तापहृतस्य प्रत्यानयनमिति सूत्रम्। समुदयो नाम द्रव्योत्पत्तिस्थानेभ्य उत्थितं धनं, युक्ता अध्यक्षाः, युक्तापहृतस्य समुदयस्य प्रत्यानयनं पुनः प्रापणमिहाभिधीयत इति सूत्रार्थः।

किमर्थं धनसंग्रहे महान् यत्न उपदिश्यत इत्यपेक्षायामाह—**कोशेत्यादि।** सर्वारम्भाः कोशपूर्वाः सर्वाणि कार्याणि तन्त्रसम्बद्धानि जनपदनिवेशादीनि आवापसम्बद्धानि च सन्धिविग्रहादीनि धननिमित्तकानि। तस्मात् कारणात्, कोशं, पूर्वं सर्वकार्याणामग्रे, अवेक्षेत यथा स वृद्धिं प्राप्नुयात् न क्षयं तथा चिन्तयेदित्यर्थः।

कोशस्योदयहेतून् नव दर्शयति—**प्रचारेत्यादि।** प्रचारसमृद्धिः जनपदसम्पत्, चरित्रानुग्रहः देशजाति-कुलाचाराणां पूर्वस्थित्यनतिक्रमेण परिपालनं, चरित्ररक्षणसन्तुष्टा हि जनाः कोशं राज्ञो वर्धयन्तीति, चोरग्रहः तस्करवधस्तस्करेभ्यो धनग्रहणं च, युक्तप्रतिषेधः युक्तानामध्यक्षाणां प्रतिषेधो धनापहाराद् वारणम् उत्कोचग्रहणनिमित्ताद्वा प्राजापीडनाद् वारणं, सस्यसम्पत् उच्चावचधान्यसमृद्धिः, पण्यबाहुल्यं पण्यानां जलजानां स्थलजानां च विक्रेयद्रव्याणां बहुलमुत्पत्तिरुपलम्भश्च, उपसर्गप्रमोक्षः अग्न्याद्युपद्रवमोचनं, परिहारक्षयः करमुक्त्यभावः अवधौ धनग्रहणोपेक्षाविरहो वा, हिरण्योपायनं सुवर्णरजतादिरूपोपदा, इति कोशवृद्धिः एवं नव कोशवृद्धिहेतवः।

कोशक्षयहेतूनष्टावुद्दिशति—**प्रतिबन्ध** इत्यादि।

सिद्धीनामिति। सिद्धीनां सिद्धद्रव्याणां राजग्राह्यकरादीनाम्, असाधनम् अनुत्पादनम्, उत्पन्नानां वा अनवतारणमहस्तप्रापणम्, अवतारितानां वा अप्रवेशनं भाण्डागाराप्रापणम्, इति प्रतिबन्धस्त्रिधा। तत्रेति। तत्र प्रतिबन्धे, दशबन्धो दशगुणः, दण्डः।

All enterprises depend on finance. Hence utmost care should be bestowed on matters relating to treasury.

The factors that contribute to the affluence of the treasury are the following (nine items) prospertiy of the people in general (pracāra-samṛddhi); administration without flouting the tradition (caritrānugrahaḥ), arrest of thieves and confiscation) of wealth (coragraha); prevention of corruption by the officers concerned (yuktapratiṣedha), prosperity by agricultural activities in the form of production of grains (sasyasampat); abundance of commerce (paṇyabāhulyam), absence of natural calamities (upasarga pramokṣa), absence of the remission of taxes (karamuktyabhāva), and income in the form of gold (hiraṇyopāyanam).

The contributory factors for the depletion of the treasury are (eightfold as) obstruction (pratibandha), lending or giving loan (prayoga), transaction of trading (vyavahāra), fabrication of accounts by employers (avastāra), causing the loss of income (parihāpaṇa), self-enjoyment (upabhoga), barter (parīvartana), and defalcation of wealth (apahāra).

Pratibandha (obstruction) is of (three kinds) the nature of failure to collect taxes and income due to the royalty, nonremittance of income (into the treasury) by handling over the same to wrong persons; and failure to deposit the income into the treasury. For this the punishment of fines is of ten times than the usual.

कोशद्रव्याणां वृद्धिप्रयोगः प्रयोगः। पण्यव्यवहारो व्यवहारः। तत्र फलद्विगुणो दण्डः।

सिद्धं कालमप्राप्तं करोत्यप्राप्तं प्राप्तं वेत्यवस्तारः। तत्र पञ्च बन्धो दण्डः।

क्लृप्तमायं परिहापयति व्ययं वा विवर्धयतीति परिहापणम्। तत्र हीनचतुर्गुणो दण्डः।

स्वयमन्यैर्वा राजद्रव्याणामुपभोजनमुपभोगः। तत्र रत्नोपभोगे घातः, सारोपभोगे मध्यमः साहसदण्डः, फल्गुकुप्योपभोगे तच्च तावच्च दण्डः।

राजद्रव्याणामन्यद्रव्येणादानं परिवर्तनं, तद् उपभोगेन व्याख्यातम्।

कोशेत्यादि। कोशद्रव्याणां कोशप्रवेश्यद्रव्याणां, वृद्धिप्रयोगः वृद्ध्यर्थं प्रयोगः स्वयं वृद्धिमुपजीव्य पश्चाद् मूलं कोशेऽर्पयिष्यामीति, स प्रयोगः। पण्यव्यवहारः कोशद्रव्यैर्वाणिज्यकरणं, व्यवहारः। तत्र प्रयोगव्यवहारयोः दण्डः फलद्विगुणः।

सिद्धमिति। सिद्धं प्राप्तं, कालं ग्राह्यद्रव्यग्रहणकालम्, अप्राप्तं, करोति आपादयति उत्कोचलिप्सया, अप्राप्तं वा कालं प्राप्तं करोति प्रद्वेषेण, इत्यवस्तारः इत्यनेन प्रकारेण प्राप्तकालाप्राप्तीकरणम-प्राप्तकालप्राप्तीकरणमिति द्विविधोऽवस्तारः। तत्र अवस्तारे, दण्डः पञ्चबन्धः।

क्लृप्तमिति। क्लृप्तं प्रतिनियतम् आयं परिहापयति न्यूनयति, व्ययं वा क्लृप्तं विवर्धयति अतिरेचयति, इति परिहापणम्, एवं द्विधा परिहापणम्। तत्र, दण्डः हीनचतुर्गुणः नाशितद्रव्यचतुर्गुणः।

रत्नसारफल्गुकुप्यानां राजद्रव्याणां स्वयमुपभोजनं परैर्वोपभोजनमिति द्विविध उपभोग इत्याह-स्वयमित्यादि। तत्र दण्डोपदेशवाक्यं-तत्रेत्यादि। तच्च उपभुक्तद्रव्यं च। तावच्च तत्परिमाणमपरं च।

परिवर्तनं व्याचष्टे–राजद्रव्याणामित्यादि। अन्यद्रव्येणादानन् अन्यद् द्रव्यं सच्छायं प्रतिनिधाय ग्रहणम्। उपभोगेन तद् व्याख्यातमिति उपभोगसमानदण्डं परिवर्तनमित्यर्थः।

By prayoga (giving on loan) the increase of the deposited materials is contemplated. Vyavahāra (commercial activity) means the trading of the deposits. Failure in these activities shall invite the fine of twice the actual value. Avastāra (falcification) implies delaying of receiving things into the treasury (for paving way to collect bribe) and what is not already due is demanded (again with ulterior motive). This invites a fine of five times than the usual.

Parihāpaṇa (loss of income) is duc to collecting a lesser amount than fixed or by increasing the expenditure (willfully to deprive the amount). For this the fine shall be four times the loss incurred.

Upabhoga (self-utilisation) is the use of the wealth or materials belonging to the king by one-self or by others due to one's own fault. In the misuse of gems the offender shall be put to death; misuse of valuable articles shall be punished with middle type of amercement while the wrong utilisation of articles of inferior value shall be punished with an equal amount of fine.

Parivartana (barter) is the replacement of the royal articles with those of inferior value (for one's own benefit) and this is a similar case with the previous one called Upabhoga (self-utilisation) and as such similar punishment shall be meted out.

सिद्धमायं न प्रवेशयति, निबद्धं व्ययं न प्रयच्छति, प्राप्तां नीवीं विप्रतिजानीत इत्यपहारः। तत्र द्वादशगुणो दण्डः।

तेषां हरणोपायाश्चत्वारिंशत्–पूर्वं सिद्धं पश्चादवतारितं, पश्चात् सिद्धं पूर्वमवतारितं, साध्यं न सिद्धम्, असाध्यं सिद्धं, सिद्धमसिद्धं कृतम्, असिद्धं सिद्धं कृतम्, अल्पसिद्धं बहुकृतं, बहुसिद्धमल्पं कृतम्, अन्यत् सिद्धमन्यत् कृतम्, अन्यतः सिद्धमन्यतः कृतं, देयं न दत्तमदेयं दत्तं, काले न दत्तमकाले दत्तम्, अल्पं दत्तं बहु कृतं, बहु दत्तमल्पं कृतम्, अन्यद् दत्तमन्यत् कृतम्, अन्यतो दत्तमन्यतः कृतं, प्रविष्टमप्रविष्टं कृतम्, अप्रविष्टं प्रविष्टं कृतं, कुप्यमदत्तमूल्यं प्रविष्टं, दत्तमूल्यं न प्रविष्टं, सङ्क्षेपो विक्षेपः कृतः, विक्षेपः सङ्क्षेपो वा, महार्घमल्पार्घेण परिवर्तितम्, अल्पार्घं महार्घेण वा, समारोपितोऽर्घः, प्रत्यवरोपितो वा, रात्रयः समारोपिताः, प्रत्यवरोपिता वा, संवत्सरो मासविषमः कृतः, मासो दिवसविषमो वा, समागमविषमः, मुखविषमः, धार्मिकविषमः, निर्वर्तनविषमः, पिण्डविषमः, वर्णविषमः, अर्घविषमः, मानविषमः, मापनविषमः, भाजनविषम इति हरणोपायाः।

त्रिप्रकारमपहारमाह–सिद्धमिति। सिद्धम् उत्पन्नम्, आयं, न प्रवेशयति लेख्ये नारोपयति

इत्येकोऽपहारः। निबद्धं पुस्तकारोपितं व्ययं राजाज्ञप्तं पारितोषिकादिलक्षणं, न प्रयच्छति राजनिर्दिष्टाय पात्राय न ददाति, इति द्वितीयोऽपहारः। प्राप्तां हस्तगतां, नीवीं, विप्रतिजानीते नाद्यापि हस्तप्राप्तेत्यपलपति, इति तृतीयोऽपहारः। तत्र अपहारे, दण्डो द्वादशगुणः।

तेषामिति। तेषाम् अध्यक्षाणां, हरणोपायाः राजद्रव्यापहरणद्वाराणि, चत्वारिंशद् वक्ष्यमाणरीत्यां अपहारपरिहरणार्थमपहृतप्रत्यानयनार्थं च तद्व्युत्पादनम् तान् दर्शयति–**पूर्वं सिद्धमित्यादिना**। **पूर्वं सिद्धं पश्चादवतारितमिति**, पूर्वसस्यत्वात् पूर्वप्रवेश्यः शाल्यादेः करः पश्चिमसस्यगोधूमादिकरेण सह प्रवेशितः स तु मध्यकालेऽध्यक्षेणोपजीव्यो भवति। **पश्चात् सिद्धं पूर्वमवतारितमिति**, पश्चिमसस्यगोधूमादिकरस्य कियांश्चिद् भागः पूर्वसस्यकरेण सह पूर्वमेव प्रवेशित आत्ययिकराजकार्यार्थत्वच्छलात्। **साध्यं न सिद्धमिति**, करदेन प्रवेशित एव करः अप्रवेशित इत्युक्त्वापहृतः, गृहीत एव करस्यैकदेशो न गृहीत इत्यपलपितो वा। **असिद्धं सिद्धं कृतमिति**, कृत्स्नकरदानार्हे काले तस्य करस्यार्धं दत्त्वा शेषार्धं पश्चाद् दास्यामीत्युक्तेन लञ्चवशीकृतेनाध्यक्षेण तच्छेषार्धं दत्त्वेन पुस्तके लिखितम्। **अल्पसिद्धं बहुकृतमिति**, पञ्चाशति प्रविष्टायां शतं प्रविष्टमित्यध्यक्षेण लञ्चग्राहिणा लिखितम्। **बहुसिद्धमल्पं कृतमिति**, शतं गृहीत्वा पञ्चाशदिति पुस्तके लिखितं लञ्चादिनां **अन्यत् सिद्धमन्यत् कृतमिति**, शालिः सिद्धः कोद्रवो लिखितः शालिकरग्रहणनिमित्तस्य लाभस्यात्मसात्कारार्थम्। **अन्यतः सिद्धमन्यतः कृतमिति**, देवदत्ताद् गृहीतं यज्ञदत्ताद् गृहीतमिति पुस्तके लिखितम्। **देयं न दत्तम् अदेयं दत्तमिति**, देयं स्वर्णरजतादिकं कस्मैचिद् दातव्यतया राज्ञाज्ञापितं तस्मै न दत्तं, किन्तु अदेयं फल्गुकुप्यादिकं कालान्तरे कथञ्चिद् दत्तम्। **काले न दत्तकाले दत्तमिति**, यज्ञाद्यर्थं कस्मैचिद् दीयतामिति राज्ञाज्ञप्तं यज्ञादिकाले वर्तमाने न दत्तं किन्त्वतिक्रान्ते कथञ्चिद् दत्तं लञ्चग्रहणपीडापुरस्सरम्। **अल्पं दत्तं बहुकृतमिति**, शतं दीयतामिति राजाज्ञायां तत् पञ्चाशतात्मसात्कारार्थया साग्रं पुस्तके विलिखितम्। **बहुदत्तमल्पं कृतमिति**, शतं देवदत्ताय दीयतामिति राजादेशे विंशतिं स्वयं गृहीत्वाशीतिमात्रं तस्मै दत्तम्। **अन्यद् दत्तमन्यत् कृतमिति**, राज्ञादिष्टाः शालयः कोद्रवास्तु दत्ताः। **अन्यतो दत्तमन्यतः कृतमिति**, देवदत्तायादिष्टं यज्ञदत्ताय दत्तम्। **प्रविष्टमप्रविष्टं कृतमिति**, कोशीनेवश्य-मुपहस्तितमेव द्रव्यमनुपहस्तितमिति वा किञ्चिदेवोपहस्तितमिति, वोक्त्वापहृतम्, अथवा कार्यविशेषार्थे 'प्रजाभ्यो धनमुत्थाप्यानीयतामि'त्यादिष्टे तदुत्थाप्य नाद्याप्युत्थितमित्युक्त्वा कालहरणेनोपजीवितम्। **अप्रविष्टं प्रविष्टं कृतमिति**, अगृहीत एव करदेभ्यः करो लञ्चं गृहीत्वा प्रविष्ट इति लिखितः। **कुप्यमदत्तमूल्यं प्रविष्टमिति**, कुप्यं वस्त्रादिकं राजादेशाद् ऋणेन गृहीतं कथञ्चित् कालान्तरे दत्तमूल्यैकदेशं कृत्वा दत्तसमग्रमूल्यमिति पुस्तके लिखितम्। **दत्तमूल्यं न प्रविष्टमिति**, महामूल्यदानेन क्रीतं कुप्यं तावन्मूल्यक्रीतत्वेन पुस्तकेऽनिबद्धम् अर्थादल्पमूल्यक्रीतत्वेन निबद्धमित्ययं विंशोऽपहारोपायः। **संक्षेपो विक्षेपः कृत इति**, संक्षेपः जनसमूहदेयः पिण्डकरः विक्षेपः कृतः विप्रकीर्णकरः कृतः समूहिभ्यः प्रत्येकं विभज्य ग्राह्यः कृत इत्यर्थः, तथाकरणे हि राजद्रव्यमुपजीवितुं शक्यं ग्राम्यजनाश्चेति। **विक्षेपः संक्षेपो वेति**, जनादेकस्माद् बहुभिर्मासैरल्पशो ग्राह्यो विप्रकीर्णकरः एकस्मिन्नेव समये संपिण्ड्य ग्राह्यः कृतः, एवं हि कुव्रताध्यक्षेण राजद्रव्यमुपजीवितुं लभ्यते जनाश्चेति। **महार्घमल्पार्घेण परिवर्तितमिति**, महार्घं युग्यवाहनादि अल्पार्घेण युग्यादिना विनिमितं विनिमायापहृतम्। **अल्पार्घं महार्घेण वेति**, अल्पमूल्यम् अत एव महाविक्रय विषयभूतं सामुद्रलवणादि पण्यं महामूल्येन अत एव अल्पविक्रयविषयेण सैन्धवलवणादिना परिवर्तितं विनिमित्तं, तद्धि शीघ्रविक्रयेण लाभमुत्पादयत् पण्याध्यक्षम्योपजीव्यं भवतीति। **समारोपितोऽर्घ इति**, अर्घस्य यथास्थितादर्घादतिरेचनमित्यर्थः। तथा हि करणे क्रेतारः स्वोपकारकामा भवन्तः

पण्याध्यक्षस्यार्धनियामकस्योपजीव्या भवन्तीति। **प्रत्यवरोपितो वेति**, अर्घ इति सम्बध्यते, अर्घप्रत्यवरोपणे हि कृते विक्रेतार: यथास्थितार्घकामा भवन्त: पण्याध्यक्षस्योपजीव्या भवन्तीति। **रात्रय: समारोपिता** इति, पञ्चरात्रवेतनं कर्मकरेभ्यो दत्त्वा सप्तरात्रवेतनं दत्तमित्येवञ्जातीयो रात्रिसमारोप:, अनेन ह्युपायेन कर्मकरेभ्यो दत्त्वा सप्तरात्रवेतनं दत्तमित्येवञ्जातीयो रात्रिसमारोप:, अनेन ह्युपायेन कर्मकरेभ्यो धनमपह्रियते। **प्रत्यवरोपिता वेति**, रात्रय इति वर्तते, स्वमिसकाशाद् दशरात्रव्ययं गृहीत्वाष्टरात्रव्ययो गृहीत इत्येवञ्जातीयं रात्रिप्रत्यवरोपणम्, अनेन ह्युपायेन स्वामिद्रव्यमुपजीव्यते। **संवत्सरो मासविषम: कृत** इति, अधिमासरहित एव संवत्सर: साधिमास: कृत इत्यर्थ:, अनेनोपायेनाधिमासलाभोऽपह्रियते। **मासो दिवसविषमो वेति**, अनूनदिवसो मासो दिवसोन: कृत:। **समागमविषम** इति, समागमे विषये विषमो व्यापार इत्यर्थ:, तद्यथा समागतानां दृष्टानां कर्मकराणां भक्तवेतनदाने परोक्षं कमपि द्रष्टव्यमपदिश्य स्वयं तद्भक्तवेतनं गृह्णाति। **मुखविषम** इति, कुतश्चिदायमुखादुत्पन्नं द्रव्यमन्यस्मादायमुखादुत्पन्नमिति ख्यापितं तदधिकृतादुत्कोचं गृहीत्वा। **धार्मिकविषम** इति, 'ब्राह्मणेभ्य: प्रत्येकं पणशतं दीयतामि'ति राजादेशे पुरोहितेन पुरोहितपुरुषेण वा तदर्धापहरणम्। **निर्वर्तनविषम** इति, किञ्चित्कर्मनिर्वर्तनप्रवृत्तौ विषमाचरणमित्यर्थ:, तद्यथा-करदेभ्य: करोद्ग्राहकर्म निर्वर्तनप्रसङ्गे करदान् 'युष्माभिरद्यैव करो निर्यातयितव्य' इत्यवरुध्य लञ्चग्रहणेन कश्चिन्मुञ्चतीति। **पिण्डविषम** इति, पिण्डे समूहे विषमाचरणं, यथा-समूहदेये विषये समूहिनमेकं लञ्चग्रहणादिना वर्जयित्वा समूहिभ्य इतरेभ्यो देयग्रहणम्। **वर्णविषम** इति, ब्राह्मणा एवाद्योत्तीर्णा: नान्ये इत्युक्त्वा तद्दिनसवेतनस्यात्मसात्करणं नावध्यक्षेण कृतम्, अथवा स्वर्णेऽष्टवर्णके ग्राह्ये नववर्णकं स्वर्णदायकाद् गृहीत्वाष्टवर्णकस्यैव राज्ञेऽर्पणं सुवर्णाध्यक्षेण कृतम्। **अर्घविषम** इति, सेनानिवेशादावर्घस्याव्यवस्थितत्वात् तं किञ्चिदधिकमपदिश्य राजार्थोपजीवनम्। **मानविषम** इति, परिमाणोन्मानसाधनवैषम्यमित्यर्थ:, तच्च हीनैस्तैर्देयं दत्त्वा महद्भिर्दत्तमिति ख्यापनम्, अथवा देयस्य हीनैर्दानं महद्भि: स्वीकरणम्। **मापनविषम** इति, मापनकृतं वैषम्यं मातृहस्तविशेषोत्पादितं वस्त्रादिमानविषयं वैषम्यम्। **भाजनविषम** इति, 'आज्यपूर्णं घटशतं दीयतामि'त्युक्ते अल्पानां घटानां शतं दत्त्वा महतां घटानां शतं दत्तमिति लेखनं, तेन राजद्रव्यमपह्रियत इत्ययं चत्वारिंशत्तमो द्रव्यापहरणोपाय:। इतिशब्द: परिसमाप्तिवचन:, हरणोपाया: समाप्ता:, किञ्चिद्भेदेन संभवन्तोऽप्ये यथोक्तेष्वेवान्तर्भवन्तीत्यभिप्राय:।

He who does not enter the actual receipt into the account of the treasury, and does not pay to other what is due for them (as per fixed rules) and misrepresents the actual balance (of stock or amount), commits the mistake called apahāra (embezzlement) is liable to pay twelve times of the loss which is to be realised as fine.

The superintendents (or authorities) are found resorting to twenty four types of embezzlement (as follows)—what is obtained earlier is entered later on;—what is obtained later is entered earlier;—what ought to have been realised is not actually realised;—what is hard to be realised is shown as realised;—what is collected is shown as not collected;—what has not been collected is shown as collected;—what is collected in part is shown as collected in full;—what is collected in full is stated as collected partly;—what is actually collected is one material while what is entered is

another thing;—what is realised from one source is entered as collected from another;—what is payable is not paid;—what is not payable is paid;—what is not paid in time;—what is paid untimely;—small gifts made large gifts;—large gifts made small gifts;—what is gifted is one sort while what is actually entered is of another;—the real donee is one while the person recorded (in the register) as donee is another;—what has been taken into the treasury is removed while what has not been credited is shown as credited;—the raw material for which payment is not effected is noted as paid while those that are paid for are not entered;—an aggregate is scattered in pieces;—scattered items are converted into an aggregate;—articles of greater value are bartered for those of smaller value;—what is of lesser value is bartered for are one of greater value;—prices of commodities deliberately enhanced;—prices of commodities are purposefully lowered;—the number of nights increased;—the number of nights decreased;—the year is stated as having not in harmony with its months; the month is recorded as not in harmony with its days;—inconsistency in the transactions carried on under personal supervision;—misrepresentation of the source of income;—inconsistencies in giving charities;—incongruity in showing the work actually turned out;—inconsistency in dealing with fixed items;—misrepresentation of test marks or the standard of fineness (of gold and silver);—misrepresentation of prices of commodities;—making use of false weights and measures;—deception in the counting of articles and making use of false cubic measures such as in the use of pots.

तत्रोपयुक्तनिधायकनिबन्धकप्रतिग्राहकदायकदापकमन्त्रिमन्त्रिवैयावृत्त्यकरानेकैकशोऽनुयुञ्जीत। मिथ्यावादे चैषां युक्तसमो दण्डः। प्रचारे चावघोषयेत्–अमुना प्रकृतेनोपहताः प्रज्ञापयन्त्विति। प्रज्ञापयतो यथोपघातं दापयेत्। अनेकेषु चाभियोगेष्वपव्ययमानः सकृदेव परोक्तः सर्वं भजेत। वैषम्ये सर्वत्रानुयोगं दद्यात्। महत्यर्थापहारे चाल्पेनापि सिद्धः सर्वं भजेत।

तत्रेति। तत्र हरणोपायेषु शङ्क्यमानेष्विति शेषः, उपयुक्तादीन् अष्टौ एकैकशः प्रत्येकम्, अनुयुञ्जीत पृच्छेद्–'इदमनेनाध्यक्षेणापहृतं नवे'ति। तत्रोपयुक्तो युक्तानामुपरि नियुक्तः प्रत्ययितपुरुषः, निधायकः भाण्डागारिकः, निबन्धको लेखकः, प्रतिग्राहकः प्रतिग्रहीता, दायकः करदः, दापकः राजपुरुषः, मन्त्री युक्तस्य धीसचिवः, मन्त्रिवैयावृत्त्यकरः मन्त्रिणः कर्मकरः। मिथ्येत्यादि। मिथ्यावादे च, एषाम् उपयुक्तादीनां, युक्तसमः अध्यक्षतुल्यो, दण्डः। प्रचारे च जनपदे च, अवघोषयेत् सपटहताडमवख्यापयेत्, केन प्रकारेण, अमुना प्रकृतेन अध्यक्षेण, उपहताः उत्कोचग्रहणादिना पीडिता जनाः, प्रज्ञापयन्तु आवेदयन्तु स्वां स्वां पीडामित्यार्थम्, इति अनेन प्रकारेण। प्रज्ञापपयतः जनस्य, यथोपघातम् उपघातानुरोधेन, दापयेद् द्रव्यम्। अनेकेष्विति। अनेकेष्वभियोगेषु उपघातावेदनेष्वनेककृतेषु युगपत् प्राप्तेषु सत्सु, अपव्ययमानः सर्वमुपघात-

मात्मकृतमनभ्युपगच्छन् युक्तः, सकृदेव परोक्तः एकत्राभियोगे एकेनाभियोक्त्रा साक्ष्यादिभिर्विभावितः पराजितः, सर्वं भजत सर्वाभियोगार्थं यथाभागं दद्यात्। वैषम्य इति। अनेकेष्वभियोगेष्वेकत्र संप्रतिपत्तिरितरत्र विप्रतिपत्तिश्च वैषम्यं तस्मिन्, सर्वत्रानुयोगं दद्याद् विप्रतिपन्नेषु सर्वेष्वभियोगेषु साक्षिप्रश्नावसरं दद्याद् रागद्वेषादिनिमित्तमिथ्याभियोगशङ्कापनुत्तये। एकाभियोक्तृविषयमाह–महतीति। महति अर्थापहारे, प्रभूतस्वर्णरजतादिनानार्थापहारे केनचित् प्रज्ञापिते, अल्पेनापि सिद्धः एकदेशेनापि साक्ष्यादिभिर्विभावितापचारः, सर्वं भजेत अभियोगविषयं कृत्स्नमर्थं दद्याद्, अर्थाद् विप्रतिपद्यमानो युक्तः।

If there is doubt (regarding theft) the officers concerned (who are eight in number as given under) may each be questioned separately and severally. They (the officers) are—upayukta (supervisor), nidhāyaka (treasurer), nibandhaka (accountant), pratigrāhaka (receiver), dāyaka (payee), dāpaka (royal servant), mantrī (advisor), and vaiyāvṛttikara (clerk under the advisor). In case false representation (of facts) all others deserve fine as in the case of the supervisor himself. Further it should be announced to the public to the effect that "whoever has suffered at the hands of this offender may make their grievances known to the king." Those who prefer complaints shall be given such compensation as is equal to the loss they have sustained. When several such complaints are preferred against a single officer, who in turn refuses to admit his guilt, and on cross examination admits to any one of the complaint, he shall be held liable to all charges of guilt preferred. When a particular complaint could not be proved to be true, he shall then be tried for each of the charges separately. When an officer misappropriates a part of the whole amount he shall be answerable to the whole.

कृतप्रतिघातावस्थः सूचको निष्पन्नार्थः षष्ठमंशं लभेत, द्वादशमंशं भृतकः। प्रभूताभियोगादल्पनिष्पत्तौ निष्पन्नस्यांशं लभेत। अनिष्पन्ने शारीरं हैरण्यं वा दण्डं लभेत, न चानुग्राह्यः।

निष्पत्तौ निक्षिपेद् वादमात्मानं वापवाहयेत्।
अभियुक्तोपजापात् तु सूचको वधमाप्नुयात्।।

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे अष्टमोऽध्यायः
समुदयस्य युक्तापहृतस्य प्रत्यानयनम्, आदितः एकोनत्रिंशः।।

कृतप्रतिघातेत्यादि। सूचकः अध्यक्षापचारपिशुनः, कृतप्रतिघातावस्थः कृतः स्वीकृतः प्रतिघातावस्थः प्रतिघातार्थोऽवस्थः अध्यक्षोत्पाद्यानर्थप्रतीकारार्थः प्रतिभूर्येन स तथाभूतः भवेदिति शेषः, यद्यध्यक्षापचारं कश्चित् सूचयेत् स प्रतिघातप्रातिभाव्यं गृहीत्वैव सूचयेदित्यर्थः। स निष्पन्नार्थः सिद्धसूचितार्थः, षष्ठमंशं लभेत, साधिताद् धनात्। द्वादशमिति। भृतकः भृत्यः सूचकः, द्वादशमंशं लभेत। **प्रभूतेत्यादि।** बहुप्रकारद्रव्यविषयेऽभियोगे प्रभूताभियोगाद् अभियोगाविषयबहुप्रकारद्रव्यमध्याद्, अल्पनिष्पत्तौ अल्पस्यैव साक्ष्यादिभिः संसिद्धौ, निष्पन्नस्यांशं लभेत सूचकः। **अनिष्पन्न** इति। अनिष्पन्ने अभियुक्तेऽर्थे सर्वथैवासंसिद्धे

सति, शारीरं हैरण्यं वा दण्डं मिथ्याभियोगनिमित्तं दमं, लभेत, न चानुग्राह्यः न च रक्षणीयः, निर्दोषविसृष्टाध्यक्षप्रभवेभ्योऽनर्थेभ्य इत्यार्थम्।

निष्पत्ताविति। निष्पत्तौ सूचितार्थसत्यत्वसिद्धौ, वादम् अभियोगं, निक्षिपेद् विरमयेत् सूचकः, आत्मानं वा अपवाहयेत् आत्मानं चाभियोगबन्धान्मोचयेत्, अनिष्पत्तौ वादपरिसमापनमात्ममोचनं वा सूचकेन कर्तुमशक्यमित्यभिप्रायः। भट्टस्वामी तु 'निष्पत्तौ सूचितार्थसंसिद्धौ, निक्षिपेद् अन्यत्र दूष्यादौ सञ्चारयेद्, वादं सूचकत्वापवादम्। आत्मानं वापवाहयेद् अहमेतस्मिन् काले विषयेऽत्र नासमिति प्रख्यापयेद्' इति व्याचष्टे। यदि तु अभियुक्तेनाध्यक्षेण लञ्चोपप्रलोभनाद्युपायैर्भेदं नीतः सूचकः स्वाभियुक्तार्थासाधकं राजान्तिके ब्रूयात्, तदा स वधदण्डमर्हतीत्याह—**अभियुक्तेत्यादि**।

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टमोऽध्यायः समुदयस्य युक्तापहृतस्य प्रत्यानयनम्, आदित
एकोनत्रिंशः॥

A sūcaka (an informant who reports about the embezzlement) who supplies information on a crime under perpetration shall, if his information proves true and helpful, get a reward of one-sixth of the amount in question. If the one happens to be a government servant the reward shall be limited to one-twelfth of the amount. If the informant proves helpful only partially he shall be rewarded according to the ratio of usefulness with regard to the embezzled sum. He who supplies a wrong information shall not only be fined in gold coins, but also shall be given corporal punishment and under no circumstances he shall be let off.

If the charge is proved the informant may impute the version to some one else and report that he has heard so in confidence (in order to clear himself of any blame). Any one who withdraws an earlier assertion regarding an embezzlement under pressure from the accused shall be condemned to death.

Thus the twentyninth chapter of the Arthaśāstra of Kauṭalya entitled detection of embezzled revenue comes to an end. Here ends the eighth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 30

27. प्रक० उपयुक्तपरीक्षा।

Section 27 : Test of the Conduct of Employees

अमात्यसम्पदोपेताः सर्वाध्यक्षाः शक्तितः कर्मसु नियोज्याः। कर्मसु चैषां नित्यं परीक्षां कारयेत् चित्तानित्यत्वान्मनुष्याणाम्। अश्वसधर्माणो हि मनुष्या नियुक्ताः कर्मसु विकुर्वते।

तस्मात् कर्तारं करणं देशं कालं कार्यं प्रक्षेपमुदयं चैषु विद्यात् ते यथासन्देशमसंहता अविगृहीताः कर्माणि कुर्युः, संहता भक्षयेयुः विगृहीता विनाशयेयुः। न चानिवेद्य भर्तुः किञ्चिदारम्भं कुर्युरन्यत्रापत्प्रतीकारेभ्यः। प्रमादस्थानेषु चैषामत्ययं स्थापयेद् दिवसवेतनव्ययद्विगुणम्।

उपयुक्तपरीक्षेति सूत्रम्। उपयुक्त युक्तानामुपरि नियुक्ताः प्रत्ययितपुरुषाः, औपरिका इति ये व्यपदिश्यन्ते, तेषां परीक्षा दोषगवेषणेति सूत्रार्थः। युक्तापहृतप्रत्यानयनोक्त्या गताध्याये युक्तानां परीक्षणीयत्वमवगतं, तत् किमुपयुक्तानामप्यस्ति, उत नेति सन्देहे प्रकरणमिदमारब्धमिति सङ्गतिः।

अमात्येत्यादि। अमात्यसम्पदोपेताः 'जानपदोऽभिजात' इत्युक्तजानपदत्वादिगुणसमृद्धियुक्ताः। एतेनार्थोपधाशुद्धियोगमात्रेण नालमिति सूचितम्। सर्वाध्यक्षाः सर्वे अध्यक्षा उपयुक्ता युक्ताश्च, शक्तितः तत्तत्कर्मसामर्थ्यानुसारेण, कर्मसु नियोज्याः। एषां कर्मसु च, परीक्षां दोषगवेषणां नित्यं कारयेत्। अर्थोपधाशुद्धानामेव कर्मसु नियोक्तव्यत्वस्य प्रागभिधानान्नियोगानन्तरं पुनः परीक्षायाः किं कारणं, तत्राह–**मनुष्याणां चित्तानित्यत्वादिति।** मनुष्यचित्तं स्वभावादव्यवस्थितं यतः। स्वाभाविकचित्तानित्यत्वमुक्त्वावस्थाविशेषभवमाह–**अश्वेत्यादि।** यथाहि अश्वा रथवहनकर्मानियोगदशायां साधुशीला एव सन्तस्तन्नियोगदशायां विकारं प्राप्नुवन्ति, एवं कर्मसु अनियोगदशायां सुशीला एव परिदृष्टाः नियोगदशायां शीलवैकृतं प्राप्नुवन्तीत्यर्थः।

तस्मादिति। तस्मात् यथोक्तात् कारणात्, कर्तारम् अध्यक्षं, करणं धर्माद्यधिकरणम् अनुष्ठानं वा, देशं स्थानीयादिकं, कालम् अहोरात्रादिं दुर्भिक्षकालादिं वा, कार्यं करणीयं, प्रक्षेपं कर्मकरभृतिम्, उदयं लाभं च, एषु अध्यक्षेषु विषये, विद्यात्। ते अध्यक्षाः, यथासन्देशं स्वाम्यादेशानतिक्रमेण, असंहता अकृतान्योन्यसङ्केताः, अविगृहीताः अकृतान्योन्यविरोधाः, कर्माणि कुर्युः। संहतिविग्रहयोर्दोषमाह–**संहता इत्यादि।** कर्माणीत्यनुवर्तते। कर्माणि भक्षयेयुः कर्मफलान्यपहरेयुः। कर्माणि विनाशयेयुः निष्फलीकुर्युः। स्वामिनमपृष्ट्वा न कमपि कर्मविशेषमग्निजलादिनिमित्तविषत्प्रतीकारातिरेकेण कुर्युरित्याह–न

चानिर्वेद्येत्यादि। प्रमादेत्यादि। एषाम् अध्यक्षाणां, प्रमादस्थानेषु स्त्रीमद्यादिव्यसनेषु दृष्टेषु, अत्ययं दण्डं, स्थापयेत् सद्य एव प्रयुञ्जीत। कियन्तं स्थापयेत्, दिवसवेतनव्ययद्विगुणं दिवसवेतनस्य प्रमाददिवससम्बन्धिनोऽध्यक्षवेतनस्य दिवसव्ययस्य प्रमादनिमित्तकतद्दिवसकर्मादर्शनजन्यस्यार्थनाशस्य च द्विगुणम्।

All supervisory officers (as also their assistants) may be appointed with due consideration of their administerial qualifications in appropriate jobs. They should be constantly under observation as to how they are discharging their duties, since people are generally fickle-minded. Like horses, they exhibit change of temper every now and then

Hence one should ascertain the nature (or character) of the supervisors, the agency which they make use of, place, time, function, the outlay of the work and resultant profit, so that they together will carry out the orders of the king independently and without dissension. If they join together they are likely to eat up the revenue and if they are opposed to each other, they will mess up the functions. They should not embark on their own on any activity without informing their master unless if happens to be an emergency. Any inadvertent action on their part against the normal rule shall be punished with the fine of twice a day's salary.

यश्चैषां यथादिष्टमर्थं सविशेषं वा करोति सस्थानमानौ लभेत।

अल्पायतिश्चेन्महाव्ययो भक्षयति। विपर्यये यथायतिव्ययश्च न भक्षयति इत्याचार्याः। अपसर्पेणैवोपलभ्यते इति कौटल्यः।

यश्चैषामिति। एषाम् अध्यक्षाणां मध्ये, यः, अर्थं राजकार्यं, यथादिष्टं करोति स्वाम्युपदिष्टप्रकारकं निष्पादयति, सविशेषं वा करोति आदिष्टाभ्यधिकगुणयुक्तं वा निष्पादयति, सः, स्थानमानौ लभेत प्रकृष्टं पदान्तरं पूजां च प्राप्नुयात्।

राजार्थजानपदार्थग्रसनाग्रसनोपलम्भेऽभ्युपायाकाङ्क्षायां व्ययमहत्त्वाल्पत्वसमत्वलिङ्गकमनुमानमाचार्या अभ्युपायं मन्यन्त इत्याह–अल्पेत्यादि। अल्पायतिरल्पधनागमः, महाव्ययश्चेद् अनल्पार्थोपभोगो यदि भवेत्, तदा सः भक्षयति राजप्रजार्थमुपजीवति। विपर्यये यथायतिव्ययश्च महायतित्वे सत्यल्पव्यय आयत्यनुरूपव्ययश्च, न भक्षयति। इत्याचार्याः। स्वमतमाह–अपसर्पेणैवेति। अपसर्पेणैवोपलभ्यते चारद्वारेणैव दुष्टादुष्टत्वमध्यक्षाणां निश्चीयते 'त्रयाणामेकवाक्ये संप्रत्यय' इति गूढपुरुषप्रणिध्युक्तदिशेत्यर्थः। एवकारेण महाव्ययत्वाल्पव्ययत्वयोरुपलब्ध्युपायत्वं व्यवच्छिद्यते। ते ह्यल्पायतेरपि महाकुटुम्बिन उद्धारग्रहणेन महाव्ययत्वदर्शनात् प्रभूतराजप्रजाद्रव्यापहारिणोऽपि सहजकृपणतयाल्पव्ययत्वदर्शनाच्च व्यभिचरिते इत्यभिप्रायः।

Among the officers the he who performs his duty exceptionally well and collects more than the usual revenue shall be rewarded with promotions and honours.

According to Ācāryas (preceptors) the officer who spends too much despite having a limited income is likely to eat up the revenue. On the other hand he who spends within revenue received will not eat up. According to Kauṭalya this fact can be ascertained only through the employment of spies.

यः समुदयं परिहापयति स राजार्थं भक्षयति। स चेदज्ञानादिभिः परिहापयति तदेनं यथागुणं दापयेत्।

यः समुदयं द्विगुणमुद्भावयति स जनपदं भक्षयति। स चेद् राजार्थमुपनयत्यल्पापराधे वारयितव्यः, महति यथापराधं दण्डयितव्यः।

यः समुदयं व्ययमुपनयति स पुरुषकर्माणि भक्षयति। स कर्मदिवसद्रव्यमूल्य-पुरुषवेतनापहारेषु यथापराधं दण्डयितव्यः।

यः समुदयमिति। यः, समुदयं द्रव्योत्पत्तिं, परिहापयति न्यूनयति, स राजार्थं भक्षयति। सः, अज्ञानादिभिः अज्ञानालस्यभयप्रमादकामकोपदर्पलोभैर्गाणनिक्याधिकारोक्तैः, परिहापयति चेद्, एनं, तद् हापितं द्रव्यं, यथागुणं द्विगुणं त्रिगुणम् अधिकगुणं वा अपराधानुसारिगुणं, दापयेत्।

यः समुदयं द्विगुणमिति। यः समुदयं, द्विगुणं क्लृप्तादधिकम्, उद्भावयति, सः, जनपदं भक्षयति कथमन्यथा समुदयाधिक्यमिति। राजार्थम् उपनयति चेत् स्वोद्भावितमधिकं साकल्येन राज्ञेऽर्पयति चेत्, तर्हि, अल्पापराधे अल्पेऽपराधे जनपदपीडने, वारयितव्यः 'मा पुनरेवं जानपदेभ्यः क्लृप्ताधिकमुद्भावये'ति प्रतिषेद्धव्यः। महति द्विगुणत्रिगुणाद्युद्भावनरूपे कोशक्षयफलकजनपदकर्शनहेतावपराधे स्वयमपहरणरूपे च, यथापराधं दण्डयितव्यः। यदुक्तं–

यथान्नकर्शनात् प्राणाः क्षीयन्ते सर्वदेहिनाम्।
तथा कोशा नरेन्द्राणां क्षीयन्ते राष्ट्रकर्शनात्।। इति।

यः समुदयं व्ययमिति। यः, व्ययं कर्मार्थव्ययाय क्लृप्तं धनं, समुदयम् उपनयति समुदये प्रवेशयति व्ययितमकृत्वेत्यार्थ, सः, पुरुषकर्माणि भक्षयति पुरुषान् कर्मकरान् कर्माणि च नाशयति कर्माननुष्ठापनेन। तस्य दण्डमाह–स इति। सः, कर्मदिवसद्रव्यमूल्यपुरुषवेतनापहारेषु कर्मार्थदिवसस्य यद् द्रव्यं तद्दिवसकर्मसाध्यं फलं तस्य मूल्यं कल्पितः कश्चिदर्घः कर्मदिवसद्रव्यमूल्यं पुरुषवेतनं पुरुषाणां कर्मकराणां वेतनं कर्मदिवसद्रव्यमूल्यस्य पुरुषवेतनस्य च अपहारेषु विनाशनेषु, यथापराधम् अपराधानुसारेण दण्डमितव्यः कर्मदिवसद्रव्यमूल्यं कर्मकरपुरुषवेतनं च यावत् कर्माकरणेन हापितं तावद् दापयितव्य इत्यभिप्रायः।

He who causes the depletion in revenue eats up the wealth of the king. If he causes the loss due to ignorance he shall be asked to make good the loss of revenue.

He who doubles the receipt of the income naturally eats into the finance of the people.

If he brings in the extra income to the account of the king he shall be let off with a warning not to repeat the offence, but if the offence is of

greater proportion he shall be punished according to the graveness of the offence.

He who does not spend the income for the specific purposes to which it is earmarked he eats into job of the labourers and leaves the job undone. He shall be punished with fine equal to the wages of a day as also the income of the day and as such needs to be punished according to the offence.

तस्मादस्य यो यस्मिन्नधिकरणे शासनस्थः स तस्य कर्मणो याथातथ्यमायव्ययौ च व्याससमासाभ्यामाचक्षीत।

मूलहरतादात्विककदर्यांश्च प्रतिषेधयेत्। यः पितृपैतामहमर्थमन्यायेन भक्षयति स मूलहरः। यो यद्यदुत्पद्यते तत्तद् भक्षयति स तादात्विकः। यो भृत्यात्मपीडाभ्यामुपचिनोत्यर्थं स कदर्यः। स पक्षवांश्चेदनादेयः, विपर्यये पर्यादातव्यः।

यो महत्यर्थसमुदये स्थितः कदर्यः सन्निधत्ते, अवनिधत्ते, अवस्रावयति वा—सन्निधत्ते स्ववेश्मनि, अवनिधत्ते पौरजानपदेषु, अवस्रावयति परविषये—तस्य सत्री मन्त्रिमित्रभृत्यबन्धुपक्षमागतिं गतिं च द्रव्याणामुपलभेत।

तस्मादिति। तस्मात् समुदयविषयेऽपराधे दण्डविधानात्, योऽध्यक्षः, यस्मिन्नधिकरणे, शासनस्थो नियुक्तः, सः, तस्य कर्मणः तदधिकरणसम्बद्धस्य कर्मणः, याथातथ्यं यथास्थितिम्, आयव्ययौ च, व्याससमासाभ्यां संक्षेपविस्ताराभ्याम्, अस्य राज्ञः, आचक्षीत निवेदयेत्।

मूलहरेत्यादि। मूलहरतादात्विककदर्यान् प्रतिषेधयेत् मूलहरणादिकर्मणो वारयेत्। के पुनर्मूलहरादय इत्यत्राह—**यः पितृपैतामहमिति।** यः, पितृपैतामहं पितृपितामहार्जितम्, अर्थम्, अन्यायेन भक्षयति दुर्विनियोगेन नाशयति, स मूलहरः। यद्यदुत्पद्यते प्रत्यहं लभ्यते, तत्तद् यः, भक्षयति दुर्विनियोगेन नाशयति, स तादात्विकः। यः भृत्यात्मपीडाभ्याम् अर्थम्, उपचिनोति वर्धयति, स कदर्यः। प्रतिषेधानन्तरमपि मूलहरणाद्यनुवृत्तावाह—**स इति।** यः मूलहराद्यन्यतमः, पक्षवांश्चेत् पक्षो बन्धुसम्पत् तद्वान् यदि, अनादेयः अग्राह्यः तद्बन्धुकोपपरिहारार्थमगृहीतधन एव स्थानादवरोपणीय इत्यर्थः। विपर्यये पक्षवत्त्वाभावे, पर्यादातव्यः सर्वस्वं हर्तव्य इत्यर्थः।

यो महतीति। यः कदर्यः महति अर्थसमुदये स्थितः सन्, सन्निधत्ते अवनिधत्ते अवस्रावयति वा, तत्र सन्निधानावनिधानावस्रावणानि विवृणोति—स्ववेश्मनि सन्निधत्ते भूगर्तस्तम्भकोटरादिषु स्थापयति, पौरजानपदेषु अवनिधत्ते रक्षणार्थं निक्षिपति, परविषये अवस्रावयति शत्रुजनपदे धनसञ्चारणं करोति, तस्य अध्यक्षस्य, मन्त्रिमित्रभृत्यबन्धुपक्षं मन्त्र्यादिचतुष्टयबलं, द्रव्याणामागतिं गतिं च, सत्री गूढपुरुषप्रणिध्युक्तलक्षणः, उपलभेत।

Hence the supervising officer of a department shall (report to the king) the true state of income and expenditure, both succinctly and in detail (as the occasion demands).

He shall also check prodigals, spend-thrifts and niggardly persons. A prodigal is the one who eats up the property inherited from his father

or grand father He who spends all that is caused day by day is a spendthrift. He who keeps to himself the money putting in much hardships without spending for his own use or for his servants is called niggardly. If he happens to have people to support he need not be deprived of the wealth but shall necessarily be dismissed from the post. On the other hand his wealth shall be confiscated.

A niggardly person inspite of having immense wealth hoards, deposits or distributes;—hoards in his own house, deposits with citizens and villagers, or distributes in foreign countries, shall be subjected to espionage by classmate spies regarding his strength (or influence) among ministers (advisors) friends, servants and relatives as well as the sources of his income and expenditure.

यश्चास्य परविषये सञ्चारं कुर्यात् तमनुप्रविश्य मन्त्रं विद्यात्। सुविदिते शत्रुशासनापदेशेनैनं घातयेत्।

तस्मादस्याध्यक्षाः सङ्ख्यायकलेखकरूपदर्शकनीवीग्राहकोत्तराध्यक्षसखाः कर्माणि कुर्युः।

उत्तराध्यक्षा हस्त्यश्वरथारोहाः। तेषामन्तेवासिनः शिल्पशौचयुक्ताः सङ्ख्यायकादीनामपसर्पाः।

बहुमुख्यमनित्यं चाधिकरणं स्थापयेत्।

यश्चेति। यश्च परविषये, अस्य कदर्यस्य, सञ्चारं द्रव्यसञ्चारणं कुर्यात्, तम्, अनुप्रविश्य अनुकूलतया प्रविश्य तन्मित्रं तद्भृत्यो वा भूत्वेत्यर्थः, मन्त्रं विद्यात् अभिसन्धिरहस्यं जानीयात् सत्री। सुविदित इति। सुविदिते सत्रिद्वारेण सम्यग् विज्ञाते मन्त्रे, एनं कदर्यं, शत्रुशासनापदेशेन घातयेत् शत्रुणा कदर्यमभिसम्बुध्य प्रहितं 'प्रेषितोऽर्थः प्रतीष्टः, अवशिष्टः क्षिप्रं प्रेष्यतामि'ति लिखितवृत्तान्तं किमपि लेख्यं शत्रुविषयागतजनहस्तादन्तपालेन गृहीतोपनीतमित्येवं कूटसृष्टस्यैव शत्रुशासनस्य अपदेशेन प्रख्यापनेन हतं कारयेत्।

तस्मादिति। तस्माद् राजद्रव्यापहारे यथोक्तदण्डविधानात्, अध्यक्षाः, अस्य राज्ञः, कर्माणि धनसम्बद्धानि कार्याणि, संख्यायाकलेखकरूपदर्शनकनीवीग्राहकोत्तराध्यक्षसखाः कुर्युः संख्यायकादिसाक्षिकाः सन्तः कुर्युः। संख्यायकाः गणकाः, लेखकाः प्रसिद्धाः, रूपदर्शकाः निष्कदीनारादिरूपपरिशोधकाः, नीवीग्राहकाः व्ययितशिष्टधनग्रहणाधिकृताः, उत्तराध्यक्षाः, उत्तराध्यक्षा औपरिकाः।

के पुनरुत्तराध्यक्षाः कर्तव्या इत्यत्राह—उत्तरेत्यादि। हस्त्यश्वरथारोहाः हस्त्यारोहा अश्वारोहा रथारोहाश्च वृद्धभावादिना युद्धाक्षमत्वं प्रतिपन्नाः, उत्तराध्यक्षाः कर्तव्याः। तेषामिति। तेषाम् उत्तराध्यक्षाणां, शिल्पशौचयुक्ता अन्तेवासिनः शिल्पं नियोगानुष्ठानकौशलं शौचं स्वकृत्याविसंवादनं ताभ्यामुपेताः शिष्याः, संख्यायकादीनामपसर्पाः संख्यायकलेखकादिप्रवृत्त्युपलम्भार्था गूढपुरुषाः कर्तव्याः।

बह्वित्यादि। अधिकरणं युक्तकर्मस्थानं, बहुमुख्यं स्थापयेत् बहवो मुख्याः प्रधाना यस्मिंस्तत् तथाभूतं

कुर्यात्, बहवश्चेत् प्रधानास्तेऽन्योन्यशङ्किता राजाद्यर्थं नापहरन्तीति। अनित्यं च स्थापयेत् अनित्यं न विद्यते नित्यः स्थिरश्चिरस्थायी युक्तो यस्मिंस्तत् तथाभूतं च कुर्यात्। नित्यो हि युक्तश्चिरसंवाससुलभां मित्रसम्पदमवष्टभ्यात्मदोषान् निह्नुवीत, जानपदाश्च तस्य दोषान् कालान्तरात्मापकारभिया नाविष्कुर्युरिति।

(The classmate-spy) shall befriend himself with the man who helps the niggardly person to spend the wealth in the enemy country and know the secret (or purpose) of such spending. Once the purpose is well-established, a concoted record or statement is to be made to implicate him and on that basis he shall be put to death.

This being the case the officers of the king shall perform their functions relating to finances in consultation with (or taking into confidence) the accountants, writers, coin examiners, treasurers and supervisory officers.

These supervisory officers belong to the category of supervisors of the the army divisions of elephants, cavalry and chariots (who themselves being old do not take active part in a fight). Their disciples noted for their honesty and good conduct shall be mades spies to watch the conduct of accountants and other clerks.

Each department shall be headed by several supervisory persons whose tenure in the (particular) post shall be temporary.

यथा ह्यनास्वादयितुं न शक्यं
जिह्वातलस्थं मधु वा विषं वा।
अर्थस्तथा ह्यर्थचरेण राज्ञः
स्वल्पोऽप्यनास्वादयितुं न शक्यः।।
मत्स्या यथान्तस्सलिले चरन्तो
ज्ञातुं न शक्याः सलिलं पिवन्तः।
युक्तास्तथा कार्यविधौ नियुक्ता
ज्ञातुं न शक्या धनमाददानाः।।
अपि शक्या गतिर्ज्ञातुं पततां खे पतत्रिणाम्।
नतु प्रच्छन्नभावानां युक्तानां चरतां गतिः।।
आस्त्रावयेच्चोपचितान् विपर्यस्येच्च कर्मसु।
यथा न भक्षयन्त्यर्थं भक्षितं निर्वमन्ति वा।।

अध्यायान्ते श्लोकानाह—यथाहीत्यादि। अनास्वादयितुं न शक्यम् अर्थादास्वादनपरिहारमिच्छतापि। अशक्यत्वोपपादकमाह—जिह्वातलस्थमिति। विनापि पुरुषयत्नेन तदुदरप्रवेशं यद्देशसन्निकर्षे लभेत तद्देशनित्यसन्निहितमित्यर्थः। अर्थ इति। योऽत्यल्पत्वाद् भक्षितविज्ञातोऽप्यनर्थापर्यवसायी मधुस्थानीयो, यश्च महत्त्वाद् वधदण्डान्तपरमानर्थपर्यवसायी विषस्थानीयः, स उभयविधोऽपि अर्थचरः अर्थेषु व्याप्रियमाणोऽध्यक्षः। तदेवमर्थभक्षणस्याध्यक्षदुष्परिहरत्वमनेनोक्तम्।।

कृतगप्यध्यक्षैरर्थभक्षणं जलचरमत्स्यजलपानवद् गगनचरपक्षिगतिवच्च स्वामिना दुखबोधमिति श्लोकद्वयेनाह—**मत्स्या यथान्तरिति अपि शक्या गतिरिति** च।।

अत एतेषु राजा किं कुर्यात्, तत्राह—**आस्त्रावयेदिति**। उपचितान् अर्थभक्षणसमृद्धान् अध्यक्षान्, आस्त्रावयेद् भक्षितमर्थमाहारयेद् उपचयरूपेण लिङ्गेनापसर्पाद्युपायेन च तदपचारमवगम्येत्यार्थम्। कर्मसु विपर्यस्यत् व्यत्ययेन निवेशयेद् उच्चकर्मस्थानेभ्योऽवरोप्य नीचकर्मस्थानेषु नियुञ्जीतेत्यर्थः। आस्त्रावणविपर्यसनभयाच्चाध्यक्षा अर्थभक्षणे न प्रवर्तन्ते, भक्षितं चार्थं प्रत्याहरन्तीत्यभिप्रायेणाह—**यथेत्यादि**। तथा आस्त्रावयेदित्येवं पूर्वार्धेन सम्बन्धः। सोऽयमर्थभक्षकविषयो विधिः प्रपञ्चितः।।

Just as it is impossible not to taste the drop of honey or poison that is placed on the tongue, so it is impossible not to swallow at least a bit of royal revenue. Just as it is impossible to know the fishes that move in the depth of water it is impossible to detect the misappropriation of government servants dealing with the revenue.

It is possible to follow the movements of birds that traverse the sky, but it is impossibles to know the movements of the officers who resort to deception (or conceal their emotions).

The wealth misappropriated by the governement servants shall be confiscated without giving them an opportunity to eat it up or to discard it (as if by vomiting).

न भक्षयन्ति ये त्वर्थान् न्यायतो वर्धयन्ति च।
नित्याधिकाराः कार्यास्ते राज्ञः प्रियहिते रताः।।

।। कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
नवमोऽध्यायः उपयुक्तपरीक्षा, आदितस्त्रिंशः।।

ये पुनरर्थचरा अपि सन्तो महान्तं यत्नमास्थाय राजजानपदार्थं न भक्षयन्ति, प्रत्युत न्यायतः परिवर्धयन्ति, तथाविधा राजप्रियहितानुष्ठानपराः स्थिराधिकाराः कर्तव्या इत्याह—**न भक्षयन्तीत्यादि**।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
नवमोऽध्यायः उपयुक्तपरीक्षा, आदितस्त्रिंशः।।

Those officers who do not eat up revenue and tend to replenish it by righteous means shall be given a permanent tenure since they are always bent on pleasing the king.

Thus the thirtieth chapter of the Arthaśāstra of Kauṭalya entitled 'test of the conduct of employees' comes to an end. Here ends the ninth chapter of the second Adhikaraṇa called Adhyakṣaprasāra.

Chapter 31

28. प्रक० शासनाधिकारः।

Section 28 : Procedure for Issuing writs

शासने शासनमित्याचक्षते। शासनप्रधाना हि राजानः, तन्मूलत्वात् सन्धिविग्रहयोः।

तस्मादमात्यसम्पदोपेतः सर्वसमयविदाशुग्रन्थश्चार्वक्षरो लेखवाचनसमर्थो लेखकः स्यात्। सोऽव्यग्रमना राज्ञः सन्देशं श्रुत्वा निश्चितार्थं लेखं विदध्याद्, देशैश्वर्यवंशनामधेयोपचारमीश्वरस्य, देशनामधेयोपचारमनीश्वरस्य।

शासनाधिकार इति सूत्रम्। शासनं नाम लिखितकार्यार्थं तालपत्रादि, तस्याधिकारो विधिरुच्यत इति सूत्रार्थः। 'अर्धगुणहीनः शासनहरः' इति शासनं यत् सूत्रितं दूतप्रणिधौ तदिह निरूप्यत इति सङ्गतिः।

किं तच्छासनमित्याह–**शासने शासनमित्याचक्षत** इति। पत्रारूढोऽर्थः शासनं तस्मिन् शासनमिति व्यपदेशं कुर्वन्त्याचार्याः, नतु सन्दिष्टेऽर्थे वाचिकाख्ये इत्यर्थः। कुतः पुनः शासनवाचिकयोर्मध्ये शासनस्य निरूपणादरो नतु वाचिकस्येत्याकाङ्क्षायामाह–**शासनेत्यादि**। सन्धिविग्रहयोरिति षाड्गुण्योपलक्षणम्। तेनायमर्थः–हि यस्माच्छासनमेव राज्ञां मन्त्रगुप्तिपुरस्सरषाड्गुण्यव्यापाराव्यभिचारनिर्वाहकतया प्रधानं, वाचिकं तु सन्देशहरगतप्रमादादिदोषसम्भावितमन्त्रभेदतया व्यभिचारित्वान्न प्रधानमिति।

शासनस्य प्रधानत्वाद् विशिष्टगुण एव तल्लेखको भवितुमर्हतीत्याह–**तस्मादित्यादि**। तस्माद्, अमात्यसम्पदोपेतः 'जानपदोऽभिजात' इति मन्त्रिपुरोहितोत्पत्तिप्रकरणोक्ताः पञ्चविंशतिर्जानपदत्वादयो गुणा अमात्यसम्पत् तया युक्तः, सर्वसमयवित् सर्वेषां वर्णानाम् आश्रमाणां वर्णातिरिक्तानां अचाराभिज्ञः, आशुग्रन्थः शीघ्रवाक्यसन्दर्भप्रसरः, चार्वक्षरः चारूणि एकैकशः समुदायतश्च दर्शनीयान्यक्षराणि लिपयो यस्य सः, लेखवाचनसमर्थः लेखस्य स्फुटसुस्वरयथास्थानवाक्यविश्रमसुभगपठनप्रवीणः, लेखस्याप्रकाश्यार्थस्य संज्ञालेखस्य वर्जिताक्षरस्य पदवाक्यसंकेतितलेखाविशेषात्मकस्य वाचने व्यवहारे समर्थ इत्यपरे। एवमेकोनत्रिंशता गुणैर्युक्तो लेखकः स्यात्। स च लेखको राज्ञोच्यमानं वाचिकमनाकुलेन मनसा श्रुत्वार्थान् पौर्वापर्यक्रमेण परलेखार्थानुगुण्यानानुगुण्याभ्यां च निश्चित्य लेखं लिखेदित्याह– **सोऽव्यग्रेत्यादि**। तत्र युक्तानामव्यग्रमनस्कता राजसत्काराद् भवति। यदाहुः–

> नीचापि बुद्धिर्नृपमानयोगाच्छ्रेष्ठत्वमायाति तदाश्रितानाम्।
> अग्र्यापि निर्वाति हि मानहीना स्नेहं विना दीपशिखेव तूर्णम्।।

इति। परलेखानुरूप्यानानुरूप्यनिश्चयविषयेऽपि श्लोकमुदाहरन्ति–

श्रुत्वा नरेन्द्रवाक्यं परभावं चावधार्य परलेखात्।
लेख: खलु कर्तव्यो गुणदोषविनिश्चयज्ञेन।।

इति। कीदृशं विदध्यात्, ईश्वरस्य राज्ञ:, देशैश्वर्यवंशनामधेयोपचारं देशादीनां चतुर्णामुपचारो यस्मिंस्तं तथाभूतम्। तत्र देशोपचारोऽध्युष्यमाणदेशनिर्देशेनोपचार:, यथा–मध्यदेशमलङ्कुर्वाणमिति। ऐश्वर्योपचार: भूकोशदण्डसम्पन्निर्देशोपचार: 'मध्यदेशाधिपतिमसंख्याताप्रतिहतदण्डक्षपितरिपुपक्षम्' इत्येवञ्जातीय:। वंशोपचार: 'सोमान्वयभूषणम्' इत्येवम्प्रकार:। नामधेयोपचार 'महाराजाधिराजश्रीसिंहवर्मदेवम्' इत्येवञ्जातीय: अनीश्वरस्य अमात्यादे:, देशनामधेयोपचारं देशोपचारनामोपचारयुक्तम्। तत्र देशोपचार: 'कान्यकुब्जमलङ्कुर्वाणम्' इत्यादि:। नामोपचार: 'श्रीसोमदत्तमि'त्यादि:।

The word 'Śāsana'—command—(according to authorities) stands for royal writs (written down on materials like palm-leaf). Kings are accustomed to issue writs since they form the basis for treaties and wars.

Hence a writer (lekhaka) shall possess the qualifications of a minister be acquainted with all kinds of customs, proficient in compossition, good in handwriting (legible) and sharp in reading. He having listened to the dictates of the king with attention write down the content, noting the details of the addressee like the country, prosperity, royal line, name etc. (of the lord) and in case the addressee is a commoner his country and name alone will do.

जातिं कुलं स्थानवयश्श्रुतानि कर्मर्द्धिशीलान्यथ देशकालौ।
यौनानुबन्धं च समीक्ष्य कार्ये लेखं विदध्यात् पुरुषानुरूपम्।।

जातिकुलाद्येकादशकमपि लेखविधौ समीक्षणीयमित्याह–जातिमित्यादि। तत्र जातिर्ब्राह्मणादि:। तत्समीक्षा च ब्राह्मणो ब्राह्मणस्य ज्यायसोऽभिवादपूर्वं कनीयस आशीर्वचनपूर्वं क्षत्रियस्य स्वस्त्यादिपदपूर्वं, क्षत्रियादिर्ब्राह्मणस्य प्रणामपूर्वमित्येवञ्जातीया। कुलम् अन्ववायो भोजादि:। स्थानमधिकार: सान्धिविग्रहिकादि:। वयो यौवनादि। श्रुतं शास्त्रविज्ञानम्। कर्म वृत्ति:। ऋद्धिर्धनसम्पत्। शीलं सदाचार:। देशो वासस्थानम्। काल: तदात्वमायतिश्च। यौनानुबन्धो विवाहसम्बन्ध:। इदं जात्याद्येकादशकं, समीक्ष्य पर्यालोच्य, कार्ये कार्यविषये, पुरुषानुरूपं पुरुषाणां हीनमध्यमोत्तमानां यथाक्रममाज्ञापनबोधनविज्ञापनाद्युक्तिप्रकारैरनुरूपं लेखं विदध्यात्। श्लोकं चात्रोदाहरन्ति–

वित्तं बन्धुर्वय: कर्म विद्या भवति पञ्चमी।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम्।। इति।

A writ (or letter) is to be composed befitting the position of the person addressed such as his caste (like Brahmin), Kulam (family such as lunar race), age, learning, occupation, property (wealth), character, place and time as well as his status (as bachelor or married).

अर्थक्रम:, सम्बन्ध:, परिपूर्णता, माधुर्यमौदार्यं, स्पष्टत्वमिति लेखसम्पत्।

तत्र यथावदनुपूर्वक्रिया प्रधानस्यार्थस्य पूर्वमभिनिवेश इत्यर्थस्य क्रम:।

प्रस्तुतस्यार्थस्यानुपरोधादुत्तरस्य विधानमा समाप्तेरिति सम्बन्धः।

अर्थपदाक्षरणामन्यूनानतिरिक्तता हेतूदाहरणदृष्टान्तैरर्थोपवर्णनाश्रान्तपदतेति परिपूर्णता।

लेखसम्पदमाह—**अर्थक्रम** इत्यादि।

अर्थक्रमादीन् षड् लेखगुणान् स्वयमेव व्याचष्टे—**तत्रे**त्यादि तत्र अर्थक्रमादीनां मध्ये। यथावदनुपूर्वक्रिया यथार्हं क्रमकरणम्। तदेव स्फुटप्रतिपत्तये विवृणोति—प्रधानस्यार्थस्य पूर्वमभिनिवेश इति। अभ्यर्हितस्यार्थस्य पूर्वं लेखनं पश्चादन्यस्येत्ययमर्थक्रमो नाम लेखगुणः।

सम्बन्धमाह—**प्रस्तुतस्ये**ति। प्रस्तुतस्य प्रक्रान्तस्य, अर्थस्य, अनुपरोधाद् अबाधात्, उत्तरस्यार्थस्य, आ समाप्तेर्विधानम् आ लेखपरिसमापनाल्लेखनं पूर्वपूर्वलिखितार्थाविरोधेनोत्तरोत्तरार्थलेखनमिति यावत्, इत्ययं सम्बन्धाख्यो गुणः।

परिपूर्णतामाह—**अर्थे**त्यादि। अर्थपदाक्षराणामन्यूनानतिरिक्तता अर्थस्य पदानामक्षराणां चान्यूनतानतिरिक्तता च। अर्थन्यूनता यथा—'हस्तिनौ प्रयच्छे'त्युक्ते हस्तिनं प्रयच्छेति लेखनम्। इहार्थमात्रं न्यूनं पदाक्षराणि तु न न्यूनानि न चातिरिक्तानि। 'हस्तिनं प्रयच्छे'त्युक्ते हस्तिनौ प्रयच्छेति लेखनेऽर्थातिरिक्तता पदाक्षराणि तु तावन्त्येव। पदन्यूनता यथा—'कालिङ्गं हस्तिनं प्रयच्छे'त्युक्ते विशेषणपरित्यागेन 'हस्तिनं प्रयच्छे'ति लेखनं 'हस्तिनं प्रयच्छे'ति निर्विशेषणोक्तौ सविशेषणलेखनं पदाधिकता। अक्षरन्यूनता यथा—सलिलशब्दोक्तौ वारिशब्दलेखनं, तद्वैपरीत्यलेखनेऽक्षराधिकता। हेतूदाहरणदृष्टान्तैरर्थोपवर्णना हेतुः कारणम् उदाहरणं शास्त्रसंवादाभिधानं दृष्टान्तो लोकसिद्धार्थनिदर्शनं हेत्वादिभिस्त्रिभिरर्थस्य प्रस्तुतस्य उपवर्णना सम्प्रतिपत्तिसम्पादनम्। अश्रान्तपदता वाक्यार्थे पदवचनं, यथा 'सन्धिं कुरु' इति पदसमूहप्रतिपाद्यस्यार्थस्य 'सन्धत्स्व' इत्येकेन पदेन प्रतिपादनम्। इति परिपूर्णता अनेन प्रकारेण परिपूर्णता नाम गुणः।

Qualities of writ are (six) as follows : arthakrama (sequence of the content), sambandha (unity of ideas), paripūrṇata (completeness), mādhurya (sweetness), audārya (use of dignified words), and spaṣṭatva (lucidity).

The statement of facts in the order of their importance is called arthakrama (sequence), the main idea being stated at first.

Sambandha (unity of ideas) consists of the continuance of idea from beginning to the end without interruption.

Paripūrṇatā (the completeness) consists in the avoidance of redundancy or defiaciency in words or letters, impressive presentation of the subject matter by citing reasons, examples and illustrations and in the use of appropriate compound words.

सुखोपनीतचार्वर्थशब्दाभिघानं माधुर्यम्।

अग्राम्यशब्दाभिधानमौदार्यम्।

प्रतीतशब्दप्रयोगः स्पष्टत्वमिति।

अकारादयो वर्णास्त्रिषष्टिः।

वर्णसङ्घातः पदम्। तच्चतुर्विधं नामाख्यातोपसर्गनिपाताश्चेति। तत्र नाम सत्त्वाभिधायि। अविशिष्टलिङ्गमाख्यातं क्रियावाचि। क्रियाविशेषकाः प्रादय उपसर्गाः। अव्ययाश्चादयो निपाताः।

सुगमसुन्दरार्थपतिपादकशब्दप्रयोगो नाम माधुर्यम्, अग्राम्यशब्दप्रयोग औदार्यं, सुप्रसिद्धशब्दप्रयोगश्च स्पष्टत्वमित्याह–**सुखोपनीते**त्यादि।

शब्दप्रसङ्गात् तद्गतं पदवाक्यविभागं पदवाक्यगतं च लेखे करणीयं विशेषान्तरं निरूपयिष्यन् पदारम्भकत्वात् प्रथममक्षराणि निरूपयति–**अकारादयो वर्णास्त्रिषष्टिरि**ति। तत्र ह्रस्वदीर्घप्लुतभेदादचो द्वाविंशतिः, कादयो मावसानाः स्पर्शाख्याः पञ्चविंशतिः, यरलवा अन्तःस्थाख्याश्चत्वारः, अयोगवाहा अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाश्चत्वारः, यमाक्षराणि चत्वारि, शषसहा ऊष्माख्याश्चत्वारः इत्येवं वर्णानां त्रिषष्टित्वम्। यदाहुः–

दीर्घाः स्वराणां तत्राष्टौ पञ्च ह्रस्वाः प्लुता नव।
चतुर्धायोगवाहोष्मयमान्तस्थाः पृथक् पृथक्।
विंशतिः पञ्च च स्पर्शास्त्रिषष्टिरिति कीर्तिताः॥

इति। स्वरानुनासिक्यकृतस्तु भेदो न संख्यातो लौकिकप्रयोगे तदनादरात्।

पदस्वरूपमाह–**वर्णसंघातः पदमि**ति। नियतानुपूर्वीकाणां वर्णानां समूहोऽर्थविशेषसङ्केतितः पदमित्युच्यते। तच्चतुर्विधं नामादिभेदादित्याह–**तदि**ति। नामादिस्वरूपमाह–**तत्रे**ति। तेषु नामादिषु मध्ये, सत्त्वाभिधायि जातिगुणद्रव्यवाचकं, **नाम** इत्युच्यते। अविशिष्टलिङ्गं स्त्रीपुन्नपुंसकरूपलिङ्गविशेषशून्यं क्रियावाचकम् **आख्यातम्**। क्रियाविशेषकाः क्रियागतप्रकर्षादिविशेषद्योतकाः, प्रादयः प्र परा अप सम् अनु इत्यादयः **उपसर्गाः**। अव्ययाः लिङ्गवचनविभक्तिभेदरहिताः, चादयः च वा ह इत्यादयः, **निपाताः**।

By mādhurya (sweatness) is meant the expression of a good idea with a pleasing effect.

Expression of idea with chaste and dignified words is called audārya (dignity).

By spaṣṭatva (lucidity) is meant the use of well known words.

The letters of alphabet are sixty-three.

Syllables combine together to make a word and that is of four kinds as nouns, verbs, prefixes of verbs and particles. A noun is that which signifies an object. A verb which has no difinite gender signifies an action. Prefixes of verbs (qualifying an action) like 'pra' etc., are called upasargas (prepositions). 'cā' and other particles are called indeclinables.

पदसमूहो वाक्यमर्थपरिसमाप्तौ। एकपदावरस्त्रिपदपरः परपदार्थानुरोधेन वर्गः कार्यः। लेखपरिसंहरणार्थ इतिशब्दो वाचिकमस्येति च।

वाक्यस्वरूपमाह–**पदे**त्यादि। पदसमूहः पदानां सङ्घातो वाक्यम् इत्युच्यते, अर्थपरिसमाप्तौ अर्थस्य पर्यवसाने सति तेन पदसमूहेन चेदेको विशिष्टार्थो नैराकाङ्क्ष्येण बुद्धौ प्रतिष्ठितो भवतीत्यर्थः।

समासकरणविषयमाह—एकेत्यादि। वर्गः समासः, परपदार्थानुरोधेन कार्यः परं यत् पदं समासघटकादेकस्मात् पदाद् अन्यत् समासघटकं पदं तस्य अर्थानुरोधेन अर्थमनुसृत्य कार्यः अर्थस्य समासघटकपदान्तरार्थेन सहैकीभावयोग्यतामभिलक्ष्य कार्य इत्यर्थः। पदयोः पदानां वा सति सामर्थ्ये समासः कार्यो नान्यथेत्यभिप्रायः। स च कथम्भूतः कार्यः, एकपदावरस्त्रिपदपरः समस्यमानपदातिरेकेणैकं पदम् अवरं निकृष्टं यस्मिन् स तथाभूतः अर्थाद् द्विपदावरः त्रीणि पदानि उत्कृष्टानि यस्मिन् स तथाभूतश्च कार्यः, त्र्यधिकपदसमासस्तु न कार्यो माधुर्याद्युक्तगुणहानात्। यदाहुः—

माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते।।

इति। अपरा व्याख्या—एकपदावरस्त्रिपदपरः इत्यनयोर्यथोक्त एवार्थः, विशेष्यस्तु पदसमूहः, स च सामर्थ्यात् समासलक्षणः। तावता च दीर्घसमासप्रतिषेधस्योक्तस्य सिद्धिः। 'परपदार्थानुरोधेन वर्ग कार्यः' इत्यनेन तु अर्थान्तरं संगृह्यते। तद्यथा—वर्गो विरामोऽवसानं विच्छेद इति पर्यायाः। वर्गः अर्थविश्रान्तिचिह्नं सुखप्रतिपत्त्यर्थं क्रियमाणं, परपदार्थानुरोधेन परपदार्थानुसारेण, कार्यः। अनुपरोधेनेति पाठे परपदार्थानुपघातेन कार्यः। यथा—'पुराणं मानवो धर्मः स्वको वेदश्चिकित्सितम्। आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः।।' इत्यस्मिन् श्लोके चत्वारीत्यत्र विरामचिह्नस्य करणे परपदार्थेन नोपरोधः, 'चत्वारि न' इत्यत्र करणे तु स्फुट एव सः इति। लेखपरिसमाप्तिचिह्नमाह—लेखेत्यादि। अन्ते इतिशब्दलेखनं 'वाचिकमस्ये'ति लेखनं वा लेखसमाप्तिसूचनप्रयोजनकमित्यर्थः। तत्र लेखनीयार्थस्य निरवशेषतायामितिशब्दः सावशेषतायां 'वाचिकमस्य' इत्युक्तिः। वाचिकमस्येति लेखनं च 'वाचिकमस्य लेखहरमुखाच्छ्रोतव्यम्' इत्यादिरीत्या लेखनमिति बोद्धव्यम्।

A vākya (sentence) is a group of words conveying a definite idea.

Varga (a compound) is to be formulated by words followed by three words which have relation to the meaning of the earlier one. To conclude a writ, a word like 'iti' (meaning thus) is to be added at the end as in the phrase "vācikam asyeti" (thus he says).

निन्दा प्रशंसा पृच्छा च तथाख्यानमथार्थना।
प्रत्याख्यानमुपालम्भः प्रतिषेधोऽथ चोदना।।
सान्त्वमभ्यवपत्तिश्च भर्त्सनानुनयौ तथा।
एतेष्वर्थाः प्रवर्तन्ते त्रयोदशसु लेखजाः।।

तत्राभिजनशरीरकर्मणां दोषवचनं निन्दा। गुणवचनमेतेषामेव प्रशंसा। कथमेतदिति पृच्छा। एवम् इत्याख्यानम्। देहीत्यर्थना। न प्रयच्छामीति प्रत्याख्यानम्। अननुरूपं भवत इत्युपालम्भः। मा कार्षीः इति प्रतिषेधः। इदं क्रियताम् इति चोदना। योऽहं स भावन्, मम यद् द्रव्यं तद् भवतः इत्युपग्रहः सान्त्वम्। व्यसनसाहाय्यमभ्यवपत्तिः। सदोषमायतिप्रदर्शनमभिभर्त्सनम्।

अथ लेखनीयतया सम्भावितान् अर्थान् श्लोकाभ्यामुद्दिशति—निन्देत्यादि। निन्दाप्रशंसादित्रयोदशकविषयतया त्रयोदशविधा लेखार्था इत्यर्थः।।

निन्दादिकं क्रमेण व्याचष्टे–तत्रेत्यादि। अभिजनशरीरकर्मणां दोषवचनं प्रकृतिकुटिला वैश्वामित्रा इत्यभिजनदोषवचनं कुष्ठितो व्याधित इति शरीरदोषवचनं गोघ्नो ब्रह्महेति कर्मदोषवचनं, सेयं निन्दा त्रिप्रकारा। तद्वैपरीत्येन तेषामेवाभिजनादीनां गुणवचनं **प्रशंसा**। कथमेतत् करणीयमिति कर्तव्यजिज्ञासा **पृच्छा**। एवमेतत् करणीयमित्युपदेशः पृष्टेन क्रियमाण **आख्यानं**। सन्ध्यादिनिमित्तं किञ्चित् कोशदण्डादिकं देहीति या वचनमर्थना। अर्थितस्य न प्रयच्छामीति वचनं **प्रत्याख्यानम्**। अननुरूपं भवत इदं कार्यमित्युक्तिरुपालम्भः। मा कार्षीरित्यकार्यप्रवृत्तेर्वारणमाप्तभावात् क्रियमाणं **प्रतिषेधः**। इदं क्रियतां सन्धानं विग्रहणं वास्मिन् देशकाल इति प्रेरणा **चोदना**। योऽहं स भवान्, मम यद् द्रव्यं तद् भवत इति स्वशरीरसम्बोध्यशरीरयोः स्वद्रव्यसम्बोध्यद्रव्ययोश्चाभेदवचनभङ्ग्यानुकूलनं **सान्त्वम्**। व्यसने रिपूपल्वादौ साह्यकरणमभ्यवपत्तिः। अनित्थंकुर्वाणमचिरात् त्वां घातयेयं, बद्ध्वा वा कारागृहे निनवेशयेयमित्येवमनर्थदोषयुक्तमुत्तरकाल कथनमभिभर्त्सनमित्युच्यते।

The contents of a writ (written document) are of thirteen kinds as—abuse, praise, inquiry, narration, request, refusal, censure, prohibition, command, conciliation, promise of help, threat and persuasion (for which it is used).

Speaking ill of one's family body, and action constitute what is called abuse. Speaking well of these characteristics themselves is called praise. The reference like "how is it" forms inquiry. Reply in the sense that "it is so" is called narration. An entreaty or request is in the form of "give it to me". "I will not give it"—an answer like this is refusal. Censure is in the sense of the observation that "it is not befitting of you." Prohibition is in the form of "don't do it."

The statement like "you may do it" form command. An observation like "what I am, thou art that, whichever is mine that is yours also" is conciliation. Extending help in situations of trouble forms the promise of help. The act of pointing out consequences that may occur in future is threat.

अनुनयस्त्रिविधोऽर्थकृतावतिक्रमे पुरुषादिव्यसने चेति।
प्रज्ञापनाज्ञापरिदानलेखास्तथा परीहारनिसृष्टिलेखौ।
प्रावृत्तिकश्च प्रतिलेख एव सर्वत्रगश्चेति हि शासनानि।।
अनेन विज्ञापितमेवमाह तद् दीयतां चेद्यदि तत्त्वमस्ति
राज्ञः समीपे वरकारमाह प्रज्ञापनैषा विविधोपदिष्टा।।
भर्तुराज्ञा भवेद् यत्र निग्रहानुग्रहौ प्रति।
विशेषेण तु भृत्येषु तदाज्ञालेखलक्षणम्।।
यथार्हगुणसंयुक्ता पूजा यत्रोपलक्ष्यते।
अप्याधौ परिदाने वा भवतस्तावुपग्रहौ।।

अनुनय इति। अर्थकृतावित्यादयो निमित्तसप्तम्यः। अर्थकरणनिमित्तोऽतिक्रमनिमित्तः पुरुषादिव्यसननिमित्त इति त्रिप्रकारोऽनुनयः। तत्र सामवायिकादिकार्यमवश्यकरणीयमकुर्वाणं प्रति तत्करणार्थं मित्रेण क्रियमाणोऽनुनय आद्यः। स्ववाक्यातिक्रमकुपितं प्रति कोपप्रशमनाय क्रियमाणोऽनुनयो द्वितीयः। पितृभ्रातृपुत्रमित्रामात्यमरणादिव्यसनेष्ववश्यानुग्राह्यं पूर्वमननुगृह्य पश्चात् कार्यवशात् तं प्रति क्रियमाणोऽनुनयस्तृतीयः।

भूयोऽप्यष्टौ शासनभेदान् श्लोकेनोद्दिशति–प्रज्ञापनेत्यादि।।

श्लोकैरेव तेषां विवरणमारभमाणः प्रथमं प्रज्ञापनलेखं व्याचष्टे–अनेनेति। प्रज्ञापना नाम महामात्रादीन् प्रति तदीयगूढपुरुषैः क्रियमाणा तन्मित्रामित्रराजपुरुषवृत्तान्तस्यावेदना। एषा विविधा बहुप्रकारा उपदिष्टा।ताममित्रविषयां पूर्वार्धेन प्रदर्शयति–अनेन राजानुचरेण देवदत्तनाम्ना विज्ञापितं राजान्तिके 'महामात्रेण कुतश्चिन्निधिरधिगत आत्मसात्कृत' इति। विज्ञापितश्च राजानेन प्रकारेणाह–'यदि महामात्रः स्वयं तं निधिं न प्रयच्छति तदाहमेव तं द्विगुणमाहारयिष्यामी'ति। तत्त्वमस्ति चेद्यदि तद् दीयतां यदि निधिद्रव्याधिगमः सत्यः तर्हि तद् दीयतां राज्ञे इत्यर्थः। मित्रविषयां तृतीयपादेन दर्शयति–राज्ञः समीपे वरकारम् आह कल्याणं कर्म त्वया क्रियमाणं निवेदयति, अर्थाद् देवदत्तादिः। इह चेत्यदयदिपदयोः सहप्रयोगोऽपिशब्दचशब्दयोरिव द्रष्टव्यः।।

सामान्यतो यस्मिन्कस्मिंश्चिज्जने विषये विशेषेण पुनर्भृत्येषु विषये निग्रहमनुग्रहं वाधिकुर्वती भर्तुराज्ञा यस्मिन् लेखे, स आज्ञालेख इत्याह–भर्तुरित्यादि।।

Anunaya (persuasion) is of three types, that made for the purpose of (obtaining) money; that made in the case of one's failure to fulfil a promise (already made) and that made on the occasion of a contingency.

Writs are of eight kinds as—writs of information, of command, and of gift; likewise writs of remission, of license, of guidance; of reply, and of the nature of general proclamation.

Of these information (prajñāna–) is the form of a report (by an officer close at hand with the king that 'you have acquired some wealth or treasure over which the king has some right that "you may give it to the king if there is any truth in the report, lest you may have to pay double the value" and similar words of advice.

Command (or ājñālekha) is in the form of an order of the king bestowing benefit or punishment, especially upon servants.

Paridānalekha—is the one involving the bestowal of honour for deserving merit or help to alleviate distress.

जातेर्विशेषेषु पुरेषु चैव ग्रामेषु देशेषु च तेषु तेषु।
अनुग्रहो यो नृपतेर्निदेशात् तज्ज्ञः परीहार इति व्यवस्येत्।।
निसृष्टिस्थापना कार्यकरणे वचने तथा।
एष वाचिकलेखः स्याद् भवेन्नैसृष्टिकोऽपि वा।।

परिदानलेखमाह—यथार्हेत्यादि। यत्र यस्मिन् लेखे, यथार्हगुणसंयुक्ता उत्तममध्यमाधमसम्बोध्यतारतम्यानुसारिणी, पूजा 'धार्मिकस्य गुणवतस्तवेदमसदृशं दुःखमुपनतं, किं कुर्मः, क्षन्तव्यमेव विवेकिभिरीदृशं कथञ्चिद्' इत्युक्तिरूपः शोककाले, 'स्वनियोगसविशेषानुष्ठानस्यापर्याप्तमपीदमस्माभिर्यत्किञ्चित् पारितोषिकं दीयमानं स्वीकरोतु भवानि'त्युक्तिरूपः स्वामिपरितोषकाले, स्वामिबहुमानः, उपलक्ष्यते, स परिदानलेख इति विधेयाध्याहारः, तस्यैव लक्षणीयतया क्रमप्राप्तत्वात्। तस्य विषयद्वैविध्येन द्वैविध्यं सूचयन्नाह—अपीति। तौ परिदानलेखौ, अप्याधौ परिदाने वा, अपिवाशब्दौ समुच्चयार्थौ, आधिर्बन्धुमरणनिमित्ता भृत्यानां मनोव्यथा परिदानं परिरक्षणं भृत्यविषयदयाविष्करणमिति यावत्, आधौ च परिदाने च, उपग्रहौ स्वीकारहेतू स्वतातिशयप्रतिपत्तिहेतू, भवतः।।

परिहारलेखमाह—जातेरिति। अमुकस्य कालस्यामुकब्राह्मणेभ्यः करो न ग्राह्य इत्येवंप्रकारो यो जातिविशेषविषयोऽनुग्रहः, अमीषु नगरेषु वणिग्भ्यः शुल्कममुकस्य कालस्य न ग्राह्यमित्येवंविधो यः पुरविषयः, नवागतकुटुम्बिभ्यः इयतः कालस्य न ग्राह्यः कर इत्येवंप्रायो यो ग्रामविषयः, न कोऽपि राजभागधेयोऽमुकदेशे कालस्यैतावतो ग्राह्य इत्येवञ्जातीयो यो देशविषयः, स सर्वविधोऽप्यनुग्रहो राजशासनात् प्रवृत्तः परीहारसंज्ञित इति लेखप्रकाराभिज्ञो जानीयादिति श्लोकार्थः। तत्रानुग्रहः कश्चित् कराग्रहणरूपः, कश्चित् स्वयं धनदानरूपः, कश्चिदुभयरूप इति त्रिप्रकारो वेदितव्यः।।

निसृष्टिलेखमाह—निसृष्टीत्यादि। कार्यकरणे तथा वचने, निसृष्टिस्थापना कस्यचिदाप्तपुरुषस्य प्रामाण्याख्यानम् 'अमुकस्य क्रिया ममैव क्रिया अमुकस्य वचनं ममैव वचनमि'त्येवं रूपं, निसृष्टिलेख इति लक्ष्यस्याध्याहारः क्रमप्राप्तत्वात्। एतस्य प्रकारद्वयमाह—एष निसृष्टिलेखः, वाचिकलेखः स्यात् वचनप्रमाणीकरणाख्यायी सन् वाचिक इति वक्तुमर्हः, नैसृष्टिकोऽपि वा भवेत् क्रियाप्रमाणीकरणाख्यायी सन् नैसृष्टिक इति वक्तुमर्हः।।

Parihāralekha (remission) is the writ issued as favour to special castes, cities, villages, to countries of various description by the order of the king, as can be understood from the terms.

Nisṛti (licence or permission) is the one bestowed in the form of a writ, either in word or deed and as such is a varbal order or writ of licence.

विविधां दैवसंयुक्तां तत्त्वजां चैव मानुषीम्।
द्विविधां तां व्यवस्यन्ति प्रवृत्तिं शासनं प्रति।।
दृष्ट्वा लेखं यथातत्त्वं ततः प्रत्यनुभाष्य च।
प्रतिलेखो भवेत् कार्यो यथा राजवचस्तथा।।
यत्रेश्वरांश्चाधिकृतांश्च राजा रक्षोपकारौ पथिकार्थमाह।
सर्वत्रगो नाम भवेत् स मार्गे देशे च सर्वत्र च वेदितव्यः।।

उपायाः सामोपप्रदानभेददण्डाः।

तत्र साम पञ्चविधं—गुणसङ्कीर्तनं सम्बन्धोपाख्यानं परस्परौपकारसन्दर्शनमायतिप्रदर्शनमात्मोपनिधानमिति।

प्रावृत्तिकमाह—विविधामिति। विविधाम् अनेकप्रकारां, दैवसंयुक्तां यथाकालवृष्टिपातसुभिक्षाद्यनुकूल-

दैवफलसिद्धिसम्बद्धाम् अग्निवात्योपप्लवादिदुर्दैवफलसिद्धिसम्बद्धां च, तत्त्वजां पारमार्थिकीम्, मानुषीं चैव यातव्यसमुच्छेदादिरूपां परचक्रचोरादिजनितराज्योपद्रवादिरूपां च, तां प्रवृत्तिं प्रावृत्तिकव्यपदेशनिमित्तभूतां वार्तां, शासनं प्रति लेखविषये, द्विविधां व्यवस्यन्ति शुभाशुभात्मना द्विप्रकारां निश्चिन्वन्ति। प्रवृत्तिद्वैविध्य-वचनभङ्ग्या चानया तन्निवेदनफलकस्य प्रावृत्तिकलेखस्य द्वैविध्यमभिहितं बोद्धव्यम्।

प्रतिलेखमाह—दृष्ट्वेति। लेखं परमादागतं यथातत्त्वं दृष्ट्वा यथावस्थितपदपदार्थानतिक्रमेण पूर्वं स्वयं वाचनया विज्ञाय, ततः प्रत्यनुमाष्य च पश्चाद् राज्ञः सकाशेऽनुवाच्य च, यथा राजवचः राज्ञ उत्तरवचनं भवति, तथा प्रतिलेखः कार्यो भवेत्।।

यत्र लेखे राजा ईश्वरान् दुर्गराष्ट्रान्तपालादीन् समाहर्तृप्रशास्तृप्रभृतीनधिकृतांश्च पथिकानां पथि सहाय्यदानलक्षणां रक्षां भक्तयवसेन्धनादिदानलक्षणमुपकारं चाज्ञापयति, स लेखः राज्ञो देशान्तरसञ्चारणे स्वनिवासदेशे सर्वस्मिंश्च काले लेखनार्हत्वान्नाम्ना सर्वत्रगो भवेदित्याह—यत्रेश्वरांश्चेत्यादि।।

शासनाधीनत्वं सन्धिविग्रहयोरुक्तमधस्तात्। सन्धिविग्रहानुष्ठानस्य उपायप्रयोगसापेक्षत्वात् तेष्वपि व्युत्पत्तिः शासनलेखकस्यापेक्षितेति कृत्वा तान् दर्शयति—उपाया इत्यादि।

तत्र साम्नः पञ्च प्रभेदानुद्दिशति—तत्र सामेत्यादि।

Writs of guidance (pravṛttilekha) are issued by the kings as remendies against various kinds of providential visitations of evils of human make and as such are of two kinds.

Pratilekha (reply) is issued in response having read a letter and discussed so as to form a suitable reply in accordance with the wishes of the king.

A writ in the form of general proclamation is the direction of the king to the viceroys, and other officers to provide protection and materials to the travellers either on roads or in the interiors of the country (as such it is termed as sarvatraga-applicable everywhere).

Upāyas (forms of stratagem) are classified as (four) Sāma (negotiation), upapradāna (bribery), bheda (causing dissension) and bheda (open attack).

Here Sāma (negotiation) is of five kinds as praising the qualities (of the opposition), narrating the mutual relationship, pointing out mutual benefit, showing the immense benefits to be accrued in future and identity of common interests.

तत्राभिजनशरीरकर्मप्रकृतिश्रुतद्रव्यादीनां गुणागुणग्रहणं प्रशंसा स्तुतिर्गुणसङ्कीर्तनम्।

ज्ञातियौनमौखस्रौवकुलहृदयमित्रसङ्कीर्तनं सम्बन्धोपाख्यानम्।

स्वपक्षपरपक्षयोरन्योन्योपकारसङ्कीर्तनं परस्परोपकारसन्दर्शनम्।

अस्मिन्नेवं कृत इदमावयोर्भवतीत्याशाजननमायतिप्रदर्शनम्।

योऽहं स भवान्, यन्मम द्रव्यं तद् भवता स्वकृत्येषु प्रयोज्यताम् इत्यात्मोपनिधानमिति।

उपप्रदानमर्थोपकारः।

तत्र प्रथमं सामप्रभेदं व्याचष्टे—**तत्राभिजनेत्यादि**। अभिजनः कुलं, शरीरं कर्म च प्रसिद्धे, प्रकृतिः स्वभावः, श्रुतं शास्त्रजनितः संस्कारः, द्रव्यं रथगजतुरगादिपरिग्रहः, आदिपदेन वयोरूपादिग्रहणम्। अभिजनादीनामेषां गुणग्रहणं गुणस्य वस्तुसतः स्वरूपाख्यानं, गुणागुणग्रहणमिति पाठे गुणागुणयोर्वस्तुसतोः स्वरूपाख्यानं, प्रशंसा सश्लाघमाख्यानं, स्तुतिरविद्यमानगुणकीर्तनं च, गुणसङ्कीर्तनं नाम भवति।

सम्बन्धोपाख्यानं व्याचष्टे—**ज्ञातीत्यादि**। ज्ञातिः समानकुलोत्पन्नः, यौनो योनिकृतः सम्बन्धो विवाहाख्यः, मौखो मुखकृतः समबन्धो वाक्सम्बन्धः शिष्याचार्यभावलक्षणः, स्रौवः स्रुवनामकनयज्ञ-पात्रविशेषकृतः सम्बन्धो याज्ययाजकभावरूपः, कुलं पूर्वपुरुषपरम्परा, हृदयं मनोनिबन्धः, मित्रम् उपकारकं, ज्ञात्यादीनां सप्तानां सङ्कीर्तनं सम्बन्धोपाख्यानमित्युच्यते।

स्वपक्षेत्यादि। स्वपक्षपरपक्षयोः, अन्योन्योपकारसङ्कीर्तनं परस्परोपकारो यथा स्यात् तथा कथनं, परस्परोपकारसन्दर्शनं नाम सामभेदः।

अस्मिन्निति। अस्मिन् कार्ये, एवं कृते अनेन प्रकारेणानुष्ठिते सति, आवयोरिदं भवति तव च मम चैतत् फलं भविष्यति इत्याशाजननम्, आयतिप्रदर्शनं नाम।

योऽहमिति। योऽहं स भवान् आवामभिन्नौ, तस्माद्, मम यद् द्रव्यं भूमिहिरण्याद्यस्ति, तद् भवता स्वकृत्येषु प्रयोज्यतां स्वीयद्रव्यनिर्विशेषमुपयुज्यताम्, इतीदृशम्, आत्मोपनिधानं नाम पञ्चमः सामप्रभेदः।

उपप्रदानाख्यं द्वितीयमुपायं व्याचष्टे—**उपेत्यादि**। अर्थोपकारः भूमिहिरण्यादिरूपार्थदानेनोपकारकरणम्, उपप्रदानम्।

Praising the qualities (guṇasaṅkīrtana) is when the family, person, occupation, conduct, learning, properties etc. (of an opposition) are commended in laudable terms with due to attention to their worth.

Mutual relationship (sambandhopākhyāna) consists of the statement of common origin, blood-relationship, speaking terms (like teacher and disciple), priestly contacts, heirarchy (kula), mental attachment and friendship.

Parasparopakārasandarśanam is the pointing out of the mutual benefit of the two parties, one's own and that of the opposition.

Āyatipradarśanam consits of the enumeration of the future benefits in such a way as to generate hope in the parties.

Identity of common interest is the pointing out of possibilities such as "what I am is yourself and what is mine will be useful to you" and on similar lines.

Upapradāna (bribery) is the offering of money.

शङ्काजननं निर्भर्त्सनं च भेदः।

वधः परिक्लेशोऽर्थहरणं दण्ड इति।

अकान्तिर्व्याघातः पुनरुक्तमपशब्दः संप्लव इति लेखदोषाः।

तत्र कालपत्रकमचारुविषमविरागाक्षरत्वमकान्तिः।

पूर्वेण पश्चिमस्यानुपपत्तिर्व्याघातः।

उक्तस्याविशेषेण द्वितीयमुच्चारणं पुनरुक्तम्।

लिङ्गवचनकालकारकाणामन्यथाप्रयोगोऽपशब्दः।

अवर्गे वर्गकरणं वर्गे चावर्गक्रिया गुणविपर्यासः संप्लव इति।

तृतीयमुपायं व्याचष्टे–शङ्केत्यादि। मित्रेष्वेकस्यापकाराधानेनान्येषां हृदि 'अस्मानप्यसावुच्छेत्स्यती'ति शङ्काया अपरागस्पर्धाहेतोरुत्पादनमेको भेदः, 'त्वामविधेयमभिघातयिष्यामी'त्येवम्प्रकारं निर्भर्त्सनमपरो भेदः।

दण्डं व्याचष्टे–वध इत्यादि। वधो व्यापादनं, परिक्लेशो बन्धनताडनादिभिर्दुःखोत्पादनम्, अर्थहरणं धनापहारः, इदं त्रयं दण्डः। इतिशब्दः समाप्तौ, लेखगुणाख्यानं परिसमाप्तमित्यर्थः।

अथ लेखदोषानाह–**अकान्तिरित्यादि।**

तत्रेति। तत्र लेखदोषेषु पञ्चसूद्दिष्टेषु मध्ये, कालपत्रकं काले मषीप्रसरणात् स्वभावतो वा मलिने पत्रे लिखितम्, अकान्तिः तदाख्यो दोषः। अचारुविषमविरागाक्षरत्वम् अचारूणि असुन्दराणि विषमाणि अनियतस्थौल्यसौक्ष्म्याणि विरागाणि शुद्धोदकप्रायमषीलिखितानि चाक्षराणि यस्मिंस्तस्य भावस्तत्त्वं च, अकान्तिः। एवमस्य दोषस्याधारप्रयुक्तत्वेनाधेयप्रयुक्तत्वेन च द्वैविध्यं दर्शितम्।

व्याघातमाह–**पूर्वेणेत्यादि।** पूर्वेणार्थेनोत्तरस्यानुपपत्तिर्विरोधः, व्याघातः, यथा 'प्रणम्याज्ञापयती'ति। इह हि प्रणामाज्ञापनयोर्विरोधः प्रतीतः।

पुनरुक्तमाह–**उक्तस्येत्यादि।** तद्यथा–पूज्यो मान्य इत्यादिलेखनम्।

अपशब्दं व्याचष्टे–**लिङ्गेत्यादि।** स्त्रीलिङ्गे प्रयोक्तव्ये पुन्नपुंसकप्रयोगो लिङ्गस्यान्यथाप्रयोगः, एकवचने द्विबहुवचनप्रयोगो वचनस्यान्यथाप्रयोगः, वर्तमाने भूतभविष्यत्प्रयोगः कालस्यान्यथाप्रयोगः, कर्मकारके कर्तृकरणादिकारकप्रयोगः कारकस्यान्यथाप्रयोगः। लिङ्गादीनामेवञ्जातीयोऽन्यथाप्रयोगोऽपशब्द इत्युच्यते।

Bheda (dissension) consists of causing fears and suspicion as well as threatening.

Daṇḍa (punishment or attack) is killing, harassing and plundering.

The faults of a writ (lekhadoṣa) consist of clumsiness, contradiction, repetition, wrong grammatical use and missarrangement.

Here clumsiness (akānti) is the use of black and ugly leaf, uneven and uncoloured writing.

Disagreement of the subsequent portion with the previous of a letter causes contradiction (Vyāghāta).

Repetition (punarukta) is the stating of the same for a second time without any special purpose.

Wrong grammatical use (apaśabda) is the wrong use of words in gender, number, time and case.

Misarrangement (samplava) is the division into paragraphs in unsuitable places, omission of division where it is needed and violation of other rules.

सर्वशास्त्राण्यनुक्रम्य प्रयोगमुपलभ्य च।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
दशमोऽध्यायः शासनाधिकारः, आदितः एकत्रिंशः।।

संप्लवमाह—**अवर्ग** इति। वर्गो यतिश्छेद इति पर्यायाः, अवर्गे वर्गायोग्ये वर्गकरणं, वर्गे वर्गयोग्ये अवर्गक्रिया च इति द्वयं, गुणविपर्यासः गुणानामर्थक्रमादिलेखगुणानां वैपरीत्यं च, संप्लवो नाम नाम्ना भवति।

अध्यायान्ते श्लोकमाह—**सर्वेत्यादि**। कौटल्येन, सर्वशास्त्राणि बार्हस्पत्यादीनि, अनुक्रम्य ज्ञात्वा, प्रयोगमुपलभ्य च शास्त्रानुष्ठानं दृष्ट्वा च, नरेन्द्रार्थे राज्ञः कृते प्रयोजनाय, शासनस्य विधिः, कृत उपदिष्टः। शास्त्रलोकदृष्टस्यापि सतः शासनविधेरिह कौटल्यकृतत्ववचनं कौटल्येन कात्स्न्यसौष्ठवातिशययोग-सम्पादनादिति बोद्धव्यम्।।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
दशमोऽध्यायः शासनाधिकारः, आदित एकत्रिंशः।।

Having examined the treatises of different sciences and looked into the usages, Kauṭalya has formulated these rules of writing royal writs for the benefit of kings.

Thus the thirty first chapater of the Arthaśāstra of kauṭilya dealing iwth the procedure for issuing writs comes to an end. Here ends the tenth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 32

29. प्रक० कोशप्रवेश्यरत्नपरीक्षा।

Section 29 : Examination of Gems to be Deposited in the Treasury

कोशाध्यक्षः कोशप्रवेश्यं रत्नं सारं फल्गु कुप्यं वा तज्जातकरणाधिष्ठितः प्रतिगृह्णीयात्।

ताम्रपर्णिकं, पाण्ड्यकवाटकं, पाशिक्यं, कौलेयं, चौर्णेयं, माहेन्द्रं, कार्दमिकं, स्रौतसीयं, ह्रादीयं, हैमवतं च मौक्तिकम्।

कोशप्रवेश्यरत्नपरीक्षेति सूत्रम्। कोशो भाण्डागारं तत्प्रवेशनार्हाणां रत्नानां माणिक्यमुक्ताप्रवालादीनां, रत्नग्रहणेन संग्राह्यद्रव्योपलक्षणात् सारफल्गुकुप्यानां च, परीक्षात्रोपदिश्यत इति सूत्रार्थः।

'कोशपूर्वाः सर्वारम्भाः' इति प्रक्रान्तायाः कोशप्रकृतेः समाहर्तृसन्निधातृव्यापारैरुत्पादनं रक्षणं च प्रागभिहितं, स्वरूपलक्षणं त्वनुक्तमिदानीमभिधीयत इति सङ्गतिः।

कोशाध्यक्ष इति। कोशाध्यक्षः भाण्डागाराधिकृतः, कोशप्रवेश्यं रत्नं मणिमुक्तादिकं, सारं चन्दनागुरुप्रभृतिकं, फल्गु पट्टदुकूलजातीयं, कुप्यं कुप्याध्यक्षप्रकरणोक्तं सारदारुवेणुवल्कादिकम् आयुधागाराध्यक्षप्रकरणोक्तं यन्त्रायुधावरणादिकं च, वाशब्दः समुच्चये, तज्जातकरणाधिष्ठितः तेषु रत्नादिषु जातास्तज्जातास्तत्सम्बद्धव्यवहारैकवृत्तय इत्यर्थः तज्जातैः करणैः कायस्थैश्च अधिष्ठितः समन्वितः सन्, प्रतिगृह्णीयात्।

अभ्यर्हितत्वान्मौक्तिकस्य परीक्षां प्रथममाह—**ताम्रपर्णिकमिति**। मौक्तिकं, ताम्रपर्णिकं ताम्रपर्णी नाम पाण्ड्येषु प्रसिद्धा नदी तस्याः समुद्रसङ्गमप्रदेशे समुत्पन्नं, पाण्ड्यकवाटकं मलयकोटिपर्वतोत्पन्नं, पाशिक्यं पाटलिपुत्रान्तिकगतायां पाशिकाख्यायां नद्यामुत्पन्नं, कौलेयं सिंहलद्वीपे मयूरग्रामे कुला नाम नदी तस्यामुत्पन्नं, चौर्णेयं केरलेषु मुरचिनामकपत्तनसमीपे चूर्णी नाम नदी तस्यामुत्पन्नं, माहेन्द्रं महेन्द्रपर्वताभ्यर्णाम्भोधिसम्भवं, कार्दमिकं कर्दमा नाम पारसीकेषु नदी तस्यामुत्पन्नं, स्रौतसीयं बर्बरकूले स्रौतसी नाम नदी तस्यामुत्पन्नं, ह्रादीयं बर्बरकूले समुद्रैकदेशे श्रीधण्टो नाम ह्रदः तस्मिन्नुत्पन्नं हैमवतं च हिमालयसम्भवं च, भवति। इत्थं मौक्तिकस्योत्पत्तिक्षेत्राणि दश भवन्ति।

The superintendent of the treasury shall deposit into the treasury items like gems (ratna) and articles of superior and inferior value, only in the presence of qualified examiners (to test them).

The varieties of pearls are :—Tāmraparṇika—that which is produced in the Tāmraparṇi (a river flowing through the Pāṇḍya country); Pāṇḍyakavātaka—that is obtained in Pāṇḍyakavāṭa—(that is obtained from Malayakoṭi mountain), Pāśikya—that is produced from river Pāśikā (which flows near Pāṭaliputra); Kauleya—that which is produced in Kūla (a river flowing through the village of Mayūragrāma in the land of Simhala (Ceylon); Caurṇeya—that which is produced in Cūrṇi (the river Cūrṇi flowing through the town Muraci (Muziris) in Malanātu (country of Malayalam = Kerala); Māhendra—produced in the region of the Mahendra mountain jutting into the sea; Kārdamika—produced in the Kardamā river (a river in Persia called Pārasika); Srautasīya-produced in the river Srautasi in Barbara (Papparakūla); Hrādīya—produced in a deep water pool known as hrada (located in Barbarakūla, the name of the Hrada being Śrīghaṇṭa) and Haimavata—produced in the Himālaya mountain region (in a river flowing in the locality), (these are the ten regions where pearls are produced).

शङ्खः शुक्तिः प्रकीर्णकं च योनयः।

मसूरकं त्रिपुटकं कूर्मकमर्धचन्द्रकं कञ्चुकितं यमकं कर्तकं खरकं सिक्थकं कामण्डलुकं श्यावं नीलं दुर्विद्धं चाप्रशस्तम्।

स्थूलं वृत्तं निस्तलं भ्राजिष्णु श्वेतं गुरु स्निग्धं देशविद्धं च प्रशस्तम्।

शीर्षकमुपशीर्षकं प्रकाण्डकमवघाटकं तरलप्रतिबन्धं चेति यष्टिप्रभेदाः।

मौक्तिकस्य योनीस्तिस्र आह–**शङ्ख** इत्यादि। शङ्खः शुक्तिश्च जलजौ प्रसिद्धौ। प्रकीर्णकं गजकुम्भादिकम्। आहुश्च–

करका वारिधाराश्च मलयाच्चन्दनोदकम्।
शङ्खशुक्तिनिपीतं यन्मौक्तिकं तत् प्रजायते।।
सूकरमृगेन्द्रदंष्ट्रोद्भवानि करिकुम्भजातानि।
वंशाभोगभुजङ्गोत्तमाङ्गजानि प्रकीर्णानि।।

इति।

अथ मौक्तिकस्य त्रयोदश दोषानाह–**मसूरकमिति**। मसूरकं तदाख्यधान्यविशेषाकारं, त्रिपुटकं तदाख्यधान्याकारं, कूर्मकं तदाकारम्, अर्धचन्द्रकम् अर्धचन्द्राकृति, कञ्चुकितं पटलितं, यमकं युग्मकं, कर्तकं छिन्नकं, खरकम् अश्लक्ष्णं, सिक्थकं सिक्थाकारबिन्दुयुक्तं, कामण्डलुकं कमण्डल्वाकारं, श्यावं कपिशवर्णं, नीलं नीलवर्णं, दुर्विद्धम् अस्थानविद्धम्, ईदृशं मौक्तिकम् अप्रशस्तम्। गुणात् प्राग् दोषवचनं दुष्टस्यात्यन्तानुपादेयत्वद्योतनार्थम्।

मौक्तिकस्याष्टौ गुणानाह–**स्थूलमिति**। स्थूलं पृथु, वृत्तं चारुपरिमण्डलं, निस्तलं तलरहितं मसृणभूम्यनवस्थायि, भ्रजिष्णु दीप्तिमत्, श्वेतं धवलं, गुरु अलघु, स्निग्धम् अरूक्षं, देशविद्धं च यथास्थानविद्धं

च, मौक्तिकं प्रशस्तम्। एवु यस्यकस्यचित् पूर्वोक्तदोषाभावरूपतया सिद्धस्यापीह शब्दतो ग्रहणं स्थूलत्वादिनिर्विशेषं गुणत्वं द्योतायितुम्।

अथ पञ्च यष्टिभेदानाह–शीर्षकमिति। मौक्तिकं महदेकं मध्ये पार्श्वयोस्तु सर्वाणि तनूनि समानि यस्याः सा यष्टिः शीर्षकमित्युच्यते। उपशीर्षकं नाम महदेकं मौक्तिकं मध्ये तत्पार्श्वयोस्तु सममल्पपरिमाणमेवैकमित्येतंक्रमेणानेकैस्त्विकैः समैर्ग्रथिता यष्टिः। प्रधानमेकं मध्ये तत्पार्श्वयोर्द्वेद्वे इत्येतंक्रमेणानेकैः पञ्चकैर्ग्रथिता यष्टिः प्रकाण्डकम्। प्रधानमेकं महन्मौक्तिकं मध्ये कृत्वा पार्श्वयोः क्रमकृशोत्तरोत्तरमौक्तिकैर्ग्रथिता यष्टिरवघाटकाख्या। तरलप्रतिबन्धं नाम समप्रमाणमौक्तिकगुम्फिता यष्टिः। चशब्दः समुच्चये। इति यष्टिप्रभेदाः यष्टीनां सराणां प्रभेदाः।

Conch shells, Oyster shells and other miscellaneous objects are the wombs of pearls.

The inferior (or inauspicious) varieties (thirteen in number) of pearls are—Masūraka (with the shape of the grain called Masūra (a kind of pulse); Tripuṭaka (of the shape of the grain called Tripuṭa (a kind of pulse like the green peas); Kūrmaka—in the shape of a tortoise; Ardhacandraka—that which is semi-circular; Kañcukita—consisting of several writings; Yamaka—that which is double; Kartaka—that which is scratched; Kharaka—which is of rough surface; Sikthaka—possessed of spots; Kāmaṇḍuluka—possessing the shape of water-pot of the sages, Śyāva—having brown colour; Nīlā— having dark blue colour, and durviddha—badly perforated.

The superior (or auspicious) ones are of (eight) notable qualities like—sthūla—big; vṛtta—round, nistala—bottomless, bhrājiṣṇu—brilliant, Śveta-white, guru-heavy; snigdha—soft to touch, and deśaviddha—properly perforated.

The varieties of pearl necklaces are (of five types)—Śīrṣaka—(a necklace of pearls, uniform in size with one bigger in the centre); upaśīrṣaka—(with one bigger pear in centre the others being uniformly smaller in size); prakāṇḍaka (one bigger in centre with two each on both sides and followed by other pearls of uniform size); avaghāṭaka (one bigger in centre followed by other pearls gradually decreasing in size); and tarala pratibandha (in which all the pearls are of uniform size.)

यष्टीनामष्टसहस्रमिन्द्रच्छन्दः। ततोऽर्धं विजयच्छन्दः। शतं देवच्छन्दः। चतुष्षष्टिरर्धहारः। चतुष्पञ्चाशद् रश्मिकलापः। द्वात्रिंशद् गुच्छः। सप्तविंशतिर्नक्षत्रमाला। चतुर्विंशतिरर्धगुच्छः। विंशतिर्माणवकः। ततोऽर्धमर्धमाणवकः। एत एव मणिमध्यास्तन्माणवका भवन्ति। एकशीर्षकः शुद्धो हारः। तद्वच्छेषाः। मणिमध्योऽर्धमाणवकस्त्रिफलकः फलकहारः पञ्चफलको वा। सूत्रमेकावली शुद्धा। सेव मणिमध्या यष्टिः। हेममणिचित्रा रत्नावली।

हेममणिमुक्तान्तरोऽपवर्तकः। सुवर्णसूत्रान्तरं सोपानकम्। मणिमध्यं वा मणिसोपानकम्।

शीर्षकादीनां पञ्चानां यष्टीनां प्रत्येकं संख्यानियमप्रयुक्तानेकादश भेदानाह—**यष्टीनामिति**। यष्टीनां शीर्षकादिलक्षणानामुक्तानाम्, अष्टसहस्रम् अष्टोत्तरं सहस्रम्, इन्द्रच्छन्दः तदाख्यं भूषणमुच्यते, शीर्षकेन्द्रच्छन्द उपशीर्षकेन्द्रच्छन्द इत्यादिप्रकारैर्व्यपदिश्यत इत्यर्थः। एवमुत्तरत्रापि बोद्धव्यम्। ततोऽर्धं चतुरुत्तरा पञ्चशती, विजयच्छन्दः। शतं देवच्छन्दः शतयष्टिकं देवच्छन्दाख्यम्। एकाशीत्युत्तरैर्यष्टीनामष्टभिः शतैर्युक्तो देवच्छन्द इति क्वचिद् व्याख्यातम्। **चतुष्षष्टिरित्यादिकम् अर्धमाणवक** इत्येवमन्तमुत्तानार्थम्। **एत एवेति**। उक्ता एवेन्द्रच्छन्दादयो, मणिमध्या माणिक्यमध्याः सन्तः, तन्माणवका भवन्ति इन्द्रच्छन्दाद्युपपदमाणवकाः भवन्ति, इन्द्रच्छन्दमाणवको विजयच्छन्दमाणवक इत्येवमादिसंज्ञायुक्ता भवन्तीत्यर्थः। **एकेत्यादि**। एकशीर्षकः शुद्धो हारः एकानि केवलान्युपशीर्षकादिलक्षणास्पृष्टानि शीर्षकाणि शीर्षकाख्याः यथोक्तसंख्या यष्ट्यो यस्य स तथाभूतः अर्थाद् इन्द्रच्छन्दादिर्विशेष्यः शुद्धहाराख्यो भवति, इन्द्रच्छन्दशीर्षकशुद्धहारो विजयच्छन्द-शीर्षकशुद्धहारो देवच्छन्दशीर्षकशुद्धहारोऽर्धहारशीर्षकशुद्धहारो रश्मिकलापशीर्षकशुद्धहार इत्यादिरीत्या व्यवहार्यो भवतीत्यर्थः। शीर्षकविषयेऽभिहितं शुद्धहारव्यपदेशमुपशीर्षकादावतिदिशति—**तद्वदिति**। तद्वद् शीर्षकवत्, शेषा उपशीर्षकादयः, बोद्धव्या इति शेषः। एतदुक्तं भवति—एकशीर्षकवद् एकोपशीर्षक एकप्रकाण्डक एकावघाटक एकतरलप्रतिबन्ध इत्यपरे चत्वारः शुद्धहारा इन्द्रच्छन्दोपशीर्षकशुद्धहारो विजयच्छन्दोपशीर्षकशुद्धहार इत्यादिक्रमेण प्रत्येकमुपगृहीतेन्द्रच्छन्दविजयच्छन्दादिसंज्ञाङ्का ऊहनीया इति। **मणिमध्य** इति। मणिर्मरतकादिर्मध्ये यस्य स मणिमध्यः, अर्धमाणवकः पूर्वोक्तो दशयष्टिः, त्रिफलकः पञ्चफलको वा त्रिभिः पञ्चभिर्वा स्वर्णफलकैर्युक्तो भवन्, फलकहारः फलकहारसंज्ञो भवति, स च द्विप्रकारः। **सूत्रमिति**। शुद्धा मणिहीना, एकावली एकः सरः शीर्षकाद्यन्यतमलक्षणः, सूत्रं तदाख्या भवति। **सैवेति**। सैव एकावल्येव, मणिमध्या सती, यष्टिः यष्टिसंज्ञा। **हेमेत्यादि**। हेममणिचित्रा हेममयैर्मणिभिराहितवैचित्र्या यष्टिः रत्नावली तदाख्या। **हेममणिमुक्तेत्यादि**। हेममणिमुक्तान्तरः हेममणिमुक्ताः पूर्वं हेमगुलिका ततः पद्मरागादिरत्नं ततो मौक्तिकमित्येवंक्रमगुम्फिताः अन्तरे मध्ये यस्य स तथाभूतः, अपवर्तकः तदाख्यः। **सुवर्णेत्यादि**। सुवर्णसूत्रान्तरं सुवर्णसूत्रम् अप्रत्युप्तमणिकं केवलस्वर्णफलकम् अन्तरे मध्ये यस्य तत् तथाभूतं, सोपानकं तत्संज्ञम्। **मणीत्यादि**। मणिमध्यं मणिसोपानकं मणियुक्तं प्रत्युप्तमणिकं मध्यं मध्यसुवर्णफलकं यस्य तत् तथाभूतं मणिसोपानकाख्यम्।

(All the above-mentioned varieties are of different kinds depending on the number of pearls in each necklace such as) the one called Indracchanda consists of one thousand and eight strings of pearls. Half of the same is called Vijayacchanda. Devacchanda consists of a hundred strings. Ardhahāra has sixty four strings. Raśmikalāpa has fifty four. Guccha is the one with thirty two strings. With twenty seven strings is made Nakṣatramālā. Twenty four strings give shape to Ardhaguccha. Māṇavaka has twenty strings. Half of it makes an Ardhamāṇavaka. The above-mentioned necklaces of pearls with a gem at the centre are called by the same names with the word "māṇavaka" suffixed to their names. When all the strings of a necklace are of the Śīrṣaka pattern it is called a Śuddhahāra (a pure necklace). Like wise other patterns are also given shape

to. Ardhamāṇavaka type with a gem studded in the centre on three or five golden bases form the necklaces called Triphalaka and Pañcaphalaka, Without a gem studded and formed by pure pearls is called Ekāvalī. The same with gem at the centre forms Yaṣṭi. Ratnāvali with golden globules (with pearls) is another variety. A string of pearls with gold globules set alternately is called Apavartaka. With a golden thread running all through the gems if forms Sopānaka.

तेन शिरोहस्तपादकटीकलापजालकविकल्पा व्याख्याताः।

मणिः कौटो मालेयकः पारसमुद्रकश्च।

तेनेति। तेन यथोक्तेन शीर्षकादिकण्ठाभरणप्रकारेण, शिरोहस्तपादकटीकलापजालकविकल्पाः शिरआदिचतुष्टयस्य कलापजालकविकल्पाः कलापः सरः जालकं सरसमूहः तयोर्विकल्पाः प्रकाराः, व्याख्याताः उक्तप्राया इत्यर्थः। अत्रायं सङ्ग्रहश्लोकः श्रीभट्टस्वामिनः–

अष्टौ गुणास्त्रिधा योनिर्दश सम्पत्तिभूमयः।
त्रयोदशैव मुक्तानां दोषा हाराश्च विंशतिः।। इति।
इति मौक्तिकप्रकरणम्।

With centre gems the necklace is called Maṇisopānaka.

The same pattern will explain the formations of (ornaments like) head-strings, bracelets, anklets, waist-bands and other varieties.

(The varieties of) gems (are of three kinds as) are obtained from Kauṭa (Koṭi is a place in the middle of the ocean of Malaya), Māleyaka (procured from the mount Malaya) and Pārasamudraka (from a mountain called Rohaṇa in the Simhaladvīpa (Ceylon).

सौगन्धिकः पद्मरागः अनवद्यरागः पारिजातपुष्पकः बालसूर्यकः।

वैडूर्यः–उत्पलवर्णः शिरीषपुष्पक उदकवर्णो वंशरागः शुकपत्रवर्णः पुष्यरागो गोमूत्रको गोमेदकः।

नीलावलीय इन्द्रनीलः कलायपुष्पको महानीलो जाम्बवाभो जीभूतप्रभो नन्दकः स्रवन्मध्यः।

शुद्धस्फटिकः मूलाटवर्णः शीतवृष्टिः सूर्यकान्तश्चेति मणयः।

अथ मणीनां वक्तुमुपक्रमते–मणिरिति। मणिः, कौटः कोटिर्मलयसागरान्तरं तत्रभवः, मलयैकदेशः कर्णीवनाख्यो माला तस्यां जातो मालेयकः, पारसमुद्रः सिंहलद्वीपस्थो रोहणाद्रिः तज्जः पारसमुद्रकः, इति त्रिविध इत्यर्थः। एवं च मणीनां योनस्तिस्र इत्युक्तं भवति। प्रायिकं चैतत् स्फटिकवैदूर्यमरतकादीनां विन्ध्यविदूरदर्दरादिषूत्पत्तिदर्शनादित्याहुः। श्लोकं चोदाहरन्ति–

विन्ध्यो विदूरशैलो मलयो विन्ध्योपलक्षणोद्देशः।
स्त्रीराज्यं चेति पुनस्तस्याकरभूमयोऽभिहिताः।। इति।

मणिषु पञ्चप्रकारां माणिक्यजातिमाह—**सौगन्धिक** इति। सौगन्धिकः तदाख्यकुसुमवद् ईषन्नैल्यरूषित-रक्तवर्णः, पद्मरागः पद्मवर्णः, अनवद्यरागः अनवद्यं कुङ्कुमं तद्वर्णः, पारिजातपुष्पकः पारिजातकुसुमवर्णः, बालसूर्यकः उदयमानसूर्यारुणः।

अष्टप्रकारां वैदूर्यजातिमाह—**वैडूर्य** इति। वैडूर्य इत्यधिकारः। उत्पलवर्णः कोकनदशोणः, शिरीषपुष्पकः शिरीषपुष्पवर्णः, उदकवर्णः उदकवत् स्वच्छवर्णः, वंशरागः वेणुपत्रवर्णः, शुकपत्रवर्णः शुकपक्षच्छविः, पुष्यरागो हरिद्रापिञ्जर इति स्वामी, गोमुत्रच्छायः, गोमेदकः गोमेदो गोरोचना तद्वर्णः।

अष्टविधामिन्द्रनीलजातिमाह—**नीले**त्यादि। नीलावलीयः शुक्ल एव नीलराजितराङ्कितः, इन्द्रनीलः मयूरबर्हवर्णः, कलायपुष्पकः कलायो धान्यभेदः तत्पुष्पसमच्छविः, महानीलः भ्रमरवर्णः, जाम्बवाभः जम्बूफलवर्णः, जीमूतप्रभः मेघवर्णः, नन्दकः अन्तःशुक्लो बहिर्नीलः, स्रवन्मध्यः स्रवज्जलाकाररश्मिप्रसरः।

चतुर्विधां स्फटिकजातिमाह—**शुद्धे**त्यादि। शुद्धस्फटिकः अत्यन्तशुक्लः, मूलाटवर्णः उद्धृतस्नेह-दधिच्छायः शीतवृष्टिः चन्द्रकान्तः यश्चन्द्रकिरणस्पर्शे द्रवति, सूर्यकान्तः यः सूर्यकरसम्पर्केऽग्निं वमति। चशब्दः समुच्चये। इति मणयः मणिभेदाः।

Māṇikya (ruby) are (of five kinds) : viz, Saugandhika (red coloured flower with a tinge of blue in the petals—a kind of water-lily), Padmarāga (with lotus-colour), Anavadyarāga (with the colour of kuṅkuma), Pārijātapuṣpaka (with the colour of Pārijāta flower—Erythrina Indica), and Bālasūryaka (red-coloured as the rising sun.)

Vaidūrya (Cat's-eye-gem—produced in the Vidura mountain) gems are (of eight kinds) known as : Utpalavarṇa (or the colour of blue lotus), Śiriṣapuṣpaka (of the colour of Śirīṣa (Acacia Sirisa) flower); Udakavarṇa (or crystal colour as water); Vamśarāga (of the colour of the bamboo), Sukapatravarṇa (of the colour of the feathers of a parrot); Puṣyarāga (Topaz), Gomūtraka (of the colour of the urine of a cow) and Gomedaka (a gem brought from the Himalaya and the Indus).

(Eight varieties of blue gems are) : Nīlāvalīya (white with blue-lines passing through); Indranīla (blue like the feather of a peacock); Kalāyapuṣpaka (of the colour of Kalāya flower with dark colour), Mahānīla (of the colour of a blue bee), Jāmbavābha (like—apple), Jīmūtaprabha (resembling a rain-cloud), Nandaka (blue with whiteness inside) and Sravanmadhya (that which appears like water pouring from the centre).

Crystals are of (four kinds as) the nature of Śuddhasphaṭika (extremely white in colour), Mūlāṭavarṇa (of the colour of curd from which ghee is separated); Śītavṛṣṭi (which appears to pour cold water) and Sūryakānta (the sunstone).

षडश्रश्चतुरश्रो वृत्तो वा, तीव्ररागः संस्थानवानच्छः स्निग्धो गुरुरर्चिष्मानन्तर्गतप्रभः प्रभानुलेपी चेति मणिगुणाः।

मन्दरागप्रभः सशर्करः पुष्पच्छिद्रः खण्डो दुर्विद्धो लेखाकीर्ण इति दोषाः।

आर्याश्चात्राचार्यैरुदाहृताः–

शशरुधिरजपाबन्धूकसन्निभाः पारिजातपुष्पाभाः।
तरुणतरणित्विषो वा त एव खलु पद्मरागाः स्युः।।
शुकबर्हवारिसैन्धवशिरीषकुसुमप्रभं हरिदाभम्।
मार्जारनयननैल्यं वंशच्छदकान्ति वैदूर्यम्।।
बर्हिणचन्द्रकवर्णा भ्रमराभाः पक्वजम्ब्वाभाः।
सूर्यांशुतापयोगात् कृच्छ्रालोका महानीलाः।।
मन्दरमथनायासितवासुकिजिविषोद्भवा मरतकस्य।
प्रथमोत्पत्तिः कथिता केचिद् भुजगाण्डजेति जगुः।।
गरुडच्छदप्रकाशं कदलीदलवंशपत्रवर्णं वा।
परिपक्वकलमकणिशानुकारि वा मरतकं गदितम्।।

इति।

केचत् पुनः सौगन्धिकशब्दस्य माणिक्यपर्यायतां वदन्तः सौगन्धिक इति वैदूर्याधिकारवद् माणिक्याधिकारस्तस्य प्रभेदाः पद्मरागादयश्चत्वार इति, उत्पलवर्णादयो नीलावलीयान्ता वैदूर्यस्य नव प्रभेदा इति, इन्द्रनील इत्यधिकारः कलायपुष्पकादयः स्रवन्मध्यान्तास्तस्य षट् प्रभेदा इति, शुद्धस्फटिकादयश्चत्वारः स्फटिकप्रभेदा इति च व्याचक्षत इत्याह स्वामी।

अथैकादश मणिगुणानाह–**षडश्र** इति। षडश्रः षट्कोटिः, चतुरश्रश्चतुष्कोटिः, वृत्तः चारुपरिमण्डलः, तीव्ररागः अत्यन्तभास्वरः, संस्थानवान् भूषणप्रतिवापयोग्यावयवसन्निवेशः, अच्छः निर्मलः, स्निग्धः मसृणः, गुरुः भारवान्, अर्चिष्मान् दीप्तिमान्, अन्तर्गतप्रभः मध्यभागेऽपि प्रभातरलः, प्रभया स्वीयया सन्निकृष्टमनुलिम्पतीति प्रभानुलेपी, चेति समुच्चये।

सप्त मणिदोषानाह–**मन्दे**त्यादि। मन्दरागप्रभः मन्दरागो वर्णरहितः मन्दप्रभो द्युतिहीनः, सशर्करः पुलकितः, पुष्पच्छिद्रः बिन्दुगर्भः, खण्डः दीर्णः, दुर्विद्ध अस्थानविद्धः, लेखाकीर्णः राजियुक्तः, इति दोषाः। अत्र भट्टस्वामिना बार्हस्पत्यौ द्वौ श्लोकावुदाहृतौ–

Such are the qualities of gems as : hexagonal, quadrangular, or circular, possessed of brilliant glow, pure, smooth, heavy, sparkling, transparent and illuminating.

The defects of the gems are : faint colour, sandy layer, spots, holes, bad perforation and scratches.

विमलकः सस्यकोऽञ्जनमूलकः पित्तकः सुलभको लोहिताक्षो मृगाश्मको ज्योतीरसको मैलेयक आहिच्छत्रकः कूर्पः प्रतिकूर्पः सुगन्धिकूर्पः क्षीरपकः शुक्तिचूर्णकः शिलाप्रवालकः पुलकः शुक्रपुलकः इत्यन्तरजातयः।

शेषाः काचमणयः।

सभाराष्ट्रकं मध्यमराष्ट्रकं कास्तीरराष्ट्रकं श्रीकटनकं मणिमन्तकमिन्द्रवानकं च वज्रम्।

पुष्पच्छिद्रोऽथ दुर्विद्धः शर्करानुगतस्तथा।
मन्दरागप्रभश्चैव जातिभेदाः प्रकीर्तिताः।।
प्रान्तश्च वामवृत्तश्च वलितास्यः (क) शान्वितः।
कृष्णिकश्च विशीर्णश्च नहि शास्त्रे प्रशस्यते।। इति।

अथावान्तरजातिमणीनाह—**विमलक** इति। विमलकः श्वेतहरितः, सस्यको नीलः, अञ्जनमूलकः नीलश्यामः, पित्तका गोपित्तवर्णः, सुलभकः शुक्लः, लोहिताक्षः पर्यन्तरक्तः कृष्णमध्यः, मृगाश्मकः सितासितः, ज्योतीरसकः शुक्ललोहितः, मैलेयकः हिङ्गुलकच्छायः, आहिच्छत्रकः मन्दरागः, मन्दरागः कूर्पः शर्करिलः, प्रतिकूर्पः स्निग्धकरुचिः, सुगन्धिकूर्पः मुद्गवर्णः, क्षीरपको दुग्धवर्णः, शुक्तिचूर्णको नैकवर्णः, शिलाप्रवालकः प्रवालवर्णः, पुलकः कृष्णगर्भः, शुक्रपुलकः शुक्लगर्भः, इत्यन्तरजातयः अनेन प्रकारेणाष्टादशावान्तरजातिमणयो बोद्धव्याः। त एते प्रशस्ताः।

अप्रशस्तानाह—**शेषा** इति। शेषाः उक्तेभ्योऽन्ये, काचमणयः अधममणयः। अत्र सङ्ग्रहश्लोकं पठन्ति—

पञ्चविंशतिभेदानां गुणास्त्वेकादश स्मृताः।
सप्त दोषा मणीनां तु दशाष्टौ च विजातयः।। इति।

अथ वज्रमणेराकरयोनिवर्णगुणदोषा वर्ण्यन्ते। तत्राकरानाह—**सभे**त्यादि। वज्रं हीरः, सभाराष्ट्रकं वैदर्भकं, मध्यमराष्ट्रकं कोसलोत्पन्नं, कास्तीरराष्ट्रकं कास्तीरराष्ट्रजं, श्रीकटनकं श्रीकटनपर्वतभवं, मणिमन्तकम् उत्तरापथवर्तिमणिमन्तकाख्यपर्वतजम्, इन्द्रवानकं कालिङ्गकं, चः समुच्चये। एवं सभाराष्ट्रादयो वज्रस्य षडाकरा उक्ताः। एतच्चोपलक्षणमन्यत्रापि वज्रस्योत्पत्तिदर्शनादिति ज्ञेयम्।

There are (eighteen) subvarieties of the gems as—Vimalaka (pure); Sasyaka (blue like a plant), Añjanamūlaka (blue-dark); Pittaka (yellowish like bile of a cow); Sulabhaka (white); Lohitākṣa (red with dark spot in the centre); Mṛgā śmaka (black and white); Jyotīrasaka (white with red-tinge); Maileyaka (having the colour of Hingu—Asafoetida); Āhicchatraka (mild-red); Kūrpa (having sandy lair inside); Pratikūrpa (having the colour of honey); Sugandhikūrpa (of the colour of mudga (kidney bean); Kṣīrapaka (of the colour of milk); Śukticūrṇaka (of variegated colours); Śilāpravālaka (of the colour of coral); Pulaka (black and red); and Śukrapulaka (white and black).

The rest are of (inferior varieties) the class of crystals (quartz).

Diamonds are (of six sources of origin) such as Sabhārāṣṭraka (of the country of Vidarbha); Madhyamarāṣṭraka (of the country of Kosala); Kāstirarāṣṭraka (of the country of Kāstīra); Śrīkaṭanaka (of the mountain region of Śrīkaṭana); Maṇimantaka (of the hill of Maṇimanta in Uttarpradesh) and Indravānaka (produced in the country of Kaliṅga).

खनिः स्त्रोतः प्रकीर्णकं च योनयः।

मार्जाराक्षकं च शिरीषपुष्पकं गोमूत्रकं गोमेदकं शुद्धस्फटिकं मूलाटीपुष्पकवर्णं मणिवर्णानामन्यतमवर्णमिति वज्रवर्णाः।

स्थूलं स्निग्धं गुरु प्रहारसहं समकोटिकं भाजनलेखि तर्कुभ्रामि भ्राजिष्णु च प्रशस्तम्।

नष्टकोणं निरश्रि पार्श्वापवृत्तं च अप्रशस्तम्।

वज्रस्य त्रिविधां योनिमाह—**खनिरिति**। खनिः खन्यमानो भूप्रदेशविशेषः, स्रोतः जलप्रवाहविशेषः, प्रकीर्णकं गजदन्तमूलादि।

वज्रस्य वर्णानाह—**मार्जारेत्यादि**। मार्जाराक्षकं मार्जारनेत्रच्छायम्। शेषं व्याख्यातपरम्। मार्जारनेत्रादिपुष्पकान्तसवर्णत्वं प्रायिकत्वात् पृथगभिधाय विरलदर्शनं मण्यन्तरसाधारणं वर्णान्तरमतिदिशति—**मणिवर्णानामन्यतमवर्णमिति**। इति वज्रवर्णाः।

अष्टौ गुणानाह—**स्थूलमिति**। स्थूलादित्रिकमवगतार्थम्। प्रहारसहं शिलापुत्रकप्रहारेणाप्यभेद्यं, समकोटिकं समास्तुल्याः कोटयो यस्य तत्, भाजनलेखि सोदकमसृणकांस्यपात्रीनिवेशितं वज्रं परिचाल्यमानं सत् पात्रे लेखोत्पादकं, तर्कुभ्रामि तर्कुर्भ्रमियन्त्रं तद्वद् भ्रमणशीलं, भ्राजिष्णु अतिमात्रदीप्तिकं, चः समुच्चये, प्रशस्तम् उत्तमं वज्रम्। श्लोकाश्चात्र भवन्ति—

तर्कुभ्रामि स्निग्धं समकोटि महद् गुरु प्रहारसहम्।
तमति च भाजनलेखि प्रशस्ततमं वज्रमुद्दिष्टम्।।
क्षिप्तमग्नौ च यद् वज्रं वर्णान्यत्वं न गच्छति।
शाणे वा घृष्यमाणं च निकषे वा विरज्यते।।
वृत्तिकैराहतं यच्च विपत्तिं नैव गच्छति।
रागवर्णसमायुक्तं बही रश्मिसमन्वितम्।।
गुरुस्नेहयुतं चैव गुणैरेभिः समन्वितम्।
एतद् विशिष्टं वज्राणां रत्नाधिपतिकीर्तितम्।
नष्टकोणं निरश्रीकं पार्श्वयातं च वर्जयेत्। इति।

अधमं त्रिविधमाह—**नष्टेत्यादि**। नष्टकोणं शिखरशून्यं, निरश्रि अश्रिरहितं, पार्श्वापवृत्तम् एकपार्श्वनिस्सृतम्। अन्ये तु दोषाः यथोक्तगुणवैपरीत्यात्मानः स्वयमूहनीयाः। यदाहुः—

विरूपान् मन्दरागांश्च निष्प्रभान् क्रूरदर्शनान्।
दग्धांश्चोद्गारिणश्चैव वज्राञ्छत्रुषु निक्षिपेत्।।
इति।

इति वज्रनिरूपणम्।

The sources from which these (diamonds) are obtained include mines, river-beds and miscellaneous places.

The colours of diamonds are :—Mārjārākṣaka (like the eye of cat);

Śirīṣapuṣpaka (flower of Acacia Sirisa); Gomūtraka (colour of the urine of cow), Gomedaka (of the colour of the bile of cow); Śuddhasphaṭika (pure crystal white), Mūlāṭipuṣpakavarṇa (of the colour of the flower of Mūlāṭi) and one among the colours of the gems described.

The best among them are the varieties of big, smooth, heavy, hard (to withstand blows), regular, capable of scratching on a vessel), grindstone, and brilliant.

The inferior ones are : devoid of angles, uneven (tips), and bent on one side.

प्रवालकम् आलकन्दकं वैवर्णिकं च रक्तं पद्मरागं च करटगर्भिणिकावर्जमिति।

चन्दनं– सातनं रक्तं भूमिगन्धि। गोशीर्षकं कालताम्रं मत्स्यगन्धि। हरिचन्दनं शुकपत्रवर्णमाम्रगन्धि। तार्णसं च । ग्रामेरुकं रक्तं रक्तकालं वा बस्तमूत्रगन्धि। दैवसभेयं रक्तं पद्मगन्धि। जावकं च। जोङ्गकं रक्तं रक्तकालं वा स्निग्धम्। तौरूपं च। मालेयकं पाण्डुरक्तम्। कुचन्दनं कालवर्णकं गोमूत्रगन्धि। कालपर्वतकं रूक्षमगुरुकालं रक्तं रक्तकालं वा। कोशकारपर्वतकं कालं कालचित्रं वा। शीतोदकीयं पद्माभं कालस्निग्धं वा। नागपर्वतकं रूक्षं शैवलवर्णं वा। शाकलं कपिलमिति।

अथ प्रवालमाह—प्रवालकमिति। प्रवालकम्, आलकन्दकम् अलकन्दो नाम बर्बरकूले समुद्रैकदेशस्तत्र भवं, वैवर्णिकं विवर्णो नाम यवनद्वीपे समुद्रैकदेशस्तत्रोत्पन्नं च, इति द्वियोनिकम्। रक्तं पद्मरागं चेति द्विवर्णकम्। करटगर्भिणिकावर्जमिति द्विदोषत्ववचनं, करटं क्रिमिजग्धं गर्भिणिकां स्थूलमध्यं च वर्जयित्वान्यत् प्रवालकमुपादेयमित्यर्थः। इति शब्दः समाप्तौ, रत्नपरीक्षा समाप्तेत्यर्थः।

इति प्रवालनिरूपणम्।

अथ सारेषु निरूपणीयेषु प्रथमं सारमुख्यं चन्दनमाह—चन्दनमिति। चन्दनम् अधिक्रियत इत्यर्थः। तस्य सातनादय उत्पत्तिभूमयः षोडश, रक्तादयो वर्णा नव, भूमिगन्धादयो गन्धाः षट्, लघुत्वादयो गुणा एकादश। त एतेऽभिधीयन्ते। सातनमिति। सातनं सातनदेशभवं, रक्तं रक्तवर्णं, भूमिगन्धि नवसिक्त-भूसमानगन्धम्। गोशीर्षकं तद्देशजं, कालताम्रं कृष्णशोणं, मत्स्यगन्धि मत्स्यतुल्यगन्धं, रक्तकरवीरतुल्यगन्धीति स्वामी। हरिचन्दनं हरिदेशजं चन्दनं, शुकपत्रवर्णम्, आमगन्धि चूतफलतुल्यगन्धि। तार्णसं च तृणसाख्यनदीनिकटभवं चन्दनं, चकारात् शुकपत्रवर्णम् आम्रगन्धि च। ग्रामेरुकं ग्रामेरुप्रभं, रक्तं रक्तकालं वा, बस्तमूत्रगन्धि अजमूत्रगन्धि, बस्तशब्दः कस्तूरी मृगवचन इत्यन्ये। दैवसभेयं देवसभायां भवं, रक्तं, पद्मगन्धि। सातनादयस्त्रयोदश मलयैकदेशाः। जावकं च जावकदेशभवं च, रक्तं पद्मगन्धि चेत्यनुषज्यते। जोङ्गकं, रक्ते रक्तकालं वा, स्निग्धं स्नेहगुणयुक्त, गन्धान्तरानुक्त्यात्रापि पद्मगन्धीति सम्बध्यते। तौरुपं च, जोङ्गकमिव रक्तं रक्तकालं वा स्निग्धं पद्मगन्धि चेत्यर्थः। जावकादित्रिकं कामरूपजं बोद्धव्यम्। मालेयकं, पाण्डुरक्तं, पूर्ववत् पद्मगन्धि च। एवञ्च दैवसभेयादिमालेयकान्तपञ्चकस्य पद्मगन्धित्वमुक्तं भवति। कुचन्दनं, कालवर्णकं कृष्णं, गोमूत्रगन्धि गोमूत्रं हि परिणामे सुगन्धि, अपरे तु गोमूत्रं नीलोत्पलमिति सम्प्रदाय इत्याहुः। कालपर्वतकं तद्देशभवं, रूक्षं खरम्, अगुरुकालम् अगुरुवत् कृष्णं, रक्तं, रक्तकालं वा कृष्णारुणं

वा। पूर्वोक्तन्यायेनात्र गोमूत्रगन्धीति सम्बन्धनीयम्। केषुचिदादर्शेषु 'कुचन्दनं कालरूक्षमगुरुकालं रक्तं रक्तकालं वा कालपर्वतकमनवद्यवर्णं वा' इति पाठो दृश्यते स गन्धानुक्तेरशुद्धः प्रतिभाति। तत्रानवद्यवर्णमित्यस्य कुङ्कुमवर्णमित्यर्थः, शेषं तु सुबोधम्। कोशकारपर्वतकं तदाख्यदेशभवं, कालं, कालचित्रं वा कृष्णकर्बुरं वा। शीतोदकीयं शीतोदकदेशभवं, पद्माभं पद्मवर्णं, कालस्निग्धं वा। नागपवर्तकं तदाख्यदेशजं, रूक्षं खरं, शैवलवर्णं जलनीलीवर्णम्। शाकलं शाकलदेशोद्भवं, कपिलं कडारवर्णम्। इह कालपर्वतकादीनां शाकलान्तानां कुचन्दनवद् गोमूत्रगन्धित्वं दृष्टव्यम्।

Pravāla (corals) are obtaiend from (two) sources such as Ālakandaka (a seashore region in Barbarakula) and Vaivarṇika (Vivarṇa is a place in Yavanandvīpa on the sea). The colours are red and of ruby colour. The blemishes like the perforations made by insects living inside are to be avoided.

Candana (sandal has sixteen places of origin, nine colours, six fragrances and eleven qualities (as hereunder :)

Sātana (obtained from the region of Sātana) is of red colour and smells like the earth. Gośīrṣaka (a locality where it is grown) is dark red and smells like a fish. Haricandana (belonging to Haridesa locality) is green like the feathers of a parrot and smells like Mango fruit. Similar is Taurṇasa (obtained near the river Tṛṇasā) in smell and colour. Grāmeruka is either red or dark red and smells like the urine of a goat. Daivasabheyam (produced in the assembly of gods) is red and smells like lotus. Jāvaka (produced in the region of that name) is also similar (in colour and smell). Jongakam is red or dark red, smooth (and smells like lotus). Taurūpa (produced in Kāmarūpa) is also similar (in colour and smell as above). Māleyaka is pale red and with the smell of lotus. Kucandana is dark in colour and smells like the urine of cow. Kālaparvataka (obtained from that region) is pungent, black as aguru (fragrant Aloe wood), red or black red. Kośakāraparvataka (obtained from that region) is black or variegated black. Śītodakīya (belong ing to that locality) is of lotus colour or smooth black. Nāgaparvataka (belong to that region) is pungent and green as moss. Śākala (belonging to that region) is of tawny colour.

लघु स्निग्धमश्यानं सर्पिःस्नेहलेपि गन्धसुखं त्वगनुसार्यनुल्बणमविराग्युष्णसहं दाहग्राहि सुखस्पर्शनमिति चन्दनगुणाः।

एवं जातिवर्णगन्धा उक्ताः। गुणानाह—लघ्वित्यादि। लघु अभारिकं, स्निग्धं मसृणम्, अश्यानं चिरशोषि, सर्पिःस्नेहलेपि घृतमिव देहं स्नेहेन लिम्पति यत् तथाभूतं, गन्धसुखं गन्धेन मोदजनकं, त्वगनुसारि त्वचमनुप्रविश्य सुखकरम्, अनुल्बणं सूक्ष्मत्वादस्फुटम्, अविरागि द्रव्यान्तरमिश्रणे स्वेदाद्युपघाते चाविकृतवर्णगन्धम्, उष्णसहं स्वलिप्ताङ्गस्योष्णसंवेदनप्रतिबन्धि, दाहग्राहि सन्तापहरं, सुखस्पर्शनं स्पर्शे

नवनीतवत् सुखावहम्। इति चन्दनगुणा: अनेन प्रकारेणैकादश चन्दनस्य गुणा विज्ञेया:। अत्र सङ्ग्रहश्लोकं पठन्ति–

षड् गन्धा नवधा वर्णो गुणाश्चैकादश स्मृता:।
चन्दनानां समासेन षोडशोत्पत्तिभूमय:।। इति।

The qualities of Candana (sandal) are : light, smooth, moist, as greasy as ghee, of pleasant smell, pleasing to the skin, not pungent, of unchanging colour, absorbing heat, heat resistent and pleasing to the touch.

अगुरु–जोङ्गकं कालं कालचित्रं मण्डलचित्रं वा। श्यामं दोङ्गकम्। पारसमुद्रकं चित्ररूपम्। उशीरगन्धि नवमालिकागन्धि वेति।

गुरु स्निग्धं पेशलगन्धि निर्हारि अग्निसहमसंप्लुतधूमं समगन्धं विमर्दसहमित्यगुरुगुणा:।

तैलपर्णिकं–अशोकग्रामिकं मांसवर्णं पद्मगन्धि। जोङ्गकं रक्तपीतकमुत्पलगन्धि गोमूत्रगन्धि वा। ग्रामेरुकं स्निग्धं गोमूत्रगन्धि। सौवर्णकुड्यकं रक्तपीतं मातुलुङ्गगन्धि। पूर्णकद्वीपकं पद्मगन्धि नवनीतगन्धि वेति।

अथागुरुजातिवर्णगन्धगुणानाह–अगुर्वित्यादि। अगुर्वित्यधिकार:। जोङ्गकं तदाख्यमगुरु त्रिविधं, कालं कृष्णं, कालचित्रं। कृष्णगौररेखामिश्रं, मण्डलचित्रं कृष्णगौरबिन्दुचित्रमिति स्वामी, वाशब्द: समुच्चये। दोङ्गकं तदाख्यं, श्यामम्। जोङ्गकदोङ्गके कामरूपभवे। पारसमुद्रकं सिंहलद्वीपोत्पन्नं, चित्ररूपं नानावर्णम्। गन्धमाह–उशीरगन्धि नवमालिकागन्धि वेति। गन्धद्वैविध्यमनेनोक्तम्।

अगुरुणो जातिवर्णगन्धानुक्त्वा गुणानाह–गुर्विति। गुरु भारिकं, स्निग्धम् अपरुषं, पेशलगन्धि हृद्यगन्धं, निर्हारि दूरप्रसृत्वरगन्धम्, अग्निसहम् अग्निना क्षिप्रं न दह्यते, असंप्लुतधूमम् अव्याकुलधूमं, समगन्धं दह्यमानस्यादिमध्यान्तेष्वेकरूपगन्धं, विमर्दसहं वस्त्रादिनिर्मार्जनेऽप्यक्षीयमाणगन्धमित्यर्थ:। इति अगुरुगुणा:। तदेवम्–

उत्पत्तिभूमयस्तिस्र: कृष्णो वर्ण: प्रधानत:।
द्वावेवागुरुणो गन्धौ गुणास्तस्याष्ट कीर्तिता:।।

इति सङ्ग्रहश्लोक:।

अथ तैलपर्णिकस्य योन्यादिकमाह–तैलपर्णिकमित्यादि। तैलपर्णिकमित्यधिकार:। अशोकग्रामिकम् अशोकग्रामे कामरूपवर्तिनि भवं, मांसवर्णं हरिणमांसपेशीवर्णमिति स्वामी, पद्मगन्धि। जोङ्गकं कामरूपस्थे जोङ्गाख्ये प्रदेशे भवं, रक्तपीतकं मनश्शिलावर्णम्, उत्पलगन्धि गोमूत्रगन्धि वा भवति। ग्रामेरुकं कामरूपवर्तिनि ग्रामेरुसंज्ञे ग्रामे भवं, स्निग्धं, गोमूत्रगन्धि, जोङ्गकवद् रक्तपीतवर्णम्। सौवर्णकुड्यकं सुवर्णकुड्यो नाम ग्राम: कामरूपग: तत्र जातं, रक्तपीतं मातुलुङ्गगन्धि। पूर्णकद्वीपकं पूर्णकद्वीप: कामरूपेष्वेव तत्र भवं, पद्मगन्धि, नवनीतगन्धि वा, वर्णतस्तु रक्तपीतम्।

Aguru (Aloe wood) is of different kinds : Jongaka (produced in that country) is black, variegated black (in colour). Pārasamudraka (obtained from Ceylon) is variegated. Uśīragandhi-having the smell of Uśīra (root

of the plant Androposon Muricatus) and Navamālikāgandhi—smelling like jasmine flower.

Its qualities are : heavy, smooth of agreeable fragrance, spreading fragrance afar, not easily burnt, without thick smoke, of continuously soft fragrance and withstanding touch (without loosing smell).

Tailaparṇika—(the white sandal) are of several varieties :— Aśokagrāmika (from Aśokagrāma in the country of Kāmarūpa) is red as flesh and smells like lotus. Jongaka (a region in Kāmarūpa) variety is yellow-red (like arsenic) with the smell of the blue lotus or the urine of cow. Grāmeruka (of the village in Kāmarūpa) is smooth and possesses the smell of the urine of cow. Ṣauvarṇakuḍyaka (from the village Suvarṇakuḍya in Kāmarūpa) is reddish yellow and smells like the fruit of Mātulungaka (fruit of citron). Pūrṇakadvīpaka (from that region of Kāmarūpa) smells like lotus or like butter.

भद्रश्रीयं–पारलौहित्यकं जातीवर्णम्। आन्तरवत्यमुशीरवर्णम्। उभयं कुष्ठगन्धि चेति।

कालेयकः–स्वर्णभूमिजः स्निग्धपीतकः। औत्तरपर्वतको रक्तपीतकः। इति साराः।

पिण्डक्वाथधूमसहमविरागि योगानुविधायि च। चन्दनागुरुवच्च तेषां गुणाः।

भद्रश्रीयस्य योन्यादिकमाह–भद्रश्रीयमित्यादि। भद्रश्रीयं चन्दनविशेषः। भद्रश्रीयपदार्थे 'केचित् कर्पूरमित्याहुस्तक्कोलमिति चापरे। श्रीवासकं तथा केचित् केचिल्लोहितचन्दनम्।।' इति विप्रतिपत्तयः स्वामिनोक्ताः। पारलौहित्यकं कामरूपे लौहित्याख्यनदपारभवं, जातीवर्णं जातीकुसुमवर्णम्। आन्तरवत्यं कामरूपेष्वेवान्तरवत्याख्यनदीतीरे जातम्, उशीरवर्णं लामज्जच्छायम्। उभयं पारलौहित्यकादिद्विकं, कुष्ठगन्धि च पारिभाव्याख्यौषधगन्धि च। इतिशब्दः भद्रश्रीयनिरूपणसमाप्तौ।

कालेयकस्य योन्यादिकमाह–कालेयक इति। कालेयको नाम काष्ठाविशेषः, स स्वर्णभूमिजः सुवर्णभूमिर्भर्मदेशस्तत्रोत्पन्नः, स्निग्धपीतकः मसृणः पीतवर्णश्च। औत्तरपवर्तकः हैमवतः, रक्तपीतकः मनश्शिलावर्णः। इति उक्तैः प्रकारैः, साराः चन्दनादिकालेयकान्ताः सारपदार्था निरूपिता इत्यर्थः।

अथ तैलपर्णिकादीनां त्रयाणां गुणमाह–पिण्डेत्यादि। पिण्डक्वाथधूमसहं पिण्डं पेषणादिना पिण्डीकरणं क्वाथम् अग्निना क्वथनं धूमं धूपनं च सहत इति तथाभूतं, पेषणक्वथनधूपनेष्वविसंवादिगन्धमित्यर्थः, अविरागि द्रव्यान्तरमिश्रणेन कालान्तरेण वा निर्विकारस्वभावं, योगानुविधायि च गन्धयुक्त्यनुकूलं च। तैलपर्णिकादित्रकं तु विशेष्यं गम्यम्। उक्ताः पिण्डसहत्वादयो न केवलं तैलपर्णिकादीनां गुणाः, किन्तु चन्दनागुरुवच्च तेषां गुणा भवन्तीत्याह **चन्दनागुरुवच्च तेषां गुणा** इति। चन्दनवद् गुणाः एकादश लघुत्वादयः, अगुरुवद् गुणा अष्टौ गुरुत्वादयः।

इति सारनिरूपणम्।

Bhadraśrīya (a variety of Sandal called Raktacandana)—is of Pāralauhityaka (region of that name in the Kāmarūpa) with the colour of Jāti (jasmine flower) as also of Āntaravatyaka (of that region) with the

colour of Uśīra (Āndroposon Muricatus). Both have the smell of Kuṣṭha (costus speciosus).

Kāleyaka (a timber—yellow fragrant wood) is Svarṇabhūmija (produced from the place in Suvarṇadvīpa) which is smooth and yellow in colour. Auttaraparvataka (from the northern mountian is reddish-yellow). These are the commodities of superior value.

The qualities (of these three—Tailaparṇika, Bhadraśrīya and Kāleyaka) are that they are lasting whether they are made into a paste, boiled or burnt; also the colour is neither changed or affected when mixed with other substances. Their qualities are similar to those of sandal and Aguru (Aloe wood).

कान्तनावकं प्रैयकं चौत्तरपर्वतकं चर्म। कान्तनावकं मयूरग्रीवाभम्। प्रैयकं नीलपीतं श्वेतं लेखाबिन्दुचित्रम्। तदुभयमष्टाङ्गुलायामम्।

बिसी महाबिसी च द्वादशग्रामीये। अव्यक्तरूपा दुहिलिका चित्रा वा बिसी। परुषा श्वेतप्राया महाबिसी। द्वादशाङ्गुलायाममुभयम्।

श्यामिका कालिका कदली चन्द्रोत्तरा शाकुला चारोहजाः। कपिला बिन्दुचित्रा वा श्यामिका। कालिका कपिला कपोतवर्णा वा। तदुभयमष्टाङ्गुलायामम्। परुषा कदली हस्तायता। सैव चन्द्रचित्रा चन्द्रोत्तरा। कदलीत्रिभागा शाकुला कोठमण्डलचित्रा कृतकर्णिकाजिनचित्रा चेति।

अथ फल्गुषु निरूपणीयेषु प्रथमं पञ्चदशप्रकारा चर्मजातिर्निरूप्यते–**कान्तनावकमित्यादिना** इति चर्मजातय इत्यन्तेन। तत्रादौ प्रकारद्वयमुद्दिशति–**कान्तनावकमिति**। कान्तनावकं तदाख्यदेशभवं, प्रैयकं च तदाख्यदेशभवं च, औत्तरपर्वतकं हैमवतं, चर्म। एवञ्च कान्तनावकप्रैयकाख्यौ हिमवत एवैकदेशौ बोद्धव्यौ। तत्र कान्तनावकं, मयूरग्रीवाभमित्येकविधम्। प्रैयकं तु, नीलपीतं, श्वेतं, लेखाबिन्दुचित्रं लेखाभिः कृतवैचित्र्यं बिन्दुभिः कृतवैचित्र्यं चेति चतुर्विधम्। तदुभयं कान्तनावकं प्रैयकं च, अष्टाङ्गुलायामम्।

बिसीति। बिसी महाबिसी च इत्येते चर्मणी, द्वादशग्रामीये हिमालयस्थेषु द्वादशम्लेच्छग्रमेषु भवे। तत्र बिस्याः स्वरूपमाह–**अव्यक्तेत्यादि**। बिसी, अव्यक्तरूपा सरटविशेषवद् बहुवर्णप्रतिभासयोगाद-निर्धारितैकवर्णा, दुहिलिका लोमशा, दुहिलितिकेति क्वापि पाठः, चित्रा वा, भवति। महाबिसी परुषा खरस्पर्शा, श्वेतप्राया धवलवर्णभूयिष्ठा। उभयं बिसी महाबिसीति, द्वयं, द्वादशाङ्गुलायामम्।

आरोहाख्यहिमवत्प्रदेशभवान् श्यामिकाकालिकादीन् पञ्च भेदान् उद्दिशति–**श्यामिकेत्यादि**। श्यामिका, कपिला कडारवर्णा, बिन्दुचित्रा वा, भवति। कालिका, कपिला, कपोतवर्णा वा, भवति। तदुभयं श्यामिकादि-द्वयम्, अष्टाङ्गुलायामम्। कदली, परुषा कर्कशस्पर्शा, हस्तायता चतुर्विंशत्यङ्गुलदीर्घा। वर्णस्त्वस्याः कालिकावत्। सैव कदली, चन्द्रचित्रा चन्द्राकारमण्डलयुक्ता, चन्द्रोत्तरा नाम भवति। प्रमाणं त्वस्याः कदलीवत्। शाकुला, कदलीत्रिभागा कदल्यपेक्षया त्रिगुणपरिमाणा त्रिहस्तायामेत्यर्थ इत्येके, कदलीप्रमाणतृतीयांशप्रमाणा अष्टाङ्गुलायतेत्यर्थ इत्यपरे, कोठमण्डलचित्रा रक्तमण्डलयुक्ता, कृतकर्णिकाजिनचित्रा कृतैः स्वभावकृतैः कर्णिकाजिनैश्चर्मग्रन्थिभिः चित्रा जनितशोभा। चशब्दः समुच्चये। इतिशब्द आरोहजसमाप्तौ।

Kāntanāvaka, Praiyaka and Auttaraparvataka are (the three) varieties of skin. Kāntanāvaka (produced in that region) is of the colour of the neck of the peacock. Praiyaka (product of the region in the Himālayas) is available in blue, yellow, white and variegated colours). Both have a length of eight aṅgulas.

The (two varieties of skins) Bisī and Mahābisī are procured from twelve (different villages in the Himalaya region). Of these Bisī (variety) is of indistinct colour, full of hair and variegated. Mahabisī is rough and almost white in colour. Both have a length of twelve aṅgulas.

Ārohaja varieties (procured from the region called Āroha in the Himalaya mountains) are Śyāmikā, Kālikā, Kadalī, Candrottarā and Śākulā (a total of five). Of these Syāmikā is either tawny or spotted with variegated colours. Kālikā (also) is tawny or of the colour of dove. Both these have a length of eight aṅgulas. Kadali is rough and has a length of a hasta (two feet). The same with moon-like spots is called Candrottara.

Śākulā is termed as Kadalītribhāga (either three times in length or one third of the length of Kadali—thus varying from three hastas to eight angulas—). It has red circular spots or variegated colour of a deer skin.

सामूरं चीनसी सामूली च बाह्लवेयाः। षट्त्रिंशदङ्गुलमञ्जनवर्णं सामूरम्। चीनसी रक्तकाली पाण्डुकाली वा। सामूली गोधूमवर्णेति।

सातिना नलतूला वृत्तपुच्छा च औद्राः। सातिना कृष्णा। नलतूला नलतूलवर्णा। कपिला वृत्तपुच्छा च। इति चर्मजातयः।

चर्मणां मृदु स्निग्धं बहुलरोम श्रेष्ठम्।

Bāhlaveya (belonging to the Bāhlava region of Himālayas) variety is of three types as Sāmūra, Cīnasī and Sāmūli. Sāmūra has a length of thirty six aṅgulas and is of the colour of Añjana (collyrium). Cīnasi—is blackish red, blackish-tawny. Sāmūli has the colour of wheat.

Audra (the skin of aquatic animals) are Sātinā, Nalatūlā and Vṛttapucchā. Of these Sātina variety is black. Nalatūla is of the colour of the fibre of the grass called Nala growing in water. Vṛttapuccha is tawny. These are the varieties of skins.

Among the skins those which are soft, smooth and full of hair belong to the highest class.

शुद्धं शुद्धरक्तं पक्षरक्तं च आविकम्। खचितं वानचित्रं खण्डसङ्घात्यं तन्तुविच्छिन्नं च।

कम्बलाः केचलकः कलमितिका सौमितिका तुरगास्तरणं वर्णकं तलिच्छकं वारवाणः परिस्तोमः समन्तभद्रकं च आविकम्।

पिच्छिलमार्द्रमिव च सूक्ष्मं मृदु च श्रेष्ठम्।

अष्टप्लोतिसङ्घात्या कृष्णा भिङ्गिसी वर्षवारणम्, अपसारक इति नैपालकम्।

त्रिप्रकारां बाह्लवेयजातिमाह–सामूरमित्यादि। बाह्लवः हिमवत एकदेशः तत्र भवाश्चर्मजातयो बाह्लवेयाः। ढप्रत्ययान्तश्चायम्। षट्त्रिंशदित्यादि चीनसीसामूल्योः प्रमाणं सामूरवत् षट्त्रिंशदङ्गुलं द्रष्टव्यम्। इतिशब्दः समाप्तौ।

इत्थं मूषिकादिस्थलचरचर्माण्यभिधाय जलचरचर्माण्याह–सातिनेति। सातिना नलतूला वृत्तपुच्छा च इति त्रिविधाः, औद्राः उद्रो जलमार्जारस्तस्येमे त्वग्भेदा इत्यर्थः। सातिना, कृष्णा कृष्णवर्णा। नलतूला बलतूलवर्णा नलतूलो नलाख्यतृणविशेषस्य पक्ष्म तस्येव वर्णो यस्याः सा। वृत्तपुछा, कपिला कडारवर्णा। इति चर्मजातयः उक्तेन प्रकारेण चर्मजातयोऽनुक्ता अपि यथाप्रसिद्धि बोद्धव्या इत्यर्थः।

चर्मगुणांस्त्रीनाह–चर्मणामित्यादि। चर्मणामिति निर्धारणे षष्ठी। शेषं स्पष्टम्।

इति चर्मनिरूपणम्।

Āvika—the blanket made of sheep's wool is of three kinds as white, pure red and partially red. They may be made of worsted thread by sewing, woven of wollen threads of different colours, made of different pieces that are put together or made of uniform woollen threads.

Of these the wollen blankets are (of ten kinds). Kambala (plain blanket); Kecalaka (a head dress); Saumitikā (the same as above with black colour as a second cover); Turagāstaraṇa (housings spread on the back of a horse); Varṇaka (a colourful blanket); Talicchaka (a particular variety of blanket); Vāravāṇa (a coat), Paristoma (a large balnket) and Samantabhadraka (a large housing of an elephant enough to cover the legs).

The best among these is the one that appears slippery, wet, possessed of fine threads (hair) and soft.

Varṣavāraṇa—used as rain proof is the one called Bhingisī which is made of eight pieces and black in colour. Likewise is Apasāraka (a curtain). Both are the products of Nepal.

सम्पुटिका चतुरश्रिका लम्बरा कटवानकं प्रावरकः सत्तलिकेति मृगरोम।

वाङ्गकं श्वेतं स्निग्धं दुकूलं, पौण्ड्रकं श्यामं मणिस्निग्धं, सौवर्णकुड्यकं सूर्यवर्णम्। मणिस्निग्धोदकवानं चतुरश्रवानं व्यामिश्रवानं च।

एतेषामेकांशुकमध्यर्धद्वित्रिचतुरंशुकमिति।

अथाविकं सप्तदशप्रकारं निरूपयिष्यन् प्रथमं रागभेदेन त्रिविधमाह–शुद्धमिति। अवयो मेषा नाम लोमोपकारिणः पशवः तल्लोमभवम् आविकम्। अधिकारश्चायम्। शुद्धं शुक्लं, शुद्धरक्तं सर्वारुणं, पक्षरक्तं च एकदेशारुणं च, भवति। क्रियाभेदेन चतुर्विधमाह–खचितमिति। खचितं सूचिवानकर्मनिष्पादितं, वानचित्रं

वानकर्मणा कृतवैचित्र्यं, खण्डसङ्घात्यं खचितानामुतानां वा बहूनां खण्डानां सङ्घातेन निष्पादितं, तन्तुविच्छिन्नं च अनुतविसृष्टैस्तन्तुभिर्मध्ये कृतविच्छेदं जालकोपयोगि च।

संस्थानकृतान् दश भेदानाह—**कम्बल** इति। कम्बलः प्रसिद्धः, केचलकः वन्यशिरस्त्राणं, कौचपक इत्यपपाठः। कलमितिका गजोपर्यास्तरणं, कुलमितिकेति क्वचित् पाठः। सौमितिका कलमितिकैव कृष्णवर्णा गजपर्याणोपर्यास्तरणं, तुरगास्तरणं प्रसिद्धं, वर्णकं वर्णकम्बलः, तलिच्छकं कम्बलविशेषः, तल्लिकश्रकमित्यपि पाठः। वारवाणः कञ्चुकः, परिस्तोमः कम्बलभेदो विस्तारचित्रः, यो विस्तृतवदवभासते निर्माणवैचित्र्यात् स इति व्याचक्षते, कुथ इति त्वेके। समन्तभद्रकं सन्नाहपट्टः, गजादिजघनत्राणमित्यपरे। चशब्दः समुच्चये। इहाविकाधिकारे पुनराविकमिति वचनं वैचित्र्यार्थम्।

गुणानाह—**पिच्छिलमिति**। पिच्छिलमिव श्लक्ष्णमिव भासमानम्, आर्द्रमिव च भासमानं, सूक्ष्मं, मृदु च, श्रेष्ठं भवति।

अष्टेत्यादि। अष्टप्लोतिसङ्घात्या प्रोतय एव प्लोतयः खण्डाः तत्सङ्घातनिष्पन्ना, सा कृष्णा कृष्णवर्णा, वर्षवारणं वृष्टिरोधसाधनभूता च, भिङ्गिसी तदाख्यः, कम्बलभेदः एकः, अपसारकः काण्डपट इत्यपरः। अनयोर्भेदयोर्गुणात् प्रागनभिधानं गुणासम्बन्धद्योतनार्थम्। इति नैपालकम् अनेन प्रकारेण नेपालदेशभवमाविकं निरूपितमित्यर्थः। नेपालग्रहणाच्च वक्ष्यमाणं मृगरोमादिकमन्यदेशजं सूचितम्।

(Blankets made) of the wool of animals are (of six kinds) : Samputikā (trousers); Caturaśrikā (with corners of nine aṅgulas woven); Lambarā (a blanket to cover); Kaṭavānaka (bed-spread made of thick threads); Prāvaraka (a variety of the above, a shawl); and Sattalikā (an woollen carpet).

Dukūla (the silken garment) woven in the country of Vaṅgaka is white and smooth : that made in Pauṇḍraka (of the Puṇḍra country) is black and as polished as gem, while the Sauvarṇakuḍya (made in that region) is as bright as the sun. Silken garment woven with threads drenched in water is called Caturaśravāna (pure without the use of different colours) while Vyāmiiśravāna is the one in which cotton threads are interwoven.

Varieties of the same are single, half, double, triple and quadruple garments.

तेन काशिकं पौण्ड्रकं च क्षौमं व्याख्यातम्।

मागधिका पौण्ड्रिका सौवर्णकुड्यका च पत्रोर्णाः। नागवृक्षो लिकुचो वकुलो वटश्च योनयः। पीतिका नागवृक्षिका, गोधूमवर्णा लैकुची, श्वेता वाकुली, शेषा नवनीतवर्णा।

तासां सौवर्णकुड्यका श्रेष्ठा। तया कौशेयं चीनपट्टाश्च चीनभूमिजा व्याख्याताः।

माधुरमापरान्तकं कालिङ्गकं काशिकं वाङ्गकं वात्सकं महिषकं च कार्पासिकं श्रेष्ठमिति।

षड्विधं मृगरोमजमाह—**सम्पुटिकेति**। सम्पुटिका जङ्घात्राणं सुक्थणाभिधानमिति क्वचिट्टीकादर्शे

लिखितं, सन्थनमित्यन्यत्र लिखितं दृश्यते। चतुरश्रिका दशारहिता नवाङ्गुलिचिह्नितकोणा। लम्बरा प्रच्छदपटविशेषः। कटवानकं स एव स्थूलसूत्रो भाष्यक इति तद्देशीयानां प्रसिद्ध इति स्वामी। प्रावरकः पूर्वोक्त एवान्यतरतोदशो रोमावर्तक इति तद्देशप्रसिद्ध इति स्वामी। सत्तलिका तूलिकाख्य आस्तरणविशेष इति स्वामी। इति मृगरोम अनेन प्रकारेण मृगरोमजमुक्तम्।

अथ त्रिप्रकारं दुकूलमाह—**वाङ्गकमित्यादि**। वाङ्गकं वङ्गदेशभवं, दुकूलं, श्वेतं, स्निग्धं मसृणम् पौण्ड्रकं पुण्ड्रदेशभवं, श्यामं, मणिस्निग्धं मरतकस्निग्धम्। सौवर्णकुड्यकं कामरूपस्थे सुवर्णकुड्याख्ये प्रदेशे भवं, सूर्यवर्णम् उद्यदादित्यद्युति। दुकूलस्य वानमपि त्रिप्रकारमाह—**मणीत्यादि**। मणिस्निग्धोदकवानं नाम दुकूलस्य साधनद्रव्यं जलेनार्द्रीकृत्य मणिबन्धेनावघृष्य वानं, चतुरश्रवानं वर्णान्तरासंसृष्टं शुद्धं वानं, व्यामिश्रवानं कार्पासकतन्तुमिश्रितैः कौशेयकतन्तुभिर्वानम्, अथवा वर्णान्तरसंसृष्टवानम्। चः समुच्चये।

एतेषामिति। एतेषां दुकूलानां मध्ये, एकांशुकं तानवानयोरेकतन्तुकम्, अर्थात् प्रशस्तं सूक्ष्मत्वात्। अध्यर्धद्वित्रिचतुरंशुकम् अध्यर्धांशुकं द्व्यंशुकं त्र्यंशुकं चतुरंशुकं च, अर्थादपकृष्टमुत्तरोत्तरं स्थूलत्वात्। तत्र येदकगुणं तन्यते द्विगुणमूयते द्विगुणं वा तन्यते एकगुणमूयते तदध्यर्धांशुकम्। यद् द्विगुणं तन्यते द्विगुणमूयते तद् द्व्यंशुकम्। यत् त्रिगुणं तन्यते त्रिगुणमूयते तत् त्र्यंशुकम्। यच्चतुर्गुणं तन्यते चतुर्गुणमूयते तच्चतुरंशुकम्। इतिशब्दो दुकूलनिरूपणसमाप्तौ।

This applies to fabrics of Kāśī (Banaras) and Pauṇḍraka (of the region of Puṇḍra).

The habitat of the trees that produce worms from which silk-threads are gathered, are Māgadhika, Pauṇḍrikā and Sauvarṇakuḍyaka. The (four) trees in which such worms flourish on their leaves are Nāgavrkṣa (a kind of tree). Likuca (bread-fruit tree—Artocarpus Lacucha), Bakula (Mimusops Elengi), and Vaṭa (Ficus Indica). That produced from Nāgavṛkṣa is yellow, Likuca is of the colour of the wheat, Vakula is white and the rest are of the colour of butter.

Among those the ones from Sauvarṇakuḍya (of that region in Kashmir) are the best.

This will explain the silken clothes as well and Cīnapaṭṭa (China fabrics) produced from the country of China.

Cotton fabrics from Madhurā (the capital of the Pāṇḍya kings), Aparāntaka (the region of Koṇkaṇa), Kaliṅga (of the Kalinga region), Kāśika (from Kāśi), Vāṅgaka (from Vangadeśa), Vātsaka (from the region of Vatsa) and Māhiṣaka (from Māhiṣmati the capital of Kuntaladeśa) are of superior class.

अतः परेषां रत्नानां प्रमाणं मूल्यलक्षणम्।
जातिं रूपं च जानीयान्निधानं नवकर्म च॥
पुराणप्रतिसंस्कारं कर्मगुह्यमुपस्करान्।
देशकालपरीभोगं हिंस्राणां च प्रतिक्रियाम्॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे एकादशोऽध्यायः कोशप्रवेश्यरत्नपरीक्षा, आदितो द्वात्रिंशः।।

तेनेति। तेन दुकूलगताध्यर्धांशुकत्वादिनिरूपणेन, काशिकं काशिदेशभवं, पौण्ड्रकं च पुण्ड्रदेशजं च, क्षौमं व्याख्यातं क्षौममेव निरूपितम् अध्यर्धांशुकद्व्यंशुकादिरूपं स्थूलं दुकूलमेव हि क्षौममिति व्यपदिश्यत इत्यभिप्रायः।

मगधपुण्ड्रकसुवर्णकुड्यकाख्यदेशत्रयभवां नागकेसरलकुचवकुलवटाख्यवृक्षचतुष्टययोनिं पत्रोर्णामाह– **मागधिकेति।** पत्रोर्णाः वृक्षपत्रेषु क्रिमिलालाकृता ऊर्णाः पट्टसूत्रस्य योनयः। तासां योनिभेदनिमित्तं गुणभेदमाह–**पीतिकेत्यादि।** नागवृक्षिका पीतिका नागवृक्षयोनिः पीतवर्णा। लैकुची लिकुचयोनिः। वाकुली वकुलयोनिः। शेषा वटयोनिः।

मागधिकादीनां पत्रोर्णानां मध्ये श्रेष्ठामाह–**तासामित्यादि। तयेति।** तया पत्रोर्णया, कौशेयं कोशकारभवं, चीनभूमिजाश्चीनपट्टाश्च चीनदेशभवा वस्त्रविशेषाश्च, व्याख्याताः योनितो वर्णतश्च निर्दिष्टाः, तेऽपि पत्रोर्णावन्नागवृक्षादियोनयः पीतकादिवर्णाश्चेत्यभिप्रायः।

कार्पासिकमाह–**माधुरमिति।** माधुरं मधुरा पाण्ड्यराजधानी तया पाण्ड्यदेशलक्षणात् पाण्ड्यदेशज-मित्यर्थः, आपरान्तकम् अपरान्तः कोङ्कणदेशस्तत्प्रभवं, कालिङ्गकं कलिङ्गभवं, काशिकं वाङ्गकं वङ्गजं, वात्सकं वत्सविषयोद्भवं, माहिषकं माहिष्मती कुन्तलदेशराजधानी तया देश लक्षणात् तद्देशभवमित्यर्थः, यद्वा महिषकदेशोत्पन्नं, चः समुच्चये, कार्पासिकं पाण्ड्यादिदेशसप्तकभवं कार्पासतन्तुजं वस्त्रं, श्रेष्ठम्। इतिशब्दः फल्गुसमाप्तौ। इति फल्गुनिरूपणम्।

अध्यायान्ते श्लोकावाह–**अत इति, पुराणेत्यादि च।** अतः अस्मादुक्तात् मौक्तिकादिकार्पासिकान्तात् सप्तदशकात्, परेषामन्येषां, रत्नानां रत्नप्रभृतीनां, प्रमाणं माषकाङ्गुलादिकं तुलामानपौतवदेशकालमान-प्रकरणयोर्वक्ष्यमाणं, मूल्यलक्षणं मूल्यं लक्षणं च, तत्र मूल्यं–

द्वे शते यद् धृतं रत्नं तण्डुलानां प्रमाणतः।
शतद्वयं सहस्राणां तस्य मूल्यं प्रकीर्तितम्।।

इत्युक्तरूपं, लक्षणं प्राशस्त्यं यथा मौक्तिकानां स्थूलनिस्तलादि, अथवा लक्षणं–

क्षीरकुम्भे मणिः क्षिप्तो यो रञ्जयति तेजसा।
शुक्लत्वं चोद्धृतो याति तं शुद्धमिति निर्दिशेत्।।

इत्युक्तजातीयं, जातिं मुक्तादीनां ताम्रपर्णिकत्वादिकं, रूपं वर्णं षडश्रचतुरश्रादिकं वा, निधानं निधीयमानवस्त्वेकान्तगोपनानुकूलं निधानप्रकारं, नवकर्म च आकरोद्धृतमात्रस्य शोधनवेधनघर्षणादिकं, पुराणप्रतिसंस्कारं पुराणस्य असम्भोगातिभोगादिभिर्विवर्णितस्य बन्धच्युतस्य श्लथबन्धस्य वा नवीकरणं, यदाह–

अतिभोगादसम्भोगाद् धूमाग्निस्वेदघर्षणात्।
भूम्यम्बुलवणैश्चापि मुक्तावर्णो विरज्यते।।

इति, कर्मगुह्यं कर्मरहस्यं रत्नादीनां वर्णापचारणरञ्जनघर्षणादिकम्, उपस्करान् शाणादीनि

रत्नादिकर्मोपकरणानि, देशकालपरीभोगमिति समाहारद्वन्द्वः, तत्र देशकालौ रत्नादीनामुत्पत्तिक्रयविक्रयानुकूलौ, परीभोग उपयोगः शीतयोर्देशकालयोर्मृगरोमजमुपयोज्यम् उष्णयोः कार्पासिकमित्येवंरूपः, हिंस्राणां क्षौमाद्युपघातकानां मूषिकादीनां, प्रतिक्रियां मार्जारोत्सर्गादिना प्रतिविधानं कृमिमूषिकादिजग्धानां वस्त्रादीनां सीवनादिना संस्करणं च, जानीयात्, अर्थात् कोशाध्यक्षः।

एषोऽत्र भट्टस्वामिनः सर्वसङ्ग्रहः–
मौक्तिकं मणयो वज्रं प्रवालं च समासतः।
रत्नं चतुर्विधं प्रोक्तं साराः पञ्चविधा मताः।।
चन्दनागुरुणी श्रेष्ठे मध्यमं तैलपर्णिकम्।
भद्रश्रीयं च जानीयात् कालेयकमथेतरत्।।
चर्माविमृगरोमाणि दुकूलं क्षौमजातयः।
कार्पासिकं च पत्रोर्णं कौशेयं फल्गु चाष्टधा।।
कुप्यं कुप्यायुधाध्यक्षप्रोक्तमित्यत्र नोदितम्।
मुक्ताफलाद्यशेषास्तु भेदाः सप्तदशोदिताः।। इति।।

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकारणे एकादशोऽध्यायः
कोशप्रवेश्यरत्नपरीक्षा, आदितो द्वात्रिंशः।।

As regards the other gems (over above the seventy items treated here), the superintendent shall ascertain their size, their worth, species, forms, utility, their treatment, the repair of the old ones, any kind of adulteration that is not easily detected, their wear and tear due to constant use and lapse of time, difference in places as well as remedies against damages (such as caused by worms and rats.)

Thus the Thirty second chapter of the Arthaśāstra of Kauṭalya entitled 'examination of gems to be deposited in the treasury' comes to an end. Here ends the eleventh chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 33

30. प्रक० आकरकर्मान्तप्रवर्तनम्।

Section 30 : Mining operations

आकराध्यक्षः शुल्बधातुशास्त्ररसपाकमणिपरागज्ञस्तज्ज्ञसखो वा तज्जातकर्मकरोपकरणसम्पन्नः किट्टमूषाङ्गारभस्मलिङ्गं वाकरं भूतपूर्वमभूतपूर्वं वा भूमिप्रस्तररसधातुमत्यर्थवर्णगौरवमुग्रगन्धरसं परीक्षेत।

आकरकर्मान्तप्रवर्तनमिति सूत्रम्। आकरेषु सुवर्णाद्युत्पत्तिस्थानेषु कर्मान्ताः तदुपलम्भानुकूलाः क्रियाः आकरकर्मान्ताः तेषां प्रवर्तनमनुष्ठापनमाकरकर्मान्तप्रवर्तनं, तदिहाभिधीयत इति सूत्रार्थः।

'गुप्तपुत्रदारानाकरकर्मान्तेषु वासयेदि'ति। पूर्वमुक्तम्। आकरकर्मान्तास्तु नोक्ताः, त इदानीमुच्यन्त इति सङ्गतिः।

आकराध्यक्ष इति। शुल्बधातुशास्त्ररसपाकमणिरागज्ञः शुल्बशास्त्रं भूसिराविज्ञानं शाकलादि, अथवा शुल्बं ताम्रं तस्य ताम्ररजतहेमता येनोपदिश्यन्ते तच्छुल्बशास्त्रं, कनकपञ्चाशीक्रियावादशुल्बशास्त्रमिति स्वामी, धातुशास्त्रं धातुभ्यः सर्जिकागन्धकादियुक्त्या सत्त्वपातनोपदेशकं धातुकौटल्यादिशास्त्रं, रसः रसबन्धविज्ञानं 'रसोपनिषदाख्यमि'ति स्वामी, पाकः कनकादीनां वर्णकोत्कर्षणाद्यनुकूलमग्निपचनकर्म, मणिरागः मणीनां वर्णभेदोत्पादनकर्म, एषु शुल्बशास्त्रादिषु ज्ञः कोविदः, तज्ज्ञसखो वा शुल्बशास्त्राद्यभिज्ञसहायश्च, तज्जातकर्मकरोपकरणसम्पन्नः तज्जातैस्तन्नित्योद्योगिभिः कर्मकरैः उपकरणैश्च खनित्रभस्त्रासन्दंशशाणयन्त्रादिभिः सम्पन्न उपेतः, आकराध्यक्षः, किट्टमूषाङ्गारभस्मलिङ्गं किट्टं लोहमलं मूषा आवर्तनभाण्डम् अङ्गारो भस्म च लिङ्गं भूतपूर्वत्वचिह्नं यस्य तं तथाभूतं, भूतपूर्वं पूर्वप्रवृत्तविच्छिन्नम्, आकरं, परीक्षेत उक्तलिङ्गदर्शनेन जानीयात्। भूमिप्रस्तररसधातुं भूमिर्मृत्तिका प्रस्तरः पाषाणः रसः सलिलपारतादिः भूमिप्रस्तररसात्मकाः धातवः सत्त्वप्रकृतयो यस्मिंस्तं भूमिधातुकं प्रस्तरधातुकं रसधातुकं चेत्यर्थः, अत्यर्थवर्णगौरवं वर्णोत्कर्षयुक्तं भारोत्कर्षयुक्तं च, उग्रगन्धरसं तीव्रगन्धयुक्तं तीव्ररसयुक्तं च, अभूतपूर्वम् आकरं वा परीक्षेत नवमाकरं च परीक्षेत, किमाकरगता धातवः उत्कृष्टसत्त्वा उतापकृष्टसत्त्वा आहो मध्यमसत्त्वा इति। तदीयवर्णगुरुत्वगन्धरसानां दर्शनतोलनाघ्राणास्वादनैर्निश्चिनुयादित्यभिप्रायः।

The superintendent of mines, possessed of the knowledge of the science concerned with copper (and other minerals), aided by equally knowledgeable friends, shall with the aid of mining labourers and instruments, examine mines containing mineral excrement, crucibles,

charcoals and ashes, which is already in existence or newly discovered on planes or mountain slopes possessing mineral ores, the richness of which can be ascertained by colour, weight and pungent smell as well as taste.

पर्वतानामभिज्ञातोद्देशानां बिलगुहोपत्यकालयनगूढखातेष्वन्तःप्रस्यन्दिनो जम्बूचूतताल-फलपक्वहरिद्राभेदहरितालक्षौद्रहिङ्गुलकपुण्डरीकशुकमयूरपत्रवर्णाः सवर्णोदकौषधि-पर्यन्ताश्चिक्कणा विशदा भारिकाश्च रसाः काञ्चनिकाः।

अप्सु निष्ठ्यूतास्तैलवद्विसर्पिणः पङ्कमलग्राहिणश्च ताम्ररूप्ययोः शतादुपरि वेद्धारः।

भूमिप्रस्तररसधातुषु रसः परनिर्दिष्टोऽप्यव्यभिचरितफलरूपसुवर्णयोनित्वेन महाफलत्वादल्पा-यासत्वाच्चाभ्यर्हित इति कृत्वा तमेव पञ्चप्रकारं प्रथमं निरूपयति–पर्वतानामिति। अभिज्ञातोद्देशानाम् अभिज्ञाताः पूर्वभूपपरिज्ञाताः आकरविद्याधीता वा उद्देशाः येषां तथाभूतानां, पर्वतानां, बिलगुहोपत्यकाल-यनगूढखातेषु बिलं भूविवरं गुहा देवखातगृहम् उपत्यका शैलासन्नभूमिः लयनं शिलाटङ्कनकर्मनिर्मितं गृहं गूढखातं महाशिलापिहितद्वारं बिलम् इत्येतेषु पञ्चसु, अन्तःप्रस्यन्दिनः मध्यप्रस्राविणः, जम्बूचूत-तालफलपक्वहरिद्राभेदहरितालक्षौद्रहिङ्गुलकपुण्डरीकशुकमयूरपत्रवर्णाः जम्बूफलादित्रिकं प्रसिद्धं पक्वहरि-द्राभेदः शोधितहरिद्राभङ्गः हरितालं धातुभेदः क्षौद्रं मधु हिङ्गुलको रागद्रव्यविशेषः पुण्डरीकं सिताम्बुजं शुकमयूरपत्रे शुकपक्षमयूरपक्षौ जम्बूफलादीनां दशानां वर्ण इव वर्णो येषां ते तथाभूताः, सवर्णोदकौषधिपर्यन्ता सवर्णोदकः स्ववर्णसमानवर्णजला सवर्णौषधिः स्ववर्णसमानवर्णौषधिश्च पर्यन्तः परिसरप्रदेशो येषां ते तथाभूताः, चिक्कणाः स्पृष्टहस्तसङ्गिनः, विशदाः शुचयः, भारिकाश्च गुरवश्च, रसाः, काञ्चनिकाः काञ्चनं सुवर्णं तत्प्रयोजनाः।

तेषामेव लक्षणान्तरमाह–अप्स्विति। अप्सु निष्ठ्यूता जले क्षिप्ताः, तैलवद्विसर्पिणः जले तैलवद् विसर्पणशीलाः, पङ्कमलग्राहिणश्च जलगतं पङ्कमादाय कतकवदधोगत्वराश्च, यथोक्ताः काञ्चनिकाः रसाः, ताम्ररूप्ययोरुपरि वेद्धारः ताम्रस्य रूप्यस्य चोपरि क्षिप्ताः सन्तः जात्यन्तरापादकाः सुवर्णत्वापादका इत्यर्थः। वेध्यवेद्ध्रोः योगपरिमाणमाह–शतादिति। शतमासाद्य, ल्यब्लोपे पञ्चमी, तच्च शतं ताम्ररूप्ययोर्वेध्ययोः पलशतं वेद्धुस्तं रसस्य परिमाणम् एकपलात्मकं विशेषाकथनात्, तथा च ताम्रपलशते रूप्यपलशते वा काञ्चनिकरसो वेधशास्त्रविधिनैकपलः क्षिप्तस्तत्सर्वं स्वर्णीकरोतीत्युक्तं भवति। इह वेद्धार इति 'विध विधान' इत्यस्मात् तृच्, विधानं च रूपान्तरापादनलक्षणं विवक्षितमिति बोद्धव्यम्।

Ores of gold are (in the form of) liquids oozing out from pits, caves, slopes or deep excavations of mountains which are already familiar, having the colour of the juice of fruit-apple, of mango, of palm tree, of ripe turmeric, sulphurate of arsenic, honey comb and vermillion, and (which liquids) are as brilliant as the petals of lotus or the feathers of peacock, of water or shrubs of similar colour and which are greasy, transparent and heavy.

They (the liquids) when dropped in water, spread like oil absorbing dirt and filth and are capable of transforming copper or silver into more than a hundred per cent gold.

तत्प्रतिरूपकमुग्रगन्धरसं शिलाजतु विद्यात्।

पीतकास्ताम्रकास्ताम्रपीतका वा भूमिप्रस्तरधातवो भिन्ना नीलराजीमन्तो मुद्गमाषकृसरवर्णा वा दधिबिन्दुपिण्डचित्रा हरिद्राहरीतकीपद्मपत्रशैवलयकृत्प्लीहानवद्यवर्णा भिन्नाश्चुञ्चुवालुकालेखाबिन्दुस्वस्तिकवन्तः सगुलिका आर्चिष्मन्तस्ताप्यमाना न भिद्यन्ते बहुफेनधूमाश्च सुवर्णधातवः प्रतीवापार्थास्ताम्ररूप्यवेधनाः।

तत्समरूपगन्धरसे शिलाजतुनि तद्भ्रमापनोदनार्थमाह–**तत्प्रतिरूपकमिति**। तत्प्रतिरूपकं तस्य काञ्चनिकरसस्य प्रतिरूपकं सदृशरूपं समानवर्णम्, उग्रगन्धरसं तद्वदुग्रगन्धमुग्ररसं च रसवस्तु, शिलाजतु तत्संज्ञं द्रव्यान्तरं, विद्याद् उपयोगादिना परीक्ष्य निश्चिनुयात्। अथवा रूपगन्धरसमात्रसाम्योक्त्या तैलवद्विसर्पित्वपङ्कमलग्राहित्वयोरभावस्य द्योतनात् तेनैव शिलाजतुत्वमवधारयेदित्यर्थः।

अथ त्रिविधान् भूमिप्रस्तरधातूनाह–**पीतका** इति। पीतकाः केवलपीताः, ताम्रकाः केवलताम्राः, ताम्रपीतकाः उक्तोभयमिश्राः, वेति विकल्पे, एवं त्रिविधाः, भूमिप्रस्तरधातवः भूमिधातवः प्रस्तरधातवश्च, भिन्ना नीलराजीमन्तः विदारिता मध्ये नीलरेखायुक्ताः मुद्गमाषकृसरवर्णा वा मुद्गमाषतिलौदनसवर्णाः, वेति विकल्पे। दधिबिन्दुपिण्डचित्राः दधिबिन्दुचित्रा दधिकणाकारैः सूक्ष्मैर्बिन्दुभिराकीर्णाः दधिपिण्डचित्राश्च दधिपिण्डसदृशैः स्थूलबिन्दुभिराकीर्णाश्च, हरिद्राहरीतकीपद्मपत्रशैवलयकृत्प्लीहानवद्यवर्णाः हरिद्रा रजनी हरीतकी पथ्या पद्मपत्रं पद्मदलं शैवलं जलनीली यकृत् कालखण्डाख्यो मांसविशेषः प्लीहा गुल्मः अनवद्यं कुङ्कुमम् एषामिव वर्णो येषां ते तथाविधाः। भिन्नेषु विशेषमाह–भिन्नाः सन्तः, चुञ्चुवालुकालेखाबिन्दुस्वस्तिकवन्तः चुञ्चुवालुका सूक्ष्मवालुकेति स्वामी तद्वन्तः लेखा राजयः तद्वन्तः बिन्दुमन्तः स्वस्तिकस्त्रिकोणरेखाविशेषस्तद्वन्तः, सगुलिकाः गुटिकाकारशर्करोपेताः, अर्चिष्मन्तो दीप्तिमन्तः। परीक्षान्तरमाह–ताप्यमानाः सन्तः न भिद्यन्ते न स्फुटयन्ति। कीदृशास्तर्हि भवन्तीत्यत्राह–बहुफेनधूमाः बहुफेनाः बहुधूमाश्च चशब्दः समुच्चये। एवंलक्षणाः भूमिप्रस्तरधातवः, प्रतीवापार्थाः प्रतीवापो नाम वेधनद्रव्यस्यावर्तमाने ताम्रे रूप्ये वा चूर्णीकृत्य प्रक्षेपः तदर्थास्तत्प्रयोजनाः, ताम्ररूप्यवेधनाः ताम्रस्य रूप्यस्य वा स्वर्णत्वापादकाः, अत एव सुवर्णधातवः सुवर्णहेतुभूता धातव इत्युच्यन्त इत्यर्थः।

Like-wise bitumen is of similar appearance though possessed of piercing smell and taste.

Those ores of gold obtained form the plains or slopes of mountains which are either yellow or red as copper or reddish-yellow; which are disjoined and tainted with blue lines; which have the colour of black beans (māṣa = Phaseolus Radiatus), green beans (mudga = Phaseolus Mungo) and sesamum; which are spotted like a drop of curd and shining as turmeric, yellow myrobalan, petals of lotus, acquatic plant, the liver or spleen; which possess a sandy layer within them and are marked with the design of a circle or a svastika (shaped like a Greek cross with the extremities of the four arms bent round in the same direction); which contain globular masses and which when roasted do not split, but emit much foam and smoke; and are capable of transforming copper or silver (forming an amalgamation with them).

शङ्खकर्पूरस्फटिकनवनीतकपोतपारावतविमलकमयूरग्रीवावर्णाः सस्यकगोमेदकगुड-मत्स्यण्डिकावर्णाः कोविदारपद्मपाटलीकलायक्षौमात- सीपुष्पवर्णाः ससीसाः साञ्जना विस्रा भिन्नाः श्वेताभाः कृष्णाः कृष्णाभाः श्वेताः सर्वे वा लेखाबिन्दुचित्रा मृदवो ध्मायमाना न स्फुटन्ति बहुफेनधूमाश्च रूप्यधातवः।

सर्वधातूनां गौरववृद्धौ सत्त्ववृद्धिः। तेषामशुद्धा मूढगर्भा वा तीक्ष्णमूत्रक्षारभाविता राजवृक्षवटपीलुगोपित्तरोचनामहिषखरकरभमूत्र लण्डपिण्डबद्धास्तत्प्रतीवापास्तदवलेपा वा विशुद्धाः स्रवन्ति।

रूप्यधातूनाह–शङ्खेत्यादि। रूप्यधातवः रूप्यहेतवो धातवः, शङ्खवर्णकर्पूरवर्णादयोऽष्टौ सस्यकवर्गगोमेदकवर्णादयश्चत्वारः कोविदारवर्णपद्मवर्णादयः षडित्येवमष्टादशप्रकाराः। तत्र कपोतः आरण्यः कलरवः, पारावतो ग्राम्यः, विमलकः श्वेतरक्तो मणिः। सस्यको नीलमणिः, गुडः पिण्डशर्करा, मत्स्यण्डिका शर्करा। कोविदारस्ताम्रपुष्पाख्यो वृक्षः, पाटली अमोघाख्या, कलायः सतीनकः, क्षौमं क्षुमाभेदः, अतसी उमाख्या। शेषं प्रसिद्धम्। ससीसाः योगेष्टाख्यलोहानुविद्धाः, साञ्जनाः सीसकवच्छुक्लवर्णमञ्जनमिति स्वामी तदनुविद्धाः, विस्राः दुर्गन्धाः. भिन्नाः खण्डिताश्चेत्, श्वेताभाः कृष्णाः श्वेतवर्णाः सन्तो मध्ये कृष्णवर्णाः, कृष्णाभाः श्वेताः कृष्णवर्णाः सन्तो मध्ये श्वेतवर्णाः, सर्वे वा वेति विकल्पे शङ्खादिवर्णा अष्टादशविधा अपि, लेखाबिन्दुचित्राः स्ववर्णभिन्नवर्णाभिर्लेखाभिर्बिन्दुभिश्च चित्राः, मृदवः, ध्मायमाना न स्फुटन्ति ताप्यमाना न भिद्यन्ते, बहुफेनधूमाश्च भवन्ति।

सर्वधातूनामिति। सर्वधातूनां सर्वेषामुक्तानां वक्ष्यमाणानां च धातूनां, **गौरववृद्धौ** गुरुत्वोत्कर्षे सति, **सत्त्ववृद्धिः** सत्त्वं धातुगतः सारः तस्य वृद्धिः, भवति। अशुद्धानामनभिव्यक्तसत्त्वानां च धातूनां शेधनप्रकारमाह–**तेषामिति।** तेषां धातूनां मध्ये, अशुद्धाः अशुद्धद्रव्यान्तरसंसर्गदुष्टाः, मूढगर्भा वा स्वदोषादेवाप्रकाशमानसत्त्वा वा धातवः, तीक्ष्णमूत्रक्षारभाविताः तीक्ष्णमूत्रं नरमूत्रमित्येके गजाश्वगोगर्दभच्छा-गमूत्रमित्यपरे इति स्वामी तीक्ष्णक्षारः कदल्यपामार्गादिभस्म ताभ्यां भाविताः असकृत् सेचनादिना संस्कृताः, राजवृक्षवटपीलुगोपित्तरोचनामहिषखरकरभमूत्रलण्डपिण्डबद्धाः राजवृक्षः शम्याकः वटः प्रसिद्धः पीलुर्गुडफलाख्यो वृक्षः गोपित्तरोचना गोपित्तं गोरोचना च महिषखरकरभमूत्रलण्डं सैरिभगर्दभबालोष्ट्राणां मूत्रपुरीषम् एतैः पिण्डबद्धाः राजवृक्षादिकल्कैर्महिषादिमूत्रलण्डेन च सह मिश्रितैरुक्ततीक्ष्णमूत्रक्षारभावित-स्यात्मनश्चूर्णैर्बद्धपिण्डा इत्यर्थः, तत्प्रतीवापाः राजवृक्षादिचूर्णकृतप्रतीवापाः, तदवलेपा वा तच्चूर्णकृतोपलेपा वा सन्तः, विशुद्धाः द्रव्यान्तरसंसर्गजदोषनिर्मुक्ताः, स्रवन्ति मूढगर्भतापहानेन सत्त्वमुद्गिरन्ति।

Those ores of silver possess the colour of conch shell, camphor, alum (crystal), butter, a pigeon, turtle-dove, Vimalaka (a kind of precious crystal colour stone) or the neck of a peacock, which are dazzling as sasyaka (a blue gem), gomedaka (agate), guḍa (canesugar) and matsyāṇḍika (molasses); and the colour of kovidāra flower (Bauhinia variegate), padma (lotus), pāṭalī (Bignonia Suaveolens), Kalāya (a kind of Phaseolus), Kṣauma (a sort of flax); atasi (Dinum Usitatissimum), as also of (the combination of) lead or iron, which smell like raw meat, are disjoined grey and blackish white and are marked with lines or spots, though soft do not break in heat, but emit much foam and smoke.

All ores of metals that are heavier contain more and more metallic value. Impure ones have foreign elements within them and when they are treated (chemically) by using urines (of men or animals) containing acidic substance (alkalis) and are mixed or smeared over with (the powder of) Rājavṛkṣa (Clitoria Ternatea), Vaṭa (Ficus Indica), and Pīlu (Carnea Arborea) together with the bile of cow, and the urine and dung of a buffalo, an ass and an elephant, get purified shedding impurity.

यवमाषतिलपलाशपीलुक्षारैर्गोक्षीराजक्षीरैर्वा कदलीवज्रकन्दप्रतीवापो मार्दवकरः।

मधु मधुकमजापयः सतैलं घृतगुडकिण्वयुतं सकन्दलीकम्।
यदपि शतसहस्रधा विभिन्नं भवति मृदु त्रिभिरेव तन्निषेकैः॥

गोदन्तशृङ्गप्रतीवापो मृदुस्तम्भनः।

यवमाषतिलपलाशपीलुभस्मभिर्गोक्षीराजक्षीरैश्च सम्मिश्रिताभ्यां कदलीकन्दवनसूरणकन्दाभ्यां प्रतीवापात् स्वर्णरूप्ययोर्मार्दवमुपजायत इत्याह–**यवमाषेत्यादि**। इह वेत्यन्तस्य विशुद्धाः स्रवन्तीत्यनेन सम्बन्धं मत्वा यवक्षारादिभिः साधनैः पूर्ववत् पिण्डबन्धनादिविधया वा धातवो विशुद्धाः स्रवन्तीत्यर्थं केचिद् वर्णयन्ति।

मृदूकारप्रकारान्तरं श्लोकेनाह–**मधुमधुकमिति**। सतैलं, घृतगुडकिण्वयुतं सर्पिश्शर्करासुराबीजसहितं, सकन्दलीकं कच्छजझाटभेदयुक्तं, यत्, मधु क्षौद्रं, मधुकं यष्ट्याख्यम्, अजापयः छागीक्षीरं च, त्रिभिरेव, तन्निषेकैः निषेको नाम स्वर्णादावौषधकल्कनिक्षेपः मध्वाद्यष्टककल्कनिक्षेपैः, शतसहस्रधा विभिन्नमपि नानाप्रकारकाठिन्ययुक्तमपि स्वर्णादिकं, मृदु भवति॥

मार्दवापायकरमाह–**गोदन्तेत्यादि**। गोदन्तशृङ्गप्रतीवापः गोर्दन्तशृङ्गचूर्णयोर्द्रुतसुवर्णाद्युपरि मृदुस्तम्भनः मार्दवविलोपनो भवति। इति स्वर्णरूप्यधातुप्रकरणम्।

Metals (gold silver etc.) are rendered soft when they are treated with the powders of wheat, black beans, sesamum, palāśa (Butea Frondosa) and Pīlu (Carnea Arborea) mixed with the milk of cow or goat; as also mixed with Kadalīkaṇḍa (bulbous root of plantain) and Vajrakanda (bulbuous root of Antiquorum).

Which ever metal is split into a hundred parts is rendered soft when it is soaked in the decoction made up of honey, madhuka (Bassia Latifolia), milk of goat, sesamum oil, clarified butter, jaggery, seed of fermentaion and mushroom.

To prevent the softness of metals forever application of the paste made from the teeth and horn of the cow may be resorted to (in the case of gold and silver).

भारिकः स्निग्धो मृदुश्च प्रस्तरधातुर्भूमिभागो वा पिङ्गलो हरितः पाटलो लोहितो वा ताम्रधातुः।

काकमेचकः कपोतरोचनावर्णः श्वेतराजिनद्धो वा विस्रः सीसधातुः।

ऊषरकर्बुरः पक्वलोष्टवर्णो वा त्रपुधातुः।
कुरुम्बः पाण्डुरोहितः सिन्दुवारपुष्पवर्णो वा तीक्ष्णधातुः।
काकाण्डभुजपत्रवर्णो वा वैकृन्तकधातुः।
अच्छः स्निग्धः सप्रभो घोषवान् शीततीव्रस्तनुरागश्च मणिधातुः।

अथ ताम्रधातुमाह—**भारिक** इति। भारिकः गुरुः, स्निग्धो मसृणः, मृदुश्च, प्रस्तरधातुः पाषाणधातुः, भूमिभागो वा भूमिधातुर्वा, ताम्रधातुः ताम्रयोनिर्भवति। तस्य चतुर्विधान् वर्णानाह—पिङ्गलः कपिलः, हरितो नीलः, पाटल ईषद्रक्तः, लोहितो वा रक्तो वा।

सीसधातुमाह—**काकेत्यादि**। काकमेचकः काक इव कृष्णः, कपोतरोचनावर्णः कपोतवर्णो गोरोचनावर्णश्च, श्वेतराजिनद्धः धवललेखाबहुलः, विस्रो वा दुर्गन्धो वा, सीसधातुः सीससंज्ञलोहयोनिर्धातुर्भवति।

त्रपुसंज्ञस्य शुक्लसीसस्य योनिं धातुमाह—**ऊषरेत्यादि**। ऊषरकर्बुर ऊषरदेशवदापाण्डुः, पक्वलोष्टवर्णो वा, त्रपुधातुः।

अयोधातुमाह—**कुरुम्ब** इति। कुरुम्बः श्लक्ष्णपाषाणप्रायः इति स्वामी, पाण्डुरोहितः श्वेतरक्तः, सिन्दुवारपुष्पवर्णो निर्गुण्डीपुष्पवर्णः, वेति विकल्पे, तीक्ष्णधातुः तीक्ष्णम् अयः तद्योनिर्धातुर्भवति।

वैकृन्तकधातुमाह—**काकाण्डेत्यादि**। काकाण्डभुजपत्रवर्णो वा काकाण्डवर्णो भूर्जपत्रवर्णो वा, क्वचिद् भूर्जेत्येव पाठः। काण्डेति पाठे काण्डो वृक्षजातिविशेष इति व्याख्येयम्। वैकृन्तकधातुः वैकृन्तकाख्यलोहविशेषयोनिर्धातुः। कांस्यादिकं तु तमरकादियुक्तताम्रादिनिष्पाद्यमिति तस्य न धात्वन्तरमस्ति। एवं लोहधातवः सप्ताभिहिताः।

अथ मणिधातूनाह—**अच्छ** इति। अच्छो बिम्बग्राही, स्निग्धो मसृणः, सप्रभः सद्युतिः, घोषवान् अग्नितापने टङ्कच्छेदने च महाशब्दः शीततीव्रः अतिशीतस्वभावः अग्नेरपनयने क्षिप्रशीतो वा, तनुरागः अल्परागः, मणिधातुः मणियोनिर्धातुर्भवति। इयमत्र संग्रहार्या—

कनकं रूप्यं ताम्रं सीसं त्रपु तीक्ष्णकं च वैकृन्तम्।
मणयोऽष्टौ निर्दिष्टा अष्टानां धातवोऽप्यष्टौ।। इति।

The mineral (called) copper is heavy, smooth, soft, the ores of which are obtained from that plaines or slopes of mountains possesses the colours like tawny, green, reddish-brown and red.

The mineral (called) Sīsa (lead) has the colour of balck (as a crow), of pigeon or the bile of a cow and marked with white lines and smells like raw fresh.

The mineral called Trapu (white lead) has the appearance of barren and saline spot as well as that of a burnt brick.

The minerals called Tīkṣṇa (iron) has the appearance of pale red and of the colour of the flower of Sinduvāra (Vitex Negundo).

The mineral called Negundo Vaikṛnta (bell-mental is of the colour of Kākāṇḍa (a kind of bean; Diospyrous tomentosa) or of the leaf of birch.

The mineral known as maṇidhātu—precious stones or gems are pure, smooth, brilliant, sounding (when struck) extremely hard and of a mild colour.

(Thus the minerals (ores) of metal are of seven kinds to which gem is added to make if eight).

धातुसमुत्थं तज्जातकर्मान्तेषु प्रयोजयेत्।

कृतभाण्डव्यवहारमेकमुखम्, अत्ययं चान्यत्रकर्तृक्रेतृविक्रेतृणां स्थापयेत्।

आकरिकमपहरन्तमष्टगुणं दापयेदन्यत्र रत्नेभ्यः।

स्तेनमनिसृष्टोपजीविनं च बद्ध्वा कर्म कारयेद्, दण्डोपकारिणं च।

इत्थं धातुपरीक्षामुपदिश्य तत्कर्मान्तप्रवर्तनमधिकृत्याह—**धातुसमुत्थमिति**। धातुसमुत्थितमित्यपि पाटः। धातुभ्यः स्वल्पधनव्ययत्नेन प्रथममुत्पन्नं स्वर्णादिद्रव्यं, तज्जातकर्मान्तेषु धातुसम्बद्धकर्मस्थानेषु स्वर्णरूप्याद्याकरेषु, प्रयोजयेत् विनियुञ्जीत बहुतरोत्पत्त्यर्थम्। विनियोज्यस्य धातुसमुत्थत्ववचनं पूर्वपूर्वसम्यक्प्रवृत्तिफलोपलम्भे सत्येवोत्तरोत्तरप्रवृत्तिः कार्येति द्योतयितुम्!

कृतेत्यादि। कृतभाण्डव्यवहारं घटितसुवर्णादिभाण्डविक्रयम्, एकमुखम् एकद्वारकमेकविक्रयस्थानकं, स्थापयेत् प्रख्यापयेत्। अन्यत्रकर्तृक्रेतृविक्रेतृणां स्थापितान्यदेशे भाण्डक्रियाक्रयविक्रयकारिणाम्, अत्ययं च दण्डं च 'पञ्चविंशतिपणमत्ययं चान्यत्रकर्तृक्रेतृविक्रेतृपरीक्षितृभ्य' इति लक्षणाध्यक्षोक्तं, स्थापयेत्। दण्ड इह द्रव्यसारतारतम्यापेक्षः शुल्काध्यक्ष–धर्मस्थीयकण्टशोधनोक्तोऽपराधानुरूपः कल्पनीयः प्रमाणाकथनादिति केचित्।

आकरिकमिति। अपहरन्तम् आकराद् द्रव्यं हरन्तं, आकरिकम् आकरकर्मकरम्, अष्टगुणम् अपहृतद्रव्याष्टगुणमत्ययं दापयेत्। तत्रापवादमाह—**अन्यत्र रत्नेभ्य** इति। रत्नापहारे तु नायं दण्डः, किन्तु घातो वक्ष्यते।

स्तेनमिति। स्तेनम् आकरिकमनाकरिकं वा चोरम्, अनिसृष्टोपजीविनं च विना राजानुमतिं धातुवादविद्यया वृत्तिं वर्तयन्तं च, बद्ध्वा निगडितं कृत्वा, बद्धमिति पाठेऽप्ययमेवार्थः, कर्म आकरव्यापारं, कारयेत्। दण्डोपकारिणं प्राड्विवाकनिर्णीतो देहदण्डप्रतिनिधिर्धनदण्डो देहपीडापरिहारार्थत्वादपराधिनं प्रति उपकारो भवतीति दण्डोपकारः। स उच्यते तद्वन्तं च अर्थाददत्तदण्डं, बद्ध्वा कर्म कारयेत्।

The yield of mines may be put to use as are in demand (as gold coins etc.) Commodities so manufactured shall be distributed for commercial purposes from a single centralised place and punishment for manufacturers, sellers and purchasers outside the prescribed locality shall also be laid down.

Except in the case of gems those who steal other products from the mines shall be fined eight times of the actual value.

A thief who steals the products of mine or otherwise shall be chained and made to work inside the mines, as also those who fail to remit the fines.

व्ययक्रियाभारिकमाकरं भागेन प्रक्रयेण वा दद्यात्, लाघविकमात्मना कारयेत्।

लोहाध्यक्षः ताम्रसीसत्रपुवैकृन्तकारकूटवृत्तकंसताललोहकर्मान्तान् कारयेत्, लोहभाण्डव्यवहारं च।

लक्षणाध्यक्षः चतुर्भागताम्रं रूप्यरूपं तीक्ष्णत्रपुसीसाञ्जनानामन्यतममाषबीजयुक्तं कारयेत् पणम्, अर्धपणं पादमष्टभागमिति।

व्ययक्रियेत्यादि। व्ययक्रियाभारिकं व्ययक्रिययोर्भारिकं गुरु। गुरुधनव्ययसाध्यं गुरुप्रयत्नसाध्यं चेत्यर्थः, आकरं, भागेन दद्याद् व्ययलाभभागव्यवस्थया परेषां प्रतिपादयेत्। प्रक्रयेण वा दद्यात् अस्याकरस्यैतावत् सुवर्णादिकं राजार्थे देयमिति परिपण्य वा परेषां दद्यात्। लाघविकं लघुव्ययसाध्यं लघुश्रमसाध्यं चाकरम्, आत्मना कारयेत् स्वयं व्यापारयेत्।

अथावान्तराध्यक्षव्यापारमाह—**लोहाध्यक्ष** इति। लोहाध्यक्षः सुवर्णरूप्ययोर्वक्ष्यमाणत्वात् तदतिरिक्तं ताम्रादिकमिह लोहः तदध्यक्षः, ताम्रसीसत्रपुवैकृन्तकारकूटवृत्तकंसताललोहकर्मान्तान् आरकूटो रीतिः, वृत्तं तदाख्यो लोहः कंसो घोषाख्यः तालः कांस्यं सातिशयनादयुक्तं वाद्योपयोगि लोहः कालायसं ताम्रादीनां कर्मान्तान् तद्भाण्डघटनकर्माणि, कारयेत्। लोहभाण्डव्यवहारं च ताम्रादिनिर्मितभाण्डक्रयविक्रयव्यवहारं च कारयेत्।

अथ पण्यव्यवहारार्थं लक्षणाध्यक्षव्यापारमाह—**लक्षणेत्यादि**। लक्षणाध्यक्षः लक्षणं पणमाषकादिरूप-निर्माणं तदध्यक्षः टङ्कशालाध्यक्ष इति यावत्। पणव्यवहारश्च रूप्यरूपश्चतुर्विधः ताम्ररूपश्चतुर्विधः इत्यष्टविधे तस्मिन् रूप्यरूपः **चतुर्भागताम्रमित्यादिना**, ताम्ररूपश्च **पादाजीवमित्यादिना** व्युत्पाद्यते। षोडशमाषको हि पणः प्रसिद्धः, तस्य चतुर्भागश्चत्वारो माषाः तत्प्रमाणं ताम्रं यस्य यथाविधं, तीक्ष्णत्रपुसीसाञ्जना-नामन्यतममाषबीजयुक्तं तीक्ष्णं कालायसं त्रपु रङ्गं सीसं योगेष्टाख्यम् अञ्जनं रसाञ्जनम् एषां चतुर्णामन्यतमस्य माषप्रमाणेन बीजेन निर्माणार्थेन युक्तम्, अर्थात् परिशिष्टैकादशमाषपरिमाणरूप्यकं, रूप्यरूपं रूप्यांशभूम्ना रूप्यमयं, पणं पणसंज्ञं नाणकविशेषं, कारयेत्। इति उक्तेन प्रकारेण, अर्धपणं पादम् अष्टभागं कारयेत् पणोक्तताम्राद्यर्धप्रमाणयोगेनार्धपणाख्यं तच्चतुर्भागप्रमाणयोगेन पादपणं तदष्टभागप्रमाणयोगेनाष्टभागाख्यं च निर्मापयेदित्यर्थः। प्रकारान्तरार्थो वा इतिशब्दः इति कारयेदिति योज्यः, त्रिपादकादिकं प्रकारान्तरमपि व्यवहारानुगुणं निर्मापयेदित्यर्थः। पादाजीवं रूप्यरूपचतुर्भागव्यवहार्यं, ताम्ररूपं ताम्रांशभूम्ना ताम्रमयं रूपं, माषकं माषकाख्यं कारयेत्। ताम्रस्यैकादश धान्यमाषाः रूप्यस्य चत्वारस्तीक्ष्णाद्यन्यतमस्यैक इति योगप्रमाणेन रूप्यरूपपणवत् षोडशधान्यमाषप्रमाणकोऽयं ताम्ररूपमाषको द्रष्टव्यः। एवं माषकोक्तताम्राद्यर्धप्रमाण-योगेनार्धमाषकं तच्चतुर्भागप्रमाणयोगेन काकणीं, तदष्टभागप्रमाणयोगेनार्धकाकणीं च कारयेत्।

The mines in which much labour and expenditure is required may be leased out to others, keeping the minor jobs and limited expenditure with the authorities.

The superintendent of metals shall supervise the manufacture of items

like copper, lead, tin, bell-metal, brass, and vṛtta, as also the products made out of them and carryout their trade.

The superintendent of mint shall manufacture coins of silver made up of four parts of copper and one-sixteenth part (= a maśa; since a paṇa consists of sixteen māṣas) of any one of the metals (already mentioned like) tīkṣṇa, trapusīsa and añjana and this forms a paṇa; half of it is ardhapaṇa, half of ardhapaṇa is pāda (a quarter) and half of the same is aṣṭabhāga.

(Thus the silver coins are of four kinds as paṇa, half a paṇa, a quarter and one-eighth).

पादाजीवं ताम्ररूपं माषकमर्धमाषकं काकणीमर्धकाकणीमिति।

रूपदर्शकः पणयात्रां व्यावहारिकीं कोशप्रवेश्यां च स्थापयेत्। रूपिकमष्टकं शतं, पञ्चकं शतं व्याजीं, पारीक्षिकमष्टभागिकं शतम्। पञ्चविंशतिपणमत्ययं चान्यत्र कर्तृक्रेतृविक्रेतृपरीक्षितृभ्यः।

रूपदर्शक इति। रूपदर्शकः रूपपरीक्षकः, पणयात्रां पणदानादानप्रस्थानं, व्यवहारिकीं व्यवहारप्रयोजनां, कोशप्रवेश्यां च कोशप्रवेशनयोग्यां च, स्थापयेद् ईदृशी पणयात्रा व्यवहारार्था ईदृशी कोशप्रवेशनार्थेति तत्सारासारभावपर्यालोचनया व्यवस्थापयेत्। इयं राजकर्तृका पणयात्रा। जानपदकारितायां तस्यां राजभाव्यमाह–**रूपिकमित्यादि**। अष्टास्योपदा दीयते अष्टकं पदास्योपदा दीयते पञ्चकम्। अष्टकं शतं पणशतेऽष्टपणग्रहणं रूपिकसंज्ञं, पणशते पञ्चपणग्रहणं व्याजीसंज्ञं, पणशतेऽष्टभागग्रहणं पारीक्षिकसंज्ञम्। रूपिकं व्याजीं पारीक्षिकं च यथोक्तलक्षणं स्थापयेद् व्यवस्थापयेत्। तत्र रूपिकं कर्मकरभृतिः, व्याजी राजभागः, पारीक्षिकं परीक्षकभृतिरिति बोद्धव्यम्। पञ्चविंशतिपणम्, अत्ययं च दण्डं च स्थापयेद्, अर्थादपराधे सति। स चापराधः सन्निहिताष्टभागिकपदानुकर्षणेनाष्टभागभवं दण्डमिति व्याख्यानादष्टभागापहारलक्षणो द्रष्टव्यः। अनया दिशा चतुर्भागाद्यपहारे दण्डद्वैगुण्यादिकमुन्नेयम्। केष्वपराधिषु विषयेऽयं दण्ड इत्याकाङ्क्षायामाह–**अन्यत्र कर्तृक्रेतृविक्रेतृपरीक्षितृभ्य** इति। ये करणक्रयणादावधिकृतास्तदतिरिक्तेषु विषये। ते च जानपदा अध्यक्षपुरुषकर्मकरा वेत्यवसेयम्। अन्यत्रकर्त्रादीनां त्वपराधे द्रव्यसारासारतापेक्षो दण्डः प्रागुक्त एव। भट्टस्वामी त्वाह–'तेषां त्वन्यत्रकर्त्रादीनामुक्त एव दण्डः "कूटकुरूपकं कुर्वतः कारयतो निपातयतो वा सहस्रदण्ड" इति' इति। ईदृशं मूलवाक्यं मृग्यम्।

Coins of copper are made up of four parts of an alloy (pādājīva) shall be (of four types) a māṣaka, half a māṣaka, kākaṇi and half a kākaṇi.

The examiner of coins shall regulate currency as a medium of exchange as well as legal tender as admissible to the treasury. (If the citizens are to mint the coins there are arrangements as follows). For minting hundred paṇams one shall have eight paṇams as his commission which is called rūpaka. The labour charge will be five paṇams for minting hundred coins and this is called Vyāji (which is due to the king as tax). The examiner of coins shall receive one-eighth of a hundred panams and

this is called pārīkṣika (fee for examining). A fine of twenty five paṇas is to be imposed on offenders other than the manufacturer, the seller, the purchaser and the examiner.

खन्यध्यक्षः शङ्खवज्रमणिमुक्ताप्रवालक्षारकर्मान्तान् कारयेत् पणनव्यवहारं च।

लवणाध्यक्षः पाकमुक्तं लवणभागं प्रक्रयं च यथाकालं सङ्गृह्णीयाद्, विक्रयाच्च मूल्यं रूपं व्याजीं च।

आगन्तुलवणं षड्भागं दद्यात्। दत्तभागविभागस्य विक्रयः। पञ्चकं शतं व्याजीं, रूपं, रूपिकं च। क्रेता शुल्कं, राजपण्यच्छेदानुरूपं च वैधरणं दद्यात्। अन्यत्रक्रेता षट्छतमत्ययं च।

अथ खन्यध्यक्षव्यापारमाह—**खन्यध्यक्ष** इत्यादि। खन्यध्यक्षः स्वर्णरत्नाद्याकराधिकारी, शङ्खवज्रमणिमुक्ताप्रवालक्षारकर्मान्तान् शङ्खानां कर्मान्तान् पाटनघर्षणादिक्रियाः वज्रमणिमुक्ताप्रवालानां कर्मान्तान् खननशोधनरञ्जनादिक्रियाः क्षाराणां कर्मान्तान् यवक्षारादीनाम् उत्पादनादिक्रियाश्च, कारयेत्। पणनव्यवहारं च शङ्खादिक्रयविक्रयव्यवहारं च कारयेत्।

लवणाध्यक्षव्यापारमाह—**लवणे**त्यादि। लवणाध्यक्षः, पाकमुक्तं परिणतं निष्पन्नं, लवणभागं भागार्पिताकरलभ्यं लवणस्य भागं, प्रक्रयं च प्रक्रयः परिपणः अमुकाकरस्यैतावल्लवणं देयमिति परिभाष्यार्पितादाकराल्लभ्यं चेत्यर्थः, यथाकालं क्लृप्तकालानतिक्रमेण, संगृह्णीयात्। तदिदं राजपण्यं वणिग्भिर्विक्रेतव्यम्। **विक्रयाच्चेति**। विक्रयाच्च तद्विक्रयलब्धद्रव्याच्च, मूल्ये पण्यमूल्यं, रूपं पारीक्षिकमष्टभागिकलक्षणं, व्याजीं च पुनर्मीयमानोनतापरिहारार्थमधिकतया गृह्यमाणां मानव्याजीं च, संगृह्णीयादिति वर्तते।

इत्थं राजपण्यसम्बद्धमभिधायागन्तुकपण्यसम्बद्धमाह—**आगन्तुलवणमिति**। आगन्तुलवणं परदेशागतं लवणम्, अर्थात् तद्विक्रेता, षड्भागं दद्यात् षष्ठं भागं राज्ञे दद्यात्। दत्तभागविभागस्य दत्तो राज्ञेऽर्पितः भागः षड्भागो विभागो मानव्याजी च येन तस्यागन्तुलवणव्यवहारिणः, विक्रयो भवति। विक्रये इति सप्तम्यन्तपाठस्तु श्रेयान् उत्तरग्रन्थेनैकवाक्यत्वस्य स्वरसतो लाभात्। न केवलं षड्भाग-मानव्याज्योर्द्वयोरेव दानं, किन्तन्येषामपि त्रयाणां तद् भवतीत्याह—**पञ्चकमित्यादि**। पणशते पणपञ्चकलक्षणां व्याजीं, पारीक्षिकं शतस्याष्टभागिकलक्षणं रूपशब्दवाच्यं, पणशते पणाष्टकलक्षणं रूपिकसंज्ञं च, दद्यादित्यनुषज्यते। **क्रेतेति**। केता शुल्कं दद्यात्, नतु विक्रेता। राजपण्यच्छेदानुरूपं राजपण्याद् विक्रीयमाणाद् यश्छेदः यावन्नष्टं तदनुरूपं, वैधरणं वैधरणशब्दितं छिन्नपूरणं च दद्यात्। अन्यत्रक्रेता विद्यमाने राजपण्येऽन्यतो लवणं क्रीणानः, षट्छतम्, अत्ययं च दण्डं च, दद्यात्।

The superintendent of mines shall deal with the items such as conches, diamonds, gems, pearls, corals and salt and enter into their commercial activities by doing necessary functions.

The superintendent in charge of salt shall after the crystallization of salt is over (shall) in time collect both the money (due) as rent and the quantity of the shares due to the government. Once the sale is effected he

shall realise its real value, as well as the premium of five percent is the form of cash.

In the case of imported salt (the trader) shall pay one-sixth portion to the king (government). In addition to this, the trader shall pay premia of five per cent and another eight per cent in cash. The purchaser shall pay not only the toll but also the compensation equivalent to the loss entailed on the king's trading activities. The trader who sells the salt due to the king to a different purchaser other than the one already promised, the (second) purchaser shall be required to pay a fine of six hundred paṇams.

The seller of an adulterated salt shall be required to pay the highest amercement. The same is the case with the one who trades in unauthorised salt except those who are foresters (hermits). Vedic scholars, mendicants and labourers may take salt with them for food.

One has to pay tolls for sat and alkalis for purposes other than this.

विलवणमुत्तमं दण्डं दद्यात्, अनिसृष्टोपजीवी च अन्यत्र वानप्रस्थेभ्यः। श्रोत्रियास्तपस्विनो विष्टयश्च भक्तलवणं हरेयुः।

अतोऽन्यो लवणक्षारवर्गः शुल्कं दद्यात्।

एवं मूल्यं विभागं च व्याजीं परिघमत्ययम्।
शुल्कं वैधरणं दण्डं रूपं रूपिकमेव च।।
खनिभ्यो द्वादशविधं धातुं पण्यं च संहरेत्।
एवं सर्वेषु पण्येषु स्थापयेन्मुखसङ्ग्रहम्।।

विलवणमिति। विलवणं विड(कृतकलवण) मृदादिमिश्रं लवणम्, अर्थात् तथाविधलवणव्यवहर्ता, उत्तमं दण्डम् उत्तमसाहसं, दद्यात्। अनिसृष्टोपजीवी च यो राजाननुमत एव लवणमुत्पाद्योपजीवति स च, उत्तमं दण्डं दद्यात्। तत्रापवादमाह–वानप्रस्थेभ्योऽन्यत्र वानप्रस्थान् विहाय। तेषां त्वनिसृष्टोपजीविनां न दण्ड इत्यर्थः। **श्रोत्रिया इति।** श्रोत्रियाः वेदाध्यायिनः तपस्विनः दीनाः, विष्टयः हठकारितकर्मकारिणश्च, भक्तलवणम् अन्नाभ्यवहारमात्रपर्याप्तं लवणं, हरेयुः विनैव शुल्कं नयेयुः।

अति इति। अतोऽनयः उक्तदितरः लवणक्षारवर्गः 'सैन्धव-सामुद्र-विड-यवक्षार-सौवर्चलोद्भेदजा लवणवर्गः' इति 'फाणित-गुड-मत्स्यण्डिका-खण्डशर्कराः क्षारवर्गः' इति च कोष्ठागाराध्यक्षे वक्ष्यमाणो लवणवर्गः क्षारवर्गश्च, अर्थात् तत्कर्ता, शुल्कं दद्यात् शुल्कमेव दद्यान्न तु व्याज्यादिकमित्यर्थः।

अथ श्लोकानाह–एवमित्यादि। एवम् उक्तप्रकारेण, खनिभ्यः, मूल्यं प्रतीतं, विभागं षड्भागं, व्याजीं पञ्चकं शतं मानव्याजीत्युभयविधां, परिघं पारीक्षिकं धातुसमुत्थितानां तज्जातकर्मान्तेषु प्रयोगात् सिद्धं लाभविशेषं वा, अत्ययम् आश्रावितं दमं, शुल्कं प्रतीतं, वैधरणं छिन्नपूरणं, दण्डम् अश्रावितं दमं, रूपं रूप्यरूपं ताम्ररूपमिति द्विविधं, रूपिकम् अष्टकं शतं, धातुं सुवर्णरूप्यादिधातुं, पण्यं विक्रेयं च, द्वादशविधम्

उक्तद्वादशप्रकारम् उपादानं, संहरेत् समुत्पादयेत्। एवं, सर्वेषु पण्येषु पणनयोग्येषु मध्ये, मुखसंग्रहं मुखमिव मुखं प्रधानं सारस्तस्य संग्रहं, स्थापयेत्।।

Thus (the superintendent of mines) one shall collect twelve kinds of income (or dues) as follows :

1. Mūlya (value of the produce); 2. vibhāga (share of the out put to government); 3. vyāji (premium of five per cent); 4. parigha (testing charge of coins); 5. atyaya (fixed fine); 6. śulka (toll); 7. vaidharaṇa (compensation for loss); 8. daṇḍa (proper fine according to the gravity of crime); 9-10. rūpa-coinage (both of silver coin and copper coin); and 11-12. rūpika (premium for purchase and sale). Thus taxes for all the commodities shall be fixed once for all.

आकरप्रभवः कोशः कोशाद् दण्डः प्रजायते।
पृथिवी कोशदण्डाभ्यां प्राप्यते कोशभूषणा।।

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे द्वादशोऽध्यायः
आकरकर्मान्तप्रवर्तनम्, आदितः त्रयस्त्रिंशः।।

आकरस्य सर्वार्थसाधकतामध्यायान्तिमश्लोकेन दर्शयति—आकरेत्यादिना।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वादशोऽध्यायः आकरकर्मान्तप्रवर्तनम्, आदितस्त्रयस्त्रिंशः।।

Mines are the source (of income) of treasury; from the treasury comes the power of the government; and the earth (country) for which the treasury forms an ornament is acquired by means of (the wealth from) the treasury and enforcement of law by the army.

Thus the thirty-third chapter of the Arthaśāstra of Kauṭalya called 'mining operations' comes to an end. Here ends the twelfth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 34

31. प्रक० अक्षशालायां सुवर्णाध्यक्षः।

Section 31 : Superintendent in the Office of Goldsmith

सुवर्णाध्यक्षः सुवर्णरजतकर्मान्तानामसम्बन्धावेशनचतुश्शालामेकद्वा- रामक्षशालां कारयेत्। विशिखामध्ये सौवर्णिकं शिल्पवन्तमभिजातं प्रात्ययिकं च स्थापयेत्।

जाम्बूनदं शातकुम्भं हाटकं वैणवं शृङ्गिशुक्तिजं, जातरूपं रसविद्धमाकरोद्गतं च सुवर्णम्।

अक्षशालायां सुवर्णाध्यक्ष इति सूत्रम्। अक्षशालायां सुवर्णरूप्यादिनिर्माणशालायां, नियुक्तः सुवर्णाध्यक्षः अर्थात् तस्य व्यापार इहाभिधीयत इति तदर्थः। प्रक्रान्तायां कोशप्रकृतौ प्रधानभूतस्य सुवर्णादेरुत्पत्तिः समनन्तराध्याययोरुक्ता। तस्यावस्थान-जाति-वर्ण-गुणशोधन-दोषपरीक्षण-परिकर्मादि-कथनपूर्वमर्जनं रक्षणं चेदानीमभिधीयते।

सुवर्णाध्यक्ष इति। सुवर्णाध्यक्षः, सुवर्णरजतकर्मान्तानां सुवर्णरजतसम्बद्धानामलङ्कारादिघटन-क्रियाणाम्, अक्षशालाम् अवस्थानभूतां शालां, कारयेत्। सुवर्णादिपरिकर्मस्थानमक्षशालेत्यभिधीयते। तां कीदृशीम्, असम्बन्धावेशनचतुश्शालाम् असम्बन्धानि परस्परानुपश्लिष्टानि आवेशनानि शिल्पकर्मस्थानभूतानि चतुश्शालानि पृथक् पृथक् चतस्रश्चतस्रः शाला यस्यां ताम्। असम्बाधावेशनेति पाठेऽप्ययमेवार्थः। एकद्वारां रक्षासौकर्यार्थं द्वारेणैकेन युक्तां च। विशिखामध्ये रथ्यामध्ये, सौवर्णिकं पौरजानपदानां रूप्यसुवर्णक्रय-विक्रयकर्माधिकारिणं, स्थापयेत्। कथम्भूतं, शिल्पवन्तं क्षेपणादिवक्ष्यमाणकर्मनिपुणम्, अभिजातं कुलीनं, प्रात्ययिकम् उपधाशुद्धम्। चकाराज्जानपदत्वादिगुणयुक्तम्। सौवर्णिकस्य व्यापारः सौवर्णिकप्रचारे वक्ष्यते। तस्यात्र निर्देशः सुवर्णाध्यक्षाधीनत्वज्ञापनाय राजधनपौरजानपदधनानां रक्षाविधानतुल्यत्वज्ञापनाय च।

अथ पञ्चविधं पञ्चवर्णं त्रियोनि सुवर्णमाह—**जाम्बूनद**मिति। सुवर्णं, जाम्बूनदं मेरुप्रभवजम्बूनदीसमुद्भूतं जम्बूफलरसवर्णं, शातकुम्भं शतकुम्भपर्वतोत्पन्नं पद्मकिञ्जल्कवर्णं, हाटकं हाटकाकरोत्पन्नम् अम्लानाख्य-कुरण्डककुसुमसवर्णं, वैणवं वेणुपर्वतजं कर्णिकारपुष्पवर्णं, शृङ्गिशुक्तिजं सुवर्णभूमिजमिति भाषाटीका, तच्च मनश्शिलावर्णम्। इति पञ्चप्रकारस्य पञ्चवर्णस्य सुवर्णस्य त्रिविधामुत्पत्तिमाह— **जातरूप**मिति। जातरूपं स्वतः सुवर्णमेवोत्पन्नं, रसविद्धं रसयोगेन काञ्चनीकृतम्, आकरोद्गतं च आकरगतमृत्पाषाणादिभ्यः

पातितं च। क्रियावादोत्पन्नमित्यपि केचित्। तत्पक्षे चतुर्योनित्वं बोध्यम्। अत्रायं भट्टस्वामिनः श्लोकः–

हेम्नः पञ्चप्रकारस्य त्रियोनेः पञ्च वर्णकाः।
जम्बूकोकनदाम्लानकर्णिकारमनश्शिलाः।। इति।

The superintendent of gold shall cause to construct akṣaśālās—chamber in which gold and silver ornaments are made—consisting of four rooms each in an enclosure with a single entrance. In the central part of the highway a trained, skilful goldsmith of noble birth and reliable character may be stationed to hold his shop.

The (varieties of) gold (is obtained from five sources such as) Jābūnada (obtained) from the river Jambū flowing from the mount of Meru and having the colour of Jambūphala (rose-apple); Śātakumbha—that which is obtained from the mount of Śatakumbha (and possessing the colour of the tendrils of lotus); Hāṭaka (of the mine of Hāṭaka with the colour of Vitex Trifolia); Vaiṇava—obtained from the mount of Venu with the colour of Karṇikāra flower (pteospermum acerifolium); Śṛṅgiśuktijam—from Suvarṇabhūmi—the golden land—possessing he colour of arsenic. Gold is obtained either pure or amalgamated with mercury or silver or alloyed with the other impurities of the gold mine.

किञ्जल्कवर्णं मृदु स्निग्धमनादि भ्रजिष्णु च श्रेष्ठं, रक्तपीतकं मध्यमं, रक्तमवरं श्रेष्ठानाम्।

पाण्डु श्वेतं चाप्राप्तकम्। तद् येनाप्राप्तकं तच्चतुर्गुणेन सीसेन शोधयेत्, सीसान्वयेन भिद्यमानं शुष्कपटलैर्ध्मापयेत्, रूक्षत्वाद् भिद्यमानं तैलगोमये निषेचयेत्।

आकरोद्गतं सीसान्वयेन भिद्यमानं पाकपत्राणि कृत्वा गण्डिकासु कुट्टयेत्, कन्दलीवज्रकन्दकल्के वा निषेचयेत्।

तुत्थोद्गतं गौडिकं काम्बुकं चाक्रवालिकं च रूप्यम्। श्वेतं स्निग्धं मृदु च श्रेष्ठम्। विपर्यये स्फोटनं च दुष्टम्। तत् सीसचतुर्भागेन शोधयेत्।

गुणानाह–**किञ्जल्केत्यादि**। किञ्जल्कवर्णं, मृदु तप्तमतप्तं चारूक्षं स्निग्धम् अखरम्, अनादि नादरहितम्, अनुनादीति पाठे दीर्घनादं, भ्राजिष्णु भास्वरं च, सुवर्णं श्रेष्ठम् उत्तमोत्तमं भवति। रक्तपीतकं लोहितहारिद्रवर्णं मध्यमं श्रेष्ठानामेव मध्ये भवति। रक्तम् अवरम् उत्तमाधमं भवति।

अथ शोधनप्रकारमाह–**पाण्डुश्वेतमिति**। पाण्डु हरिणवर्णं, श्वेतं सितं च, अप्राप्तकं तत्संज्ञं द्रव्यान्तरयोगेनोत्तमवर्णतामप्राप्तमिति कृत्वा। तत् तथाविधं स्वर्णं, येनाप्राप्तकं येनापद्रव्येणाशुद्धतां गतं, तच्चतुर्गुणेन सीसेन, शोधयेद् आवर्तयेद् आ सीसक्षयात्। सीसान्वयेन सीसानुवेधेन, भिद्यमानं वियुज्यमानं, शुष्कपटलैः शुष्कारण्यगोमयैः, ध्मापयेत्। रूक्षत्वाद् भिद्यमानं, तैलगोमये तैले गोमये च, निषेचयेत् पुनःपुनरावर्त्य प्रक्षिपेत्।

आकरोद्गतस्य शोधने विशेषमाह–आकरोद्गतमिति। आकरोद्गतं सुवर्णं, सीसान्वयेन भिद्यमानं, पाकपत्राणि कृशपत्राणि, कृत्वा, गण्डिकासु काष्ठफलकेषु, कुट्टयेत् अर्थात् काष्ठेन। अथवा, कन्दलीवज्रकन्दकल्के कन्दली वल्लिभेदः वज्रं श्रीबेरं कन्दं पद्ममूलम् एतद्योगसिद्धे कषाये, निषेचयेत्।

रूप्यं चतुर्विधमाह–तुत्थोद्गतमिति। तुत्थोद्गतं तुत्थपर्वतजं जातिकुसुमाभं, गौडिकं कामरूपजं तगरकुसुमवर्णं, काम्बुकं कम्बुपर्वतोत्पन्नं, चाक्रवालिकं चक्रवालाकरोद्भूतं तदुभयं कुन्दपुष्पाभम् इति चतुर्धा रूप्यं श्रेष्ठम्। तस्य श्वैत्यं स्निग्धत्वं मार्दवमिति त्रीन् गुणानाह– श्वेतमित्यादि। दोषानाह–विपर्यय इति। विपर्यये दुष्टम् उक्तगुणवैपरीत्ये दोषाः कृष्णत्वरूक्षत्वखरत्वरूपाः, स्फोटनं च दुष्टं भिद्यमानत्वं च दोष इत्याहत्य चत्वारो दोषाः। शुद्धिमाह–तद् दुष्टं रजतं, सीसचतुर्भागेन रजतप्रमाणचतुर्भागेन सीसेन, शोधयेत्।

That which is of the colour of the filament of a lotus, smooth, glossy, without producing noise and dazzling is the best (among the varieties of gold), that which is reddish-yellow is of the middle quality while that which is of the red colour is of low quality.

Pale-white and pure white (gold) is called aprāptaka (since it has not reached the original colour being contaminated with other metals like lead). Such a variety shall be fused with four times of the contaminated material like Sīsa (lead), when it is rendered with the contamination with lead, it shall be heated with dry-cowdung. When it is split into peices owing to hardness, it shall be drenched in oil mixed with cowdung (to separate the gold content).

Gold obtained from the mine which appears brittle due to its contamination with lead shall be flattened placing it on a plank and hammering with an wooden pestle (so that it will remain compact). Or (to avoid being split) such gold may be drenched in a decoction made up of mushroom and Vajrakanda (Antiquorum).

Silver (is of four kinds as) obtained from the mountain called Tuttha, Gaṇḍika—obtained from the region of Kāmarūpa; Kāmbuka—obtained from the mountain called Kambu; and Cākravālika—obtained from the mine called Cakravāla.

(The first is as white as jasmine flower, the second is like the flower of the poison tree while the other two are of the colour of a kind of jasmine). Silver which is white, glossy and smooth is the best and that which is of the reverse quality is bad (or impure). The impure silver shall be heated with lead of the one fourth quantity of the impurity. That which appears to be full of globules, white, glowing and possessing the colour of curd is pure.

उद्गतचूलिकमच्छं भ्राजिष्णु दधिवर्णं च शुद्धम्।

शुद्धस्यैको हारिद्रस्य सुवर्णो वर्णकः। ततः शुल्वकाकण्युत्तरापसारिता आ चतुस्सीमान्तादिति षोडश वर्णकाः।

सुवर्णं पूर्वं निकष्य पश्चाद् वर्णिकां निकषयेत्। समरागलेखमनिम्नोन्नते देशे निकषितम्। परिमृदितं परिलीढं नखान्तराद्वा गौरिकेणावचूर्णितमुपधिं विद्यात्। जातिहिङ्गुलकेन पुष्पकासीसेन वा गोमूत्रभावितेन दिग्धेनाग्रहस्तेन संस्पृष्टं सुवर्णं श्वेतीभवति।

शुद्धस्य लक्षणमाह—उद्गतचूलिकमित्यादि। उत्थितबुद्बुदं, स्वच्छं, रुचिमत्, दधिप्रभं च शुद्धम्।

अथ शुद्धसुवर्णस्य षोडश वर्णकानाह—**शुद्धस्येति**। शुद्धस्य स्वभावशुद्धस्य यथोक्तविधिशोधितस्य वा, हारिद्रस्य हरिद्राभङ्गभासुरस्य सुवर्णस्य, सुवर्णः षोडशमाषप्रमाणः एको वर्णकः शुद्धो भवति। ततः तस्मिन् वर्णके, शुल्ककाकणी शुल्बस्य ताम्रस्य काकणी माषचतुर्भागः, प्रक्षिप्तेति शेषः, उत्तरा अधिका सुवर्णकाकणी, अपसारिता तस्माद् वर्णकाद् अपनीता च, भवति। आ कुतः इमे काकणीप्रक्षेपापसारणे इत्यत्राह—आ चतुस्सीमान्तात् आ चतुर्माषावधेः आ षोडशकाकण्यवधेरित्यर्थः। इति एकादिषोडशान्तानां शुल्बकाकणीनां वर्णके मिश्रणं स्वर्णकाकणीनां वर्णकादपनयनं चेत्यनया रीत्या, षोडश वर्णकाः, मिश्राः सम्पद्यन्त इति शेषः। त एते शुद्धवर्णकेन सह सप्तदश भवन्ति। इह चतुरित्यनेन काकणीग्रहणे वर्णकषोडशत्वासिद्ध्या तत्सिद्धये षोडशपर्यन्तकाकण्यपेक्षणात् सामर्थ्याच्चतुर्माषग्रहणं विज्ञेयम्।

निकषच्छेदतापलक्षणां त्रिविधां वर्णकपरीक्षामाह—**सुवर्णमिति**। सुवर्णं परीक्ष्यं, पूर्वं प्रथमं, निकष्य निकषे घर्षणेन दत्तरेखं कृत्वा, पश्चाद्, वर्णिकां, तद्वर्णकपरीक्षार्थं निकषयेत्। निरूपाधिकं निकषितमाह—समरागेत्यादि। समरागलेखं तुल्यरागया रेखया युक्तम्, अनिम्नोन्नते देशे निकषोपलप्रदेशे, निकषितं, न्याय्यं भवतीति शेषः। व्याजनिकषितमाह—**परिमृदितमित्यादि**। परिमृदितं गाढनिकषितं वर्णकोत्कर्षार्थं विक्रेता करोति। परिलीढम् अगाढनिकषितं वर्णापकर्षार्थं विक्रेता करोति, हस्तेनोन्मृष्टलीढमिति स्वामी। नखान्तराद् गैरिकेण नखान्तरनिहितेन पीतधातुना, अवचूर्णितं प्रक्षिप्तचूर्णम् उत्कर्षार्थं विक्रेता तत्पक्ष्यो वा परीक्षकः करोति। इति त्रिविधम् उपधिं विद्यात्। उपधिमन्यमाह—**जातीत्यादि**। गोमूत्रभावितेन जातिहिङ्गुलकेन हंसपादाख्यहिङ्गुलकविशेषेण, पुष्पकासीसेन वा किञ्चित्पीतवर्णेन हरितालेन वा, दिग्धेन लिप्तेन, अग्रहस्तेन, संस्पृष्टं, सुवर्णं, श्वेतीभवति हीनवर्णं भवति। अयं क्रेतृप्रयोज्यो व्याजः।

When the streak of gold (on a touch-stone) appears as having the colour of turmeric it is called suvarṇa. By adding copper from one to sixteen kākaṇis to standard pure gold one could obtain sixteen varieties (called carats) in which copper is inseparably alloyed.

To find out the purity, the pure gold may be represented as a streat on the touch-stone and the one to be tested may be made into a streak on the same (touch stone).

The uniform streak made on an even surface and appearing similar in colour although shows good quality of testing when the streak is due to sprinkling of any glittering powder, or made with a sweating hand or rubbed with cloth, then the testing is erroneous and deceptive. If the edge

of the palm is dipped in a solution of vermillion or of sulphate of iron in cow's urine, gold touched becomes white (loosing its original colour).

सकेसरः स्निग्धो मृदुर्भ्राजिष्णुश्च निकषरागः श्रेष्ठः।

कालिङ्गकस्तापीपाषाणो वा मुद्गवर्णो निकषः श्रेष्ठः। समरागी विक्रयक्रयहितः। हस्तिच्छविकः सहरितः प्रतिरागी विक्रयहितः। स्थिरः परुषो विषमवर्णश्चाप्रतिरागी क्रयहितः।

छेदश्चिक्कणः समवर्णः श्लक्ष्णो मृदुर्भ्राजिष्णुश्च श्रेष्ठः।

गुणानाह—सकेसर इति। सकेसरः बहुलकेसरः, स्निग्धो, मृदुः भ्राजिष्णुश्च, निकषरागः निकषरेखावर्णः, श्रेष्ठः।

निकषगुणमाह—कालिङ्गक इति। कालिङ्गकः कलिङ्गदेशे महेन्द्रपर्वतादुत्पन्नः पाषाणः, तापीपाषाणो वा, तापी नाम आरट्टदेशवाहिनी नदी तद्गतः पाषाणो वा, मुद्गवर्णो निकषः श्रेष्ठः। समरागी यथास्थितवर्णग्राही, विक्रयक्रयहितः क्रेतृविक्रेत्रोरुभयोरप्यनुकूलः। हस्तिच्छविकः गजचर्मवत् खरशुष्कः, सहरितः हरितवर्णयुक्तः, प्रतिरागी अपकृष्टस्यापि सुवर्णस्य रागोत्कर्षप्रदर्शकः, विक्रयहितः विक्रेतुरनुकूलः। स्थिरः दृढः, परुषः खरः, विषमवर्णः नानावर्णश्च, अप्रतिरागी उत्कृष्टस्यापि सुवर्णस्य यथास्थितरागाप्रदर्शकः निकषः, क्रयहितः क्रेतुरनुकूलः।

निकषमुक्त्वा छेदमाह—छेद इति। छेदः छिन्नः स्वर्णखण्डः। चिक्कणः स्निग्धः, समवर्णः बहिरन्तश्च तुल्यवर्णः, श्लक्ष्णः मसृणः, मृदुः भ्राजिष्णुश्च श्रेष्ठः।

Nikaṣarāga—the colour of the streak on the touch-stone with soft and shining splendour like tendrils is the best.

The touch-stones Kāliṅgaka—(Obtained from the Mahendra mountian in the Kaliṅga country) and Tāpī (obtained from the river Tāpi flowing through the Āraṭṭa region), both of which have the colour of green beams are the best. A touch-stone of even or uniform colour is best suited for effecting sale or purchase (of gold). The one which possesses the colour of an elephant, tinged with green colour and capable of reflection of light is good for selling the gold. The one which is hard, rough and uneven colour and not reflecting is good for effecting the purchase.

The piece of gold with its cutting edge showing even colour, glossy, smooth and brilliant is the best.

तापे बहिरन्तश्च समः किञ्जल्कवर्णः कुरण्डकपुष्पवर्णो वा श्रेष्ठः। श्यावो नीलश्चाप्राप्तकः।

तुलाप्रतिमानं पौतवाध्यक्षे वक्ष्यामः। तेनोपदेशेन रूप्यसुवर्णं दद्यादाददीत च।

अक्षशालामनायुक्तो नोपगच्छेत्। अभिगच्छन् उच्छेद्यः। आयुक्तो वा सरूप्यस्वर्णस्तेनैव जीयेत। विचितवस्त्रहस्तगुह्याः काञ्चनपृषतत्वष्टृतपनीयकारवो ध्मायकचरकपांसुधावकाः

प्रविशेयुर्निष्कसेयुश्च। सर्वं चैषामुपकरणमनिष्ठिताश्च प्रयोगास्तत्रैवावतिष्ठेरन्। गृहीतं सुवर्णं धृतं च प्रयोगं करणमध्ये दद्यात्। सायं प्रातश्च लक्षितं कर्तृकारयितृमुद्राभ्यां निदध्यात्।

अथ तापमाह–ताप इति। अग्नितापितः स्वर्णभागः, बहिरन्तश्च समः समानवर्णः, तापनात् पूर्वं पश्चाच्च किञ्जल्कवर्णः, कुरण्डकपुष्पवर्णो वा अम्लानकुसुमवर्णो वा, श्रेष्ठः। श्यावः कपिशः, नीलश्च, अप्राप्तकः तत्संज्ञः अशुद्ध इति यावत्।

अथ रूप्यसुवर्णयोरुन्मानविध्यपेक्षायामाह–तुलेत्यादि। तुलाप्रतिमानं तुलापरिच्छेदविधिं, पौतवाध्यक्षे तुलामानपौतवप्रकरणे, वक्ष्यामः। इयमनागतावेक्षणरूपा तन्त्रयुक्तिः। तेनोपदेशेन तत्प्रकरणोक्तमानविधिना, रूप्यसुवर्णं, दद्याद्, आददीत च गृह्णीयाच्च।

पालनविधिमाह -**अक्षशालामिति**। अक्षशालाम्, अनायुक्तः अनधिकृतः, नोपगच्छेत्। अभिगच्छन् वारितोऽप्यभिमुखं गच्छन्, उच्छेद्यः हृतसर्वस्वः कर्तव्यः। आयुक्तो वा नियुक्तोऽपि वा, सरूप्यस्वर्णः रूप्यस्वर्णसहितो, गच्छन्, तेनैव रूप्येण स्वर्णेन च, जीयेत दण्ड्येत। **विचितेत्यादि**। विचितवस्त्रहस्तगुह्याः वस्त्रं हस्तो गुह्यं च विचितं रूप्यस्वर्णयुक्तं न वेति परीक्षितं येषां ते तथाविधाः भूत्वा, काञ्चनपृषतत्वष्टृतपनीयकारवः काञ्चनकारवः रसवेधस्वर्णीकरणशिल्पिनः पृषतकारवो गुलिकादिसूक्ष्मशिल्पकारिणः त्वष्टृकारवः पट्टपात्रादिशिल्पिनः तपनीयकारवः नानाजातीयभूषणशिल्पिनश्च, ध्मायकचरकपांसुधावकाः भस्त्राध्मायकाः परिचारकाः धूलिशोधकाश्च, प्रविशेयुः अक्षशालां निष्कसेयुश्च ततो निर्गच्छेयुश्च। **सर्वं चेति**। एषां कारुप्रभृतीनां, सर्वम् उपकरणम्, अनिष्ठिताः प्रयोगाश्च असमाप्तानि शिल्पानि च, तत्रैव अवतिष्ठेरन् अक्षशालातो बहिर्न नीयेरन्। **गृहीतमिति**। गृहीतं भाण्डागाराद् आत्मनोपात्तं सुवर्णं, प्रयोगं च यत्र सुवर्णं प्रयुक्तं तं पदार्थं च, करणमध्ये धृतं दद्यात् करणानां राजलेखकानां स्वस्वपुस्तकेष्वर्थं लिखतां साक्षिभूतानां मध्ये तुलाधृतं कृत्वा प्रत्यर्पयेत्, अर्थात् सुवर्णाध्यक्षः। सायं प्रातश्च दैनन्दिनव्यापारस्यावसाने प्रारम्भे च, कर्तृकारयितृमुद्राभ्यां लक्षितं कर्तृकारयित्रोः सौवर्णिकसुवर्णाध्यक्षयोर्मुद्राभ्यां चिह्नितं, स्थापयेत्, सुवर्णम्। करणमध्य इत्येव।

That which retains the colour of the tendrils of lotus or Kuraṇḍaka flower (yellow amaranth) both inside and outside when heated is of the best type. But that which changes the colour into black or blue not retaining the original is of inferior quality.

We shall consider the balance and weights (of gold) under the section of the superintendent of weights and measures. Silver and gold may be exchanged according to the rules prescribed therein.

None other than an employee shall enter the office of the goldsmith. He who enters without permission shall forfeit his belongings. Even a workman who enters the office with silver and gold has to for forfeit the same. Employees making the ornaments of solid or hollow gold, who are setting gems into golden ornaments as well as blowers and sweepers shall be admitted into and sent out of the office only after their person and dress are thoroughly examined. All their instruments together with their

unfinished work shall be kept in the office. The gold received and the ornaments made shall be returned for keeping accounts from time to time. Both in the evening and morning the items finished shall be kept under the seal of the officer and the employee concerned.

क्षेपणो गुणः क्षुद्रकमिति कर्माणि। क्षेपणः काचार्पणादीनि। गुणः सूत्रवानादीनि। घनं सुषिरं पृषतादियुक्तं क्षुद्रकमिति।

अर्पयेत् काचकर्मणः पञ्चभागं काञ्चनं दशभागं कटुमानम्। ताम्रपादयुक्तं रूप्यं रूप्यपादयुक्तं वा सुवर्णं संस्कृतकं तस्माद् रक्षेत्।

पृषतकाचकर्मणः त्रयो हि भागाः परिभाण्डं द्वौ वास्तुकम्। चत्वारो वा वास्तुकं त्रयः परिभाण्डम्।

अथ कर्म त्रिधा विभज्य व्याचष्टे–**क्षेपण** इत्यादि। क्षेपणः तदाख्यं कर्म, काचार्पणादीनि मणिसंयोजनादीनि। गुणः तत्कर्म, सूत्रवानादीनि कटिसूत्रग्रथनादीनि। क्षुद्रकं सूक्ष्मपरिकर्म, घनं कटकाङ्गुलीयकादि सुषिरं सरन्ध्रं स्थालीभृङ्गारादि, पृषतादियुक्तं पृषतो गुटिका आदिपदात् पत्रभङ्गादि तद्युक्तम्। इतिशब्दः प्रकारान्तरसंग्रहार्थः।

अर्पयेदिति। काचकर्मणः मणिंसयोजनस्य विधिरुच्यत इति वाक्यशेषः। पञ्चभागं मणेः पञ्चमं भागं तलभागं काञ्चनम् अर्पयेद् आधारसुवर्णे प्रवेशयेत्। दशभागं काञ्चनप्रवेशितस्य भागस्यार्धं, कटुमानम् अर्पयेत् मणिदार्ढ्यार्थो वास्तुकोपरिसुवर्णपट्टिकाबन्धः कटुमानमित्युच्यते। तत्र प्रवेशयेदित्यर्थः। रत्नार्पणाधारबन्धे रूप्यमये ताम्रपादयोजनेन तावद्रूप्यहरणं, सुवर्णमये रूप्यपादयोजनेन तावत्सुवर्णहरणं च पश्यतोहरैः सुकरं यतः, तस्मात् कारणाद् आधारबन्धो द्रव्यान्तरमिश्रणाद् यत्नेन रक्षणीय इत्युपदिशति–**ताम्रपादेत्यादि**। संस्कृतकं, यथोक्तमिश्रणाशुद्धमपि रूप्यं सुवर्णं वा शुद्धसदृशं प्रतिभायादित्यर्थः।

शुद्धकाचकर्मविधिमुक्त्वा मिश्रकाचकर्मविधिमाह–**पृषतेत्यादि**। पृषतकाचकर्मणः गुटिकामिश्रकाचकर्मणि क्रियमाणे, तदर्थं सुवर्णं पञ्चधा विभज्य त्रयो भागाः, परिभाण्डं पद्मस्वस्तिकाद्याकारं पृषतमणिप्रतिवापस्थानं भवति, द्वौ वास्तुकं द्वौ भागौ आधारपीठबन्धः। इत्येकः प्रकारः। यदि मणयः स्थूलास्तदा विधिमाह–**चत्वारो वेत्यादि**।

The three kinds of ornamental work are designated as Kṣepaṇa, Guṇa and Kṣudraka. Kṣepaṇa—is the setting of gems and crystal to the gold. Gaṇa is the act of threading or joining together of items with golden thread. Kṣudraka stands for solid, hollow globular ornaments.

In order to set jewels in gold, five parts of pure gold and ten parts of gold alloyed with four parts of copper or silver shall be the required quantity. One has to be careful that the workmen are not stealing the silver alloyed with copper and gold alloyed with silver.

For setting jewels in hollow ornaments, three parts of gold to hold the jewels and two parts for the bottom (base). It can be four parts for the bottom and three for holding the gems.

त्वष्टृकर्मणः। शुल्बभाण्डं समसुवर्णेन संयूहयेत्। रूप्यभाण्डं घनं घनसुषिरं वा सुवर्णार्धेन अवलेपयेत्। चतुर्भागसुवर्णं वालुकाहिङ्गुलकस्य रसेन चूर्णेन वा वासयेत्।

तपनीयं ज्येष्ठं सुवर्णं सुरागं, समसीसातिक्रान्तं पाकपत्रपक्वं सैन्धविकयोज्ज्वालितं नीलपीतश्वेतहरितशुकपोतवर्णानां प्रकृतिर्भवति। तीक्ष्णं चास्य मयूरग्रीवाभं श्वेतभङ्गं चिमिचिमायितं पीतचूर्णितं काकणिकः सुवर्णरागः।

त्वष्टृकर्माह—**त्वष्ट्रित्यादि**। त्वष्टृकर्मणः ताम्ररजतनिर्मितघनपत्रादिकर्मणः विधिरुच्यत इति शेषः। शुल्बभाण्डं ताम्रभाण्डं, समसुवर्णेन संयूहयेत् ताम्रपलतुल्यपलेन सुवर्णेन दृढपत्रीकृतेन संयोजयेत्। रूप्यभाण्डं, घनम् अङ्गुलीयककङ्कणादि, घनसुषिरं वा स्थालीकलशभृङ्गारादिकं वा, सुवर्णार्धेन अवलेपयेत् रूप्यपलशतकृतं भाण्डं पञ्चाशता सुवर्णपलैस्तनुपत्रीकृतैरेव श्लेषयेत्। अवलेपविधिमुक्त्वा वासनाविधिमाह—**चतुर्भागसुवर्णमिति**। रूप्यभाण्डमिति वर्तते। अयमर्थः—रूप्यपलशतकृतं भाण्डं पञ्चविंशतिपलसुवर्णेन चूर्णीकृतेन वालुकाहिङ्गुलकचूर्णमिश्रेण पारतयुक्तेन तुषाग्निद्रवीकृतेन वासयेत्। एवं तावत् सुवर्णस्य समस्यार्धस्य चतुर्भागस्य च योजनेन त्रिप्रकारं त्वष्टृकर्म व्युत्पादितम्।

तपनीयकर्माह—**तपनीयमित्यादि**। तपनीयम् अलङ्कारार्थं घटनीयं कनकं, ज्येष्ठम् उत्तमं सप्तदशवर्णकं षोडशवर्णकं वा, सुवर्णं किञ्जल्काद्यन्यतमवर्णं, सुरागं स्निग्धभ्राजिष्णुरागं, नीलपीतादीनां पञ्चानां प्रकृतिः कारणं भवति। अनेवम्भूताशुद्धस्वर्णविषये आह—**समसीसेत्यादिना**। समसीसातिक्रान्तं तत्तुल्यमानसीसशोधितं, पाकपत्रपक्वं तनुपत्रात्मकं कृत्वारण्यगोमयदग्धं, सैन्धविकया सौराष्ट्रमृत्तिकया सह उज्ज्वालितम्, इत्थं **शोधनेन** संस्कृतं, नीलादीनां प्रकृतिर्भवति। **तीक्ष्णं वेति**। अस्य तपनीयस्य, तीक्ष्णं तदाख्यो लोहविशेषश्च, प्रकृतिर्भवतीत्यनुवर्तते, अर्थान्नीलादीनां पञ्चानाम्। कीदृशं तीक्ष्णं मयूरग्रीवाभं, श्वेतभङ्गं छेदे शुक्लं, चिमिचिमायितम् अत्यन्तभास्वरम्, ईदृशं तीक्ष्णं, पीतचूर्णितं तप्तचूर्णीकृतं स्वर्णे प्रक्षिप्तमित्यार्थम्। कियति स्वर्णे कियत् तीक्ष्णं रञ्जनार्थं प्रक्षेप्तव्यमित्यत्राह—**काकणिक** इति। सुवर्णरागः षोडशमाषप्रमाणस्य सुवर्णस्य रागो रञ्जकस्तीक्ष्णांशः, काकणिकः काकणी माषचतुर्भागस्तत्प्रमाणकः।

For the work of goldsmith copper and gold may be mixed in equal quantitites. For silver items either solid or hollow, it may be fused with half of the amount of gold or by making use of the powder or solution of vermillion, gold equal to one-fourth of the quantity of silver of the ornament may be painted on it.

Tapanīya (the gold for ornament) is pure and glittering, combined with equal quantity of lead and heated with rock salt to melting point becomes the basis of gold alloys of blue, red, white, yellow, parrot and pigeon colour, Tīkṣṇa—the metal of which a kākaṇi—could also be the basis (for the colours) and it is of like colour of the neck of a peacock, and when it is cut the edge appears to be white, glittering and full of golden hue.

तारमुपशुद्धं वा। अस्थितुत्थे चतुः, समसीसे चतुः, शुष्कतुल्ये चतुः, कपाले त्रिर्गोमये

द्विः, एवं सप्तदशतुत्थातिक्रान्तं सैन्धविकयोज्ज्वालितम्। एतस्मात् काकण्युत्तरापसारिता। आ द्विमाषादिति सुवर्णे देयं, पश्चाद् रागयोगः। श्वेततारं भवति।

त्रयोंऽशाः तपनीयस्य द्वात्रिंशद्भागश्वेततारमूर्छितं तत् श्वेतलोहितकं भवति। ताम्रं पीतकं करोति।

स्वर्णानन्तरं रूप्यमाह—तारमित्यादि। उपशुद्धम् अत्यन्तशुद्धं, तारं रजतं, वाशब्दो विकल्पे। नीलादीनां प्रकृतिर्भवतीत्यनुवर्तते। तारस्याशुद्धस्य शोधनप्रकारमाह—**अस्थितुत्थ** इति। अस्थितुत्थे अस्थिचूर्णयुक्त-मृत्तिकानिर्मितायां मूषायां, चतुः चतुर्वारान्, आवर्तितम्, एवं समसीसे मृत्तिकासीससमप्रमाणनिर्मिते तुत्थे चतुः, शुष्कतुत्थे 'शुष्कतुत्थः कटुशर्करामूषा' इति भट्टस्वामी, तस्यां चतुः, कपाले शुद्धमृत्तिकामूषायां त्रिः, गोमये गोमयकृतमूषायां द्विः, एवं सप्तदशतुत्थातिक्रान्तं सप्तदशमूषावर्तितं, पश्चात्, सैन्धविकया लवणयुक्तसौराष्ट्रमृत्तिकया सह, उज्ज्वालितम् उज्ज्वलनसंस्कृतं, शुद्धमित्यार्थम्। एतस्मात् काकणी उक्तरीत्या शोधिताद् रूप्यात् काकणी, सुवर्णे प्रक्षिप्ता, उत्तरा अपसारिता अधिका सुवर्णकाकणी अपनीता भवति। इति आ द्विमाषात् सुवर्णे देयम् एवं सुवर्णकाकण्यपनयनपूर्वकरूप्यकाकणीप्रक्षेपोपचयक्रमेण अष्टकाकायधिकः सुवर्णे रूप्यप्रक्षेपः कर्तव्यः। पश्चाद्, रागयोगः रागयोगार्थो यथोक्ततीक्ष्णकाकणीप्रक्षेपः। श्वेततारं भवति एवं करणे स्वर्णं श्वेततारसमप्रभं संपद्यते। केचित्तु श्वेततारं रागार्थं भवतीति व्याचक्षते।

रागयोगमाह—**त्रयोंऽशा** इत्यादि। एवं स्वामी व्याचष्टे—सामान्यसुवर्णाद् द्वात्रिंशद्धा विभक्ताद् अंशत्रयमपनीय, तपनीयस्य यथोक्तप्रकारशोधिततपनीयस्य, त्रयोंऽशाः सामान्यस्वर्णे प्रक्षिप्यन्त इति शेषः। तत् स्वर्णं, द्वात्रिंशद्भागश्वेततारमूर्छितं द्वात्रिंशद्भागिकेन श्वेतरजतेन सहावर्तितं सत्, श्वेतलोहितकं भवति श्वेतलोहितात्मकवर्णद्वयसम्भिन्नं भवति। ताम्रं कर्तृ, पीतकं पीतवर्णं करोति, अर्थात् तदेव सामान्यस्वर्णं कर्म। इहापि पूर्ववत् 'त्रयोंऽशा' इत्यादि योजनीयं, श्वेततारस्थाने च ताम्रम्। तथाच तत् स्वर्णं द्वात्रिंशद्भागिकताम्रेण सहावर्तितं सत् पीतवर्णं जायत इत्युक्तं भवति। भाषाटीका त्वन्यथा व्याचष्टे—द्वात्रिंशति भागेषु त्रयोंऽशास्तपनीयस्य, शेषास्तु रजतस्येत्येवं मिश्रयित्वावर्तने कृते तच्छ्वेतलोहितवर्णं भवति। एवं द्वात्रिंशद्भागात्मके ताम्रे शुद्धसुवर्णस्य त्रीन् भागान् योजयित्वावर्तने कृते तत् पीतरागं भवतीति।

Silver both pure and impure (may be treated like this) for the purpose. Impure silver is to be melted consecutively for seventeen times in various kinds of crucibles before it is finally heated to white light with rock-salt (in a crucible) made of salt procured from Saurāṣṭra country) as follows. Four times in astituttha (crucible made with bones and mud) four times in Samasīsa (crucible made with lead and mud in equal proportions) and four times in Śuṣkatuttha (crucible made of Kaṭuśarkara—a kind of clay), three times in Kapāla (crucible made of plain mud) and twice in crucible made of cowdung. Thus silver can be alloyed with gold to the extent of one Kākaṇi to two māṣas. Then the gold attains white colour and is called Śvetatāra.

When three parts of pure gold are melted with thirty-two parts of Śvetatāra the compound becomes reddish white. Similarly copper (thirty two parts) is melted with gold (there parts) becomes yellowish.

तपनीयमुज्ज्वाल्य रागत्रिभागं दद्यात्। पीतरागं भवति।

श्वेततारभागौ। द्वावेकस्तपनीयस्य मुद्गवर्णं करोति।

कालायसस्यार्धभागाभ्यक्तं कृष्णं भवति। प्रतिलेपिना रसेन द्विगुणाभ्यक्तं तपनीयं शुकपत्रवर्णं भवति। तस्यारम्भे रागविशेषेषु प्रतिवर्णिकां गृह्णीयात्।

तीक्ष्णताम्रसंस्कारं च बुध्येत। तस्माद् वज्रमणिमुक्ताप्रवालरूपाणामपनेयि- मानं च रूप्यसुवर्णभाण्डबन्धप्रमाणानि चेति।

तपनीयमुज्ज्वाल्येति। तपनीयं सामान्यस्वर्णं, सैन्धविकयोज्ज्वाल्य, रागत्रिभागं शोधितस्वर्णत्रिभागं, दद्यात्। पीतरागं भवति तथाकरणे तत् सामान्यस्वर्णं पीतरागं पीतरक्तं भवति। अपरा व्याख्या–तपनीयं शोधितसुवर्णं सैन्धविकयोज्ज्वाल्य तत्र रागत्रिभागं ताम्रत्रिभागं दद्यात्। तत् पीतरागं भवतीति।

द्विगुणशुद्धरूप्ययुक्तं शुद्धसुवर्णमावर्तितं मुद्गवर्णं भवतीत्याह–**श्वेततारभागावित्यादि।** पश्चाद्रागयोग इति सर्वशेषो द्रष्टव्यः।

कालायसस्येति। कालायसस्य तीक्ष्णस्य, अर्धभागाभ्यक्तम् अर्धभागेन रागार्थमस्य तीक्ष्णस्य प्रमाणं तृतीयांश उक्तः तदर्धभागेन अभ्यक्तमनुलिप्तं न त्वावर्तितं, तपनीयं, कृष्णम् अञ्जनवर्णं, भवति। प्रतिलेपिना द्रवीकृतेन कालायसेन, रसेन पारतयुक्तेन, द्विगुणाभ्यक्तं द्विगुणमनुलिप्तं, तपनीयं, शुकपत्रवर्णं भवति। **तस्येति।** तस्य नीलादेरुक्तस्य, आरम्भे, रागविशेषेषु शुद्धाशुद्धस्वर्णरजतरूपेषु रञ्जकभेदेषु विषये, प्रतिवर्णिकां तारतम्यपरिच्छेदार्थं, गृह्णीयात्।

रञ्जनार्थतीक्ष्णताम्रयोः शुद्धिपरिज्ञानापेक्षायामाह–**तीक्ष्णेत्यादि।** तीक्ष्णताम्रयोः संस्कारं शोधनं, बुध्येत धातुशोधनशास्त्राज्जानीयात्। तस्मात् सुवर्णरजतादिशुद्धिप्रकारज्ञानस्य यो हेतुः कारुहरणशङ्कारूपस्तेनैव हेतुनेत्यर्थः, वज्रमणिमुक्ताप्रवालरूपाणाम्, अपनेयिमानं च असारहीरमाणिक्यादिप्रक्षेपेण सारहीरमाणिक्यादिपरिवर्तनादिकं हरणप्रकारं च, रूप्यसुवर्णभाण्डबन्धप्रमाणानि च रूप्यसुवर्णाभरणादीनां संव्यूहनादीनि च 'शुल्बभाण्डं समसुवर्णेन संयूहयेत्' इत्यादिनोक्तानि, बुध्येतेति सम्बध्यते। इतिशब्दः प्रकारे।

Also ordinary gold melted with three parts of other substances of gold compound becomes yellowish in colour.

Two parts of Śvetatāra and one part of gold melted will present the colour of mudga (the beans Phraseolus Mungo). When gold is drenched in a solution of half the quantity of black iron, it becomes black. When the gold is twice drenched in a solution mixed with mercury it acquires the colour of the feathers of a peacock. Before they are put to use they may be tested on a touch stone.

The process of assaying the quality of iron and copper shall be poperly known. Hence the various counter weights used in weighing diamonds, rubies, pearls, corals and coins (of silver), as well as the proportional amount of gold and silver necessary for various kinds of ornaments can be well assessed.

समरागं समद्वन्द्वमसक्तपृषतं स्थिरम्।
सुप्रमृष्टमसंपीतं विभक्तं धारणे सुखम्।।
अभिनीतं प्रभायुक्तं संस्थानमधुरं समम्।
मनोनेत्राभिरामं च तपनीयगुणाः स्मृताः।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोदशोऽध्यायः अक्षशालायां सुवर्णाध्यक्षः, आदितश्चतुस्त्रिंशः।।

अध्यायान्ते श्लोकद्वयं तपनीयगुणचतुर्दशकप्रतिपादकमाह–समरागमित्यादि। समरागं समवर्णिकं, समद्वन्द्वं तोलनतो वर्णतश्च स्वसमानद्वितीयम्, असक्तपृषतम् असंसक्तगुटिकं, स्थिरम् अविसंवादि, सुप्रमृष्टं पूर्वोक्तविधिना रौप्यविकया सम्यगुज्ज्वालितम्, अप्रमृष्टमिति पाठे अकृत्रिमच्छायम्, असम्पीतं छायोत्कर्षार्थं पायितं न भवति, विभक्तं सुविभक्तावयवं, धारणे सुखम् आमुञ्चताम् अदुःखकरम्, अभिनीतम् अनुद्बणं, प्रभायुक्तं द्युतिमत्, संस्थानमधुरम् आकृतिरमणीयं, समम् अनिम्नोन्नतप्रदेशं, मनोनेत्राभिरामं मनोहरं दृष्टिसुखं च, तपनीयगुणाः स्वर्णाभरणगुणाः।।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोदशोऽध्यायः अक्षशालायां सुवर्णाध्यक्षः, आदितः चतुस्त्रिंशः।।

The qualities of the pure gold (tāpanīya) may be enumerated as that it is uniform in colour, equal in the colour of test streak (on a touch-stone) to the standard gold, devoid of hollow globules, hard, smooth, free from alloys, pleasing when worn as an ornament, not dazzling though glittering, sweet in uniformity of mass, and pleasing the mind and eyes.

Thus the thirty-fourth chapter of the Arthaśāstra of Kauṭalya called 'Superintendent in the office of goldsmith' comes to an end. Here ends the thirteenth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 35

32. प्रक० विशिखायां सौवर्णिकप्रचारः।

Section 32 : Goldsmith in the High Road

सौवर्णिकः पौरजानपदानां रूप्यसुवर्णमावेशनिभिः कारयेत्। निर्दिष्टकालकार्यं च कर्म कुर्युः, अनिर्दिष्टकालं कार्यापदेशम्।

कालातिपातने पादहीनं वेतनं तद्द्विगुणश्च दण्डः। कार्यस्यान्यथाकरणे वेतननाशः तद्द्विगुणश्च दण्डः।

यथावर्णप्रमाणं निक्षेपं गृह्णीयुस्तथाविधमेवार्पयेयुः, कालान्तरादपि च तथाविधमेव प्रतिगृह्णीयुरन्यत्र क्षीणपरिशीर्णाभ्याम्।

विशिखायां सौवर्णिकप्रचार इति सूत्रम्। विशिखायां विशिखेह सौवर्णिकविपणिः तस्यां, सौवर्णिकप्रचारः सौवर्णिकस्य सुवर्णे नियुक्तस्य प्रचारो व्यापारः, सोऽभिधीयत इत्यर्थः। पूर्वाध्याये शिल्पवत्त्वाभिजात्यप्रात्ययिकत्वादिगुणयुक्तं विशिखायां सौवर्णिकं कुर्यादित्युक्तम्। तस्य व्यापारस्तु नोक्तः। स इहोच्यत इति सम्बन्धः।

सौवर्णिक इति। सौवर्णिकः, पौरजानपदानां पुरवासिनां बहिर्विषयवासिनां च, रूप्यसुवर्णं रूप्यशिल्पं सुवर्णशिल्पं च, आवेशनिभिः शिल्पिशालीयैः सुवर्णकारादिभिः, कारयेत्। निर्दिष्टकालकार्यं च कर्म कुर्युः इयता कालेनेदृशं कटकाङ्गदादि निर्मायार्पणीयम् एतावच्च वेतनमिति परिभाषणपूर्वं शिल्पं कुर्युः, अर्थादावेशनिनः। कार्यापदेशम् अनिर्दिष्टकालमिति निर्मातव्यवस्तुगौरवनिमित्तं तु अपरिभाषितकालमपि कर्म कुर्युः।

कालातिपातन इति। परिभाषितकालातिक्रमे, पादहीनं परिभाषितचतुर्भागहीनं, वेतनं भवति, तद्द्विगुणः गृह्यमाणवेतनद्विगुणः दण्डश्च भवति। कार्यस्यान्यथाकरणे कटकं परिभाष्य केयूरादिकरणे, वेतननाशः, तद्द्विगुणः नष्टवेतनद्विगुणः, दण्डश्च भवति। कण्टकशोधने कारुकरक्षणे कारूणां सर्वेषां दण्ड उक्तः सुवर्णकारूणां त्विह दण्डकथनं विशेषज्ञापनार्थं–कार्वन्तरदण्डवत् सुवर्णकारुदण्डं प्रशास्तारः केवला न कुर्युः किन्तु सौवर्णिकसहिता एव कुर्युरिति।

यथावर्णेत्यादि। निक्षेपं घटनीयरूप्यसुवर्णादि, यथावर्णप्रमाणं यद्वर्णिकं यत्प्रमाणं च, गृह्णीयुः, तथाविधमेव तत्प्रकारमेव न तु लेशतोऽपि वर्णप्रमाणयोर्हीनम्, अर्पयेयुः कारवः। कालान्तरादपि चेति ग्रहीतुः कारुकस्य दीर्घप्रवासादिना मरणादिना वा निमित्तेन तत्पुत्रादिहस्तादपि च, तथाविधमेव प्रतिगृह्णीयुः

स्वार्पितवर्णप्रमाणकमेव निक्षेपं प्रतिगृह्णीयुः, न तु तदभ्यधिकवर्णप्रमाणकं कालातिपातदोषापदेशेन प्रार्थयेयुः, न वा पुत्रादीनां वेतनहानिर्दण्डो वेत्यभिप्रायः। अपरा व्याख्या–कालान्तरादपि देशविभ्रमादिनिमित्ते कालातिपाते जातेऽपि, तथाविधमेव यथानिक्षिप्तमघटितमेव, अर्पयेयुः कारवः, निक्षेपकाश्च प्रतिगृह्णीयुरिति। तत्रापवादमाह–क्षीणपरिशीर्णाभ्यामन्यत्र उपभोगघृष्टं प्रच्युतावयवं च निक्षेपमपहाय। क्षीणपरिशीर्णयोस्तु दण्डो दाप्य एव।

The authority of Goldsmith shall employ artisans to manufacture silver and gold ornaments of the citizens and villagers. The employees are expected to perform their assignments as ordered and in time depending upon the nature of work involved.

If the time is exceeded they shall forfeit one fourth of their wages and also pay a fine of twice the amount of wages. If the work is done against the requirements the loss of wages and a fine of double the wages are to be imposed.

The goldsmith shall receive the bullion for making ornaments of the required quantity and shall return the same quantity to the owner in the form of ornaments or coins. With the exception of dimunition in weight the same shall be received back even after a lapse of time as several years allowing margin for wear and tear.

आवेशनिभिः सुवर्णपुद्गललक्षणप्रयोगेषु तत्तज्जानीयात्।

तप्तकलधौतकयोः काकणिकः सुवर्णे क्षयो देयः। तीक्ष्णकाकणी रूप्यद्विगुणा रागप्रक्षेपस्तस्य षड्भागः क्षयः।

वर्णहीने माषावरे पूर्वः साहसदण्डः, प्रमाणहीने मध्यमः, तुलाप्रतिमानो- पधावुत्तमः, कृतभाण्डोपधौ च।

आवेशनिभिरिति। सुवर्णपुद्गललक्षणप्रयोगेषु सुवर्णः किञ्जल्कवर्णादिः पुद्गलम् आभरणभृङ्गारादि लक्षणं मुद्रा एतेषां स्वर्णादिसम्बन्धिनां प्रयोगेषु व्यवहारेषु हरणोपायानुष्ठानेषु वा, तत्तत् छलमच्छलं च ज्ञेयं सर्वं वस्तुतत्त्वम्, आवेशनिभिर्जानीयात् शिल्पिद्वारेण विद्यात्, सौवर्णिकः।

'अन्यत्र क्षीणपरिशीर्णाभ्यामि'त्युक्तस्य प्रतिप्रसवमाह–**तप्तेत्यादि।** तप्तकलधौतकयोः अशुद्धस्वर्णरजतयोर्विषये, सुवर्णे काकणिकः षोडशमाषके माषचतुर्भागप्रमाणः, क्षयो देयः निक्षेपं घटितं तावन्मात्रन्यूनमेव निक्षेपकः प्रतिगृह्णीयात्। तीक्ष्णकाकणी कालायसकाकणी, रूप्यद्विगुणा रजतकाकणीद्वययुक्ता, रागप्रक्षेपः रागार्थं षोडशमाषकस्वर्णे प्रक्षेप्तव्येत्यर्थः। तस्य षड्भागः प्रक्षिप्तकाकणीत्रयस्य षड्भागः अर्धादर्धकाकणिकः, क्षयः देयो भवति।

अथ दण्डमाह–**वर्णेत्यादि।** माषावरे वर्णहीने माषप्रमाणे सुवर्णे उत्कृष्टवर्णहानिं नीते सति, पूर्वः साहसदण्डः। माषावरे प्रमाणहीने प्रतिमानहानिं नीते सति, मध्यमः साहसदण्डः। तुलाप्रतिमानोपधौ न केवलं माषमात्रप्रतिमानहानिः, किन्तु हापितप्रतिमानस्य पूरणकैतवमपि यत्र प्रयुज्यते तादृशे विषय इत्यर्थः,

उत्तमः साहसदण्डः। कृतभाण्डोपधौ च माषावरविषये घटितरूपपरिवर्तनादिकैतवे च, उत्तमः साहसदण्डः। अनया दिशा द्विमाषत्रिमाषादिविषयहान्यादौ तत्तद्दण्डद्वैगुण्यत्रैगुण्यादिकमूह्यम्।

The employees (goldsmith) shall be aware of the purity of the gold, its colour and rate of exchange.

In the case of gold and silver that is melted allowance should be granted towards loss of weight which is calculated as one Kākaṇi. In the matter of iron alloyed with gold and silver alloyed with gold the margin of loss due to the melting may be calculated as two Kakanis. One-sixth of the weight may be calculated as allowance for the loss of gold and the colouring ingredient.

If the gold of the quantity of a māsa is of inferior colour the fine shall be the first amercement. When its weight is less than the standard weight the goldsmith shall be punished with the middle most amercement. Deception in weight in the exchange of manufactured ornaments shall be punished with the highest amercement. The same is the case with the wrong manufacture of the ordered item.

सौवर्णिकेनादृष्टमन्यत्र वा प्रयोगं कारयतो द्वादशपणो दण्डः, कर्तुर्द्विगुणः, सापसारश्चेत्। अनपसारः कण्टकशोधनाय नीयेत। कर्तुश्च द्विशतो दण्डः पणच्छेदनं वा।

तुलाप्रतिमानभाण्डं पौतवहस्तात् क्रीणीयुः। अन्यथा द्वादशपणो दण्डः।

घनं घनसुषिरं संयूह्यमवलेप्यं सङ्घात्यं वासितकं च कारुकर्म।

तुलाविषममपसारणं विस्रावणं पेटकः पिङ्कश्चेति हरणोपायाः।

सन्नामिन्युत्कीर्णिका भिन्नमस्तकोपकण्ठी कुशिक्या सकटुकक्ष्या पारिवेल्ल्ययस्कान्ता च दुष्टतुलाः।

सौवर्णिकेनाननुमतं विशिखायाम्, अनुमतमपि वा विशिखातोऽन्यत्रालङ्कारादिनिर्माणं कारयतः कर्तुश्च दण्डमाह—**सौवर्णिकेने**त्यादि। सापसारश्चेदिति कारयिता यदि सापसारस्तदायं दण्ड इत्यर्थः। अपसारोऽपसरणं तच्च स्वर्णादेः स्वामिशुद्धागमनप्रतिपादनेन चोरशङ्काकलङ्कादात्मव्यावृत्तिः, तद्वान् सापसारः। अनपसारविषये त्वाह—**अनपसार** इति। अनपसारश्चेत् कारयिता, कण्टकशोधनाय वाक्यकर्मानुयोगादिना शुद्धाशुद्धत्वनिर्णयाय, नीयेत प्रदेष्टृसन्निधिम्। कर्तुश्च स्वर्णकारादेरनपसारस्य, द्विशतो दण्डो भवति। तस्य द्विशतपणदण्डदानासामर्थ्ये त्वाह—**पणच्छेदनं** वेति। पणच्छेदनं पणनसाधनपञ्चाङ्गुलिच्छेदनम्।

तुलाप्रतिमानेत्यादि। तुलाप्रतिमानभाण्डं तुलाप्रतिमानसाधनं माषद्विमाषादिकम्, उपलक्षणात् प्रस्थद्रोणादिकं मानसाधनं च, पौतवहस्तात् वक्ष्यमाणपौतवाध्यक्षसकाशात्, क्रीणीयुः क्रीत्वा तेन व्यवहरेयुः सुवर्णकारादयः। तुलामानभाण्डमिति पाठे तुलाभाण्डं माषद्विमाषादिकं मानभाण्डं प्रस्थद्रोणादिकं चेति व्याख्येयम्। अन्यथा स्वयं निर्माणेऽन्यतः क्रयणे वा, द्वादशपणो दण्डः।

अथ हरणोपायद्वारभूतं कारो: कर्म षट्प्रकारमाह–घनमित्यादि। घनम् अङ्गुलीयकादि, घनसुषिरं भृङ्गारादि, संयूह्यं स्थूलपत्रयोजनम्, अवलेप्यं लघुपत्रयोजनं, सङ्घात्यं कटिसूत्रादि, वासितकं रसादिना वासितम्।

तेषु कर्मसु प्रयोज्यान् पञ्च हरणोपायान् नामत उद्दिशति–तुलेत्यादि।

तत्र तुलाविषममाह–सन्नामिनीत्यादि। सन्नामिनी मृदुलोहनिर्मिता यथाकामसंनाम्या, उत्कीर्णिका तीक्ष्णचूर्णेन पारतेन वा पूरिताभ्यन्तरसुषिरा, भिन्नमस्तका सरन्ध्राग्रा सा हि वाताभिमुखं धृता वातेन नामिता भवतीति, उपकण्ठी ग्रन्थिबहुला, कुशिक्या शिक्यं तोल्यवस्तुनिवेशाधार: तत् कुत्सितं यस्या: सा, सकटुकक्ष्या अप्रवणसूत्रा, पारिवेल्ली परिवेल्ल: परिचलनं तद्वती, अयस्कान्ता अयस्कान्ताख्यलोहनिर्मिता, सा हि यत: स्वर्णं ततो याति। च: समुच्चये। अष्टावेता दुष्टतुला:। इत्थं सम्भावितानष्टविधदुष्टतुलं तुलाविषमम्।

Whoever causes the manufacture of items (of gold or silver) in a place other than the mint or without the knowledge of the superintendent shall be punished with a fine of twelve paṇams; the artisan is to be fined twice the amount if he misappropriates a part of it. He who causes the manufacture thus may be taken for questioning by proper authorities. If he admits his guilt (or detected) he shall have his fingers cut off.

Weighing balance and counter weights shall be purchased (only) from the superintendent in charge of them. Otherwise a fine of twelve paṇas is to be imposed.

The work of artisan involves the manufacture of articles which are ghana (compact), ghanasuṣira (compact and hollow), samyūhya (soldering), avalepya (amalgamation), saṅghātya (enclosing) and gilding (or covering) termed as vāsitaka.

Means employed by the artisans (goldsmith) are tulāviṣama (use of false balance), apasāraṇa (removal of original), visrāvaṇa (dropping), peṭaka (folding) and piṅka (confounding).

False balances are (eight as follows) Sannāminī (that of bending arms being made of soft metals); utkīrṇīkā (that of high helm or pivot or filled with iron powder); bhinnamastakā (that of broken-head having holes so that it vascillates in wind); upakaṇṭhī (that of hollow neck or having several knots); kuśikyā (that of bad strings or bad platforms to put weighing articles), sakaṭukakṣyā (with false strings which are not flexible, pārivellī (that which is oscillating, moving aside) and ayaskānta (that which is combined with magnet).

रूप्यस्य द्वौ भागावेक: शुल्बस्य त्रिपुटकम्। तेनाकरोद्गतमपसार्यते तत् त्रिपुटकापसारितं, शुल्बेन शुल्बापसारितं, वेल्लकेन वेल्लकापसारितं, शुल्बार्धसारेण हेम्ना हेमापसारितम्।

मूकमूषा पूतिकिट्ट: करटकमुखं नाली सन्दंशो जोङ्गनी सुवर्चिका लवणं तदेव

सुवर्णमित्यपसारणमार्गाः। पूर्वप्रणिहिता वा पिण्डवालुका मूषाभेदादग्निष्ठा उद्ध्रियन्ते।

अथापसारणमुच्यते। तत्र यदसारद्रव्यं प्रक्षिप्य सारद्रव्यमपसार्यतेऽपह्रियते तदपद्रव्यं चतुर्विधमादावाह–**रूप्यस्येति**। द्वौ रूप्यस्य भागौ एकः शुल्बस्य भाग इति भागत्रयमिदं मेलयित्वावर्तितं, त्रिपुटकं तत्संज्ञम्। तेन त्रिपुटकेन प्रक्षिप्तेन, आकरोद्गतं शुद्धम्, अपसार्यते आकर एवाशुद्धमिदमुत्पन्नमिति व्यपदिश्यापह्रियते, तत् तथाविधमपसारणसाधनं, त्रिपुटकापसारितं तदाख्यमपद्रव्यमेकम्। शुल्बेन ताम्रप्रक्षेपेण अपसार्यते तथापह्रियते, तत् शुल्बापसारितं तदाख्यम् अपसारणसाधनं द्वितीयम्। वेल्लेकेन तीक्ष्णलोहं रूप्यं च समभागमावर्तितं वेल्लकमिति प्रसिद्धं तेन साधनेन प्रक्षिप्तेन, अपसार्यते, तद् वेल्लकापसारितं तृतीयम्। शुल्बार्धसारेण ताम्रसमभागयोगावर्तितेन, हेम्ना साधनेन, अपसार्यते तथापह्रियते, तत् तथाविधं साधनं, हेमापसारितं तत्संज्ञं चतुर्थम्।

अथापद्रव्यप्रक्षेपेण सारद्रव्यापहरणस्य मार्गानाह–**मूकमूषेत्यादि**। मूकमूषा ससम्पुटार्धमूषा, पूतिकिट्टो लोहमलं, करटकमुखं काकमुखं कर्तरीमुखं वा, नाली प्रसिद्धा, सन्दंशः कङ्कमुखं, जोङ्गनी लोहकटिका, सुवर्चिका क्षारविशेषः, लवणं प्रसिद्धम्। **तदेव सुवर्णमिति** तादृशं हीनवर्णकमेवाकरोद्गतं सुवर्णमिति मिथ्यावादः, अपसारमार्गाः त एते सुवर्णापहरणोपायाः। अयमर्थः–आकरोद्गते मूकमूषायामावर्त्यमाने शुद्धसुवर्णे लोहमलहरणव्याजेन सुवर्चिकालवणक्षेपव्याजेन च त्रिपुटकादिकमपद्रव्यं प्रक्षिप्य करटमुखादिना साधनेन शुद्धसुवर्णमपहरन्ति सुवर्णकाराः कृतकच्छायमीदृशमेव सुवर्णमाकरादुद्गतमिति वदन्त इति। हरणोपायविकल्पमाह–**पूर्वप्रणिहिता** वेति। पूर्वप्रणिहिताः पूर्वमेवाग्नौ प्रक्षिप्ताः, पिण्डवालुका वा अपसारणमार्गा इति सम्बध्यते। द्रव्यधात्वनुगमपरिगृहीततच्छायाः सूक्ष्मवालुकाः द्रवीभूतेन रूप्येण सुवर्णेन वा सम्पर्कात् पिण्डतां प्रतिपन्नाः पिण्डवालुकाः उपायीभावप्रकारमाह–**मूषाभेदादग्निष्ठा उद्ध्रियन्त** इति। पूर्वमेवाग्निप्रक्षिप्तपिण्डवालुकाप्रमाणं सारद्रव्यमपहृत्य मूषा भिन्नेत्यपदेशेन तत्सम्पृक्तास्ता एव पिण्डवालुकास्तत्स्वामिसमक्षमग्नेरुद्ध्रियन्त इत्यर्थः।

Tripuṭaka consists of two parts of silver and one part of copper, by this an equal portion of pure alluvial gold is replaced (and it is called) Tripuṭāpasārita; when by copper an equal part of gold is replaced it is Śulbāpasārita, when by Vellaka (alloy of iron and silver) an equal portion is replaced it is Vellakāpasārita; and when pure gold is replaced by a similar portion of gold half of which is mixed with copper it is Hemāpasārita (removal of gold).

The several things which are made use of by goldsmiths in stealing gold consist of—mūkamūṣā (a crucible with a base of metallic piece hidden in it), pūtikiṭṭa (metallic excrement), Karaṭakamukha (pincers), nālī (measuring vessel), samdaṁśa (a pair of tongs), jonganī (metallic pieces), suvarcikā (borax) and lavaṇa (salt). Sands wrought into a mass along with metals are put in the fire before gold is put into crucible in order to steal particles of gold.

पश्चाद्बन्धने आचितकपत्रपरीक्षायां वा रूप्यरूपेण परिवर्तनं विस्रावणम्, पिण्डवालुकानां लोहपिण्डवालुकाभिर्वा।

गाढश्चाभ्युद्धार्यश्च पेटकः संयूह्यावलेप्यसङ्घात्येषु क्रियते। सीसरूपं सुवर्णपत्रेणाव-लिप्तमभ्यन्तरमष्टकेन बद्धं गाढपेटकः। स एव पटलसम्पुटेष्वभ्युद्धार्यः। पत्रमाश्लिष्टं यमकपत्रं वावलेप्येषु क्रियते। शुल्बं तारं वा गर्भः पत्राणाम्। सङ्घात्येषु क्रियते शुल्बरूपं सुवर्णपत्रसंहतं प्रमृष्टं सुपार्श्वम्। तदेव यमकपत्रसंहतं प्रमृष्टम्। ताम्रताररूपं चोत्तरवर्णकः।

विस्रावणमाह—**पश्चादित्यादि**। पश्चाद्बन्धने पूर्वं निर्मितस्य उत्तरकालसन्धानप्रसङ्गे, आचितकपत्रपरीक्षायां वा प्रचुरघटितपत्रपरीक्षाप्रसक्तौ वा, रूप्यरूपेण परिवर्तनं रजतभाण्डप्रक्षेपेण सुवर्णमयस्य विनिमानं, विस्रावणम्। इत्येको विस्रावणप्रकारः। अपरमाह–पिण्डेत्यादि। पिण्डवालुकानां सुवर्णाकरसम्भूतानां, लोहपिण्डवालुकाभिः लोहाकरसम्भूताभिर्वालुकाभिः परिवर्तनं वा विस्रावणम्।

पेटकमाह—**गाढश्चेति**। पेटकः संश्लेषः, पिटधातोः संश्लेषणार्थत्वात्, स गाढश्च अभ्युद्धार्यश्चेति द्विविधः, संयूह्यावलेप्यसङ्घात्येषु संयूह्यादिषु त्रिषु पूर्वोक्तेषु कर्मसु विषये, क्रियते अनुष्ठीयते। सीसरूपं सीसपत्रं, सुवर्णपत्रेण, अवलिप्तम् आच्छादितम्, अभ्यन्तरम् आच्छादिताच्छादकयोरन्तरालम्, अष्टकेन बद्धं जतुसर्जरसादिना पटलसम्पुटेषु दृढसंश्लेषणार्थं बद्धं, यदि भवतीति शेषः। गाढपेटकः अर्थात् स एष बन्धो गाढपेटकाख्यः। **स एवेति**। स एव पेटकः, पटलसम्पुटेषु अभ्युद्धार्यः अष्टबन्धरहितत्वादभ्युद्धर्तुं शक्य इति सोऽभ्युद्धार्यपेटकः। स एष द्रव्यापद्रव्ययोः समप्रविभागिके संयूहने हरणप्रकारः। अथ सारार्धभागेषु लेप्येषु हरणप्रकारमाह—**पत्रमिति**। पत्रं सुवर्णपत्रम्, आश्लिष्टम् एकपार्श्वयोजितं, यमकपत्रं वा उभयपार्श्वयोजितं वा अवलेप्येषु, क्रियते। बहिःपत्रमुक्त्वा गर्भपत्रमाह–शुल्बं तारं वा, पत्राणां सुवर्णपत्राणां, गर्भः क्रियते। सङ्घात्यविषयं विधिमाह—**सङ्घात्येष्विति**। सङ्घात्येषु विषये, शुल्बरूपं ताम्रमाण्डं, सुवर्णपत्रसंहतम् एकपार्श्वे सुवर्णपत्रच्छादितं, प्रमृष्टं प्रकर्षेणोज्ज्वलितं, सुपार्श्वं शोभनैकपार्श्वं, क्रियते। तदेव शुल्बरूपं, यमकपत्रसंहतम् उभयपार्श्वयोः सुवर्णपत्रावच्छादितं, प्रमृष्टं, क्रियते। पूर्वस्य सुपार्श्वमिति संज्ञा समनन्तरस्य प्रमृष्टमिति संज्ञेत्येके। **ताम्रताररूपं च उत्तरवर्णक** इति। न केवलं सुवर्णपत्रं यथोक्तमवच्छादनार्थमुपयुज्यते, किन्तु ताम्रभाण्डरजतभाण्डे अपीत्यर्थः। ताभ्यां पुनरौचित्यात् कृष्णायसादि भाण्डमवच्छाद्यं भवतीत्यवगन्तव्यम्।

Visrāvaṇa—the act of dropping involves the stealing of gold by deception which is perpetrated by substituting silver or gold or when particles of a base metal are substituted for those of gold.

Folding (or gold covering of other metals) either firm or loose is practised in soldering, in preparing amalgams and in enclosing a base lower material with two pieces of a superior metal. When a piece of lead is firmly covered over with gold leaf using wax to file the gap in between (lead and gold) to make it solid it is called Gāḍhapeṭaka—firm folding or covering, and when it is loosely folded (without fixing with wax) it is Abhyuddhārya—loosely covered. In amalgams, a single or double layer (of a superior metal) is used to cover a piece (of an inferior metal). Copper or silver may also be put in between two leaves (of a superior material like gold). Thus a copper piece may be covered with gold leaf and the edges may be smoothened. Similarly any lesser material may be covered over

with double leaf of copper or silver and the surface as well as edges be smoothened.

तदुभयं तापनिकषाभ्यां निश्शब्दोल्लेखनाभ्यां वा विद्यात्। अभ्युद्धार्यं बदराम्ले लवणोदके वा सादयन्ति। इति पेटकः।

घनसुषिरे वा रूपे सुवर्णमृन्मालुकाहिङ्गुलुककल्को वा तप्तोऽवतिष्ठते। दृढवास्तुके वा रूपे वालुकामिश्रजतुगान्धारपङ्को वा तप्तोऽवतिष्ठते। तयोस्तापनमवध्वंसनं वा शुद्धिः। सपरिभाण्डे वा रूपे लवणमुल्कया कटुशर्करया तप्तमवतिष्ठते। तस्य क्वाथनं शुद्धिः। अभ्रपटलमष्टकेन द्विगुणवास्तुके वा रूपे बध्यते। तस्यापिहितकाचकस्योदके निमज्जत एकदेशः सीदति। पटलान्तरेषु वा सूच्या भिद्यते। मणयो रूप्यं सुवर्णं वा घनसुषिराणां पिङ्कः। तस्य तापनमवध्वंसनं वा शुद्धिः। इति पिङ्कः।

पेटकस्य परीक्षामाह–तदुभयमिति। तदुभयं गाढपेटकम् अभ्युद्धार्यपेटकं च, तापनिकषाभ्याम् अग्नितापननिकषघर्षणाभ्यां, निश्शब्दोल्लेखनाभ्यां वा निश्शब्दं शब्दहीनं छेदनम् उल्लेखनं तीक्ष्णमुखलेखनं ताभ्यां वा, विद्यात्। अभ्युद्धार्ये विशेषमाह–अभ्युद्धार्यं, बदराम्ले कर्कन्धूफलरसे, लवणोदके वा, सादयन्ति निवेशयन्ति। तथा करणे लोहितवर्णः सञ्जायत इति भाषाटीका। इति पेटकः व्याख्यात इति शेषः।

पञ्चविधं पिङ्कं तत्परीक्षणं चाह–घनेत्यादि। घनसुषिरे रूपे घने सुषिरवति च भाण्डे कटकाद्यलङ्कारे, सुवर्णमृन्मालुकाहिङ्गुलुककल्को वा सुवर्णमृत् सुवर्णमालुका च धातुविशेषौ हिङ्गुलुको जातिहिङ्गुलुकः एतेषां मिलितानां कल्कः, तप्तः तापयित्वा प्रक्षिप्तः, अवतिष्ठते अवस्थितो भवति। अतस्तद्योजनेन तावत् स्वर्णमपह्रियत इत्यर्थः। अन्यदपद्रव्यमाह–दृढवास्तुके रूपे वा दृढपीठबन्धे अलङ्कारे वा, वालुकामिश्रः पिण्डवालुकायुक्तः जतुगान्धारपङ्कः लाक्षासिन्दूरपङ्कः, तप्तोऽवतिष्ठते। तत्र शुद्धिमाह–तयोः घनसुषिर-दृढवास्तुकयोर्विषये, तापनं दाहः, अवध्वसनं वा ताडनं वा, शुद्धिः शोधनोपायः। सपरिभाण्डे रूपे पृषतमणिबन्धे, लवणम्, उल्कया ज्वालया, कटुशर्करया तप्तं मृदुपाषाणविशेषेण सह तप्तम्, अवतिष्ठते। तस्य, क्वाथनम् अर्थाद् बदराम्लोदके, शुद्धिः शुद्धिहेतुः। पिङ्कस्य प्रकारान्तरमाह–**अभ्रे**त्यादि। अभ्रपटलं काचमणिः, अष्टकेन द्विगुणवास्तुके लाक्षादिना द्विगुणावगाढबन्धे, रूपे, बध्यते सम्बध्यते अवतिष्ठत इत्यर्थः। तत्परीक्षामाह–**तस्ये**ति। तस्य प्रत्युप्तमणेरन्तरवच्छादितकाचस्य सुवर्णाभरणस्य, उदके निमज्जतः परीक्षार्थं बदराम्लोदके प्रक्षिप्तस्य, एकदेशः सीदति अभ्रपटलरहितोऽवयवो गुरुत्वादधो गच्छति। अर्थादेकदेशान्त-रमभ्रपटलयुक्तं लघुत्वादधो न गच्छति। अभ्रपटलातिरिक्तताम्रपटलादिविषये तु सूच्या भेदनममेव शुद्धिज्ञानोपाय इत्याह–**पटलान्तरेष्वि**ति। पुनः पिङ्कस्य घनसुषिराभरणविषये त्रीन् प्रकारानाह–**मणय** इति। घनसुषिराणां घनसुषिराभरणविषये, मणयः पिङ्कः काचमणयो जात्यमणिहरणोपायः, रूप्यं पिङ्कः रजतं सुवर्णहरणोपायः, सुवर्णं पिङ्कः अशुद्धं स्वर्णं शुद्धस्वर्णहरणोपायः। तत्र शोधनप्रकारमाह–**तस्ये**त्यादि। इति पिङ्कः व्याख्यात इति शेषः।

The two methods of folding could be understood by the process of heating or by testing on a touch-stone or by observing absence of sound when it is rubbed. The loosely folded items could be (detected by being) plunged into the juice of badarāmla (jujube fruit—Flacourtia Cataphracta)

or in salt water (by which the change of colour could be noticed). So much about folding (items).

In a solid and hollow piece, small particles of gold-like mud or a bit of vermillion are heated to such an extent that it makes materials firmly adhere together to the one inside. In a solid (or compact) piece the wax-like mud of Gāndhāra mixed with the particles of gold-like sand is so heated as to adhere to the piece. These two kinds of impurities are got rid of by hammering the pieces when they are red hot. In an ornament or coin (covered with gold leaves) salt mixed with a kind of soft sand is so heated to inflame as to make it firmly adhere to (the ornament or coin). This soft sand and salt can be got rid of by boiling. In some pieces mica may be firmly fixed inside by wax and covered with a double leaf (of gold or silver). When such a piece with mica or glass inside is dipped in water one side dips more than the other in water or when pierced by a nail, the nail goes smoothly into the layers of mica located in the interior. In the case of solid and hollow pieces spurious gems, counterfeit gold or silver are substituted as deception. They are to be detected by hammering after making them red-hot. So much for confounding (the items).

तस्माद् वज्रमणिमुक्ताप्रवालरूपाणां जातिरूपवर्णप्रमाणपुद्गल- लक्षणान्युपलभेत।

तस्मादिति। उच्चावचहरणोपायसम्भवात्, वज्रमणिमुक्ताप्रवालरूपाणां वज्रादिरूपाणां चतुर्णां, जातिरूपवर्णप्रमाणपुद्गललक्षणानि जातिरुत्पत्तिः रूपमाकारः वर्णो रागः प्रमाणं माषकादिपरिमाणं पुद्गलमाभरणं लक्षणं लक्ष्म, एतानि, उपलभेत विद्यात्।

Hence the chief of gold shall have a thorough knowledge of species, characteristic, colour, weight and formation of diamonds, precious stones, pearls, corals and coins (of silver).

कृतभाण्डपरीक्षायां पुराणभाण्डप्रतिसंस्कारे वा चत्वारो हरणोपायाः– परिकुट्टनमवच्छेदनमुल्लेखनं परिमर्दनं वा। पेटकापदेशेन पृषतं गुणं पिटकां वा यत् परिशातयन्ति तत् परिकुट्टनम्। यद् द्विगुणवास्तुकानां वा रूपे सीसरूपं प्रक्षिप्य अभ्यन्तरमवच्छिन्दन्ति तदवच्छेदनम्। यद् घनानां तीक्ष्णेनोल्लिखन्ति तदुल्लेखनम्। हरितालमनःशिलाहिङ्गुलकचुर्णानामन्यतमेन कुरुविन्दचूर्णेन वा वस्त्रं संयूह्य यत् परिमृद्नन्ति तत् परिमर्दनम्। तेन सौवर्णराजतानि भाण्डानि क्षीयन्ते। न चैषां किञ्चिदवरुग्णं भवति।

भग्नखण्डघृष्टानां संयूह्यानां सदृशेनानुमानं कुर्यात्। अवलेप्यानां यावदुत्पाटितं तावदुत्पाट्यानुमानं कुर्यात्। विरूपाणां वा। तापनमुदकपेषणं च बहुशः कुर्यात्।

इदानीं कृतभाण्डपरीक्षणविषयं परिकुट्टनादिकं हरणोपायचतुष्टयमाह–कृतेत्यादि। पुराणभाण्डप्रतिसंस्कारे वा जीर्णभाण्डनवीकरणे वा। परिकुट्टनादिकं लक्षयति–पेटकेत्यादि। पेटकापदेशेन

पूर्वोक्तपेटकपरीक्षणव्याजेन, पृषतं क्षुद्रगुटिकां, गुणं कटकाद्यंशमल्पं, पिटकां वा बृहदंशं वा, यत् परिशातयन्ति पातयन्ति, तत् परिकुट्टनं तदाख्यम्। द्विगुणवास्तुकानां बहुपत्रपुटघटितानां, रूपे भाण्डे, सीसरूपं सीसपत्र सुवर्णानुलिप्तं, प्रक्षिप्य अभ्यन्तरं सुवर्णपत्रं, यदवच्छिन्दन्ति अवच्छिद्यापहरन्ति, तदवच्छेदनं नाम। घनानां घननिर्मितानां, रूप इति वर्तते, तीक्ष्णेन निशितशस्त्रेण, यदुल्लिखन्ति, तद् उल्लेखनम्। हरितालमनश्शिला-हिङ्गुलकानाम् अन्यतमचूर्णेन वा, कुरुविन्दाख्यपाषाणविशेषचूर्णेन च, वस्त्रं, संयूह्य मिश्रयित्वा, यत् परिमृद्नन्ति यत् परिघर्षयन्ति, तत् परिमर्दनं तदाख्यम्। तेन परिमर्दनेन, सौवर्णराजतानि भाण्डानि, क्षीयन्ते प्रमाणहानिं प्राप्नुवन्ति। एषां भाण्डानाम्, अवरुग्णं भङ्गः, किञ्चिद् न च भवति मनागपि न भवति च। सोऽयं विनैव भाण्डभङ्गमपहरणोपायः।

परिकुट्टनादिकृतं वर्णकादिपातनम् एतावति कथं निर्णेतव्यं तत्राह—भग्नेत्यादि। संयूह्यानां दृढपत्रघटित-भाण्डानां भग्नखण्डघृष्टानां भग्नं परिकुट्टनशातितं खण्डमवच्छेदनहृतं घृष्टमुल्लेखनपरिमर्दनकर्मापहृतम् एषां भग्नादीनां, सदृशेनानुमानं कुर्यात् सजातीयावयवप्रमाणेन लिङ्गेनानुमितिं कुर्यात् भग्नस्यावयवस्या-भग्नावयवप्रमाणेन खण्डस्याखण्डावयवप्रमाणेन घृष्टस्याघृष्टावयवप्रमाणेन चेयत्तां निश्चिनुयादित्यर्थः। **अवलेप्यानामिति**। अवलेप्यानां तनुपत्रघटितभाण्डानां, यावदुत्पाटितं तावदुत्पाट्यानुमानं कुर्यात् यावानंशोऽवच्छिद्य गृहीतस्तावन्तमपरमंशमवच्छिद्य तत्प्रतिमानेनापहृतांशमानं निश्चिनुयात्। **विरूपाणामिति**। विरूपाणां वा प्रचुरापद्रव्यमिश्रणेन हीनवर्णकतामापादितानां सुवर्णभाण्डानां च, सदृशेनानुमानं कुर्यादित्यनुवर्तते, प्रतिमिततदीयैकांशस्य शुद्धीकरणेन वर्णहानीयत्तां विज्ञाय तत्सादृश्येन शेषांशानां वर्णहानीयत्तामभ्यूहेदित्यर्थः। शोधनप्रकारमाह—**तापनमिति**। तापनं पत्रीकृत्याग्नौ दहनम्, उदकपेषणं च तप्तमुदके प्रक्षिप्य चुक्रिकायोजनेन कुट्टनं च, बहुशो बहुकृत्वः, कुर्याद् यावद् वैवर्ण्यमपैति तावदित्यार्थम्। इयत्तानिर्णयफलं तु 'वर्णहीने माषकावरे पूर्वः साहसदण्ड' इत्यादि पूर्वोक्तदण्डविधानम्।

In the matter of examining new coins (or pieces) or repairing old ones there could be four ways of deception (to commit theft) such as hammering, cutting, scratching and rubbing. In hammering the article in question is hammered under the guise of detecting deception in gold-covering or silver covering (of ornaments).

In cutting, a lead piece (covered over by gold or silver leaf) is substituted for a real one and its interior is cut off. In scratching the compact pieces (of gold etc.) are scratched by an iron. In rubbing the golden article is rubbed by a cloth containing powders of yellow orpiment, red-arsenic, vermillion or powder of Kuruvinda (a kind of barley). By these acts pieces of gold and silver ornaments get reduced in weight (by loss of particles). They will not appear as damaged in the least.

The damage to such articles caused by these acts can be noticed by comparing them with similar articles (not subjected to such acts). In amalgamated pieces which are cut off, the loss can be detected by cutting an equal portion of a similar portion. In articles with changed appearance heating and drenching in water several times in required (to detect the theft).

अवक्षेपः प्रतिमानमग्निर्गण्डिका भण्डिकाधिकरणी पिञ्छः सूत्रं चेल्लम्, बोल्लनं शिर उत्सङ्गो मक्षिका स्वकायेक्षा दृतिरुदकशरावमग्निष्ठमिति काचं विद्यात्।

राजतानां विस्त्रं मलग्राहि परुषं प्रस्तीतं विवर्णं वा दुष्टमिति विद्यात्।

पूर्वोक्ताकरोद्भवापसारणमार्गातिरेकिणोऽवक्षेपादीन् सप्तदश हरणोपायानाह–**अवक्षेप** इति। अवक्षेपः हस्तलाघवेन सारमपहृत्यापद्रव्यप्रक्षेपः, प्रतिमानं तद्विनिमयादि, अग्निः, अग्निमध्ये हरणप्रयोगः, गण्डिका काष्ठाधिकरणी रत्नप्रतिवापाधारकाष्ठं, पिञ्छः मयूरबर्हः, सूत्रं सुवर्णतुलातन्तुः, चेल्लं वस्त्रं, बोल्लनं कथाव्याजेन द्रष्टृचित्तव्याक्षेपकरणं, चेल्लबोल्लनमिति समस्तपाठे वस्त्रपटलिका, शिरः शीर्षकण्डूयनादि, उत्सङ्गः अङ्कः उपलक्षणाद् गुह्यप्रदेशश्च, मक्षिका मक्षिकानिवारणव्याजेन निर्यासद्रवलिप्तस्वाङ्गसंश्लेषणं, स्वकायेक्षा स्वेदादिदर्शनव्याजः, दृतिः ध्मानभस्त्रा, उदकशरावं जलपात्रम्, अग्निष्ठम् अग्निप्रक्षिप्तमपद्रव्यम्, इति एवम्प्रकार, काचम्, अपहरणोपायं, विद्यात्।

राजतानां पञ्च दुष्टिचिह्नान्याह–**राजतानामित्यादि** राजतोक्त्या पूर्वोक्तस्य स्वर्णविषयत्वं सूचितम्। विस्त्रं सीसादिसंसर्गदुर्गन्धि। मलग्राहि मलिनम्। परुषं खरस्पर्शम्। प्रस्तीतं विवर्णम् अपद्रव्य-मिश्रणोपहतनिजप्रभम्। एतच्छोधनप्रकारस्तु 'अस्थितुत्थे चतुः समसीसे चतुः' इत्यादिना पूर्वाध्याये दर्शित एव।

The authorities shall detect deception when the artisan (shows undue attention to 17 items like) avakṣepa (replacing spurious substance by the sleight of hand), pratimāna (exchange of materials), agni (stealing while throwing in fire), gaṇḍikā (the piece of wood in which throwing in fire), gaṇḍikā (the piece of wood in which gold is placed to be shown in the fire), bhaṇḍika (vessel to put melted gold), adhikaraṇi (metallic vessel), piñcha (peacock's feather), sūtra (golden thread tied to the balance), Cella (cloth), bollanam (diverting the attention by talk), śira (scratching the head), utsanga (folded thighs or lap), makṣikā (smearing the golden particles on the body in the guise of driving the mosquittos), svakāyekṣa (looking at one's body as if to remove the sweat), dṛti (bellows to fan the fire), udakaśarāva (waterpot) and agniṣṭha (throwing in fire as if it is a waste)

In the case of silver (or even gold) ornaments detection of deception is possible due to (five) reasons like visra (bad smell like rotten meat due to the mixture of base materials), malagrāhi (adulteration due to alloy of base lead), paruṣa (roughness), prastīta (hardness), and vivarṇa (change of colour indicative of spuriousness).

एवं नवं च जीर्णं च विरूपं चापि भाण्डकम्।
परीक्षेतात्ययं चैषां यथोद्दिष्टं प्रकल्पयेत्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे चतुर्दशोऽध्यायः विशिखायां सौवर्णिकप्रचारः, आदितः पञ्चत्रिंशः।।

अध्यायान्ते श्लोकमाह—एवमित्यादि। विरूपम् अपद्रव्यमिश्रण दूषितम्। अत्ययं दण्डम्। यथोद्दिष्टं 'वर्णहीने माषकावरे' इत्यादिना विहितप्रकारम्। प्रकल्पयेत् प्रकर्षेण कल्पयेत् अवश्यं प्रयुञ्जीतेत्यर्थः। उदाहृतौ चात्र भट्टस्वामिना बार्हस्पत्यौ श्लोकौ–

अचोराश्चोरधर्माणो वणिजः कारवस्तथा।
तस्मात् तेषु न विश्वासः कर्तव्यो भूतिमिच्छता।।
प्रकाशतस्करानेतान् परद्रव्यापहारिणः।
शिल्पिनो वणिजश्चैव राजा दण्डेन वारयेत्।। इति।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्दशोऽध्यायः विशिखायां सौवर्णिकप्रचारः, आदितः पञ्चत्रिंशः।।

Thus one should examine new, old or damaged items of covered ornaments and (on detection of spuriousness the artisans concerned) proper punishment by way of fine may be imposed.

Thus the thirty fifth chapter of the Arthaśāstra of Kauṭalya called 'Goldsmith in the high road' comes to an end. Here ends the fourteenth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 36

33. प्रक० कोष्ठागाराध्यक्षः।

Section 33 : Chief of Store-House

कोष्ठागाराध्यक्षः सीताराष्ट्रक्रयिमपरिवर्तकप्रामित्यकापमित्यकसिंहनिकान्यजातव्ययप्रत्यायोपस्थानान्युपलभेत।

सीताध्यक्षोपनीतः सस्यवर्णकः सीता।

पिण्डकरः, षड्भागः, सेनाभक्तं, बलिः, करः, उत्सङ्गः, पार्श्वं, पारिहीणिकम्, औपायनिकं, कौष्ठेयकं च राष्ट्रम्।

कोष्ठागाराध्यक्ष इति सूत्रम्। कोष्ठमुदरं तेन तदर्थानि धान्यस्नेहक्षारलवणादीन्यभ्यवहार्यद्रव्याणि लक्ष्यन्ते, तेषामगारं संग्रहसंगोपनस्थानं तस्य अध्यक्षः कोष्ठागाराध्यक्षः अर्थात् तद्व्यापारः स इहाभिधीयत इति सूत्रार्थः।

प्रक्रान्तायाः कोशप्रकृतेराकरकर्मान्तप्रवर्तनादिनोत्पादनरक्षणादिकमुक्तम्। शरीरस्थितिहेतुतया प्रधानस्य धान्यादेरुत्पादनरक्षणव्ययप्रकारादिकं तु नोक्तम्। तदिहोपदिश्यत इति सम्बन्धः। यद्वा 'सन्निधाता कोशगृहं कोष्ठागारं पण्यगृहं कुप्यगृहमायुधागारं बन्धनागारं च कारयेद्' इति कोष्ठागारकरणं पूर्वमुक्तम्। तदध्यक्षव्यापारस्त्वनभिहित इदानीमभिधीयत इति सङ्गतिः।

तमाह—**कोष्ठागारेत्यादि**। कोष्ठागराध्यक्षः, सीतादीनि सीता राष्ट्रं क्रयिमं परिवर्तकः प्रामित्यकम् आपमित्यकं सिंहनिका अन्यजातः व्ययप्रत्यायः उपस्थानमित्येतान् दश पदार्थान् उपलभेत चिन्तयेत्।

तान् यथोद्देशं विवृणोति—**सीताध्यक्षोपनीत** इत्यादि। सीताध्यक्षेण धान्यकरग्रहणकर्माधिकृतेन उपनीतः कोष्ठागारे प्रवेशितः, सस्यवर्णकः धान्यजातिः, सीता तदाख्या। कोष्ठागाराध्यक्षस्तां शुद्धामन्यूनां च गृह्णीयात्।

राष्ट्रमाह—**पिण्डेत्यादि**। पिण्डकरः तत्तद्ग्रामदेयतया क्लृप्तः करसमुदायः, षड्भागः षडिति चतुर्थादिभागस्याप्युपलक्षणं तेन षड्भागचतुर्भागादिरूपस्तत्तद्देशसिद्धो राजभाग इत्यर्थः, सेनाभक्तं सेनासन्नाहनकाले यथादेशप्रसिद्धं स्नेहतण्डुललवणादि राजदेयमिति स्वामी, सैनिकानां तण्डुलहिरण्यादिदानसमये राजार्थे तैर्दीयमानः स्नेहतण्डुलाद्यंश इति भाषाटीका। बलिः षड्भागातिरिक्तः यथादेशप्रसिद्धो दशविंशतिबन्धादिकः यं भिक्षाभक्तं वदन्ति, करः फलवृक्षादिसम्बद्धं राजदेयम्, उत्सङ्गो राज्ञे पुत्रजन्माद्युत्सवावसरेषु पौरजानपदैर्दत्तं शालाकमध्वादि, पार्श्वम् उचितकरादधिकग्रहणं योगवृत्ताधिकरणस्य द्वितीये कोशाभिसंहरणाध्याये वक्ष्यमाणं, पारिहीणिकं चतुष्पदविनाशितसस्यदण्डलभ्यम्, औपायनिकम्

उपायनार्थं कौशेयादिकं, कौष्ठेयकं च राजस्थापिततटाकारामाद्युत्पन्नं च, इत्येवं दशप्रकारं राष्ट्रम्। पूर्वं समाहर्तृसमुदयप्रस्थापनाध्याये राष्ट्रान्तर्गतो बलिरुक्तः पार्श्वपारिहीणिकानि चान्यजातान्तर्गतान्युक्तानि। तेषामिह पुनः पाठः समाहर्त्रुत्पादितानामपि कोष्ठागारप्रवेश्यतां ज्ञापयितुम्।

The chief of Koṣṭhāgāra (the room where things are stored is called Koṣṭha—meaning store) shall supervise the accounts of agricultural produces (sītā), taxes coming under rāṣṭra (income from towns and villages), commerce (krayima), barter (parivartaka), requirements for grains (prāmityaka), āpamityaka (grain borrowed on loan to be repaid later), manufacture of rice, oils etc., (simhanika), accidental revenue (anyajāta); statements to check expenditure (vayajāta); statements to check expenditure (vyapratyāya), and recovery of past arrears (upasthānam) (altogether ten items).

Sitā means all kinds of agricultural products brought in by the superintendent of agriculture (to be kept in the store house).

By rāṣṭra is meant (the ten) items like piṇḍakara (fixed taxes); ṣaḍbhāga (one-sixth due to the royalty); senābhakta (provision for the upkeep of the army) bali (taxes levied in addition to one-sixth for religious purposes); karaḥ (subsidies paid by vassals and others to the king), utsaṅga (special tax on occasions like the birth of a prince), pārśva (income for marginal expenses), pārihīṇika (compensation for damages to crops etc; in the form of grains), aupāyanika (presentation made to the king) and kauṣṭheyaka (taxes or income from state gardens, lakes and other items).

धान्यमूल्यं कोशनिर्हारः प्रयोगप्रत्यादानं च क्रयिमम्।

सस्यवर्णानामर्घान्तरेण विनिमयः परिवर्तकः।

सस्ययाचनमन्यतः प्रामित्यकम्।

तदेव प्रतिदानार्थमापमित्यकम्।

कुट्टकरोचकसक्तुशुक्तपिष्टकर्म तज्जीवनेषु तैलपीडनमौरभ्रचा- क्रिकेष्विक्षूणां च क्षारकर्म सिंहनिका।

धान्यमूल्यमिति। धान्यमूल्यं धान्यविक्रयहिरण्यं, कोशनिर्हारः हिरण्येन धान्यक्रयः, प्रयोगप्रत्यादानं वृद्धिप्रयुक्तधान्यप्रवेशनम्, इत्येवं त्रिप्रकारं क्रयिमम्।

परिवर्तकमहा—सस्येत्यादि। सस्यवर्णानां सस्यजातीयानाम्, अर्घान्तरेण विनिमयः एकेन शालिप्रस्थेन चतुःप्रस्थकोद्रवग्रहणमित्येवञ्जातीयो विनिमयः, परिवर्तकः तदाख्यः।

प्रामित्यकमाह—सस्येत्यादि। अन्यतः मित्रादेः, सस्ययाचनम् अप्रतिदानार्थं, प्रामित्यकं तत्संज्ञम्।

आपमित्यकमाह—तदेवेति। अन्यतः सस्ययाचनमेव, प्रतिदानार्थं सवृद्धिकप्रत्यर्पणार्थम्, आपमित्यकं तत्संज्ञम्।

कुट्टककर्मादिपञ्चकजीविभ्यस्तैलपीडनजीविभ्य इक्षुक्षारकर्मजीविभ्यश्च यदुपादीयते तत् सिंहनिकाख्यमित्याह–कुट्टकेत्यादि। कुट्टकादीनां पञ्चानां द्वन्द्वः। कर्मशब्दश्च तेषु प्रत्येकमभिसम्बध्यते। कुट्टककर्म अवघातः, रोचककर्म मुद्गमाषादिविदलनं, सक्तुकर्म घरट्टादिना यवादिचूर्णीकरणं, शुक्तकर्म इक्षुरसादिसन्धानं, पिष्टकर्म गोधूमपेषणादि। कुट्टकादिकर्म, तज्जीवनेषु कुट्टकादिकर्मोपजीविषु विषये तत्कर्मोपजीवनार्थं तेभ्यः शुल्कं यद् गृह्यते तदित्यर्थः, तैलपीडनं तिलेभ्यो यन्त्रनिष्पीडितेभ्यस्तैलोत्पादनकर्म, औरभ्रचाक्रिकेषु औरभ्रेषु यज्ञियोरभ्रसंज्ञपनकर्मकरेषु तैलिषु विषये तदुपजीवनेष्विन्त्यनुवर्तनात् तैलपीडनकर्मोपजीवनार्थं तेभ्यो यद् गृह्यते तदित्यर्थः, इक्षूणां क्षारकर्म च फाणितगुडखण्डादिकर्म च तत्कर्मोपजीविभ्यो युदपादीयते तच्चेत्यर्थः। संहनिकेति तु व्याख्यापाठः सुष्ठु।

Krayima (commerce) is of (three kinds) as the value of the grains, in gold coins, purchase of grains giving gold coins, and collection of intersest in the form of grains.

Puchase of another type of grains by a different grain is called parivartaka—exchange.

Borrowing of grains on on request is called pramityaka.

Repayment of the borrowed grains in the same form at a later date is called āpamityaka.

Simhanika stands for the activity of five kinds as pounding, removing the chaff from the grains (or breaking the grains into two), grinding into powder, pressing the juice out of things, and making food itmes out of grains after pounding them. Also pressing the oil out of grains by employing shepherds and oil-makers and manufacture of sugar are meant by the term.

नष्टप्रस्मृतादिरन्यजातः।

विक्षेपव्याधितान्तरारम्भशेषं च व्ययप्रत्यायः।

तुलामानान्तरं हस्तपूरणमुत्करो व्याजी पर्युषितं प्रार्जितं चोपस्थानमिति।

धान्यस्नेहक्षारलवणानाम्।

धान्यकल्पं सीताध्यक्षे वक्ष्यामः। सर्पिस्तैलवसामज्जानः स्नेहाः।

अन्यजातमाह–नष्टेत्यादि। नष्टप्रस्मृतादिः नष्टमपगतं प्रस्मृतं विस्मृतं चेति द्वयम्। आदिपदादायुक्तदण्डादिर्ग्राह्यः।

व्ययप्रत्यायमाह–विक्षेपेत्यादि। विक्षेपशेषं किञ्चित्कार्यसाधनाय प्रेषितस्य सैन्यस्यार्थे व्ययिताद् धनादवशिष्टं, व्याधितशेषं भेषजशालाव्ययितावशिष्टम्, अन्तरारम्भशेषं दुर्गप्रासादादिपरिकर्मार्थे निर्गतस्य धनस्य लघुपरिव्ययकरणाच्छेषम्।

उपस्थानमाह–तुलेत्यादि। तुलामानान्तरं तुलामानभेदः तुलामानाभ्यमधिकाभ्यां गृहीत्वा हीनाभ्यां दानादुत्पन्नं, हस्तपूरणं कराभ्यां प्रस्थादौ धान्यस्य यत्नप्रवेशनं प्रस्थाग्रे कराभ्यां धान्यधारणं वा, हस्तप्रपूरणमिति

पाठे हस्तश्लथीकाराङ्गुलिविरलीकरणादिना व्रीह्यादिमेयधान्यानां पूगीफलादिगण्यपण्यानां च प्रच्यावनम्, उत्करः धान्यादिराशिः शालाकादिर्वा, गणनमानप्रदेशयोर्गण्यमेयवस्तुविक्षेपणं वा, व्याजी षोडशभागादि पुनर्मानन्यूनतापरिहारायाधिकतया गृह्यमाणं, पर्युषितं गतवत्सरशेषं, प्रार्जितं च पुष्पताम्बूलादिकं च स्वनैपुण्योत्पादितम्, उपस्थानं तदाख्यम्। इतिशब्द उद्दिष्टसीतादिपदार्थविवरणोपसंहारार्थः।

धान्येत्यादि। धान्यस्नेहक्षारलवणानामित्यधिकार आध्यायपरिसमाप्तेः।

तत्र धान्यकल्पः सीताध्याये वक्ष्यत इत्याह—धान्यकल्पमित्यादि। इयमनागतावेक्षणलक्षणा तन्त्रयुक्तिः। सर्पिरित्यादि। सर्पिस्तैलं वसा मज्जेत्येते चत्वारः स्नेहाः।

Accidental revenue is in the form of the recovery of what is lost or forgotten.

Checking of expenditure is accounting of the balance of expenditure, unspent balance on medical expenses and savings from an outlay of expenditure.

By upasthāna is meant the claiming of tulāmānāntara (using big balance for purchase and small balance for sale.); hastapūraṇa is the handful of grains taken after the correct measure to compensate any loss; utkara is collecting together of the spilled over grains or fruits; Vyāji means the taking one of one-sixteenth measure and four while counting eleven as a compensatory measure; paryuṣita is the claiming of the balance of due accrued from the previous year (in one's account), prārjita is the collection of extra benefit by the authority due to his ability of persuation.

As regards grains, oils, sugar and salt—all that concerns with grains shall be dealt with in the chapter on Sītādhyakṣa (Superintendent of Agriculture).

The term sneha (oils) stands for clarified butter, oil, serum of flesh and pith (or sup) of plants etc.

फाणितगुडमत्स्यण्डिकाखण्डशर्कराः क्षारवर्गः।

सैन्धवसामुद्रविडयवक्षारसौवर्चलोद्भेदजा लवणवर्गः।

क्षौद्रं मार्द्वीकं च मधु।

इक्षुरसगुलमधुफाणितजाम्बवपनसानामन्यतमो मेषशृङ्गीपिप्पलीक्वाथाभिषुतो मासिकः षाण्मासिकः सांवत्सरिको वा चिद्भिटोर्वारुकेक्षुकाण्डाम्रफलामलकावसुतः शुद्धो वा शुक्तवर्गः।

वृक्षाम्लकरमर्दाम्रविदलामलमातुलुङ्गकलबदरसौवीरकपरूषकादिः फलाम्लवर्गः।

दधिधान्याम्लादिर्द्रवाम्लवर्गः।

इक्षुविकारभेदाः फाणितादयः क्षारवर्ग इत्याह—फाणितेत्यादि। गुडखण्डशर्करयोर्मध्यमावस्था मत्स्यण्डिका।

सैन्धवादिषट्प्रकारं लवणवर्गमाह–सैन्धवेत्यादि। उद्भेदज ऊषरलवणमिति स्वामी। क्षौद्रमिति। क्षौद्रं क्षुद्राभिः सञ्चितम्। मार्द्वीकं मृद्वीकाना रसः। इति द्विविधं मधु।

शुक्तवर्गमाह–इक्षुरसेत्यादि। इक्षुरसो, गुलः, मधु, फाणितं च प्रसिद्धं जाम्बवपनसौ जम्बूफलरसः पनसफलरसश्च, एषां षण्णाम्, अन्यतमः, मेषशृङ्गीपिप्पलीक्वाथाभिपुतः मेषविषाणाख्याया मागध्याख्याया-श्चौषधेः कषायेण मिश्रः, मासिकः पाण्मासिकः सांवत्सरिको वा मासषण्मासादिकालपरिवासेन क्रमादधममध्यमोत्तमभेदं प्रतिपन्नः, चिद्भिटादिपञ्चकरसैर्व्यस्तैः समस्तैर्मिश्रितः, शुद्धो वा चिद्भिटाद्यमिश्रितो वा, शुक्तवर्गः आसनवर्गः। चिद्भिटं वल्लीफलविशेषः, तदेव कटुकमुर्वारुकम्।

फलाम्लवर्गमाह–वृक्षाम्लेत्यादि। वृक्षाम्लं तिन्तिडीकं, करमर्दः वशपर्यायः, आम्रामलके प्रसिद्धे, विदलं दाडिमं, मातुलुङ्गं दाडिमभेदः, कोलं क्षुद्रबदरं, बदरं स्थूलबदरं, सौवीरकं स्वादुबदरं, परूषकं मध्यदेशादिप्रसिद्धं मधुराम्लफलम्, आदिग्रहणं जम्बीराद्यर्थम्। यथोक्तमकारः फलाम्लवर्गः।

दधीत्यादि। दधि प्रसिद्धं, धान्याम्लं काञ्जिकम्। आदिपदात् तक्रादिग्रहणम्। इत्ययं द्रवाम्लवर्गः।

The term Kṣāra (juice or essence) means phanita (decoction), jaggery, granulated sugar and sugar-candy.

The term lavaṇa stands for saindhava—salt produced in the country of Sindhu; sāmudra—that produced from ocean; viḍa—a kind of artificial salt called Bit-noben; yavakṣāra-nitre; sauvarcala—the product of the country of Sauvarcala—sochal salt; and udbhedaja—produced from saline soil.

Madhu (honey or nectar) is the honey produced by the bees as well as juice extracted from the grapes.

Śuktavarga—the group of astringents consists of the mixture of any one of the (six) substances such as juice of sugar-cane; jaggery, honey, the juice of grapes, the essence of Jambu fruits (Euginia Jambolana) and of jack tee, with the essence of Meṣaśṛṅga (the medicinal plant Odina Pinnata or Gymnema sylvestre) and long pepper with or without the addition of the essence of cidbhiṭa (a kind of gourd), cucumber, sugar-cane, mango fruit and the fruit of myrobalan, the mixture being prepared so as to last for a month, or six month or a year.

Under the group of acid fruits may be included trees which produce such fruits such as Vṛkṣāmla (tamarind), karamarda (carissa carandas), viḍālāmlaka (myrobalan), mātuluṅga (citron), kola (small jujuba), badara (Flacourtia cataphracta), sauvīra (big jujuba) and parūṣaka (Grewia Asiatica).

Acids in the form of liquids are curds, acids prepared from grains and so on.

पिप्पलीमरिचशृङ्गिबेराजाजीकिराततिक्तगौरसर्षपकुस्तुम्बुरुचोरकदमनकमरुवकशिग्रुकाण्डादिः कटुकवर्गः।

शुष्कमत्स्यमांसकन्दमूलफलशाकादि च शाकवर्गः।

ततोऽर्धमापदर्थं जानपदानां स्थापयेत्। अर्धमुपयुञ्जीत। नवेन चानवं शोधयेत्।

क्षुण्णघृष्टपिष्टभृष्टानामार्द्रशुष्कसिद्धानां च धान्यानां वृद्धिक्षयप्रमाणानि प्रत्यक्षीकुर्वीत।

कोद्रववव्रीहीणामर्धं सारः, शालीनामष्टभागोनः, त्रिभागोनो वरकाणाम्। प्रियङ्गूणामर्धं सारो नवभागवृद्धिश्च। उदारकस्तुल्यः। यवा गोधूमाश्च क्षुण्णाः।

पिप्पलीत्यादि। पिप्पल्यादित्रिकं प्रसिद्धं, अजाजी जीरकः, किराततिक्तः भूनिम्बाख्य ओषधिविशेषः, गौरसर्षपः, गौरसर्षपः सिद्धार्थः, कुस्तुम्बुरु धान्याख्यं, चोरकः शतपुष्पानुकारी गुच्छ इति स्वामी, दमनकं कान्ताख्यं, मरुवकः पिण्डीतकः, शिग्रुकाण्डः शोभाञ्जनकाण्डः, आदिग्रहणं राजसर्षपाद्यर्थम्। इत्येवञ्जातीयः कटुकवर्गः।

शुष्केत्यादि। शुष्कशब्दो मत्स्यमांसयोः प्रत्येकं सम्बध्यते। शुष्कमत्स्यः शुष्कमीनः, शुष्कमांसं वल्लूरं, कन्दः सूरणादिः, मूलं शतमूलीप्रभृति, फलं वार्ताकादि, शाकं वास्तुकादि, आदिग्रहणान्माषविकारादिपरिग्रहः। इत्ययं शाकवर्गः।

तत इति। ततोऽर्धं स्नेहादिवर्गेभ्यः पूर्वोक्तेभ्योऽर्धं, जानपदानाम्, आपदर्थं दुर्भिक्षाद्यापत्समयोपयोगार्थं, स्थापयेत्। अर्धम्, उपयुञ्जीत राजमहानसाद्यर्थे विनियुञ्जीत। नवेन चानवं शोधयेत् नवं प्रक्षिप्य पुराणं कालाक्षमं निचितमुपयुञ्जीत।

धान्यानां क्षोदघर्षणाद्यवस्थासु सप्तसु वृद्धिक्षयाववश्यम्भाविनौ तत्तत्कर्मकरेभ्योऽनुमन्तमव्यौ। अतस्तयोरियत्तानिश्चयं सकृत्प्रत्यक्षीकरणेन कोष्ठागाराध्यक्षोऽधिगच्छेदित्याह–क्षुण्णेत्यादि। क्षुण्णं सकृदवहतं, घृष्टं फलीकृतं, पिष्टं श्लक्ष्णचूर्णितं, भृष्टं भ्राष्ट्रपक्वम्, आर्द्रं तिमितं, शुष्कं कृतशोषणं, सिद्धं राद्धम्। सोऽयं धान्यानां सारमात्राया अल्पत्वानल्पत्वतारतम्ये क्षयवृद्धीयत्तापरिज्ञानार्थो विशेषविधिरुक्तः।

सामान्यतस्तु तदियत्ताविषयं विधिमुपदेष्टुमाह–कोद्रवेत्यादि। कोद्रवव्रीहीणामर्धं सारः व्रीहीणां च तत्प्रस्थद्वयस्यैकस्तण्डुलप्रस्थः सारः फलति, शेषस्तु क्षय इत्यर्थः। शालीना कलमाख्यव्रीहिभेदानाम्, अष्टभागोनः प्रकृत्यष्टमांशन्यूनः, अर्धं सार इति वर्तते। तेन शालीनां प्रस्थाष्टकस्य प्रस्थत्रयं सारो भवति। वरकाणां धान्यभेदानां, त्रिभागोनः प्रस्थत्रये प्रस्थद्वयं सारो भवति। प्रियङ्गूणां कङ्गूनाम्, अर्धं सारः नवभागवृद्धिश्च अष्टसु प्रस्थेषु प्रस्थपञ्चकं तण्डुलानां भवति। उदारकः तृणकोलकः, तुल्यः प्रियङ्गुतुल्यसारः अनवहतावस्थाप्रमाणतुल्यसारो वा भवति। तत्राद्यः शुष्कावघाते, सजलावघाते पर इति विवेकः। यवाः, गोधूमाश्च, क्षुण्णाः सजलावहताः, तुल्याः अनवहतावस्थाप्रमाणतुल्यसाराः।

Kaṭukavarga—the group of pungent substances are pippalī (long pepper), marica (black pepper), Śringibera (ginger), ajāji (= jīraka—cumin seed), kirātatikta (Agathotes chirayta), gaurasarṣapa (white mustard), kustumbura (a particular grain (the seed of coriander), coraka (a kind of turmeric), damanaka (Artemisia Indica), maruvaka (Vagueria spinosa), śigru (Hyperanthea Moringa) and the like.

Under the group of Śākavarga (edibles) are included dried fish, dried flesh, bulbuous roots, fruits and vegetables.

Of the items that are kept in the store half shall be kept in reserve to ward off the calamities of people and only the other half shall be put to use. Old items shall be periodically replaced by new ones.

(The authority concerned shall) supervise the increase or diminution in grains when they are pounded or frayed or reduced to flour or fried or dried after soaking in water.

In the case of kodrava (a kind of grain—Paspalum scrobiculatum) and vrīhis (grains in general) the essential part is one half; that of śāli (a particular grain of rice) it is less by one-eighth part, and in Varāka (Phaseolus Trilobus) is half less by one-third part. In the case of priyangu (panic seed or millete) it is one-half with an increase of one-ninth. In the matter of Udāraka (dried pepper) it is half. So also is the case of pounded barley and wheat.

तिला यवा मुद्गमाषाश्च घृष्टाः। पञ्चभागवृद्धिर्गोधूमः सक्तवश्च। पादोनो कलायचमसी। मुद्गमाषाणामर्धपादोना। शैम्बानामर्धं सारः। त्रिभागोनो मसूराणाम्।

पिष्टमाणं कुल्माषश्चाध्यर्धगुणः। द्विगुणो यावकः। पुलाकः पिष्टं च सिद्धम्।

कोद्रववरकोदारकप्रियङ्गूणां त्रिगुणमन्नं चतुर्गुणं व्रीहीणाम् पञ्चगुणं शालीनाम्। तिमितमपरान्नं द्विगुणमर्धाधिकं विरूढानाम्।

क्षुण्णानुक्त्वा घृष्टानाह–तिला इत्यादि। घृष्टाः दलिताः, तिलाः, यवाः, मुद्गमाषाश्च, तुल्या इति वर्तते, अघृष्टावस्थातुल्यप्रमाणाः। गोधूमः, पञ्चभागवृद्धिः पञ्चभागेन वर्धते। सक्तवश्च भृष्टयवजाः, पञ्चभागवृद्धयः। कलायचमसी कलायश्चणभेदः तस्य चमसी श्लक्ष्णचूर्णं, पादोना कलायप्रस्थचतुष्टयस्य तच्चूर्णं प्रस्थत्रयप्रमाणं भवति। मुद्गमाषाणाम् मुद्गानां माषाणां च चमसी, अर्धपादोनाष्टभागेन ऊना भवति। शैम्बानां कुलत्थादिकोशीधान्यानाम्, अर्धं, सारः वितुषांशो भवति। मसूराणां चणविशेशाणां, त्रिभागोनः सारः प्रस्थत्रयदलने प्रस्थद्वयं सारो भवति।

पिष्टमाह–**पिष्टमिति**। आमं पिष्टम् अपक्वं गोधूमादि, कुल्माषश्च मुद्गमाषादिश्च, अध्यर्धगुणः कुडुबचतुष्टये कुडुवषट्कं भवति। यावकः वितुषीकृतो यवः, द्विगुणः चूर्णीकृतो द्वैगुण्यं प्राप्नोति। पुलाकः अर्धसिद्धस्तण्डुलः, पिष्टं च गोधूमादितण्डुलचूर्णं च, सिद्धं राद्धं सत्, द्विगुणं भवति।

सिद्धमाह–**कोद्रववरकेत्यादि**। कोद्रवादिचतुष्टयान्नं तत्तत्तण्डुलात् त्रिगुणं, व्रीह्यन्नं चतुर्गुणं, शालयन्नं पञ्चगुणं च वर्धते इत्यर्थः। अष्टगुणं शालीनामिति भाषाटीकायां पाठो भाति। **तिमितमिति**। तिमितं लवनाद्यवसरे केदारादावार्द्रीकृतव्रीह्याद्यन्नम्, अपरान्नम् अपरिणतव्रीह्याद्यन्नं च, द्विगुणं भवति। विरूढानाम् अङ्कुरितानां व्रीह्यादीनाम्, अर्थादन्नम्, अर्धाधिकम् अर्धाधिकद्विगुणं भवति। अपरा व्याख्या–तिमितम् आर्द्रीकृतम्, अपरान्नं फलाढकीचणकादि, द्विगुणं भवति। चणकादीनामेव विरूढानाम् अङ्कुरितानाम्, अर्धाधिकम् अर्धमधिकमार्द्रीकृताद् भवति इति।

(Items like) sesamum, barley, mudga (Phaseolus mungo) and māṣa (beans—Phaseolus Radiatus) when crushed is half less (or even equal in measure to the uncrushed state). In the case of wheat powder and barley power there will be an increase of five-fold. There will be a decrease of one-fourth in the case of pounded kalāya (a sort of pea or pulse), mudga and māṣa will be reduced by one-fourth when crushed. In the case of śaimba (a pulse) half of it will be remaining (when crushed). In the case of masūra (Eruvum Hirsutum) it is less by one-third.

Raw flour and kulmāṣa (boiled rice) will show an increase of half the original quantity when they are pounded. yāvaka (barley) will increase double fold. Pulāka (a species of grains) will also show a double-fold increase when pounded.

Kodrava (Paspalum Scrobiculatum), varaka (Phaseolus Trilobus), udāraka (Panicum) and priyaṅgu (millet) will show an increase of three times of the original quantity when cooked; vrīhi (rice) will increase four times white śāli (a variety of rice) will be five fold when cooked. Moistened grains will increase twice the original quantity, and two and a half time when soaked to sprouting condition.

पञ्चभागवृद्धिर्भृष्टानाम्। कलायो द्विगुणः, लाजा भरुजाश्च।

षट्कं तैलमतसीनाम्। निम्बकुशाम्रकपित्थादीनां पञ्चभागः। चतुर्भागिकास्तिल-कुसुम्भमधूकेङ्गुदीस्नेहाः।

कार्पासक्षौमाणां पञ्चपले पलसूत्रम्।

पञ्चद्रोणे शालीनां द्वादशाढकं तण्डुलानां कलभभोजनम्, एकादशकं व्यालानां, दशकमौपवाह्यानां, नवकं सान्नाह्यानाम्, अष्टकं पत्तीनां, सप्तकं मुख्यानां, षट्कं देवीकुमाराणाम्, पञ्चकं राज्ञाम्। अखण्डपरिशुद्धानां वा तण्डुलानां प्रस्थः।

भृष्टमाह—**पञ्चभागे**त्यादि। भृष्टानां कृतभर्जनानां तेषामेवावरान्नानां, पञ्चभागवृद्धिः प्रस्थपञ्चकं भृष्टं प्रस्थषट्कं भवति। कलायश्चणभेदो भृष्टः द्विगुणः। लाजाः व्रीह्यादयो, भरुजा यवाश्च, भृष्टाः द्विगुणाः।

तैलमाह—**षट्कं तैलमतसीना**मिति। षट्सु अतसीबीजप्रस्थेषु एकस्तैलप्रस्थो भवति। निम्बकुशाम्रकपित्थादीनां पञ्चभागः निम्बबीजादीनां प्रस्थपञ्चके एकप्रस्थः स्नेहो भवति। आदिग्रहणमेरण्डादिपरिग्रहार्थम्। तिलकुसुम्भमधूकेङ्गुदीस्नेहाः चतुर्भागिकाः तिलकुसुम्भबीजादीनां प्रस्थचतुष्टये एकः स्नेहप्रस्थो भवति।

सूत्रमाह—**कार्पासे**त्यादि। क्षौमो वल्कविशेषः। कार्पासपलपञ्चकस्य क्षौमपलपञ्चकस्यं च एकपलं सूत्रं भवति।

अथ भक्तोपयोगाय तण्डुलादीनां व्यवस्थाविशेषानाह—**पञ्चद्रोण** इत्यादि। शालीनां विंशत्याढकात्मके

पञ्चद्रोणे तण्डुलानां द्वादशाढकं यथा निष्पद्येत, तथावहननिष्पादितास्तत्तण्डुलाः, कलभभोजनं कलभानां बालगजानां भोजनार्थे विनियोज्याः। व्यालानां दुष्टगजानाम्, एकादशकं शाल्याढकविंशतावेकादशाढकक्रमेण निष्पन्नास्तण्डुलाः, भोजनार्थे विनियोज्या इत्यार्थम्। एवमुत्तरेष्वपि। औपवाह्यानां राजवाह्यानां, दशकं दशाढकं विंशतौ दशाढकक्रमेण साधितास्तण्डुलाः, विनियोज्याः। सान्नाह्यानां समरोचितानां, नवकं नवाढकं विंशतौ नवाढकक्रमनिष्पन्नास्तण्डुलाः। पत्तीनां पदातीनाम्, अष्टकम् अष्टाढकम् अष्टाढकक्रमनिष्पन्नास्तण्डुलाः। मुख्यानां भटप्रधानानां, सप्तकं सप्ताढकं सप्ताढकक्रमनिष्पन्नास्तण्डुलाः। देवीकुमाराणां राजपत्नीनां राजपुत्राणां च, षट्कं षडाढकं षडाढकक्रमनिष्पन्नास्तण्डुलाः। सेयं पूर्वाभ्यः प्रतिपत्तिभ्य उत्तमा प्रतिपत्तिः। राज्ञां पुनरितोऽप्युत्तमामाह–राज्ञामिति। राज्ञां, पञ्चकं पञ्चाढकं शालिविंशत्याढके पञ्चाढकक्रमनिष्पन्नास्तण्डुलाः भोजनार्थे विनियोज्याः। तदेवमष्टौ वर्णिकास्तण्डुलानां भक्तोपयोगिन्य उक्ताः। राजभोजने पक्षान्तरमाह–अखण्डेत्यादि। वाशब्दः पक्षान्तरे। अखण्डपरिशुद्धानाम् अक्षतावयवानां फलीकरणविवेचनसंशोधितानां च, तण्डुलानां, प्रस्थः आढकचतुर्भागः शाल्यशीतिप्रस्थादवहननादिसंस्कृताद् यथोक्तगुणैकतण्डुलप्रस्थग्रहणक्रमेण सम्पन्नस्तण्डुल इत्यर्थः।

Fried grains will increase by one fifth of the original quantity. Kalāya (leguminous seeds) will increase twice the quantity by frying. So is the case with lāja (parched rice) and barley when fried.

The quantity of oil extracted from atasī (linseed) will be one-sixth (of the total), that extracted from the seeds, nimba (Azadirachta India), kuśāmra (seed of a variety of mango) and kapittha (Feronia Elephantum) will be one fifth and that extracted from tila (sesamum), kusumbha (a sort of kidney bean), madhūka (Bassia latifolia) and ingudi (Terminalia Catappa) will be one fourth.

Five palas (a measure) of kārpāsa (cotton) and of kṣauma (flax) will yield one pala of threads.

Rice shall be prepared in such a way that a (measure of) five droṇas of śāli yield ten ādhakas of rice sufficient to feed young elephants, elven āḍhakas from five droṇas for elephants of bad temper and ten āḍhakas from the same quantity for elephants trained for riding, nine āḍhakas from the same quantity for elephants used in war; eight āḍhakas from the same for infantry, eleven āḍhakas from the same for chiefs of the army; six āḍhakas from the same for queens and princes and five from the same quantity for kings. (For kings) one prastha (a measure) of pure and unsplit may be sufficient (for food).

चतुर्भागः सूपः, सूपषोडशो लवणस्यांशः, चतुर्भागः सर्पिषः तैलस्य वा, एकमार्यभक्तम्। प्रस्थषड्भागः सूपः, अर्धस्नेहमवराणाम्। पादोनं स्त्रीणाम्। अर्धं बालानाम्।

मांसपलविंशत्या स्नेहार्धकुडुबः, पलिको लवणस्यांशः, क्षारपलयोगः, द्विधरणिकः कटुकयोगः, दध्नश्चार्धप्रस्थः।

चतुर्भाग इति। सूपः चतुर्भागः प्रस्थस्य प्रकृतत्वात् तच्चतुर्थांशः। सूपषोडशः सूपस्य षोडशांशप्रमाणः, लवणस्यांशः। सर्पिषस्तैलस्य वा, चतुर्भागः सूपचतुर्थभागः। **एकमार्यभक्तमिति**। तदिदमेकं मध्यमप्रतिपत्तिकस्य पुरुषस्य भोजनं भवति। अवरभोजनमाह—**प्रस्थेत्यादि**। अवराणां निकृष्टानां, प्रस्थषड्भागः सूपः। अर्धस्नेहं अर्धं सूपार्धभागः स्नेहस्तैलादिः यस्य तत्। लवणं तु समानमेव। भोजनस्यान्यपदार्थतामभिप्रेत्य नपुंसकनिर्देशः। **पादोनं स्त्रीणामिति**। पादन्यूनमार्यपुरुषभक्तमार्यस्त्रीणाम्, अवरपुरुषभक्तमवरस्त्रीणां च यथायथं बोध्यम्। **अर्धं बालानामिति**। पूर्ववद् यथायथमार्यबालानामवरबालानां च।

मांससंस्कारे योजनीयानां स्नेहादीनां परिमाणव्यवस्थामाह—**मांसपलेत्यादि**। मांसपलविंशत्या सह, स्नेहार्धकुडुबः स्नेहस्य अर्धकुडुबः प्रस्थाष्टभागः, योज्यः। लवणस्यांशः, पलिकः पलमितः। क्षारपलयोगः क्षारस्य सुवर्चिकायवक्षारादेः पलयोगः लवणाभावे। कटुकयोगः कटुकानां पिप्पलीमरिचशृङ्गबेराणां योगः, द्विधरणिकः धरणद्वयमानः। धरणप्रमाणं तु 'अष्टाशीतिगौरसर्षपा रूप्यमाषकः, ते षोडश धरणमि'ति पौतवाध्यक्षे वक्ष्यते। दध्नश्च, अर्धप्रस्थः प्रस्थस्यार्धं कुडुबद्वयं भवति।

In addition to one prastha of rice a standard meal for an Ārya shall consist of one fourth (prastha) of sūpa, clarified butter or oil equal to one fourth part of (sūpa).

One sixth prastha of sūpa for a (grown up) man and half the above quantity of oil will form one meal for low castes (avara). The same rations less by one-fourth of the above will form one (standard) meal for a woman, and half-the aboe rations for children.

For preparing a dish of twenty palas of flesh, half a kuduba (a measure) of oil, one pala of salt, one pala of sugar, two dharaṇis (vesselful) of pungent spices and half a prastha of curd is necessary.

तेनोत्तरं व्याख्यातम्। शकानामध्यर्धगुणः, शुष्काणां द्विगुणः, स चैव योगः।

हस्त्यश्वयोस्तदध्यक्षे विधाप्रमाणं वक्ष्यामः। बलीवर्दानां माषद्रोणं यवानां वा पुलाकः। शेषमश्वविधानम्। विशेषो—घाणपिण्याकतुला कणकुण्डकं दशाढकं वा।

द्विगुणं महिषोष्ट्राणाम्। अर्धद्रोणं खरपृषतरोहितानाम्। आढकमेणकुरङ्गाणाम्। अर्धाढकमजैलकवराहाणां द्विगुणं वा कणकुण्डकम्। प्रस्थौदनः शुनाम्। हंसक्रौञ्चमयूराणामर्धप्रस्थः। शेषाणामतो मृगपशुपक्षिव्यालानामेकभक्तादनुमानं ग्राहयेत्।

तेनेति। तेन उक्तयोगमानेन, उत्तरम् अधिकं मांसपलत्रिंशच्चत्वारिंशदादीनां स्नेहादियोगमानमर्धगुणद्वैगुण्यादिरूपं, व्याख्यातं विवृतप्रायम् उन्नेतुं शक्यमित्यर्थः। शाकानां वास्तुकादीनां, स चैव मांसोक्त एव, अध्यर्धगुणः सार्धगुणो, योगः। यथा—शाकपलविंशत्या पादोनकुडुबः स्नेहः अध्यर्धपलिकं लवणम् अध्यर्धपलिकं क्षारमित्यादि। शुष्काणां मांसानां शाकनां च, द्विगुणः स्नेहः मांसविषये कुडुबपरिमाणः शाकविषयेऽध्यर्धकुडुबपरिमाण इत्यादिः।

हस्त्यश्वयोरिति। हस्त्यश्वयोः, विधाप्रमाणं तण्डुलादिमानं तदध्यक्षे तयोरध्यक्षे हस्त्यध्यक्षे अश्वाध्यक्षे च, वक्ष्यामः। इतीयमनागतावेक्षणरूपा तन्त्रयुक्तिः। बलीवर्दानाम् उक्ष्णां, माषद्रोणं, यवानां वा पुलाकः

अर्धसिद्धस्तण्डुल:, अर्थाद् द्रोणपारमणि:। शेषम्, अश्वविधानम् अश्वस्योक्तं विधानं ग्राह्यम्। **विशेष** इति। विशेष: अश्वापेक्षया विशेष एषामुच्यत इत्यर्थ:। घाणपिण्याकतुला शुष्कस्य तिलकल्कस्य पलशतं, दशाढकं, कणकुण्डकं वा तण्डुलानां सूक्ष्मांशमिश्रमलं वा।

द्विगुणमित्यादि। उक्तं बलीवर्दविधानं द्विगुणं माषद्विद्रोणं यवपुलाकद्विद्रोणं वा महिषाणामुष्ट्राणां च भवति। अर्धद्रोणं माषाणां यवपुलाकानां वा आढकद्वयं, खरपृषतरोहितानां गर्दभानां बिन्दुचित्रमृगाणां रोहितमृगाणां च। आढकं प्रस्थचतुष्टयम्, एणकुरङ्गाणां एणानां कुरङ्गाणां च मृगभेदानाम्। अर्धाढकं प्रस्थद्वयम्, अजैलकवराहाणाम्। अत्र पक्षान्तरमाह-द्विगुणम् उक्तार्धाढकाद् द्विगुणमेकाढकं, कणकुण्टकं वा। प्रस्थौदन: प्रस्थपरिमितमन्नं शुनाम्। हंसक्रौञ्चमयूराणाम्, अर्धप्रस्थ: द्विकुडुबमन्नम्। **शेषाणामि**ति। अत: उक्तेभ्य:, शेषाणां मृगपशुपक्षिव्यालानाम्, एकभक्ताद् एकदिवसभुक्तपरीक्षणाद्, अनुमानं शेषदिवसभक्तेयत्तानिश्चयं, ग्राहयेत् कारयेत्।

The same proportion may be accepted for preparing a larger quantity (of flesh). For vegetable preparations, the above ingredients are to be used one and a half times as much; for dried items it shall be twice the quantity maintaining proportions.

In the case of (the food or) elephants and horses the mode of preparation shall be diseassed under those topics. For (feeding) bullocks one droṇa of māṣa (Phaseolus Radiatus) or one droṇa of cooked barley is enough. Rest of things may be the same as for the horses. Special item used is a tulā of oil cakes or ten āḍhakas of bran.

Twice the above quantity for buffaloes and camels (are (required). Half a droṇa for asses, red-spotted dear and deer with white stripes. One āḍhaka for an antelope and big red deer. Half an āḍhaka or even one āḍhaka or grain together with bran for a goat, a ram and a boar. For dogs one prastha of cooked food is required. The quantity of a standard meal for other beasts, cattle, birds and rogue elephants may be inferred frm the above proportions.

अङ्गारांस्तुषान् लोहकर्मान्तभित्तिलेप्यानां हारयेत्। कणिका: दासकर्मकरसूपकाराणाम्। अतोऽन्यदौदनिकापूपिकेभ्य: प्रयच्छेत्।

तुलामानभाण्डं रोचनीदृषन्मुसलोलूखलकुट्टकरोचकयन्त्रपत्रकशूर्पचालनिका-कण्डोलीपिटकसम्मार्जन्यश्चोपकरणानि।

पाककर्मणि निष्पन्नानामङ्गाराणाम् अवघातनिष्पतितानां तुषाणां च विनियोगमाह-**अङ्गारानि**त्यादि। अङ्गारान् तुषांश्च, लोहकर्मान्तभित्तिलेप्यानां हारयेत् लोहकर्मान्तार्थे भित्तिलेप्यकर्मार्थे च सञ्चिनुयात्। भस्मादिसंग्रहस्याप्येतदुपलक्षणम्। भस्माद्यपि हि केदारादौ दोहदाद्यर्थे विनियुज्यते। कणिका: तण्डुलकणान्, दासकर्मकरसूपकाराणां, प्रयच्छेद् भक्तार्थे। अतोऽन्यद् दासादिदत्तशेषम्, औदनिकापूपिकेभ्य: सामान्यान्नपाचकेभ्य: अपूपकर्मकरेभ्यश्च, प्रयच्छेत् तत्कर्मविनियोगार्थे।

उपकरणान्याह–तुलेत्यादि। तुलामानभाण्डं तुलाभाण्डं मानभाण्डं च पौतवाध्यक्षे वक्ष्यमाणं, रोचन्यादिद्वादशकं च उपकरणानि। तत्र रोचनी दलनयन्त्रं, दृषत् पेषणी, मुसलोलूखले प्रतीते, कुट्टकरोचकयन्त्रे कुट्टकयन्त्रं रोचकयन्त्रं च आद्यमुष्ट्रग्रीवाकारं तण्डुलादिकुट्टनसाधनं द्वितीयं तु पेषणयन्त्रं, 'तच्च त्रिविधं मनुष्यप्रावर्तितं बलीवर्दप्रावर्तितं सलिलप्रावर्तितं चेति' इति भट्टस्वामी। पत्रकं दारुमय आवपनभेदः, शूर्पं प्रस्फोटनं, चालनिका तितउः, कण्डोली वंशदलादिनिर्मितं भाण्डं, पिटकः पेटारिका, संमार्जनी शोधनी।

Charcoal and chaff may be given over for smelting iron and preparing lime kiln. Bran and morsels of food may be given to slaves, labourers and cooks. What is left over may be given to those who prepare cooked food and rice cakes.

The necessary instruments are—the weighing balance, weights, measures, mill-stone, pestle, mortar, wooden contrivances for pounding rice etc; contrivances for splitting seeds into pieces, winnowing fans, sieves, grain-baskets, boxes and brooms.

मार्जकारक्षकधारकमायकमापकदायकदापकशलाकाप्रतिग्राहकदासकर्म- करवर्गश्च विष्टिः।

उच्चैर्धान्यस्य निक्षेपो मूताः क्षारस्य संहताः।

मृत्काष्ठकोष्ठाः स्नेहस्य पृथिवी लवणस्य च।।

।। इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चदशोऽध्यायः कोष्ठागाराध्यक्षः, आदितः षट्त्रिंशः।।

कर्मकरानाह–मार्जकेत्यादि। मार्जकः भूमिसंस्कारकः, आरक्षकः कोष्ठागाररक्षी, धारकस्तुलोन्माताः मायको धान्यमाता, मापकस्तदधिष्ठाता, दायको दाता, दापकस्तदधिष्ठाता, शलाकाप्रतिग्राहको भारयष्ट्यादिप्रतिग्राही, दासः क्रीतः, कर्मकरस्तादात्विकभृतिभुक्, वर्ग उक्तजातीयगण आहितकादिः, विष्टिरिति त एते मार्जकादयो विष्टिसंज्ञिताः।

अध्यायान्ते श्लोकमाह–उच्चैरित्यादि। धान्यस्य, उच्चैरुपरि, निक्षेपः भूमिस्पर्शो यथा न भवेत् तथा निक्षेपस्थानम्। क्षारस्य गुडफाणितादेः, संहताः सान्द्रघटिताः मूताः तृणादिबन्धाः, निक्षेपः गोपस्थानम्। स्नेहस्य घृततैलादेः, मृत्काष्ठकोष्ठाः मृत्कोष्ठाः कुम्भादयः काष्ठकोष्ठाः दारुकोष्ठाश्च मधूच्छिष्टजतुर- साद्यनुलिप्ताः, निक्षेपः। लवणस्य, पृथिवी भूमिः पार्थिवो घटादिर्वा, निक्षेपः। चकाराद् अनुक्तमन्यदपि निक्षेपस्थानमुक्तानाम्, अनुक्तानां शाकशुक्तादीनां निवेशस्थानं च यथार्हं कार्यमिति सूचयति।।

।। इति कौटलीयार्थशास्त्रव्याख्याम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चदशोऽध्यायः कोष्ठागाराध्यक्षः, आदितः षट्त्रिंशः।।

Sweepers; preservers; those who weigh things; those who measure grains etc; those who supervise the work of measuring grains, those who supervise the supply of items to the store house; those who supply commodities; those who are employed to receive compensation for any real

or supposed error in measuring grains etc, slaves and labourers are (referred to as) Viṣṭis.

Grains are (usually) heaped on the floor; jaggery is bound in baskets, oils are kept in earthen ware or wooden vessels and salt is heaped up on the surface of the floor.

Thus the thirty sixth chapter of the Arthaśāstra of Kauṭalya entitled chief of store house comes to an end. Here ends fifteenth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 37

34. प्रक० पण्याध्यक्षः।

Section 34 : Authority of Commerce

पण्याध्यक्षः स्थलजलजानां नानाविधानां पण्यानां स्थलपथवारिपथोपयातानां सारफल्ग्वर्घान्तरं प्रियाप्रियतां च विद्यात्। तथा विक्षेपसंक्षेपक्रयविक्रयप्रयोगकालान्।

यच्च पण्यं प्रचुरं स्यात् तदेकीकृत्यार्घमारोपयेत्। प्राप्तेऽर्घे वार्घान्तरं कारयेत्।

स्वभूमिजानां राजपण्यानामेकमुखं व्यवहारं स्थापयेत्, परभूमिजानामनेकमुखम्। उभयं च प्रजानामनुग्रहेण विक्रापयेत्। स्थूलमपि च लाभं प्रजानामौपघातिकं वारयेत्। अजस्रपण्यानां कालोपरोधं सङ्कुलदोषं वा नोत्पादयेत्।

पण्याध्यक्ष इति सूत्रम्। पण्यं विक्रेयं राजद्रव्यं तस्य विक्रये क्रये च नियुक्तः पण्याध्यक्ष इति सूत्रार्थः। सन्निधातृनिचयकर्माभिहितम्। निचितस्य राजपण्यस्य क्रयविक्रयव्यवहार इदानीमुच्यत इति सम्बन्धः। अथवा 'सन्निधाता कोशगृहं पण्यगृहं कोष्ठागारमि'त्यादिना पण्यगृहकरणमुक्तम्। तदध्यक्षस्तदध्यक्षव्यापारो वा नोक्तः। स इहोच्यत इति सम्बन्धः। ननु च पण्याध्यक्षकर्म नाम वाणिज्यम्। सत्यम्। तस्येह कोष्ठागाराध्यक्षानन्तर्येण वचनं कोष्ठागाराध्यक्षस्यापि स्वव्यापाराः क्रयिमपरिवर्तकप्रामित्यकादयः पण्याध्यक्षापेक्षयानुष्ठेया इति ज्ञापनार्थम्।

पण्याध्यक्ष इति। पण्याध्यक्षः, स्थलजलजानां स्थलजानां कुङ्कुमादीनां जलजानां मुक्ताप्रवालादीनां च, नानाविधानां पृथग् बहुप्रकाराणां, स्थलपथवारिपथोपयातानां, पण्यानां, सारफल्ग्वर्घान्तरं सारस्य बहुमूल्यस्य फल्गुनोऽल्पमूल्यस्य च अर्घान्तरं मूल्यतारतम्यं, प्रियाप्रियतां च प्रियतां शीघ्रविक्रयताम् अप्रियतां मन्दविक्रयतां च, विद्यात्। तथा, विक्षेपादिप्रयोगकालान् विक्षेपः संक्षिप्तद्रव्यविस्तारः संक्षेपः विक्षिप्तद्रव्यसंक्षेपः क्रयः पण्यसंग्रहः विक्रयः संगृहीतपण्यव्ययः इत्येतेषां प्रयोगकालान् अनुष्ठानानुष्ठानकालान्, विद्यादिति सम्बध्यते।

यच्चेति। यत् पण्यं कुङ्कुमादि, प्रचुरं प्राज्यं, स्यात्, तद् एकीकृत्य तद् सर्वमेकत्रगतं कृत्वा, अर्घम्, आरोपयेत् आरूढमधिकं स्थापयेत्। प्राप्तेऽर्घे वा न्यायलभ्येऽर्घेऽधिगते वा सति, अर्घान्तरम् अर्घभेदमारोपिताल्लघुं, कारयेत्।

स्वभूमीत्यादि। स्वभूमिजानां स्वविषयोद्भवानां, राजपण्यानाम्, एकमुखम् एकस्थानं, व्यवहारं विक्रयं, स्थापयेद्, राजा। परभूमिजानां परविषयोपनीतानाम्, अनेकमुखं, स्थापयेत्। उभयं च स्वभूमिजं परभूमिजं च, प्रजानाम्, अनुग्रहेण अनुपपीडया, विक्रापयेत्, अर्थात् पण्याध्यक्षः। स्थूलं प्रभूतमपि, लाभं, प्रजानाम्,

औपघातिकम् उपघात: पीडा तत्पर्यवसायिनं, वारयेत्। अजस्रपण्यानां क्षीरशाकादीनां, कालोपरोधं कालविक्रयप्रतिषेधं, संकुलदोषं वा शाकादिषु कैश्चिदानीतचरेष्वविक्रीतेष्वन्यै: शाकाद्यानयनं वा, नोत्पादयेत्।

The superintendent of commerce shall ascertain the demand as well as its absence, the rise and fall of the prices of commodities which may be products of either land or of water, which may have been brought in through land or water-way He shall also ascertain the properties for distribution, collection, purchase and sale.

When a commodity becomes dearer a uniform increase in the price may be effected in selling them. After realising the same still antoher increase of the price could be effected.

The merchandise of the state produced witih in shall be sold from a centralised location while those imported from out side shall be sold through different outlets. Both the merchandise shall be sold without causing difficulty to the people. A sizable profit shall not be made to put difficulty before the people. Those commodities which are constantly required and is in constant demand shall not be subjected to the evils of centralisation.

बहुमुखं वा राजपण्यं वैदेहका: कृतार्घं विक्रीणीरन्। छेदानुरूपं च वैधरणं दद्यु:।

षोडशभागो मानव्याजी। विंशतिभागस्तुलामानम्। गण्यपण्यानामेकादशभाग:।

परभूमिजं पण्यमनुग्रहेणावाहयेत्। नाविकसार्थवाहेभ्यश्च परिहारमायतिक्षमं दद्यात्। अनभियोगश्चार्थेष्वागन्तूनामन्यत्र सभ्योपकारिभ्य:।

बह्वित्यादि। वैदेहका: वणिज:, कृतार्घं व्यवस्थापितमूल्यं, राजपण्यं, बहुमुखं वा बहुषु स्थलेषु वा, विक्रीणीरन्। **छेदानुरूपं च वैधरणमिति**। यदि विक्रये कश्चिच्छेदोऽर्घहानिर्भवेत् तदनुरूपं छेदतुल्यमानं, वैधरणं दद्यु:। छेदप्रतिनिधेर्वैधरणमिति संज्ञा।

वणिग्भ्य उपादेयां राजोपदामाह–षोडशेत्यादि। षोडशभागो मानव्याजी मेयद्रव्यषोडशांशो मानव्याजीसंज्ञ:। स राज्ञे देय:। तुलामानं विंशतिभाग: तोलनीयद्रव्यं पलशते। पञ्चवपलमितं, राज्ञे देयम्। गण्यपण्यानां क्रमुकफलादीनाम्, एकादशभाग:, राज्ञे देय:। सर्वेयं व्याजी क्रेतृग्राह्येति केचित्।

परेत्यादि। परभूमिजं पण्यम्, अनुग्रहेण अन्तपालाटविकराजवल्लभाद्युपद्रववारणेन व्याजीमोक्षेण च, आवाह्येत् आनाययेत्। नाविकसार्थवाहेभ्यश्च जलपथवाहकवणिग्भ्यश्च, परिहारम् आदेयमोक्षम्, आयतिक्षमम् उत्तरकालाबाधकं, दद्यात्। अनभियोगश्च उत्तमर्णकर्तृकाभियोगप्रतिषेधश्च, अर्थेषु ऋणादिषु विषये, आगन्तूनां देशान्तरागतानां, तद्विषये अभियोगं विनैव ऋणदानं व्यवस्थाप्यमिति भाव:। अत्रापवादमाह–अन्यत्र सभ्योपकारिभ्य: तदुपकारिकर्मकरानपहाय। तेषां तु परस्पराभियोगो भवत्येव।

Traders from outside the country may purchase merchandise from different centres in case their value is fixed one. They are to make compensation for the loss entailed upon it.

One-sixteenth is the tax (be paid to the royalty on transactions). One-twentieth is the tax on commodities sold by weighing and one-eleventh is the tax on items which are based on numbers.

Commodities from outside the states may be encouraged to be brought in by waiving taxes. For mariners and merchants who import foreign goods compensatory benefits may be extended by remission of taxes, so that they may derive some extra profit. In the dispute of debts between foreign and local traders, the king shall maintain law without showing any undue favour. On the other hand those who perform a service shall be encouraged by the state.

पण्याधिष्ठातारः पण्यमूल्यमेकमुखं काष्ठद्रोण्यामेकच्छिद्रापिधानायां निदध्युः। अह्नश्चाष्टमे भागे पण्याध्यक्षस्यार्पयेयुः–इदं विक्रीतमिदं शेषमिति। तुलामानभाण्डकं चार्पयेयुः। इति स्वविषये व्याख्यातम्।

परविषये तु–पण्यप्रतिपण्ययोरर्घं मूल्यं च आगमय्य शुल्कवर्तन्यातिवाहिकगुल्मतरदेयभक्तभाटकव्ययशुद्धमुदयं पश्येत्। असत्युदये भाण्डनिर्वहणेन पण्यप्रतिपण्यार्घेण वा लाभं पश्येत्। ततःसारपादेन स्थलव्यवहारमध्वना क्षेमेण प्रयोजयेत् । अटव्यन्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेदनुग्रहार्थम्।

पण्याधिष्ठातार इति। राजपण्यविक्रेतारः, पण्यमूल्यं पण्यविक्रयागतं धनम्, एकमुखम् एकस्थानागतं, काष्ठद्रोण्यां दारुपेटिकायाम्, एकच्छिद्रापिधानायाम् एकद्वाराच्छादनायां, निदध्युः निक्षिपेयुः। अह्नश्च, अष्टमे चरमे, भागे, उपलक्षणात् क्रयसमयावसाने वा, पण्याध्यक्षस्य, अर्पयेयुः। किं कृत्वा, इदं विक्रीतम् इदं शेषमिति एतावद् विक्रीतम् एतावद् विक्रेयमवशिष्यत इति बोधयित्वा। तुलामानभाण्डकं तुलाप्रस्थकुडुबादिकं च, अर्पयेयुः, पण्याध्यक्षस्य। **इति स्वविषये व्याख्यातमिति।** एवं स्वदेशे पण्यपणनविधिर्विवृतः।

परविषये त्विति। व्याख्यायत इति शेषः। **पण्येत्यादि।** पण्यप्रतिपण्ययोः स्वपण्यपरविषयपण्ययोः, अर्घं समन्यूनाधिकं, मूल्यं च भाण्डोपस्कारादिमूल्यं च, आगमय्य विज्ञाय, शुल्कादिव्ययशुद्धं शुल्कादिव्ययशोधितावशेषम्, उदयं लाभं, पश्येत् समीक्षेत, सति लाभदर्शने स्वपण्यं परविषये प्रेषयेदित्यभिप्रायः। तत्र शुल्कं शुल्काध्यक्षोक्तं, देयशब्दस्य वर्तन्यादिभिः प्रत्येकमभिसम्बन्धः। वर्तनीदेयम् अन्तपालदेयम्, आतिवाहिकदेयं मार्गातिवाहनसहायभूतायुधीयदेयं, गुल्मदेयं वनस्थानिकदेयं तरदेयं नद्याद्युत्तारकनाविकादिदेयं, भक्तं भोजनं कर्मकरवलीवर्दादिभृतिश्च, भाटकः प्रसेवकादिग्रहणार्थः प्रक्रयः। भागेति त्वपपाठ इति भाति। **असतीति।** असत्युदये लाभादर्शने, भाण्डनिर्वहणेन स्वपण्यस्य परदेशनयनेन लाभकालप्रतीक्षापूर्वकविक्रयद्वारेण लाभं पश्येत्। वा अथवा, पण्यप्रतिपण्यार्घेण स्वपण्यस्य प्रतिपण्यार्घकरणेन स्वपण्यदानपूर्वकप्रियपण्यान्तरग्रहणेनेत्यर्थः, लाभं पश्येत्। **तत इति।** ततः लाभदर्शनानन्तरं, सारपादेन समीक्षितलाभचतुर्थांशव्ययेन, स्थलव्यवहारं सुलभापायो जलपथ इति कृत्वा स्थलपथव्यवहारं, क्षेमेणाध्वना स्थलपथेनापि चोराद्युपद्रवरहितेन, प्रयोजयेत्। अटव्यन्तपालपुरराष्ट्रमुख्यैश्च अटवीपालान्तपालपुरमुख्यराष्ट्रमुख्यैश्च सह, प्रतिसंसर्गं सोपदानं संगतं, गच्छेद् अनुग्रहार्थं तदानुकूल्यार्थम्।

Those who trade in the merchandise of the king shall keep the total value or proceeds in an wooden box with a single opening in a fixed place. During the eighth part of the day; they shall report to the superintendents that this much has been sold and thus much is kept as balance. They also shall return the weights and measures. Such are the rules applicable to local trade.

Regarding the sale of king's merchandise in foreign countries—one has to ascertain the value of the local product and foreign product and the profit margin that may accrue by sales. One has to find out by calculation whether there is any margin left for profit after meeting the payments such as toll, road-cess, conveyance-cess, tax payable at military stations, ferry charges, subsistence to the merchants and his followers and the portion of merchandise payable to the foreign ruler (in whose territory the sale is effected). In case there is no possibility of any profit by sale, one may consider of exchanging goods as barter for any foreign produce. Then one may send one-quarter of the produce through roads to different locations or markets in the land taking precautions for safety. One may get into friendship with forest guards, boundary guards and officers in charge of cities and country parts (of the foreign king) to secure their favour. One should take care to protect one's good as well as one's life from danger. In case one fails to reach the intended place or market, one may (in an exigency) sell the merchandise with out considering the margin for tax etc.

आपदि सारमात्मानं वा मोक्षयेत्। आत्मनो वा भूमिमप्राप्तः सर्वदेयविशुद्धं व्यवहरेत्।

वारिपथे च यानभाटकपथ्यदनपण्यप्रतिपण्यार्घप्रमाणयात्राका लभयप्रतीकारपण्य-पत्तनचारित्राण्युपलभेत।

आपदीति। आपदि चोरोपरोधे, सारं रत्नादिद्रव्यम्, आत्मानं वा स्वशरीरं च, मोक्षयेत् रक्षेत्। इदं च सति सम्भवे। उभयमोक्षणासौकर्ये तु सारपरित्यागेनात्मैव मोक्षणीयः। यदाहुः-

शरीरमर्थाद् गोप्तव्यं राजगुह्यभयार्दितम्।
वित्तहीनोऽल्पवित्तो वा जीवन् भद्राणि पश्यति।।

इति। **आत्मनो वेति**। आत्मनो वा भूमिमप्राप्तः स्वपण्यविक्रयभूमिभूतात् परविषयात् स्वविषयात् स्वविषयमप्रत्यागतः, परविषयवासकाले कृत्स्नेऽपीत्यर्थः, सर्वदेयविशुद्धं व्यवहरेत् शुल्कादिनिखिलदेया-प्रदानापराधविधुरं विक्रयव्यवहारं कुर्यात्, स्वल्पप्रत्याशया सर्वनाशो मा भूदिति।

वारिपथे चेति। जलपथे च, यानभाटकादीनि, उपलभेत ज्ञात्वा तदनुरोधेन व्यवहरेत्। तत्र यानभाटकः नाविकभृतिः, पथ्यदनं मार्गभक्तं, पण्यप्रतिपण्यार्घप्रमाणं पण्यप्रतिपण्ययोरर्घतारतम्यं, यात्राकालः यात्रार्हऋतुविशेषलक्षणो गतागतापेक्षितकालेयत्ता वा, भयप्रतीकारः सम्भावितततस्करादिभयप्रतिविधिः, पण्यपत्तनचारित्रं स्वपण्यविक्रयस्थानभूतपरकीयपत्तनसमुदाचारः।

On moving through rivers one shall ascertain the rental such as conveyance charges, subsistence on the way, value of foreign merchandise that could be obtained in barter for local merchandise, occasions of pilgrimages, means that could be employed to ward off dangers (of the journey) and the history of commercial towns.

नदीपथे च विज्ञाय व्यवहारं चरित्रतः।
यतो लाभस्ततो गच्छेदलाभं परिवर्जयेत्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
षोडशोऽध्यायः पण्याध्यक्षः, आदितः सप्तत्रिंशः।।

अध्यायान्ते श्लोकमाह—नदीपथे चेति। नदीपथे च न केवलं समुद्रमार्गे किन्तु नदीमार्गेऽपि, व्यवहारं वाणिज्यं, चरित्रतः तत्तद्देशाचारानुरोधेन, विज्ञाय, यतो येन पथा, लाभः, ततो गच्छेत्। अलाभम् अल्पलाभं क्षयव्ययप्रवासादिमहाक्लेशानुरूपलाभं जलपथं, परिवर्जयेत्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
षोडशोऽध्यायः पण्याध्यक्षः, आदितः सप्तत्रिंशः।।

Having ascertained the nature of the river-way and the scope of business in commercial town along the banks of rivers one should transport one's merchandise to profitable market avoiding unprofitable ones.

Thus the thirty seventh chapter of the Arthaśāstra of Kauṭalya entitled authority of commerce comes to an end. Here ends the sixteenth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 38

35. प्रक० कुप्याध्यक्षः।

Section 35 : Authority of Forest Produces

कुप्याध्यक्षा द्रव्यवनपालैः कुप्यमानाययेत्। द्रव्यवनकर्मान्तांश्च प्रयोजयेत्। द्रव्यवनच्छिदां च देयमत्ययं च स्थापयेदन्यत्रापद्भ्यः।

कुप्यवर्गः—शाकतिनिशधन्वनार्जुनमधूकतिलकसालशिंशपारिमेदराजादनशिरीषखदिरसरलतालसर्जाश्वकर्णसोमवल्ककशाम्रप्रियकधवादिः सारदारुवर्गः।

कुप्याध्यक्ष इति सूत्रम्। कुप्यं सारदारुवेणुवल्लिवल्कादि, तत्र नियुक्तः कुप्याध्यक्षः, अर्थात् तस्य व्यापारः कुप्यविषय इहोच्यत इति सूत्रार्थः। कोशप्रवेश्यरत्नपरीक्षायां रत्नसारफल्गुकुप्यान्युपक्रम्य रत्नसारफल्गुप्रतिग्रहणमुक्तं कुप्यस्य त्वनुक्तमिहोच्यत इति सम्बन्धः। अथवा 'सन्निधाता कोशगृहमि'त्यादिना कुप्यगृहविधानं पूर्वमुक्तं, तदध्यक्षव्यापारस्त्वधुनोच्यत इति।

कुप्याध्यक्ष इत्यादि। कुप्याध्यक्षः, द्रव्यवनपालैः वार्क्षवनरक्षिभिः, कुप्यं सारदार्वादि, आनाययेद् आवाहयेत्। द्रव्यवनकर्मान्तांश्च दारुनिर्मेयान् गृहशकटादिकान् प्रयोजयेत् कारयेत्। द्रव्यवनच्छिदां च द्रव्यवनच्छेदोपजीविनां च वृक्षमर्मज्ञानां, देयं छेदनीयशिरश्शाखास्कन्धमूलभागभेदेन छेदनदुर्गतारणाद्यर्थे प्रदेयं वेतनं, स्थापयेद् एतावदिति व्यवस्थापयेत्। अत्ययं च दण्डं चाननुज्ञातच्छेदने, स्थापयेत्। किं सर्वदा, नेत्याह—अन्यत्रापद्भ्य इति। शकटयुगभङ्गादिविपत्प्राप्तौ तु कालविलम्बासहयुगयोजनाद्यर्थे अननुज्ञातच्छेदनं नापराधः।

कुप्यवर्ग इति। वक्ष्यत इति शेषः। अयं चाधिकारः। तत्र शाकाद्येकविंशतिः सारदारुवर्ग इत्याह—**शाकतिनिशेत्यादि**। शाकः पृथुच्छदाख्यो वृक्षः, तिनिशो नेमी, धन्वनः धनुर्वृक्षः, अर्जुनः ककुभः, मधूकः मधुद्रुमः, तिलकः क्षुरकः, सालः कार्ष्यकाख्यः, शिंशपा तीक्ष्णधूमाख्या, अरिमेदः विट्खदिरः पूतिखदिराख्यः, राजादनः फलाध्यक्षाख्यः, शिरीषः कपीतनः, खदिरस्तिक्तसाराख्यः, सरलः पूतिकाष्ठाख्यः तालः तृणद्रुमः, सर्जः पीतसालकः, अश्वकर्णः सर्जभेदः, सोमवल्कः सितखदिरः, कशः लोमशपुच्छको नकुलवृक्षभेदः, आम्रश्चूतः, प्रियकः गौरसर्जः, धवः धुरन्धराख्यः, आदिग्रहणमनुक्तसंग्रहार्थम्।

The authority of forest produces shall collect timber and other valuable produces of the forest from those who are enjoined to guard them. He shall also engage artisans to produce products out of them. He shall aslo fix adequate remuneration in the matter of cutting the woods, branches

that require to be shorn, in addition to fines for cutting them unless it is an emergency.

Forest produces (in this regard) are :—Śāka (teak), tiniśa (Dalbergia Ougeinensis), madhuka (Bassia Latifolia), tilaka (Barleria Cristata), tāla (palmyrah), Śimśapā (Dalbergia sissu), arimeda (Fetid Mimosa), rājādana (Mimosops Kauki), śiriṣa (Mimosa Sirisha), Khadira (Mimosa catechu), sarala (Pinus Longifolia), tālasarja (sal tree or Shorea Robesta), aśvakarṇa (Vatika Robesta), somavalka (a kind of white khadira), Kaśā (a kind of Nakula tree), āmra (mango tree), priyaka (white saral tree) and dhava (Mimosa Hexandra). These are of strong timber (Sāradāruvarga).

उटजचिमियचापवेणुवंशसातीनकण्टकभाल्लूकादिर्वेणुवर्गः।

वेत्रशीकवल्लीवाशीश्यामलतानागलतादिर्वल्लीवर्गः।

मालतीमूर्वार्कशणगवेधुकातस्यादिर्वल्कवर्गः।

मुञ्जबल्वजादि रज्जुभाण्डम्। तालीतालभूर्जानां पत्रम्। किंशुककुसुम्भकुङ्कुमानां पुष्पम्।

कन्दमूलफलादिरौषधवर्गः।

कालकूटवत्सनाभहालाहलमेषशृङ्गमुस्ताकुष्ठमहाविषवेल्लितकगौरार्द्रवालकमार्कट-हैमवतकालिङ्गकदारदकाङ्कोलसारकोष्ट्रकादीनि विषाणि।

वेणुवर्गमाह—**उटजे**त्यादि। उटजो महासुषिरस्तनुकण्टकः कर्कशपृष्ठः, चिमियो निस्सुषिरो मृदुत्वक्कः, चापः स्वल्पसुषिरोऽतिखरश्च, वेणुर्निष्कण्टकश्चापयोग्यः, वंशो दीर्घपर्वकः सरन्ध्रः सकण्टकश्च, सातीनकण्टकौ वेणुभेदौ, भाल्लूकः स्थूलदीर्घो महाप्रमाणो निष्कण्टकः।

वल्लीवर्गमाह—**वेत्रे**त्यादि। वेत्रं प्रसिद्धं, शकवल्ली हंसवल्लीति देशविशेषप्रसिद्धा, वाशी अर्जुनपुष्पसमानपुष्पा, श्यामलता त्रिपुटीसदृशी, नागलता नागजिह्वा।

वल्कवर्गमाह—**मालती**त्यादि। मालती माहुलानीति देशविशेषप्रसिद्धा, मूर्वा मरुलिति द्रविडप्रसिद्धा, अर्कः शणोऽतसी च प्रतीताः, गवेधुका नागबला।

रज्जुभाण्डादिकमाह—**मुञ्जे**त्यादि। मुञ्जबल्बजादि मुञ्जः शरः बल्बजास्तृणविशेषः इत्येवमादि, रज्जुनिर्माणसाधनम्। तालीत्यादि। तालीतालभूर्जाः प्रसिद्धाः तेषां पत्रं लेख्योपयोगि। किंशुककुसुम्भकुङ्कुमानां, पुष्पं वस्त्रादिरञ्जनसाधनम्।

ओषधिवर्गमाह—**कन्दमूले**त्यादि। कन्दाः सूरणादयः मूलान्युशीरादीनि फलानि आमलकहरीतक्यादीनि एतदादिः ओषधिवर्गः।

विषवर्गमाह—**कालकूटे**त्यादि। कालकूटोऽश्वत्थपत्राकृतिपत्रो वृक्षः पर्वान्तराच्छुष्कमार्द्रं च निर्यासमुद्गिरति। वत्सस्येव नाभिरस्य वत्सनाभः, निर्गुण्डीसदृशपत्रं सूचीपत्रं नीलपल्लवं गोस्तनाकृतिफलं हालाहलं, मेषशृङ्गमुत्पलमुकुलाकारं, मुस्ता द्विविधा मुस्ताकारा खण्डशर्करोपमा च, शङ्खपाण्डरा चेति

स्वामी, कुष्ठं कुष्ठसगन्धनकन्दं, महाविषं मांसवर्णं स्तनचूचुकाकारं, वेल्लितकं मूलजं कृष्णरक्तं, गौरार्द्रं कन्दजं कृष्णं, बालकं पिप्पल्याकारं, मार्कटं कपिमेढ्राकारं, हैमवतं हिमवदुत्पन्नं दीर्घपत्रं, कालिङ्गकं कलिङ्गभवं यवाकृति, दारदकं दरदप्रभवं पत्रविषम्, अङ्कोलसारकम् अङ्कोलवृक्षजं विषम्, उष्ट्रकम् उष्ट्रमेढ्राकारम्, इत्येवं षोडश, आदिग्रहणादनुक्तानामेकोनसप्ततिप्रकाराणां ग्रहणम्। तदेवं स्थावराणि विषाणि पञ्चाशीतिर्भवन्ति दशाश्रयाणि। तथाच भट्टस्वामिनः श्लोकः-

त्वक्कन्दपत्रपुष्पाणि फलं निर्यास एव च।
मूलं सारस्तथा धातुर्बीजं चेति दशाश्रयाः।।
अव्यक्तरसगन्धानि तीक्ष्णान्येकरसानि च।
पञ्चाशीतिर्विषाण्येवमुपदिष्टानि तत्त्वतः।। इति।

Those that form the group of bamboo are—Uṭaja, cimiya, cāpa, veṇu, vamśa, sātina, kaṇṭaka and bhāllūka.

The group of creepers are :—Netra (cane), Śīkavalli (hamsavallī), vāśī (having flowers similar to that of Arjuna), śyāmalatā (Ichnocarpus) and nāgalatā (betel).

The group of fibrous plants are—mālati (jasmine), dūrva (panic grass), arka (Calotropis Gigantea), śaṇa (hemp), gavethuka (Coix Barbata) and atasī (Linum Usitatis).

Plants which yield rope-making materials are Muñja (Saccharum munja), balbaja (Elensine Indica) etc.

Those that yield leaves are Tāli (Corypha Taliera), tāla (palmyra) and bhūrja (birch).

Those which yield flowers are kimśuka (Butea Frondosa), Kusumbha (Carthamus Tinetorius) and Kunkuma (Crocus Sativus).

Balbuous roots and fruits are the group of medicines.

The various poisons are—kālakūṭa (gum-like secretion of a tree, the leaves of which are like those of a fig-tree), vatsanābha (this may be either fresh or dry, its leaves are like those of Nirguṇdi—Vitex Negundo), hālāhala (its leaves are blue and elongated like pins; and its fruits are like the nipple of a cow), meṣaśṛṅga (this is like the bud of a blue lotus), mustā (this is of two kinds, the ordinary and the white as conch-shell), kuṣṭha (Saussurea auriculata), mahāviṣa (this has the colour of red like flesh and is of the form of breast-nipple), vellitaka (with black and white coloured roots), gaurārdra (a bulbuous root of black colour like pepper), bālaka (with white bulbuous root), mārkaṭaka (like Meḍhra-testicles of a monkey), haimavata (a product of the Himalayas with long leaves), Kāliṅgaka (product of the Kaliṅga country and looks like barley), dāradaka (its leaves

are poisonous) ankolasāraka (produced form the ankola tree (the plant Alangium Hexapetalum), and uṣṭraka (looking like the testicle of the camel.)

सर्पाः कीटाश्च। त एव कुम्भगताः। विषवर्गः।

गोधासेरकद्वीपिशिंशुमारसिंहव्याघ्रहस्तिमहिषचमरसृमरखड्गगोमृगगवयानां चर्मास्थिपित्तस्नायवास्थिदन्तशृङ्गखुरपुच्छानि। अन्येषां वापि मृगपशुपक्षिव्यालानाम्।

कालायसताम्रवृत्तकांस्यसीसत्रपुवैकृन्तकारकूटानि लोहानि। विदलमृत्तिकामयं भाण्डम्।

जङ्गमविषाणि द्विविधान्याह—**सर्पाः कीटाश्चेति**। सर्पाः कृष्णसर्पादयः, कीटाः चित्रभेककौण्डिन्यकादयः। उभये चैते प्रत्येकं द्विविधा संस्कृतासंस्कृतभेदेन। तत्रासंस्कृताः स्वभावस्थिताः। संस्कृतांस्त्वाह—त एवेति। त एव सर्पाः कीटाश्च, कुम्भगताः औपनिषदोक्तविधानेन संस्कृत्य कुम्भे त्रपुघटे संयोजिताः। स एष विषवर्गः।

अथ चर्मादिवर्गानाह—**गोधासेरकेत्यादि**। सेरकः गौरत्वग् गोधाभेदः, द्वीपी चित्रकायः, सृमरः शरभः, अन्ये प्रसिद्धाः, एषां चर्मादीनि कुप्याधिकारात् कुप्यसंज्ञानि संग्राह्याणि च भवन्ति। अन्येषां वापि अनुक्तानामपि मृगपशुपक्षिव्यालानां, चर्मादीनि यथोपयोगं संग्राह्याणि।

लोहान्याह—**कालायसेत्यादि**। आकरकर्मान्तप्रवर्तनप्रकरणे पूर्वमुक्तानामपि लोहानामिह पुनः पाठः कुप्यसंज्ञार्थः। भाण्डमाह—**विदलेत्यादि**। भाण्डं, विदलमृत्तिकामयं विदलमयं वंशवेत्रादिमयं पिटकफेलकादि मृत्तिकामयं कुलालभाण्डं घटशरावादि।

Likewise serpents and worms kept in pots are the group of poisons.

(The group of skins etc.), consists of those of godhā (alligator), seraka (white alligator), dvīpī (leopard), śimśumāra (porpoise), simha (lion), vyāghra (tiger), hasti (elephant) mahiṣa (buffalo), camara (the yak, Bos grunniens), gomṛga (bos gaveus) and gavaya (the Gayal). Bones, bile, sinew, teeth, horn, hoofs and tails of the above animals as well as other beasts, cattle, birds and snakes (are to be collected as forest produces).

Kālāyasa (iron), tāmra (copper), vṛtta (a metal), kāmsya (bronze) sīsa (lead) trapu (tin), vaikrṇtaka (mercury) and ārakūṭa (brass) are metals.

अङ्गारतुषभस्मानि मृगपशुपक्षिव्यालवाटाः काष्ठतृणवाटाश्चेति।
बहिरन्तश्च कर्मान्ता विभक्ताः सर्वभाण्डिकाः।
आजीवपुररक्षार्थाः कार्याः कुप्योपजीविना।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तदशोऽध्यायः कुप्याध्यक्षः, आदितोऽष्टात्रिंशः।।

अङ्गारेत्यादि। अङ्गारतुषभस्मानि, मृगपशुपक्षिव्यालवाटाः मृगादीनां वाटाः स्थानानि, काष्ठतृणवाटाश्च काष्ठतृणानां समूहाश्च, कुप्यसंज्ञास्तेऽपि संग्राह्याः।

अध्यायान्ते श्लोकमाह—**बहिरिति**। बहिः द्रव्यवननिकटप्रदेशे जनपदे च, अन्तश्च दुर्गाभ्यन्तरे च, कर्मान्ताः शकटादिघटनरूपाः, विभक्ताः असंकीर्णाः पृथगवस्थानाः, सर्वभाण्डिकाः सर्वविधभाण्डसम्बद्धाः, आजीवपुररक्षार्थाः आजीवार्थाः जीविकाप्रयोजनाः हलमुसलशकटादयः पुररक्षार्था यन्त्रायुधादयश्च, कार्याः कारयितव्याः, कुप्योपजीविना तत्तत्कुप्यशिल्पाजीवेन प्रयोज्यकर्त्रा कुप्याध्यक्षेण प्रयोजकेन।।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तदशोऽध्यायः कुप्याध्यक्षः, आदितोऽष्टात्रिंशः।।

Utensils are those made of cane, bark and clay.

Charcoal, bran, and ashes are other things.

Menageries of beasts, cattle and birds; collections of fire wood and fooder (are produces from the forest).

The superintendent of forest produces shall carry on, either inside or outside the city, the manufacture of all kinds of articles which are necessary for life or for the defence of forts.

Thus the Thirtyeighth chapter of the Arthaśāstra of Kauṭalya called 'authority of forest produces' comes to an end. Here ends the seventeenth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 39

36. प्रक० आयुधागाराध्यक्षः।

Section 36 : Authority of the Armoury

आयुधागाराध्यक्षः साङ्ग्रामिकं दौर्गकर्मिकं परपुराभिघातिकं यन्त्रमायुधमावरणमुपकरणं च तज्जातकारुशिल्पिभिः कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारयेत्। स्वभूमौ च स्थापयेत्। स्थानपरिवर्तनमातपप्रवातप्रदानं च बहुशः कुर्यात्। ऊष्मोपस्नेहक्रिमिभिरुपहन्यमानमन्यथा स्थापयेत्। जातिरूपलक्षणप्रमाणागममूल्यनिक्षेपैश्चोपलभेत।

सर्वतोभद्रजामदग्न्यबहुमुखविश्वासघातिसङ्घाटियानकपर्जन्यकबाहूर्ध्वबाह्वर्धबाहूनि स्थितयन्त्राणि।

आयुधागाराध्यक्ष इति सूत्रम्। आयुधशालाध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः। कुप्यप्रसङ्गात् तदन्तर्गतायुधप्रस्तावसङ्गतिः। अथवा सन्निधातुरायुधागारकरणं पूर्वमुक्तं, तदध्यक्षस्त्वनुक्त इहाभिधीयत इति सङ्गतिः।

आयुधागारेत्यादि। आयुधागाराध्यक्षः, साङ्ग्रामिकं सङ्ग्रामप्रयोजनकं, दौर्गकर्मिकं दुर्गकर्म स्वदुर्गरक्षणं तत्साधकं, परपुराभिघातिकं शत्रुदुर्गविध्वंसनानुकूलं, यन्त्रं सर्वतोभद्रजामदग्न्यादि, चक्रयन्त्रमिति मूलपाठश्चिन्त्यः। आयुधं शक्तिचापादि, आवरणं लोहजालादि, उपकरणं च युग्यादि च, तज्जातकारुशिल्पिभिः तज्जातैस्तत्कर्मसमर्थैः कारुभिः स्थूलकर्मकारिभिः शिल्पिभिः सूक्ष्मकर्मकारिभिश्च, तैः कीदृशैः, कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कृतकर्मप्रमाणकालवेतना कर्मप्रमाणं कर्तव्ययन्त्रायुधादीनां सङ्ख्यासंस्थानादिमानं कालोऽवधिः वेतनं भृतिरित्येतानि कृतानि परिभाषितानि यस्यां सा तथाभूता फलनिष्पत्तिर्यन्त्रादिनिष्पत्तिर्येषां तैस्तथाभूतैः, कारयेत्। **स्वभूमौ च स्थापयेदिति।** कारितानि च तानि स्वायत्ते स्थाने निवेश्य रक्षेत्। स्थानपरिवर्तनं स्थानात् स्थानान्तरनिवेशनम्, आतपप्रवातप्रदानम् आतपवातविसारणं च, तेषां बहुशः असकृत् त्रिचतुर्दिवसात्यासं, कुर्यात्। ऊष्मोपस्नेहक्रिमिभिः धर्मप्रस्वेदघुणकादिभिः, उपहन्यमानम्, अन्यथा प्रकारान्तरेणानुपघातहेतुना, स्थापयेत्। जातीत्यादि। जात्यादिभिश्च उपलभेत तानि विजानीयात्। तत्र जातिः स्वभावः पाटनादिः, रूपमृजुवक्रतादि, लक्षणं शास्त्रोक्तमुत्तमादिचिह्नं, प्रमाणं मानोन्मानतो दैर्ध्यविस्तारादिपरिच्छेदः, आगमः यतो लब्धं सः, मूल्यम् अर्घः, निक्षेपः कोशभस्त्रादिः।

यन्त्राण्याह—**सर्वतोभद्रेत्यादि।** अत्र स्वामी व्याचष्टे–"तत्र सर्वतोभद्रं शकटचक्रप्रमाणं तीक्ष्णनेमि

कुड्यस्थितगन्धर्वहस्तस्थं भ्रमणात् सर्वतः पाषाणान् क्षिपति। अपरे तु सिद्धभूमिकायन्त्राख्यं लघुतरपाषाण-क्षेपणमाचक्षते। जामदग्न्यं मध्यरन्ध्रविनिहितमहाशरं यन्त्रम्। बहुमुखं प्राकारोत्सेधाधिगतश्चक्रसन्निविष्टश्चर्मा-वृतस्त्रिचतुस्तलो धानुष्काधिष्ठानं च अट्टालको भवति, तत्र स्थिता धन्विनो नराः सर्वतः शरान् क्षिपन्ति। विश्वासघाति तिर्यगवस्थितो नगरस्य बहिःपरिघो यन्त्रविश्लेषणेन हन्ति। सङ्घाटि दीर्घकाष्ठसङ्घटित-मट्टालकादिप्रदीपनार्थमग्नियन्त्रम्। यानकं चक्रारूढं दण्डायतं फलककोष्ठि। पर्जन्यकमग्निप्रशमनार्थ-मुदकयन्त्रम्, अन्ये तु–पञ्चाशद्धस्तायतं बहिः प्राकारस्य सन्ततं यन्त्रविश्लेषणेन समीपगतं व्यापादयतीत्या-चक्षते। विश्वासघातिनोऽस्य च विशेषः–तत् प्रच्छन्नं लघुतरं च भवति, एतत्तु तद्विपरीतमिति। बाहुयन्त्रं पर्जन्यकार्धप्रमाणं स्तम्भद्वयं परस्पराभिमुखं यन्त्रविश्लेषणेन मारयति। ऊर्ध्वबाहु ऊर्ध्वस्थितः पर्जन्यकप्रमाणो महास्तम्भः समीपगतान् यन्त्रविश्लेषणेन हन्ति। अर्धबाहु पूर्वस्यैवार्धप्रमाणम्। इत्येवमेतानि दश स्थितयन्त्राणि" इति।

The authority in the charge of the armoury shall employ experienced workers of proven ability to manufacture, in a given time and for fixed wages, wheels, weapons, armour and other construmetns for use in battles, in the construction of defence of forts, or in destroying the cities or strong holds of enemies. They (weapons etc.) shall be kept in one's own armoury. They shall be moved once in a while so as to be exposed to the sun and the wind. Such weapons as are likely to be affected by vapour, heat and worms may be kept apart. They shall be (periodically) examined with reference to the class to which they belong, their characteristics, their size, their source, their value and their total quantity.

The immovable machines (or contrivances) are : Sarvatobhadra (a cart with wheels capable of rapid revolution. In rotation it throws arrows into different directions. It is also called Bhūmikāyantra capable of throwing small stones into different directions); Jāmadagnya (a large contrivance to shoot arrows); Bahumukha (An aṭṭālaka (tower) situated on the top of a fort and provided with a leather cover and facing all directions, so that a number of archers could send their arrows to different directions); Viśāvasaghātī (a cross beam put across a ditch so that soldiers crossing over will fall down when they tread on it); Sanghāṭi (a long pole to set fire to the turrets and other parts of the fort); Yānaka (a rod mounted on a wheel so as to be directed against the enemies); Parjanyaka (a water machine or gun to put out fire; others say that it is a machine fifty hands long and kept outside a fort to be thrown against an approaching enemy); Ardhabāhu (Two pillars arranged in such a way that it could be caused to fall on the enemy soldiers to kill them); and urdhvabāhu (A large pillar placed atop so as to fall on the enemy.

पञ्चालिकदेवदण्डसूकरिकामुसलयष्टिहस्तिवारकतालवृन्तमुद्गरद्रुघणगदास्पृक्तलाकुद्दाला-स्फोटिमोद्धाटिमोत्पाटिमशतघ्नीत्रिशूलचक्राणि चलयन्त्राणि।

चलयन्त्राण्याह–**पञ्चालिकेत्यादि**। पञ्चालिकं तीक्ष्णमुखनिरन्तरसारदारुफलकं प्राकाराद् बहिरुदकमध्ये शत्रुमार्गनिरोधार्थं क्रियते। देवदण्डः कीलरहितः महास्तम्भः प्रतीतरोचाभिधान इति स्वामी। स प्राकारस्योपरि स्थाप्यते। सूकरिका सूत्रचर्ममयी कार्पासोर्णादिपूर्णमध्या महाभस्त्रा प्रमाणतो गोपुराट्टालकदेवपथादीनां प्रच्छादनी बाह्यपाषाणनिवारणाय क्रियत इति केचित्। 'वेणुमयी चर्मावृता सूकराकारा प्राकारग्रहणनिवारणाय क्रियत इत्यन्ये' इति स्वामी। मुसलयष्टिः खादिरः शूलः। हस्तिवारको 'द्विमुखस्त्रिमुखो वेति केचित्। हस्त्याघाताय हस्तिपरिघ इत्यपरे' इति स्वामी। तालवृन्तं वातचक्रम्। मुद्गरः प्रसिद्धः। दुघणो मुद्गराकारः। गदा लगुडी। स्पृक्तला गदैव कण्टकनिचिता। कुद्दालः खनित्रम्। आस्फोटिमं चर्मावृतं चतुःस्तम्भं मृत्पाषाणक्षेपणयन्त्रम्। उद्घाटिमं मुद्गराकृतिरेव यन्त्रभेदः। उत्पाटिमं स्तम्भाद्युत्पाटनं श्येनयन्त्रम्। शतघ्नी स्थूलदीर्घकीलाचितो महास्तम्भः पर्यन्ताहितशकटचक्रः प्राकारोपरि क्रियते। त्रिशूलचक्रे प्रसिद्धे। इत्येतानि सप्तदश चलयन्त्राणि। श्लोकश्चात्र भट्टस्वामिनः–

व्यधितं भ्रामितं चैव भारयुक्तं च कारयेत्।
पीडनाद् भ्रमणाद् भारात् त्रिधा यन्त्रं प्रवर्तते।। इति।

The movable machines (or contrivances are (enumerated as) : Pañcālika (a contrivance in the form of a big wooden board with nails on its surface to be placed in water outside the fort wall to arrest the onward march of enemy soldiers); Devadaṇḍa (a long pole with iron nails attached to it to be put atop fort wall); Sūkarikā (a leather with cotton to serve as cushion for the protection of the towers against stones sent by enemies; some take it as a mat made of bamboo rafters and covered with leather); Musala (a club made of Khadira (Mimosa Catechu wood); Yaṣṭi (a big pole made of hard wood like Khadira); Hastivāraka (a big rod with two or three points to drive the elephants back); Tālavṛnta (a fan-like disc); Mudgara (a club with thorny head); Gadā (a club or cudgel) Sprktala (a club with thorny head); Kuddāla (a spade); Āsphāṭima (A set of four wooden sticks covered with leather to throw stones), Udghāṭima (a club-like contrivance); Utpāṭima (a contrivance to uproot pillars—'up rooter'); Śataghnī (a big pole with numerous sharp points on its surface—usually put atop a fort); Triśūla (a trident) and Cakra (a disc).

शक्तिप्रासकुन्तहाटकभिण्डिपालशूलतोमरवराहकर्णकणयकर्पणत्रासिकादीनि च हलमुखानि।

तालचापदारवशार्ङ्गाणि कार्मुककोदण्डद्रूणा धनूंषि।

आयुधान्याह–**शक्तिप्रासेत्यादि**। शक्तिः सर्वलोहमयं करवीरपत्राकृतिमुखम् अधस्ताद् गोस्तनाकारं चतुर्हस्तदीर्घमायुधं, प्रासश्चतुर्विंशत्यङ्गुलो द्विपीठः सर्वलोहमयः काष्ठगर्भश्च, कुन्तः–

हस्ताः सप्तोत्तमः कुन्तः षड्ढस्तैश्चैव मध्यमः।
कनिष्ठः पञ्चहस्तैस्तु कुन्तमानं प्रकीर्तितम्।।

इत्युक्तलक्षण:, हाटकं त्रिकण्टकं कुन्ततुल्यप्रमाणं, भिण्डिपाल: कुन्त एव पृथुफल:, शूलम् एकमुखमनियतहस्तप्रमाणं, तोमर: शराकृतिशिख:–

चतुर्हस्त: कनिष्ठस्तु चत्वारोऽर्धं च मध्यम:।
उत्तम: पञ्चहस्तस्तु प्रमाणात् तोमरो भवेत्।।

इत्यभिहितत्रिभेद:, वराहकर्ण: प्रास एव वराहकर्णाकृतिमुख:, कणय: सर्वलोहमय उभयतस्त्रिकण्टकाकारमुखो मध्यमुष्टि:,

कनिष्ठो विंशति: स्यात् तदङ्गुलानां प्रमाणत:।
द्वाविंशतिर्मध्यम: स्याच्चतुर्विंशतिरुत्तम:।।

इत्युक्तप्रकारत्रय:, कर्पण: तोमरतुल्यमानो हस्तक्षेप्य: पक्षयुक्त: शर:–

कनीय: सप्तकर्षं तु द्विपलं मध्यमं भवेत्।
उत्तमं नवकर्षं तु कर्पणस्य पलं भवेत्।।

इत्युक्तत्रिप्रकारपलप्रमाण:, त्रासिकां सर्वलोहमयी प्रासप्रमाणा चूडोपेता, इत्येवञ्जातीयान्यायुधानि, हलमुखानि तीक्ष्णाग्रत्वात्।

धनूंष्याह–तालेत्यादि। तालचापदारवशार्ङ्गाणि तालं तालमयं चापं वेणुविशेषमयं दारवं धन्वनादिसारवृक्षदारुनिर्मितं शार्ङ्गं विषाणमयम् इत्येवं चतुष्प्रकृतीनि, धनूंषि भवन्ति। तानि च कार्मुककोदण्डद्रूणा: आकृतिक्रियादिभेदात् कार्मुकादिसंज्ञानि भवन्ति। तत्र कार्मुककोदण्डयो: प्रमाणलक्षणादिकं धनुर्वेदादवगन्तव्यं, 'द्रूणस्तु लोकप्रतीत' इति स्वामी।

Weapons classified as Halmukha (with edges like a plough share) are :— Śakti (a metallic weapon looking like the leaf of Karavīra with a handle like a cow's nipple); Prāsa (a weapon 24 angulas (inches)—long with two handles); Kunta (a spear about eight hastas long—metallic Tip and wooden handle); Hāṭaka (a rod with three or four pointed edges); Bhiṇḍipāla (a rod with a heavy top); Śūla (spear, a pointed rod without any fixed length); Tomara (a rod with an arrow-like tip of different lengths); Varāhakarṇa (a rod with its edges resembling the ear of a boar; Kaṇaya-a metallic weapon with both ends triangular in shape); Karpaṇa (an arrow to be thrown by the hand); and Trāsika (a metallic weapon like spear).

Bows made of Tāla (palmyrah), of Cāpa (a kind of bamboo), of dāru (a kind of wood) and Śṛṅga (horn) are respectively called kārmuka, kodaṇḍa, drūṇa and dhanus.

मूर्वार्कशणगवेधुवेणुस्नायूनि ज्या:।

वेणुशरशलाकादण्डासननाराचाश्च इषव:। तेषां मुखानि छेदनभेदनताडनान्यायसास्थिदारवाणि।

निस्त्रिंशमण्डलाग्रासियष्टय: खड्गा:। खड्गमहिषवारणविषाणदारुवेणुमूलानि त्सरव:।

परशुकुठारपट्टसखनित्रकुद्दालक्रकचकाण्डच्छेदनाः क्षुरकल्पाः।

यन्त्रगोष्पणमुष्टिपाषाणरोचनीदृषदश्चायुधानि।

ज्या आह–मूर्वेत्यादि। स्नायुर्वायुवाहिनी नाडी। शेषं प्रतीतम्। तत्र वेणुविदलज्या कोदण्डस्यैव, अन्ययोस्त्वन्या इति स्वामी।

इषूनाह–वेण्वित्यादि। तत्र वेणुरुटजचर्मियादिः, शरो जात्यशराख्यः स्तम्बः, शलाका सारदारुमयी, दण्डासनोऽर्धनाराचः, नाराचः सर्वलोहमयः। चकारो भ्रमरद्रोणमक्षिकादिसंग्रहार्थ इति स्वामी। इषुकर्माण्याह–तेषामिति। तेषाम् इषूणां, मुखानि अग्राणि, छेदनानि कर्तनानि, भेदनानि सशोणिताभिघातदायकानि, ताडनानि अशोणितप्रहारदायकानि च भवन्ति। मुखानां प्रकृतिमाह–आयसास्थिदारवाणीति। आयसानि अस्थिमयानि दारवाणि सारदारुमयानि च।

खड्गानाह–निस्त्रिंशेत्यादि। तत्र निस्त्रिंशो वक्राग्रः, मण्डलाग्रः ऋजुवृत्ताकाराग्रः, असियष्टिस्तनुदीर्घाकृतिः। त्सरुप्रकृतीराह–खड्गेत्यादि। खड्गो गण्डकमृगः, महिषः सैरिभः, वारणो गजः इत्येतेषां विषाणानि शृङ्गाणि दारूणि सारदारूणि वेणुमूलानि वंशमूलानि च, त्सरवः खड्गमुष्टयः।

क्षुरकल्पानाह–परशुकुठारेत्यादि। तत्र परशुः सर्वलोहमयश्चतुर्विंशत्यङ्गुलः, पट्टस उभयान्तत्रिशूलः, क्रकचः करपत्रं, काण्डच्छेदनः काण्डासिकः, शेषं प्रतीतम्।

यन्त्रेत्यादि। पाषाणशब्दस्य यन्त्रादिषु प्रत्येकं संबन्धः, यन्त्रपाषाणो यन्त्रक्षेप्यः पाषाणः, रोचनी दलनयन्त्रशिला, दृषद् महाशिला। चकारः समुच्चयार्थः। इत्येतानि आयुधानि।

Strings of bow are made up of Mūrvā (Sansviera Roxburghiana), arka (Catatropis Gigantia), śaṇa (hemp), gavedhu (coix barbata), veṇu (bamboo bark) and snāyu (sinew).

Various types of arrows are called veṇu, śara śalākā, daṇḍāsana and nārāca. The tips of arrows shall be made of iron, bone, or wood so as to cut, rend or pierce (the target).

The swords are : Nistrimśa (a sword with a crooked handle); Maṇḍalāgra (provided with a disc at the top) and Asiyaṣṭi (long and sharp sword). The handles of swords are made of horn of rhinoceros, buffalo, of the tusk of elephants, of wood or of the root of bamboo.

Paraśu (a scymitar), kuṭhāra (a dagger), paṭṭasa (with the shape of a trident), khanitra (a spade), kuddāla (a hoe), krakaca (a kind of saw) and kāṇḍacchedana (a big axe), are razor-like wepons.

Other weapons include : Yantrapāṣāṇa (a contrivance to throw stones), gospaṇa (pāṣāṇa)—a rod to throw stones; muṣṭipāṣāṇa—stone thrown by the hand; rocanī (mill-stone) and dṛṣat (stones to be hurld at the enemy).

लोहाजालजालिकापट्टकवचसूत्रकङ्कटशिंशुमारकखड्गिधेनुकहस्तिगोचर्मखुरशृङ्गसङ्घातं

वर्माणि। शिरस्त्राणकण्ठत्राणकूर्पासकञ्चुकवारवाणपट्टनागोदरिकाः। पेटीचर्महस्तिकर्णताल-मूलधमनिकाकवाटकिटिकाप्रतिहतवलाहकान्ताश्चावरणानि।

हस्तिरथवाजिनां योग्याभाण्डमालाङ्कारिकं सन्नाहकल्पनाश्चोपकरणानि। ऐन्द्रजालिक-मौपनिषदिकं च कर्म।

वर्माण्याह—लोहजालेत्यादि। लोहशब्दो जालादिषु चतुर्षु प्रत्येकं सम्बध्यते। लोहजालं सशिरस्त्राणा प्रावरणी, लोहजालिका मुण्डसन्नाहः, लोहपट्टो विबाहुसन्नाहः, लोहकवचं बाहुरहितं वक्षःपृष्ठमात्रावरणं, सूत्रकङ्कटः कार्पासादिसूत्रमयः सन्नाहः, शिंशुमारकादीनां पञ्चानां चर्मखुरशृङ्गसङ्घातश्च चतुरशिल्पिघटितानि त्वक्शफविषाणानि च, वर्माणि भवन्ति। तत्र शिंशुमारकः अम्बुकपिनामा जलचरः, खड्गी खड्गमृगः, धेनुको गोसदृशो गवय इति व्याख्येयं, सेरकपाठस्तु धेनुकस्थाने भाषाटीकायामुपलभ्यते। हस्ती गजः, गौर्वृषभः। शिरस्त्राणेत्यादि। शिरस्त्राणादयः सप्त च वर्माणि। तत्र शिरस्त्राणं शिरोमात्रावरणं, कण्ठत्राणं कण्ठमात्रावरणं, कूर्पासः अर्धबाहुकः, कञ्चुको जानुपर्यन्तः, वारवाणो गुल्फपर्यन्तः, पट्टो विबाहुरलोहमयः, नागोदरिका कराङ्गुलित्राणम्, इत्येतानि देहधार्याणि। करधार्याण्यावरणान्याह—पेटीत्यादि। पेट्यादयो नव। तत्र पेटी काष्ठवल्लीमयं खेटकं, चर्म चर्मफलकं, हस्तिकर्णः अवकुण्ठनफलकं, तालमूलं काष्ठनिर्मितं खेटकं, धमनिका सूत्रमयी, कवाटं काष्ठमयफलकभेदः, किटिका चर्मवेणुविदलमयी, अप्रतिहतः हस्तवारकाख्यः, वलाहकान्तः अप्रतिहत एव पर्यन्तबद्धलोहपट्टः, चः समुच्चये।

उपकरणान्याह—हस्तीत्यादि। हस्तिरथवाजिनां, योग्याभाण्डं शिक्षापरिकरभूतं कशाङ्कुशादिकम्, आलङ्कारिकम् अलङ्कारप्रयोजनकं पताकाक्षुरप्रमालादिकं, सन्नाहकल्पनाश्च वर्मतोमरशरीरावारकादयश्च, उपकरणानि। उपकरणान्तरमाह—ऐन्द्रेत्यादि। ऐन्द्रजालिकं कर्म अल्पसैन्यस्य बहुसैन्यत्वप्रदर्शन-मनग्नावग्निप्रदर्शनमित्येवञ्जातीयं मायिकम्, औपनिषदिकं च औपनिषदकाधिकरणोक्तं विषधूमाम्बुदूषण-प्रलम्भनादिप्रयोगतत्प्रतिक्रियालक्षणं, चकारादनुक्तमन्यच्च, कर्म, उपकरणपदानुवर्तनादुपकरणसंज्ञम्।

Lohajālika (a coat of iron to protect the body), paṭṭa (a coat of iron without the cover for arms); kavaca (a coat of iron with detectable pieces to protect head, trunk and arms) and sūtraka (cover to protect hips and waist and made of iron) are the varieties of armour made of iron or skins with hoofs and horns of porpoise, rhinoceros, bison, elephant or cow. Similarly śirastrāṇa (cover for the protection of the head), kaṇṭhatrāṇa (for the protection of the neck), kūrpāsa (for the protection of the trunk), kañcuka (a coat extending upto the knee joints), vāravāṇa (a coat extending as far as the heels) paṭṭa (a coat without cover for the arms) and nāgodarika (gloves) are the varieties of armour. Peṭi (a kind of mat or box made of creeper), carma (leather glove), hastikarṇa (a board to form a cover for the body); tālamūla (a wooden shield), dhamanika (a trumpet), kavāṭa (a kind of wooden board), kiṭikā (a cover made of leather or bamboo bark), apratihata (a protection for the hand) and valāhakānta (a variety of hand cover) are instruments used in self defence.

Ornaments for elephants, chariots and horses as well as goads and hooks to lead them in battle fields constitute accessory items.

(In addition) there are delusive and destructive contrivances together with new inventions of expert workmen.

कर्मान्तानां च,
इच्छामारम्भनिष्पत्तिं प्रयोगं व्याजमुद्दयम्।
क्षयव्ययौ च जानीयात् कुप्यानामायुधेश्वरः।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टादशोऽध्यायः आयुधागाराध्यक्षः, आदित एकोनचत्वारिंशः।।

कर्मान्तानां चेति। वक्ष्यमाणश्लोकान्वयि। श्लोकमाह–**इच्छामिति**। कुप्यानां कर्मान्तानां गतप्रकृताध्यायद्वयोक्तद्रव्यसम्बन्धिनां व्यापाराणां विषये, इच्छां राजरुचिम्, आरम्भनिष्पत्तिम् आरम्भसहितां निष्पत्तिं, राजेच्छानुसारेणोपक्रममर्थसिद्धिं चेत्यर्थः। प्रयोगम् उपयोगं, व्याजं दोषं, व्याजिमिति पाठे राजपण्यविक्रयेऽन्तरग्राह्यम्, उद्दयं लाभम्। उन्नयमिति भाषापाठश्च श्रेयान्। क्षयव्ययौ च क्षयं साधनच्छेदं व्ययं कर्मकरादिभक्तादिपरिव्ययं च, जानीयात् पर्यालोचयेत्, आयुधेश्वरः आयुधागाराध्यक्षः। इदं कुप्याध्यक्षस्याप्युपलक्षणम्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टादशोऽध्यायः आयुधागाराध्यक्षः, आदित एकोनचत्वारिंशः।।

The authority of armoury shall precisely ascertain the demand and supply of weapons, their application, their wear and tear as well as their decay and loss.

Thus the thirtyninth chapter of the Arthaśāstra of Kauṭalya entitled the authority of the armoury comes to an end. Here ends the eighteenth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 40

37. प्रक० तुलामानपौतवम्।

Section 37 : Authority of Weights and Measures

पौतवाध्यक्षः पौतवकर्मान्तान् कारयेत्।

धान्यमाषा दश सुवर्णमाषकः। पञ्च वा गुञ्जाः। ते षोडश सुवर्णः कर्षो वा। चतुष्कर्षं पलम्।

अष्टाशीतिगौरसर्षपा रूप्यमाषकः। ते षोडश धरणम्। शैम्ब्यानि वा विंशतिः।

विंशतितण्डुलं वज्रधरणम्।

अर्धमाषकः, माषकः, द्वौ, चत्वारः, अष्टौ माषकाः, सुवर्णो, द्वौ, चत्वारः, अष्टौ सुवर्णाः, दश, विंशतिः, त्रिंशत्, चत्वारिंशत्, शतमिति।

तुलामानपौतवमिति सूत्रम्। तुलाया उन्मानसाधनस्य मानस्य प्रस्थकुडुबादेश्च पौतवम् पोतुर्मानभाण्डशोधकः तस्य कर्म अकृतकरणं कृतशोधनं चेहाभिधीयत इति सूत्रार्थः। तुलाप्रतिमानं 'पौतवाध्यक्षे वक्ष्याम' इत्युक्तं सुवर्णाध्यक्षे। तदेतत् कुप्याङ्गत्वात् कुप्यानन्तरमभिधीयत इति सङ्गतिः।

पौतवेत्यादि। पौतवाध्यक्षः पौतवाधिकृतः, पौतवकर्मान्तान् तुलाकुडुवादिघटनकर्माणि, कारयेत्।

अभ्यर्हितत्वात् प्रथमं सुवर्णस्य प्रतिमानमाह–**धान्येत्यादि**। धान्यमाषाः दश सुवर्णमाषकः धान्यमाषदशकप्रतिमानं सुवर्णं माषकसंज्ञम्। पञ्च वा गुञ्जाः गुञ्जापञ्चकं वा, माषक इत्यनुवर्तनान्माषकसंज्ञम्। ते षोडश सुवर्णः कर्षो वा माषषोडशकं सुवर्णसंज्ञं भवति कर्षसंज्ञं वा। चतुष्कर्षं पलमिति चत्वारः कर्षाः पलाख्याः।

रूप्यस्य प्रतिमानमाह–**अष्टाशीतिरिति**। अष्टाशीतिः गौरसर्षपाः रूप्यमाषकः रूप्यस्यैको माषकः। ते रूप्यमाषकाः, षोडश, धरणं धरणाख्याः। शैम्ब्यानि विंशतिर्वा शिम्बिफलविंशतिर्वा धरणम्।

वज्राख्यस्य रत्नस्य प्रतिमानमाह–**विंशतीत्यादि**। विंशतितण्डुलं मध्यमाखण्डव्रीहितण्डुलप्रमाणं, वज्रधरणं भवति।

प्रतिमानसंख्या आह–**अर्धमाषक** इति। अर्धमाषकः, माषकः, द्वौ माषकौ, चत्वारः माषकाः, अष्टौ माषकाः। सुवर्णः, द्वौ सुवर्णौ, चत्वारः सुवर्णाः, अष्टौ सुवर्णाः, दश विंशतिः त्रिंशत् चत्वारिंशत् शतम् इति चतुर्दश भवन्ति।

The authority of weights and measures shall have the relevant items manufactured.

Ten seeds of māṣa (Phaseolus Radiatus) form one suvarṇamāṣa as also five seeds of guñja (Abrus Precatorius). Sixteen savarṇamāṣas form a suvarṇa or a karṣa and four karṣas make one pala.

Eightly-eight white mustard seeds form (the weight called) one silver māṣa. Sixteen of them make a dharaṇa which is equal to twenty Śaimbya seeds (śimbiphala).

Twenty grains of rice form one dharaṇa of a diamond (in weight).

(The measures or units of weight are enumerated as fourteen as follows) Ardha-māṣa (half a māṣa); one māṣa; two māṣas; four māṣas; eight māṣas; one suvarṇa; two suvarṇas; four suvarṇas; eight suvarṇas; ten suvarṇas; twenty suvarṇas, thirty suvarṇas; forty suvarṇas and one hundred suvarṇas are the different units of weight.

तेन धरणानि व्याख्यातानि।

प्रतिमानान्ययोमयानि मागधमेकलशैलमयानि, यानि वा नोदकप्रदेहाभ्यां वृद्धिं गच्छेयुरुष्णेन वा ह्रासम्।

षडङ्गुलादूर्ध्वमष्टाङ्गुलोत्तराः दश तुलाः कारयेल्लोहपलादूर्ध्वमेकपलोत्तराः। यन्त्रमुभयतः शिक्यं वा।

पञ्चत्रिंशत्पललोहां द्विसप्तत्यङ्गुलायामां समवृत्तां कारयेत्। तस्याः पञ्चपलिकं मण्डलं बद्ध्वा समकरणं कारयेत्। ततः कर्षोत्तरं पलं, पलोत्तरं दशपलं, द्वादश पञ्चदश विंशतिरिति पदानि कारयेत्। तत आ शताद् दशोत्तरं कारयेत्। अक्षेषु नद्धीपिनद्धं कारयेत्।

सुवर्णोक्तं प्रतिमानविधिं रूप्येष्वातिदिशति–तेनेति। तेन सुवर्णप्रतिमानकथनेन, धरणानि व्याख्यातानि रूप्यधरणानामपि धरणं द्वे चत्वारि अष्टौ दश विंशतिः त्रिंशत् चत्वारिंशत् शतमित्येवं प्रतिमानसंख्या योज्या इत्यर्थः। एवं धरणग्रहणेन रूप्यमाषकाणामप्युपलक्षणाद् अर्धमाषको माषको द्वौ चत्वार इत्यादयः शतान्तसंख्यास्तत्राप्यूहनीयाः।

कीदृशानि प्रतिमाानानीत्यत्राह–**प्रतिमानानीति**। प्रतिमानानि, अयोमयानि लोहमयानि, मागधमेकलशैलमयानि मगधदेशोत्पन्नशिलामयानि मेकलापरनामकाटवीराज्योद्भवशिलामयानि च भवन्ति। पक्षान्तरमाह–शङ्खशुक्तिप्रभृतीनि यानि, उदकप्रदेहाभ्यां जलार्द्रीकरणमललेपाभ्यां, वृद्धिम् आधिक्यम्, उष्णेन, ह्रासं वा न्यूनतां वा, न गच्छेयुः, तन्मयानि वा भवन्ति। तन्मयानीत्येतच्च यत्पदसामर्थ्यलभ्यम्।

दशविधास्तुला आह–**षडङ्गुलादिति**। षडङ्गुलात् षडङ्गुलायामात् प्रभृति, ऊर्ध्वम्, अष्टाङ्गुलोत्तराः अष्टाङ्गुलाधिकायामाः, दश तुलाः दशप्रकारास्तुलाः, कारयेत्। कियल्लोहपरिमाणाः, लोहपरादूर्ध्वमेकपलोत्तराः एकलोहपलात् प्रभृति एकैकलोहपलाधिकाः। तत्र प्रथमा षडङ्गुलायामा लोहपलप्रमाणा, द्वितीया

चतुर्दशाङ्गुलायामा लोहपलद्वयप्रमाणा, तृतीया द्वाविंशत्यङ्गुलायामा त्रिपललोहा च भवतीत्यनेन क्रमेणाष्टसप्तत्यङ्गुला दशपललोहा च दशमी तुला भवति। यन्त्रमुभयतः तुलायन्त्रस्योभयोः पार्श्वयोः, शिक्यं कारयेत् मेयमानयोर्युगपद्धारणार्थम्। वाशब्दादेकतः शिक्यं वा, तयोः पर्यायधारणसम्भवात्। ता एताः सुवर्णरूप्यतुलाः।

तदन्यतुलामाह—पञ्चत्रिंशदित्यादि। पञ्चत्रिंशत्पललोहां पञ्चत्रिंशत्पलप्रमाणलोहनिर्मितां, द्विसप्तत्यङ्गुलायामां त्रिहस्तदीर्घां, समवृत्तां तदाख्यां वर्तुलतयान्वितार्थां, कारयेत्। तस्याः, पञ्चपलिकं, मण्डलं देलं, बद्ध्वा, समकरणम् अनुन्नतानवनतोभयान्तचिह्नं, कारयेत्। ततः समचिह्नात् परतः, कर्षोत्तरं पलं कर्षोऽर्धपलं पादोनपलं पलमिति, कारयेत्। ततः पलोत्तरं दशपलम् एकं पलं द्वे त्रीणि चत्वारि पञ्च षट् सप्ताष्ट नव दशेति, ततः द्वादश पञ्चदश विंशतिरिति षोडश पदानि रेखाः, कारयेत्। तत इति। ततः विंशतेरुपरि, आ शतात् शतमभिव्याप्य, दशोत्तरं दशदशाधिकं त्रिंशच्चत्वारिंशत् पञ्चाशदित्यादिकं, कारयेत्। अक्षेषु पञ्चमदशमपञ्चदशादिषु, नद्ध्रीपिनद्धं वरत्राबन्धं वरत्राकाररेखाबन्धं, कारयेद् विशेषार्थम्। स्वामिटीकादर्शे तु नान्दीपिनद्धं स्वस्तिकमिति दृश्यते।

Similar series of weights (in units) shall also be made in dharaṇas.

Weights shall be made of (materials like) iron or of stones available in countries of Magadha and Mekala; or of such things as will neither contract when wetted or expand under the influence of heat.

Starting with a lever of six aṅgulas (inches) in length and of one pala in the weight of its metallic mass, they shall be made of ten different balances with levers successively increasing by one pala in weight of their metallic masses, and by eight aṅgulas in their length. A scale-pan shall be attached to each of them on one or both sides.

A balance termed samavṛtta (circular in shape) with its lever seventy-two aṅgulas long and weighing fifty-three palas in its metallic mass, shall also be made. A scale-pan of five palas (in weight) being attached its edge, the horizontal position of the lever (samakaraṇa) when weighing a karṣa shall be marked (on that part of the lever where, held by a thread, it stands horizontal).

Thereafter to the left of that mark symbols such as one pala, twelve palas, fifteen palas and twenty pālas shall be marked. After that each place of tens upto hundred shall be marked. In the place of Akṣas (fifth, tenth and fifteenth markings) the sign of Nāndi (the symbol of svastika) may be marked.

द्विगुणलोहां तुलामतः षण्णवत्यङ्गुलायामां परिमाणीं कारयेत्। तस्याः शतपदादूर्ध्वं विंशतिः, पञ्चाशत्, शतमिति पदानि कारयेत्।

विंशतितौलिको भारः।

दशधरणिकं पलम्। तत्पलशतमायमानी।
पञ्चपलावरा व्यावहारिकी भाजन्यन्तःपुरभाजनी च।

परिमाणीसंज्ञां तुलामाह–द्विगुणेत्यादि। अतः समवृत्तायाः, द्विगुणलोहां सप्ततिपललोहां, षण्णवत्यङ्गुलायामां चतुर्हस्तदीर्घां, परिमाणीं, कारयेत्। तस्याः शतपदादूर्ध्वं समवृत्तादर्शितदिशा कर्षादिक्रमेण कृताच्छतपदात् परतः, विंशतिः, तदूर्ध्वं पञ्चाशत्, तदूर्ध्वं शतम्, अर्थाच्छतद्वयम् इति पदानि कारयेत्।

विंशतीत्यादि। विंशतितौलिकः तुला नाम पलशतं विंशतितुलाप्रमाणः, भारः तत्संज्ञः।

अथ पूर्वोक्तात् सुवर्णपलादधिकं पलविशेषं सुवर्णरूप्यातिरिक्तद्रव्यपरिच्छेदोपयोगिनमाह–**दशधरणिकमिति**। दशधरणिकं पूर्वोक्तधरणदशकपरिमाणं, पलम्। तत्पलशतं तेषां दशधरणिकानां पलानां शतम्, आयमानी आय एव मीयते अनयेति व्युत्पत्तेरायमानीसंज्ञा तुला।

अन्यास्तिस्रस्तुला आह–**पञ्चपलावरेति**। सप्तपर्णवदिह वीप्सालोपौ। पञ्चभिः पञ्चभिः पलैः अवरा पूर्वपूर्वापेक्षया यथोत्तरं न्यूना पञ्चपलावरा तुला, व्यावहारिकी तदाख्या क्रयविक्रयोपयोगिनी, भाजनी तदाख्याभृत्यदेयार्था, अन्तःपुरभाजनी तदाख्या देवीकुमारादिदेयार्था च भवति। तत्र प्रथमा आयमानीतः पञ्चपलन्यूना पञ्चनवतिपला, द्वितीया व्यावहारिकीतस्तावन्न्यूना नवतिपला, तृतीया भाजनीतस्तावन्न्यूना पञ्चाशीतिपलेति विवेकः।

Parimāṇī (the variety of weighing balance) is to be made of twice as much metallic mass as that of samavṛtta (the circular variety) and nintysix aṅgulas in length. On its lever markings such as twenty, fifty and hundred above its initial weight of hundred shall be carved.

A bhāra (particular weight) consists of twenty tulas.

One pala means ten dharaṇis. One hundred such palas is called are Āyamānī (literally meaning that which measures the income of royalty).

A gradual decrease of five palas each are known as Public balance (vyāvaharika), Bhājani (servant's balance) and Antaḥpura bhājani (harem balance).

तासामर्धधरणावरं पलम्। द्विपलावरमुत्तरलोहम्। षडङ्गुलावराश्चायामाः।
पूर्वयोः पञ्चपलिकः प्रयामो मांसलोहलवणमणिवर्जम्।
काष्ठतुला अष्टहस्ता पदवती प्रतिमानवती मयूरपदाधिष्ठाना।
काष्ठपञ्चविंशतिपलं तण्डुप्रस्थसाधनम्। एष प्रदेशो बह्वल्पयोः।

व्यावहारिक्यादीनामपि पलादिमाने परस्परविशेषमाह–**तासामित्यादि**। तासां व्यावहारिक्यादीनाम्, अर्धधरणावरम् अर्धेनार्धेन धरणेन पूर्वपूर्वापेक्षया न्यूनं, पलं भवति। तद्यथा–दशधरणिकादायमानीपलादर्धोनं सार्धनवधरणिकं पलं व्यावहारिक्याः, ततोऽर्धोनं नवधरणिकं भाजन्याः, ततोऽर्धोनं सार्धाष्टधरणिकमन्तःपुरभाजन्या इति। द्विपलावरं द्वाभ्यां पलाभ्यां पूर्वपूर्वतो न्यूनम्, उत्तरलोहम् उत्तरासां लोहं भवति। षडङ्गुलावराश्च षट्षडङ्गुलन्यूनाश्च, आयामाः दैर्घ्याणि भवन्ति, अर्थादुत्तरासाम्। तद्यथा–पञ्चत्रिंशत्पललोहा द्विसप्तत्यङ्गुलायामा च यद्यायमानी, तदा त्रयस्त्रिंशत्पललोहा षट्षष्ट्यङ्गुलायामा च यद्यायमानी, तदा त्रयस्त्रिंशत्पललोहा

षट्षष्ट्यङ्गुलायामा च व्यावहारिकी भवति, एकत्रिंशत्पललोहा षष्ट्यङ्गुलायामा च भाजनी, एकोनत्रिंशत्पललोहा चतुष्पञ्चाशदङ्गुलायामा चान्तःपुरभाजनीति।

प्रयाममाह- **पूर्वयोरिति**। पूर्वयोः परिमाण्यायमान्योः, पञ्चपलिकः प्रयामः पलशते पञ्चपलमधिकदेयं भवति। मांसलोहलवणमणिवर्जं मांसलोहादीन् वर्जयित्वा, तेषां तु न प्रयामः।

काष्ठतुलामाह–**काष्ठेत्यादि**। काष्ठतुला सारदारुप्रकृतिस्तुला, अष्टहस्ता, पदवती एकद्वित्र्यादि-पदरेखोपेता, प्रतिमानवती प्रमाणपाषाणयुक्ता, मयूरपदाधिष्ठाना मयूरपदौ तदाकारस्तम्भौ अधिष्ठानमाधारो यस्यास्तादृशी, मयूरपदाधिष्ठितेति पाठे मयूरपदाश्रितेत्यर्थः। कर्तव्या।

काष्ठपञ्चविंशतीत्यादि। काष्ठपञ्चविंशतिपलम् इन्धनपलपञ्चविंशतिः, तण्डुलप्रस्थसाधनं प्रस्थमिततण्डुलपाकनिष्पादकं भवति। **एष प्रदेशो बह्वल्पयोरिति**। प्रस्थाधिकतण्डुलस्य प्रस्थन्यूनतण्डुलस्य चायमेव पाकापेक्षितकाष्ठमानव्यवस्थापनमार्गः। एतच्च कोष्ठागाराध्यक्षशेषम् असारस्याप्यमितो व्ययो न कर्तव्यः किमुत सारस्येति सामान्यज्ञापनद्वारेण प्राकरणिकेषु मानेष्ववधानोपदेशार्थं द्रष्टव्यम्।

A pala in each of the above successively falls short of the same (Āyamānī) by half a dharaṇi. The metallic mass of the levers of each of the above successively decreases in weight by two ordinary palas and in length by six aṅgulas (inches).

With exceptions to flesh, metals, salt and precious stones, an excess of five palas (shall be given to the king) when they are weighed in the first-named balances (i.e., samvṛta and Parimāṇi).

A wooden balance with a lever of eight hands long, provided with measuring marks and counter poise weights shall be erectcd on a pedestal like that of a peacock.

For cooking one prastha of rice, twenty five palas of firewood will be needed. This is the unit for the calcualtion of greater or lesser quantity (of wood).

इति तुलाप्रतिमानं व्याख्यातम्।

अथधान्यमापद्विपलशतं द्रोणमायमानम्। सप्ताशीतिपलशतमर्धपलं च व्यावहारिकम्। पञ्चसप्ततिपलशतं भाजनीयम्। द्विषष्टिपलशतमर्धपलं चान्तःपुरभाजनीयम्।

तेषामाढकप्रस्थकुडुबाश्चतुर्भागावराः।

षोडशद्रोणा खारी, विंशतिद्रोणिकः कुम्भः, कुम्भैर्दशभिर्वहः।

शुष्कसारदारुमयं समं चतुर्भागशिखं मानं कारयेत्। अन्तश्शिखं वा। रसस्य तु।

इति तुलेत्यादि। इति उक्तप्रकारेण, तुलाप्रतिमानं व्याख्यातं तुलाः षोडशविधाः प्रतिमानानि च चतुर्दशविधानि निरूपितानि।

अथ द्रोणाढकादिनिरूपणमारभते–**अथेत्यादि**। धान्यमाषद्विपलशतं तुलाद्वयमितधान्यमाषपूरणीयम्,

आयमानं नाम द्रोणम्। सप्ताशीतिपलशतमर्धपलं चेति। अर्थादायमानद्रोणादर्धत्रयोदशभिः पलैर्न्यूनं, व्यावहारिकं नाम द्रोणं भवति। पञ्चसप्ततिपलशतमिति। अर्थाद् व्यावहारिकद्रोणादर्धत्रयोदशपलैर्न्यूनं, भाजनीयं नाम द्रोणं भवति। द्विषष्टिपलशतमर्धपलं चेति। अर्थाद् भाजनीयद्रोणाद् अर्धत्रयोदशपलैर्न्यूनम्, अन्तःपुरभाजनीयं नाम द्रोणं भवति। इति चतुर्विधं द्रोणम्।

तेषामिति। तेषां चतुर्णां द्रोणानाम्, आढकप्रस्थकुडुबाः, चतुर्भागावराः क्रमेण चतुर्भागाः अवराः स्वस्वपूर्वचतुर्भागात्मका अत एव स्वस्वपूर्वतो निकृष्टाश्चेत्यर्थः। एतदुक्तं भवति-द्रोणचतुर्भाग आढक आढकचतुर्भागः प्रस्थः प्रस्थचतुर्भागः कुडुब इति।

द्रोणादुत्कृष्टान् मानविशेषानाह-षोडशेत्यादि। षोडशद्रोणमिता खारी, विंशतिद्रोणमितः कुम्भः, दशकुम्भमितो वहः।

मानसाधनान्याह-शुष्केत्यादि। शुष्कसारदारुमयं, समं तुल्यमूलाग्रं चतुर्भागशिखं शिखा मुखोपरितनावकाशः आ मुखाद् भागत्रयवतः शिखायां मेयचतुर्भागो यथा तिष्ठेत् तथा कृतशिखं, मानं, कारयेत्। अन्तश्शिखं वा अन्तर्गता आमूलमुखान्तावकाशान्तःप्रविष्टा शिखा पूर्वोक्तश्चतुर्भागावकाशो यस्य तत् तथाभूतं वा, मानं कारयेत्। धान्यादिमाने चायं विकल्पः। रसस्य त्विति। अन्तश्शिखमित्यनुवर्तते। तत्र तुशब्दोऽवधारणार्थः सम्बध्यते। तदयमर्थः-रसस्य घृततैलादेरन्तश्शिखमेव मानं भवतीति।

The weighing balance and the weights are thus enumerated.

One droṇa which is an Āyamāna (a measure of royal income) consists of two hundred palas in the grains of māṣa. One Vyāvahārīka droṇa (for public use) consists of one hundred and eighty seven and a half palas. One Bhājanīya (servant's measure) is to consist of one hundred and seventy five palas. One Antaḥpurabhājanīya (measure for harem) is to consist of one hundred sixty two and a half palas.

Āḍhaka, prastha and kuḍuba are each one fourth of the one previously mentioned (meaning one āḍhaka is equal to one fourth droṇa and the like.)

A khāri consists of sixteen droṇas; a kumbha consists of twenty droṇas and ten kumbhas form a vaha.

Measure made of dried wood shall be so made that when filled with grains, the conically heaped-up portion of the grains standing on the mouth of the measure is equal to one-fourth of the quantity to grains so measured; or the measures may also be made so that a quantity equal to the heaped-up portion can be contained within the measure (meaning measured level to the mouth). Liquids shall always be measured level to the mouth of the measure.

सुरायाः पुष्पफलयोः तुषाङ्गाराणां सुधायाश्च शिखामानं द्विगुणोत्तरा वृद्धिः।

सपादपणो द्रोणमूल्यम्। आढकस्य पादोनः। षण्माषकाः प्रस्थस्य। माषकः कुडुबस्य।

द्विगुणं रसादीनां मानमूल्यम्।

विंशतिपणाः प्रतिमानस्य। तुलामूल्यं त्रिभागः।

चतुर्मासिकं प्रातिवेधनिकं कारयेत्। अप्रतिविद्धस्यात्ययः सपादः सप्तविंशतिपणः। प्रातिवेधनिकं काकणिकमहरहः पौतवाध्यक्षाय दद्युः।

सुराया इत्यादि। सुरादीनां षण्णां शिखामानम् अस्ति। किन्तु द्विगुणोत्तरा वृद्धिः द्विगुणाधिका तस्य वृद्धिः। धान्यादिषु शिखामानं यदुक्तं चतुर्भागात्मकं तदिह द्वैगुण्यं यातीत्यर्थः। अतश्च सुरादीनां प्रस्थः पञ्चभिरेव कुडुबैर्भवति, न तु धान्यानामिव चतुर्भिः। तत्रापि सुरायाः बहिश्शिखासम्भवाभावात् प्रस्थोऽन्तश्शिखोऽर्थादन्तःप्रविष्टपञ्चकुडुबः कार्यः।

तुलामानभाण्डस्य मूल्यमाह–**सपादपण** इत्यादि। **माषकः कुडुबस्ये**त्येतदन्तमतिरोहितार्थम्।

द्विगुणमिति। रसादीनां घृततैलादीनां, द्विगुणं सपादपणादिपूर्वोक्तद्विगुणमर्धतृतीयपणादिकं, द्रोणादिमूल्यं भवति। धान्यमानापेक्षया रसादिमानानामन्तश्शिखत्वेन रूपपृथुत्वात् श्लक्ष्णतरदारुघटितत्वाच्च मूल्यद्वैगुण्योपपत्तिः।

विंशतीत्यादि। प्रतिमानस्य चतुर्दशविधप्रतिमानसमुदायस्य, विंशतिपणाः, मूल्यम्। **तुलामूल्यमित्यादि**। तुलामूल्यम् अनन्तरोक्तस्य विंशतिपणात्मकस्य प्रतिमानमूल्यस्य त्रिभागः।

चतुरित्यादि। चतुर्मासिकं चतुर्षु चतुर्षु मासेषु भवं, प्रतिवेधनमेव प्रातिवेधनिकं परिशोधनं, विनयादित्वाट्ठक्। कारयेत्। **अप्रतिविद्धस्येति**। अप्रतिविद्धस्य अपरिशोधितस्य तुलामानस्य, व्यवहारे, अत्ययो दण्डः, सपादः, सप्तविंशतिपणः। **प्रातिवेधनिकमिति**। प्रातिवेधनिकं परिशोधननिमित्तं, काकणिकम्, अहरहः प्रतिदिनं, पौतवाध्यक्षाय, दद्युः, दिवसस्यैका काकणीति क्रमेण मासचतुष्टयस्य सविंशति काकणीनां शतं शोधनकाले तुलामानव्यवहारिणोऽर्पयेयुरित्यर्थः।

As regards the wine, flowers, fruits, bran, charcoal and baked lime, twice the quantity for the heaped up portion (which comes to one-fourth of measure) shall be given in excess.

The price for a droṇa is one and one fourth pana; for an āḍhaka it is less by one-fourth (= three-fourth); six māṣas for a prastha and one māṣa for a kuḍuba.

The price of similar liquid measures is double the above (rates).

The superintendent shall check the weights and measures once in four months (by stamping them). A fine of twenty seven and one-quarter paṇas shall be imposed for using unstamped weights or measures. The traders are liable to pay one kākaṇi per day to the superintendent towards the charge of stamping the weights and measures.

Those who sell clarified butter are liable to give (to purchasers) one by thirty two part more as tapta vyāji (= compensation for decrease in the quantity of ghee owing to its liquid condition). Those who trade in oil shall give one by sixtyfour part more (on this account). In selling liquids the

traders shall give one by fifty part more as mānasrāva (= compensation for diminution in the quantity owing to its overflow or adhesion to the measuring can).

द्वात्रिंशद्भागस्तप्तव्याजी सर्पिषश्चतुष्षष्टिभागस्तैलस्य। पञ्चाशद्भागो मानस्रावो द्रवाणाम्।

कुडुबार्धचतुरष्टभागानि मानानि कारयेत्।
कुडुबाश्चतुरशीतिर्वारकः सर्पिषो मतः।
चतुष्षष्टिस्तु तैलस्य पादश्च घटिकानयोः।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनविंशोऽध्यायः तुलामानपौतवम्, आदितश्चत्वारिंशः ।।

रसादिप्रसङ्गाद् घृतादिगतं किञ्चिदाह–द्वात्रिंशदित्यादि। सर्पिषः घृतस्य विलापितस्य क्रीयमाणस्य, द्वात्रिंशद्भागः अधिकतया ग्राह्य इति वाक्यशेषः। तप्तव्याजी स तप्तव्याजीसंज्ञः। तैलस्य, चतुःषष्टिभागः ग्राह्यः। पञ्चाशद्भाग इति। पञ्चाशद्भागो मानस्रावः तदाख्यो, द्रवाणां ग्राह्यः। द्रवसामान्यविषयोऽयं मानस्रावः सर्पिस्तैलयोर्यथोक्तव्याज्या सह समुच्चीयत इत्याहुः।

कुडुबादीनामल्पपरिमाणानां मानसाधनान्याह–कुडुबार्धेत्यादि। प्रस्थचतुर्भागः कुडुब उक्तः। तस्य मानसाधनं कुडुबं कुडुबार्धं कुडुबचतुर्भागं कुडुबाष्टभागम् इत्येतानि मानानि, कारयेत् निर्मापयेत्।

अध्यायान्ते श्लोकमाह–कुडुबा इत्यादि सर्पिषः, चतुरशीतिः कुडुबाः यत्र मान्ति, स वारकस्तत्संज्ञः, मतः। तैलस्य तु, चतुःषष्टिः कुडुबाः यत्र मान्ति, स वारकः। अनयोः सर्पिर्वारकतैलवारकयोः, पादः चतुर्भागः, घटिका सर्पिर्घटिकाख्या तैलघटिकाख्या च, मता।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनविंशोऽध्यायस्तुलामानपौतवम्, आदितश्चत्वारिंशः।।

Measures of one kuḍuba, half-kuḍuba and one-eight parts of the same shall be manufactured.

A Vāraka (measure) is to contain eighty four kuḍubas of clarified butter; sixty four kuḍubas of oil. One fourth measure of these is called ghaṭika either of ghee or of oil.

Thus the fortieth chapter of the Arthaśāstra of Kauṭalya called authority of weights and measures comes to an end. Here ends the nineteenth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 41

38. प्रक० देशकालमानम्।

Section 38 : Measurement of Space and Time

मानाध्यक्षो देशकालमानं विद्यात्।

अष्टौ परमाणवो रथचक्रविप्रुट्। ता अष्टौ लिक्षा। ता अष्टौ यूकामध्यः। ते अष्टौ यवमध्यः। अष्टौ यवमध्याः अङ्गुलम्।

मध्यमस्य पुरुषस्य मध्यमाया अङ्गुल्या मध्यप्रकर्षो वाङ्गुलम्।

चतुरङ्गुलो धनुर्ग्रहः। अष्टाङ्गुला धनुर्मुष्टिः।

देशकालमानमिति सूत्रम्। देशो भूमिस्तद्विकारः प्राकारस्तम्भादिः कालस्त्रुटिलवादिः तयोर्मानमिति सूत्रार्थः। 'द्वादशहस्तादूर्ध्वमोजं युग्मं वा आ चतुर्विंशतिहस्ताद्' इति दुर्गविधाने, 'चतुर्दण्डान्तरा रथ्याः' 'पञ्चारत्नयो रथपथः' इति दुर्गनिवेशेऽन्यत्र च हस्तदण्डारत्न्यादीनां व्यवहारः कृतः। तेषां प्रमाणं तु नोक्तम्। तथा 'पूर्वे दिवसस्याष्टभागे रक्षाविधानमायव्ययौ च शृणुयाद्' इत्येवं राजप्रणिधौ कालविभाग उक्तः। तस्य मानं तु नोक्तम्। तदुभयमिह मानप्रसङ्गादुच्यत इति सङ्गतिः।

मानाध्यक्ष इति। मानाध्यक्षः पौतवाध्यक्षः, देशकालमानं, विद्यात् वक्ष्यमाणप्रकारेण जानीयात्।

अष्टाविति। अष्टौ, परमाणवः अतीन्द्रिया अणवः संहताः, रथचक्रविप्रुट् रथचक्रोत्थापितं चक्षुर्ग्राह्यमेकं रजो भवति। ता विप्रुषः, अष्टौ, लिक्षा। ता अष्टौ लिक्षाः, यूकामध्यः। ते यूकामध्याः, अष्टौ, यवमध्यः। अष्टौ यवमध्याः अङ्गुलमेकम्।

अङ्गुलस्य प्रकारान्तरमाह–**मध्यमस्येत्यादि**। अङ्गुलशतोत्सेधोऽर्धनवत्यङ्गुलपरिणाहो मध्यमः पुरुषः इति स्वामी। मध्यमस्य पुरुषस्य, मध्यमायाः अङ्गुल्याः हस्तमध्यमाङ्गुल्याः, मध्यप्रकर्षो मध्यप्रदेशपृथुत्वातिशयो वा, अङ्गुलम्।

चतुरङ्गुल इति। चत्वार्यङ्गुलानि, धनुर्ग्रहः धनुर्ग्रहसंज्ञानि। **अष्टाङ्गुलेति**। धनुर्ग्रहद्विगुणा धनुर्मुष्टिः।

The superintendent of lineal measures should have a thorough knowledge of measuring space and time.

Eight atoms are equal to one particle of dust thrown off by the wheel of a chariot. Eight such atoms form a likṣā. (louse). Eight likṣas form a yūkāmadhya (= a yūka of the medium size). Eight of them form a

yavamadhya (= barley of the middle size). Eight yavamadhyas form an aṅgula.

Or an aṅgula may be termed as the middle most joint of the middle finger of a man of medium size.

Four aṅgulas form a dhanurgraha. Eight aṅgulas form a dhanurmuṣṭi.

द्वादशाङ्गुला वितस्तिः छायापौरुषं च। चतुर्दशाङ्गुलं शमः शलः परिरयः पदं च। द्विवितस्तिररत्निः प्रजापत्यो हस्तः।

सधनुर्ग्रहः पौतवविवीतमानम्। सधनुर्मुष्टिः किष्कुः कंसो वा।

द्विचत्वारिंशदङ्गुलस्तक्ष्णः क्राकचिककिष्कुः स्कन्धावारदुर्गराजपरिग्रहमानम्। चतुष्पञ्चाशदङ्गुलः कुप्यवनहस्तः।

चतुरशीत्यङ्गुलो व्यामो रज्जुमानं खातपौरुषं च।

चतुररत्निर्दण्डो धनुर्नाळिका पौरुषं च।

गार्हपत्यमष्टशताङ्गुलं धनुः पथिप्राकारमानम्। पौरुषं च अग्निचित्यानाम्।

द्वादशेत्यादि। द्वादशाङ्गुला वितस्तिः तदाख्या। **छायापौरुषं** चेति छायापौरुषं शङ्कुप्रमाणं, तदपि द्वादशाङ्गुलमित्यर्थः। **चतुर्दशेत्यादि।** चतुर्दशाङ्गुलं शमसंज्ञं शलसंज्ञं परिरयसंज्ञं पदसंज्ञं च। **द्विवितस्तिरिति।** चतुर्विंशत्यङ्गुलोऽरत्निः। स प्राजापत्यो विश्वकर्मसम्मतो हस्तः।

सधनुर्ग्रह इति। धनुर्ग्रहयुक्तः चतुरङ्गुलाधिकः प्राजापत्यः अर्थादष्टाविंशत्यङ्गुलगानं पौतवविवीतमानं काष्ठतुलादेः पश्वर्थक्षेत्रादेश्च हस्तमानं भवति। **सधनुर्मुष्टिरिति।** अष्टाङ्गुलाधिकः प्राजापत्यः किष्कुसंज्ञः कंससंज्ञो वा।

द्विचत्वारिंशदित्यादि। द्विचत्वारिंशदङ्गुलः हस्तः, तक्ष्णः वर्धकेः कर्मणि, क्राकचिककिष्कुः करपत्रकर्ममानोपयोगी किष्कुः, स्कन्धावारदुर्गराजपरिग्रहमानं स्कन्धावारादीनां च मानं, भवति। **चतुष्पञ्चाशदित्यादि।** चतुष्पञ्चाशदङ्गुलः, कुप्यवनहस्तः द्रव्यवनकर्ममानहस्तः।

चतुरशीतीत्यादि। चतुरशीत्यङ्गुलः हस्तः, व्यामः, स च रज्जुमानं, खातपौरुषं च कूपादेः पुरुषमानं च भवति।

चतुररत्निरिति। चः संज्ञासमुच्चये। चतुररत्निप्रमाणस्य दण्डः धनुः नाळिका पौरुषम् इति चतस्रः संज्ञाः।

गार्हपत्यमिति। गृहपतिर्विश्वकर्मा तद्दृष्टं गार्हपत्यम्, अष्टशताङ्गुलं, धनुः तदाख्यम्। तच्च पथिप्राकारमानम् अध्वमानं प्राकारमानं च भवति। **पौरुषं चेति।** पुरुषमानम्, अग्निचित्यानाम् अग्निचयनविशेषाणाम्।

Twelve aṅgulas form a vitasti, which is also called a cchayāpauruṣa (= length of a shadow caste by a Śaṅku or gnomon).

Fourteen aṅgulas are variously called śama, śala pariraya and pada. Two vitastis form an aratni, prājāpatya or hasta.

One hasta along with a dhanurgraha is used in measuring balances and cubic measures. One hasta with a dhanurmuṣti is called kiṣku or kamsa. A carpenter and sawyer consider a kiṣku as consisting of forty two aṅgulas. This is to measure the grounds for the encampment of the army, forts and palaces. Fifty four aṅgulas is the measure in the case of timber of forests.

Eighty four aṅgulas of ropes are known as vyāma to measure the depth of digging in terms of man's height.

According to the school of Visvakarman four aratnis form a danda, which is also called dhanus, nālikā and pauruṣa.

One gārhapatyadhanus consisting of one hundred and eight aṅguals is the measure used by carpenters (grahapati) in measuring roads and fort walls. Pauruṣa (which is the same as above = 108 aṅgulas) is the measure for building sacrificial altars.

षट्कंसो दण्डो ब्रह्मदेयातिथ्यमानम्। दशदण्डा रज्जुः। द्विरज्जुकः परिदेशः। त्रिरज्जुकं निवर्तनम्।

एकतो द्विदण्डाधिको बाहुः। द्विधनुस्सहस्त्रं गोरुतम्। चतुर्गोरुतं योजनम्। इति देशमानम्।

कालमानमत ऊर्ध्वम्। तुटो लवो निमेषः काष्ठा कला नालिका मुहूर्तः पूर्वापरभागौ दिवसो रात्रिः पक्षो मास ऋतुरयनं संवत्सरो युगमिति कालाः।

निमेषचतुर्भागस्तुटः।
द्वौ तुटौ लवः।
पञ्च निमेषाः काष्ठा।
त्रिंशत् काष्ठाः कला।
चत्वारिंशत् कला नाडिका।

षट्कंस इत्यादि कंसषट्कप्रमाणः अर्थात् प्राजापत्यहस्ताष्टकप्रमाणः, दण्डः। सः ब्रह्मदेयातिथ्यमानं ब्रह्मदेयानाम् आतिथ्यानां च मानं भवति। ब्रह्मदेयानि ऋत्विगादिब्राह्मणदेयानि, आतिथ्यानि अतिथिभोजनार्थ-विसृष्टक्षेत्राणि। **दशदण्डेति**। अर्थाच्चत्वारिंशद्धस्तप्रमाणा, रज्जुः। **द्विरज्जुक** इति। विंशतिदण्डप्रमाणः, परिदेशः। **त्रिरज्जुकमिति**। त्रिंशद्दण्डप्रमाणं, निवर्तनं चतुरश्रनिवर्तनम्।

एकतो द्विदण्डाधिक इति। निवर्तनस्यैवैकपार्श्वे दण्डद्वयाधिकप्रमाणः पार्श्वान्तरेष्वनधिकप्रमाणः अर्थाद् द्वात्रिंशद्दण्डदीर्घस्त्रिंशद्दण्डविस्तारश्च मानविशेषः, बाहुस्तत्संज्ञः। **द्विधनुस्सहस्त्रमिति**। धनुस्सहस्त्रद्वय-प्रमाणं, गोरुतम्। स क्रोश इति व्यवह्रियते। **चतुर्गोरुतमिति**। अर्थात् क्रोशचतुष्टयं योजनसंज्ञम्। **इति देशमानमिति**। व्याख्यातमिति शेषः।

कालमानमित्यादि। व्याख्यास्यत इति शेषः। कालं सप्तदशधा विभज्यते—**तुट** इत्यादि।

तुटादीनि व्याचष्टे—निमेषेत्यादि। निमेषचतुर्भागः कालपरमाणुरिति स्वामी। परमाणुद्वयमिति भाषा। स तुटः तुटसंज्ञः। अयं तुटिस्त्रुटिरिति चोच्यते।

द्वौ तुटावित्यादि चत्वारिंशत्कला नाडिकेत्यन्तमतिरोहितम्।

Six kamsas (mentioned above) are equal to a daṇḍa to measure the lands to be gifted to the Brahmins. A rajju consists of ten daṇḍas and two rajjus form a parideśa while three rajjus form a nivartana (a square measure).

A length of two daṇḍas on a side is termed as a bāhu (= 32 measuring rods) a goruta (sound of a cow) is equal to the measure of two thousand dhanus. Four such gorutas form a yojanā. These are the lineal and square measures (to be understood).

Hereafter with regard to the measure of time. (The divisions of time are) enumerated as tuṭa, lava, nimeṣa, kāṣṭhā, kalā, nālikā, muhūrta, pūrvāparabhāgau (forenoon and afternoon), divasa, rātri, pakṣa, māsa, ṛtu (season), ayana (solstice), samvatsara (year) and yuga.

One fourth of a nimeṣa forms a tuṭa (= also referred to as tuṭi and struṭi).

Two tuṭas form a lava.

Two lavas form a nimeṣa

Five nimeṣas form a kāṣṭhā

Thirty kaṣṭhās form a kalā

Forty kalas form a nāḍikā.

सुवर्णमाषकाश्चत्वारश्चतुरङ्गुलायामाः कुम्भच्छिद्रमाढकमम्भसो वा नाळिका।

द्विनालिको मुहूर्तः। पञ्चदशमुहूर्तो दिवसो रात्रिश्च चैत्रे मास्याश्वयुजे च मासि भवतः। ततः परं त्रिभिर्मुहूर्तैरन्यतरः षण्मासं वर्धते ह्रसते चेति।

छायायामष्टपौरुष्यामष्टादशभागश्छेदः, षट्पौरुष्यां चतुर्दशभागः, चतुष्पौरुष्यामष्टभागः, द्विपौरुष्यां षड्भागः, पौरुष्यां चतुर्भागः, अष्टाङ्गुलायां त्रयोदशभागाः, चतुरङ्गुलायाम् अष्टभागाः, अच्छायो मध्याह्न इति।

नालिकायाः प्रकारान्तरमाह—सुवर्णेत्यादि। सुवर्णमाषकाश्चत्वारश्चतुरङ्गुलायामा इति मेयमानयोरभेदोपचारात् सुवर्णमाषकचतुष्टयप्रमाणा चतुरङ्गुलदीर्घा जलनिर्गमनालशलाकोच्यते, कुम्भच्छिद्रं तत्समानं जलधारकघटच्छिद्रम्, आढकमम्भसः तत्कुम्भगतमाढकमितं जलम्, इतिशब्द इहाध्याहार्यः, इति वा नालिका इत्येतत्त्रितययोगेन वा नालिका परिच्छिद्यते। यथोक्तमानशलाकायुक्तच्छिद्रात् कुम्भादाढकपरिमितं जलं छिद्रतो यावता कालेन गलति सा वा नालिकेत्यर्थः।

द्विनालिक इति। नालिकाद्वयं मुहूर्तः। एतदुत्तरं पूर्वापरभागयोर्व्याख्यानं क्रमप्राप्तम्। तत्तु न कृतं

सुबोधत्वात्। तौ हि मुहूर्तान्तानामुक्तानां वक्ष्यमाणानां च दिवसादीनां यथासम्भवं पूर्वभागोत्तरभागौ भवतः। तत्र पूर्वाह्णो दिवसपूर्वभागोऽपराह्णो दिवसोत्तरभागः। तथा पूर्वरात्रो रात्रिपूर्वभागोऽपररात्रो रात्र्युत्तरभाग इत्यादि यथाव्यवहारमूह्यम्। **पञ्चदशेत्यादि।** पञ्चदशमुहूर्तो दिवसो रात्रिश्च भवतः, किं सर्वेषु मासेषु, नेत्याह—**चैत्रे मासि आश्वयुजे मासि च** अर्थाद् विषुवयोर्द्वयोः। **ततः परमिति।** विषुवद्द्वयादुपरि, अन्यतरो दिवसो रात्रिश्च, त्रिभिर्मुहूर्तैः षण्मासं वर्धते ह्रसते च एकशश्चतुर्लवोपचयापचयक्रमेण मुहूर्तत्रयं यावत् षण्मासान् उपचीयते क्षीयते च। तत्र दिवसस्य चैत्रविषुवादुपरि वृद्धिः आश्वयुजविषुवादुपरि ह्रासः, रात्रेराश्वयुजविषुवादुपरि वृद्धिश्चैत्रविषुवादुपरि ह्रासः।

छायया कालमानमाह—**छायायामित्यादि।** छायायाम्, अष्टपौरुष्यां षण्णवत्यङ्गुलायां, दिवसस्य, अष्टादशभागः छेदः अष्टादशो भागः गतांशः त्रिंशन्नाडिकासु पादोनं नाडिकाद्वयमतीतं ज्ञेयं सपादाष्टाविंशति-नाडिकास्तु शेषाः। षट्पौरुष्या द्विसप्तत्यङ्गुलायां छायायां, चतुर्दशभागः छेदः त्रयोदश तु शेषाः। चतुष्पौरुष्याम् अष्टाचत्वारिंशदङ्गुलायाम्, अष्टभागः छेदः अर्धयामो गतः सप्त शेषाः। द्विपौरुष्यां चतुर्विंशत्यङ्गुलायां, षड्भागश्छेदः पञ्चनालिका गताः पञ्चविंशतिस्तु शेषाः। पौरुष्यां द्वादशाङ्गुलायां, चतुर्भागश्छेदः यामो गतः यामत्रयमवशिष्टम्। अष्टाङ्गुलायां छायायां, त्रयो दशभागाः दशधा विभक्तस्य दिवसस्य त्रयो दशमांशाः अर्थान्नवनालिकाः, छेदः, एकविंशतिस्तु नालिकाः शिष्टाः। चतुरङ्गुलायाम्, अष्टभागाः अष्टधा विभक्तस्य दिवसस्य त्रयोऽष्टमांशाः गता विज्ञेयाः, पञ्च तु शिष्टाः। अच्छायः शङ्कुप्रविष्टच्छायो, मध्याह्नो भवति।

A nāḍikā is that period of time during which one āḍhaka of water passes out of a pot through an aperture of the same diameter as that of a wire of four aṅgulas in length and made of four māṣas of gold.

Two nāḍikās form a muhūrta; fifteen muhūrtas form a day or night in the month of Caitra and Āśvayuja. Then after the period of six months it increases or diminishes by three muhūrtas.

When the length of shadow is eight pauruṣas (= 96 aṅgulas) it is the one-eighteenth (1/18) part of the day. When it is six pauruṣas (= 72 aṅgulas) it is one-fourteenth (1/14) part of the day; when four pauruṣas it is one-eighth (1/8) part; when two pauruṣas it is one-sixth (1/6) part; when it is one pauruṣa it is one fourth 1/4) part; when it is eight aṅgulas it is three-tenth (3/10) part and when no shadow is cast, it is to be cosidered as midday.

परावृत्ते दिवसे शेषमेवं विद्यात्।

आषाढे मासि नष्टच्छायो मध्याह्नो भवति। अतः परं श्रावणादीनां षण्मासानां व्यङ्गुलोत्तरा माघादीनां व्यङ्गुलावरा छाया इति। पञ्चदशाहोरात्राः पक्षः। सोमाप्यायनः शुक्लः। सोमावच्छेदनो बहुलः।

मध्याह्नात् परतोऽप्येवमेवच्छायामानं, किन्तु छेदस्थाने शेषकल्पनया विज्ञेयमित्याह—**परावृत्त** इति। परावृत्ते दिवसे मध्याह्नात् परतः, शेषं गतावशिष्टं दविसभागम्, एवं विद्यात् चतुरङ्गुलायां त्रयोऽष्टभागा इत्यादिना छायायामष्टपौरुष्यामष्टादशभाग इत्यन्तेन प्रकारेणाष्टभागत्रयप्रभृतिमष्टादशभागान्तं जानीयात्।

आषाढ इति। आषाढे मासि आषाढमासान्ते, नष्टच्छायोऽच्छाय:, मध्याह्न: भवति। अत: परं, श्रावणादीनां षण्मासानां पौषान्तानां, द्व्यङ्गुलोत्तरा द्विद्व्यङ्गुलक्रमवृद्धा छाया भवति। तद्यथा–श्रावणस्यान्ते द्व्यङ्गुलाभाद्रपदस्य चतुरङ्गुला आश्वयुजस्य षडङ्गुला कार्त्तिकस्याष्टाङ्गुला मार्गशीर्षस्य दशाङ्गुला पौषस्य द्वादशाङ्गुलेति। अत: परं, माघादीनां षण्मासानामाषाढान्तानां, द्व्यङ्गुलावरा द्विद्व्यङ्गुलक्रमक्षीणा, छाया, भवति। यथा–माघस्यान्ते दशाङ्गुला छाया फाल्गुनस्याष्टाङ्गुला चैत्रस्य षडङ्गुला वैशाखस्य चतुरङ्गुला ज्येष्ठस्य द्व्यङ्गुला आषाढस्य तु शङ्कुप्रविष्टेति।

पञ्चदशेत्यादि। पञ्चदशाहोरात्रसमुदाय: पक्षसंज्ञ:। तत्र सोमाप्यायन: चन्द्रवृद्धिकर: पक्ष:, शुक्ल: तत्संज्ञ:। सोमावच्छेदन: चन्द्रक्षयकर:, बहुल: तदाख्य:।

Similarly when the day declines, the same process at reverse order shall be observed.

In the month of Āṣāḍha no shadow is cast at midday. Thereafter for six months from Śrāvaṇa the length of shadow successively increases by two Aṅgulas and during the six months from Māgha upwards it successively decreases by two aṅgulas.

A pakṣa is made up of fifteen days and nights together. That in which the moon waxes is called Śukla (pakṣa) and that during which the moon wanes is bahula.

द्विपक्षो मास:।
त्रिंशदहोरात्र: प्रकर्ममास:।
सार्ध: सौर:।
अर्धन्यूनश्चान्द्रमास:।
सप्तविंशतिर्नाक्षत्रमास:।
द्वात्रिंशद् मलमास:।
पञ्चत्रिंशदश्ववाहाया:।
चत्वारिंशद्धस्तिवाहाया:।
द्वौ मासावृतु:।
श्रावण: प्रोष्ठपदश्च वर्षा:।
आश्वयुज: कार्त्तिकश्च शरत्।
मार्गशीर्ष: पौषश्च हेमन्त:।
माध: फाल्गुनश्च शिशिर:।

द्विपक्ष इति। उक्तौ शुक्लबहुलपक्षौ समुदितौ, मास:, स एव सावन:।

त्रिंशदहोरात्र इति। त्रिंशदहोरात्रसमुदाय:, प्रकर्ममास: कर्मकरभृतिगणनीयो मास:।

सार्ध इति। अर्धाहोरात्रसहितस्त्रिंशदहोरात्र:, सौर: सौरमास:।

अर्धन्यून इति। अर्धाहोरात्रन्यूनस्त्रिंशदहोरात्र:, चान्द्रमास:।

सप्तविंशतिरिति। सप्तविंशत्यहोरात्रो नाक्षत्रमासः।

द्वात्रिंशदिति। द्वात्रिंशदहोरात्रो मलमासः।

पञ्चत्रिंशदिति। पञ्चत्रिंदहोरात्रः, तावन्मानो मासः, अश्ववाहायाः अश्वप्रवाहणस्य, अर्थादश्वकर्म-भृत्यानाम्। 'अथ प्रवाहणे। वाहा नृस्त्री स्त्रियां बाहौ' इति केशवस्वामी।

चत्वारिंशदित्यादि। चत्वारिंशदहोरात्रो गजशुश्रूषाकर्मकरवेतनमासः।

द्वाविति। उभौ द्विपक्षलक्षणौ मासौ मिलितौ ऋतुसंज्ञौ।

ऋतुं विभज्य व्याचष्टे–**श्रावण** इत्यादिना **ग्रीष्म** इत्यन्तेन। वर्षाः वर्षासंज्ञः। ज्येष्ठामूलीयः ज्येष्ठः। शेषं सुगमम्।

A month has two pakṣas.

Thirty day and nights make up a month to fix the wages of labourers.

Thirty days and nights with an additional half a days for a saura (solar) month.

The same (30) less by half a day makes a cāndra (lunar) month.

Twenty seven (days and nights) make a sideral month(= nakṣatra-māsa).

Thirty two day and nights form a Malamāsa (= Malayalam commentary takes the reading balamāsa and explain a month calculated for the salary of infantry soldiers). Thirty five day and nights are considered as a month for cavalry.

Forty day and nights are treated as a month for the keepers (driver) of elephants (mahouts).

Two months form one ṛtu (season)

Śrāvaṇa and proṣṭhapada make the rainy season (varṣā).

Āśvayuja and Kārtika make the autumn (śarad).

Mārgaśīrṣa and Pauṣa form the winter (hemanta)

Māgha and Phālguna make the dewy season (śisira).

चैत्रो वैशाखश्च वसन्तः।
ज्योष्ठामूलीय आषाढश्च ग्रीष्मः।
शिशिराद्युत्तरायणम्। वर्षादि दक्षिणायनम्।
द्व्ययनः संवत्सरः।
पञ्चसंवत्सरो युगमिति।
दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः।
करोत्येकमहश्छेदं तथैवैकं च चन्द्रमाः॥

एवमर्धतृतीयानामब्दानामधिमासकम्।
ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते च पश्चिमम्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
विंशोऽध्यायः देशकालमानम्, आदित एकचत्वारिंशः।।

शिशिरादीत्यादि। शिशिरप्रभृति ग्रीष्मान्तमृतुत्रयम्, उत्तरायणसंज्ञम्। वर्षादि हेमन्तान्तमृतुत्रयं, दक्षिणायनम्।

द्वययन इति। अयनद्वयात्मा संवत्सरो भवति।

पञ्चसंवत्सर इति। संवत्सरपञ्चकात्मकः कालो, युगं युगसंज्ञया व्यवह्रियते। इतिशब्दो व्यावहारिक-कालमानसमाप्तौ।

अधिमासं श्लोकद्वयेनाह–दिवसस्येति। अर्कः सूर्यः, दिवसस्य अहोरात्रस्य, षष्टिभागम् एकघटिकात्मकं, हरति प्रतिदिवसं छिनत्ति। ततः प्रतिदिवसमेकघटिकाहरणात्, ऋतौ षष्टिदिवसात्मकमास-द्वयावसाने, एकमहश्छेदम् एकमधिकमहोरात्रं, करोति उत्पादयति। तथैव अर्कवदेव, चन्द्रमाश्च एकम् अहश्छेदं करोति। एवम् अनेन प्रकारेण, अर्धतृतीयानामब्दानाम् अर्धोनतृतीयानां वर्षाणाम् अर्थान्माघप्रभृतीनां त्रिंशतो मासानां, ग्रीष्मे पूर्वम्। अधिमासकम् अधिकमासं त्रिंशत्तमं द्वितीयम् आषाढं, पञ्चाब्दान्ते अर्थात् पुनरर्धतृतीयवर्षात्मनां श्रावणप्रभृतीनां त्रिंशतो मासानामन्ते, पश्चिममधिमासकं च उत्तरमधिकमासं च अर्थात् त्रिंशत्तमं द्वितीयं पौषं च, जनयतः, अर्कचन्द्रमसौ।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
विंशोऽध्यायः देशकालमानम्, आदित एकचत्वारिंशः।।

Caitra and Vaiśākha form the spring (vasanta).

Jyeṣṭhāmūlīya and Āṣāḍha make the summer (grīṣma).

Seasons from Śisira upwards are the summer solstice (uttarāyaṇa) and those from varṣa upwards are the winter solstice (dakṣiṇāyaṇa).

Two solstices (ayanas) make one year (samvatsara).

Five years make one yuga.

The sun carries of one-sixtieth (1/60) of a whole day every day and thus makes one complete day in every two months (= a ṛtu or season). Likewise the moon falls behind by one-sixtieth (1/60) of a whole day every day and falls behind one day in every two months. Thus in the middle of every third year (they, the sun and moon make one adhimāsa, an additional month, first in the summer season and second in the end of five years.

Thus the forty first chapter of the Arthaśāstra of Kauṭalya called 'measurement of space and time' comes to an end. Here ends the twentieth chapter of the second Adhikaraṇa called Adhykṣaplacāra.

Chapter 42

39. प्रक० शुल्काध्यक्षः।

Section 39 : Superintendent of Tolls

शुल्काध्यक्षः शुल्कशालां ध्वजं च प्राङ्मुखम् उदङ्मुखं वा महाद्वाराभ्याशे निवेशयेत्।

शुल्कादायिनश्चत्वारः पञ्च वा सार्थोपयातान् वणिजो लिखेयुः– के कुतस्त्याः कियत्पण्याः क्व चाभिज्ञानमुद्रा वा कृतेति।

अमुद्राणामत्ययो देयद्विगुणः।

कूटमुद्राणां शुल्काष्टगुणो दण्डः।

भिन्नमुद्राणामत्ययो घटिकाः स्थाने स्थानम्।

शुल्काध्यक्ष इति सूत्रम्। शुल्कः राज्ञे देयं पञ्चेदशभागादि तस्य अध्यक्षः शुल्काध्यक्षः। तद्व्यापारोऽभिधीयते इति सूत्रार्थः। देशविशेषभूतदुर्गसम्बन्धित्वाद् मानपरिच्छेद्यनानाभाण्डविषयत्वाच्च शुल्कस्य देशमानानन्तरमभिधानसङ्गतिः।

शुल्काध्यक्ष इति। शुल्कशालाध्यक्षः, शुल्कशालां शुल्कग्रहणावस्थानं, ध्वजं च तच्चिह्नं च, प्राङ्मुखमुदङ्मुखं वा, महाद्वाराभ्याशे प्रधानद्वारसमीपे, निवेशयेत् कारयेत्।

शुल्कादायिन इति। शुल्कग्राहिणः, चत्वारः पञ्च वा पुरुषाः शुल्काध्यक्षनियुक्ताः, सार्थोपयातान् सभाण्डोपगतान्, वणिजो नैगमान्, लिखेयुः। किं कृत्वा, के कुतस्त्या इत्यादि पृष्ट्वेति शेषः। तत्र क इति नामजातिविषयः प्रश्नः, कुतस्त्या इति निवासविषयः, कियत्पण्या इति विक्रेयवस्तुपरिमाणविषयः, क्व चाभिज्ञानमुद्रेति अन्तपालकृतपण्यविशेषज्ञप्तिमुद्राविषयः। शुल्कादायिनां बहुत्वं विसंवादपरिहारार्थम्।

अमुद्राणामिति। मुद्रारहितानां वणिजाम्, अत्ययः दण्डः, देयद्विगुणः अन्तपालदेयवर्तनीद्विगुणः। वर्तनी त्वनुपदं वक्ष्यते।

कूटेत्यादि। कूटमुद्राणां कपटकृतमुद्राणां, शुल्काष्टगुणो दण्डः।

भिन्नेत्यादि। भिन्नमुद्राणामत्ययः गृहीतनष्टमुद्राणां दण्डः, घटिकाः स्थाने स्थानं वणिगन्तरदृश्ये क्वापि शुल्कशालैकदेशे घटिकात्रयकालावस्थानं भवति। घटिका इति स्थानक्रियात्यन्तसंयोगे द्वितीया, कपिञ्जलाधिकरणन्यायेन च तासां त्रित्वम्।

The superintendent of tolls shall build near the larger gate of the city

both the toll-house and its flag, facing either the north or the east. Four or five collectors shall be engaged to take the down the detail of the merchants who arrive as to who they are, whence they come, what quantity of merchandise they have brought with them and when did they stamp the seal mark for the first time on the merchandise.

Those who have not already stamped the merchandise are liable to pay twice the amount of toll. For stamping with a counterfeit seal, they shall be levied eight times of the toll. If the seal is effaced or torn the merchants are required to be put in detention (for a short period).

राजमुद्रापरिवर्तने नामकृते वा सपादपणिकं वहनं दापयेत्।

ध्वजमूलोपस्थितस्य प्रमाणमर्घं च वैदेहकाः पण्यस्य ब्रूयुः– एतत्प्रमाणेनार्घेण पण्यमिदं कः क्रेतेति। त्रिरुद्घोषितमर्थिभ्यो दद्यात्। क्रेतृसङ्घर्षे मूल्यवृद्धिः। सशुल्का कोशं गच्छेत्।

शुल्कभयात् पण्यप्रमाणं मूल्यं वा हीनं ब्रुवतस्तदतिरिक्तं राजा हरेत्। शुल्कमष्टगुणं वा दद्यात्।

तदेव निविष्टपण्यस्य भाण्डस्य हीनप्रतिवर्णकेनार्घापकर्षणे सारभाण्डस्य फल्गुभाण्डेन प्रतिच्छादने कुर्यात्।

प्रतिक्रेतृभयाद् वा पण्यमूल्यादुपरि मूल्यं वर्धयतो मूल्यवृद्धिं राजा हरेद्, द्विगुणं वा शुल्कं कुर्यात्।

राजेत्यादि। राजमुद्रापरिवर्तने, नामकृते वा परिवर्तन इत्यनुषङ्गात् कार्पासादिद्रव्याणां तूलादिनामनिवेशेन नामव्यत्ययकरणे वा, सपादपणिकं पादाधिकपणदण्डं, वहनं पण्यहारकं, दापयेत्।

ध्वजेत्यादि। ध्वजमूलोपस्थितस्य शुल्कशालाङ्गणगतस्य पण्यस्य, प्रमाणम् इयत्ताम्, अर्घं च, वैदेहकाः वणिजः, ब्रूयुः, एतत्प्रमाणेनेत्यादिविधया। त्रिरुद्घोषितं यथोक्तप्रकारेण वारत्रयघोषणया श्रावितं, पण्यम्, अर्थिभ्यः क्रेतृभ्यः, दद्यात्, तेनैव वैदेहकनिर्दिष्टेनार्घेण। क्रेतृसंघर्षे क्रेतृणाम् अर्धवर्धनहेतुभूतपरस्परस्पर्धासम्भवे, मूल्यवृद्धिः वणिङ्निर्दिष्टप्रमाणादधिकं मूल्यस्य प्रमाणम्, इष्यत इति शेषः। किन्तु सशुल्का शुल्कसहिता सा मूल्यवृद्धिः, कोशं गच्छेत् राजभण्डागारं प्राप्नुयाद् निर्दिष्टमूल्यमात्रमेव तु वैदेहकानित्यर्थः। सशुल्कमित्यपि पाठः।

शुल्केत्यादि। शुल्कभयात्, पण्यप्रमाणं भाण्डेयत्तां, मूल्यं वा पण्यार्घं वा, हीनम् अवरं, ब्रुवतः, तदतिरिक्तं तदुक्तातिरिक्तं प्रमाणं मूल्यं चोपलभ्यमानं, राजा हरेत्। इति तद्दण्डविधिः। तद्विकल्पमाह– शुल्कमष्टगुणं वा दद्याद्, वणिक्।

तदेवेति। तदेव तदुक्तातिरिक्तं शुल्काष्टगुणं वा, निविष्टपण्यस्य पण्यपूरितस्य, भाण्डस्य, हीनप्रतिवर्णकेन निकृष्टप्रतिवर्णकप्रदर्शनेन, अर्घापकर्षणे मूल्यपातने, सारभाण्डस्य फल्गुभाण्डेन प्रतिच्छादने च महार्घस्य पण्यस्य मणिमुक्तादेरल्पार्घकार्पासतूलादिनावच्छादने च, कुर्यात्।

प्रतिक्रेतृभयादिति। प्रतिक्रेतृपुरुषविशेषक्रयणशङ्कया, पण्यमूल्यान्न्याय्याद्, उपरि, मूल्यं वर्धयतः क्रेतुः, तन्मूल्यवृद्धिं राजा हरेत्। द्विगुणं वा शुल्कं कुर्यादिति दण्डविकल्पः।

तदिति। तदेव वैदेहकानां तत्तदपराधे यद् देयं विहितं तदेव, अष्टगुणम्, अध्यक्षस्य, छादयत: वैदेहकापराधं मैत्रीलञ्चग्रहणादिना गोपयत:, कुर्याद् राजा।

When one kind of seal is used for another or when one kind of merchandise has been otherwise named (or declared as another object) the merchants shall pay a fine of one and one-quarter panams per to load.

Once the merchandise is placed near the flag of the toll-house, the merchants shall declare its quantity and price, and announce in a loud voice as to who will purchase this quantity of merchandise for this much amount of price. When the purchasers offer a higher price in the auction, the enhanced price together with the toll on the merchandise shall be paid into the royal treasury.

In case under the fear of a heavy toll the quantity or the price is purposefully lowered, the excess shall be consfiscated by the authority or the merchants shall be made to pay eight times the toll.

The same punishment shall be meted out when the price of the merchandise packed in bags is lowered by showing an inferior sort as its sample or when valuable merchandise is covered over with a layer of inferior one.

When under the apprehension of bidders enhancing the price beyond its original value of the merchandise the king shall receive the enhanced amount or twice the amount of toll on it. The same punishment of eight times the amount of tolls shall be imposed on the superintendent of tolls if he happens to conceal the merchandise.

तदेवाष्टगुणमध्यक्षस्याच्छादयत:।

तस्माद् विक्रय: पण्यानां धृतो मितो गणितो वा कार्य:, तर्क: फल्गुभाण्डानामानुग्रहिकाणां च।

ध्वजमूलमतिक्रान्तानां चाकृतशुल्कानां शुल्कादष्टगुणो दण्ड:। पथिकोत्पथिकास्तद् विद्यु:।

वैवाहिकमन्वायनयौपायनिकं यज्ञकृत्यप्रसवनैमित्तिकं देवज्याचौलोपनयनगोदानव्रतदीक्षणादिषु क्रियाविशेषेषु भाण्डमुच्छुल्कं गच्छेत्।

तस्मादिति। यथोक्तानृतव्यवहारसम्भवात्, विक्रय:, पण्यानां तोलनीयपरिमेयगणनीयानां, धृत: तुलातोलित:, मित: प्रस्थादिपरिमित:, गणितो वा, कार्य:। तर्क: इदमियत् स्यादिति मानार्घसम्भावनात्मा, कार्य:, फल्गुभाण्डानाम् अङ्गाराद्यल्पपण्यानाम्, आनुग्रहिकाणां लवणादीनां च।

ध्वजमूलमतिक्रान्तानामित्यादि। अकृत एव शुल्के शुल्कशालामतिक्रम्य गतानां विषये, शुल्कादष्टगुणो दण्ड:। पथिकोत्पथिका: पथिका: पथि वाणिज्यच्छलचारिण: उत्पथिका:। अनुज्ञातोत्पथगतागता-

स्तृणेन्धनहारकाः पशुपालकाश्च प्रणिहिताः, तद् अकृतशुल्कवणिगतिक्रमणं, विद्युः, अत एव साक्षिणश्च स्युर्विवादे।

अशुल्कनेयं भाण्डमाह–**वैवाहिकमिति**। वैवाहिकं विवाहप्रयोजनकम्, अन्वायनं परिणीतायाः पतिगृहं गच्छन्त्याः पितृगृहान्नीयमानम्, औपायनिकम् उपायनमन्त्रसत्राद्यर्थं उपहारः तत्प्रयोजनकं, यज्ञकृत्य-प्रसवनैमित्तिकं यज्ञकृत्यनैमित्तिकं पयोदधिघृतादिकं प्रसवनैमित्तिकं जातकर्मसूतिकाभेषजाद्यर्थं च, देवेज्यादिषु क्रियाविशेषेषु देवेज्या देवानां देवालयगतानाम् इज्या नित्यनैमित्तिकपूजोत्सवादिः चौलोपनयनगोदानानि संस्कारविशेषाः प्रसिद्धाः व्रतदक्षिणं दानविशेषादिलक्षणव्रतपरिग्रहः एवम्प्रकारेषु धर्म्यकार्येषु, भाण्डम्, उच्छुल्कम् अशुल्कं, गच्छेत्।

Hence the sale of commodities be effected only after they are properly weighed, measured or numbered. In the case of minor commodities as well as those which are let off free of toll, the amount shall be determined after due consideration.

The merchants who take their merchandise beyond the toll-house without paying the amount shall be rounded up and a punishment of eight times the normal toll may be realised. This fact is to be ascertained from way farers disguised as merchants (regarding the payment of toll).

The commodities that are exempted from paying the toll are— items intended for marriage or taken by a by a bride from her house to that of her husband; items of gifts, taken for sacrificial purposes; confinement of women; for the worship of gods, ceremony of tonsure; investiture of sacred thread; gift of cows and similar religious rite, consecration ceremony and similar functions.

अन्यथावादिनः स्तेयदण्डः।

कृतशुल्केनाकृतशुल्कं निर्वाहयतो द्वितीयमेकमुद्रया भित्त्वा पुटमपहरतो वैदेहकस्य तच्च तावच्च दण्डः।

शुल्कस्थानाद् गोमयपलालं प्रमाणं कृत्वापहरत उत्तमः साहसदण्डः।

शस्त्रवर्मकवचलोहरथरत्नधान्यपशूनामन्यतमानिर्वाह्यं निर्वाहयतो यथावघुषितो दण्डः पण्यनाशश्च।

तेषामन्यतमस्यानयने बहिरेवोच्छुल्को विक्रयः।

अन्यथावादिन इति। अवैवाहिकादिकमेव भाण्डं वैवाहिकादिकमिति मिथ्या ब्रुवतो वणिजः, **स्तेयदण्डः** चौर्यस्य यो दण्डो धर्मस्थीयविहितः स कार्यः।

कृतेत्यादि। कृतशुल्केन दत्तशुल्केन पण्यवासनेन सह, अकृतशुल्कम् अदत्तशुल्कं, निर्वाहयतः संकुले निष्क्रामयतः, इत्येकोऽपराधः, **द्वितीयमेकमुद्रयेति** एकस्य पण्यवासनस्य मुद्राप्रदर्शनेन तत्तुल्यरूपमपरं पण्यवासनं निर्वाहयत इत्यपरः, **भित्त्वा पुटमपहरत** इति पुटं पण्यवासनं कृतशुल्कं भित्त्वा तस्मिन्

पण्यमकृतशुल्कं निवेश्य नयत इति तृतीयः। एवमेवमपराधिनो वैदेहकस्य, तच्च तावच्च यदेव पण्यं यत्परिमाणमपहृतं तदेव तत्परिमाणमेव, दण्डः।

शुल्कस्थानादिति। ध्वजमूलात्, गोमयपलालं प्रमाणं कृत्वापहरतः गोपुरीषं धान्यस्तम्बं चात्यन्तनिस्सारद्रव्यं विश्वासपदमपदिश्य तन्निगूहितं सारद्रव्यं नयतः, उत्तमः साहसदण्डः पणसाहस्ररूपो दण्डः।

शस्त्रेत्यादि। शस्त्रादीनामष्टानाम्, अन्यतमानिर्वाह्यम् अन्यतमम् अनिर्वाह्यत्वेन कस्मिंश्चिन्निमित्ते राज्ञा प्रख्यापितं, निर्वाहयतः, यथावघुतिः प्रख्यापितप्रकारो, दण्डः, पण्यनाशश्च निर्वाह्यमानशस्त्रादिपण्यहानिश्च। तत्र कर्म आवरणसामान्यं, कवचं बाहुकादियुक्तस्तद्विशेषः। शेषं प्रतीतम्।

तेषामिति। अनिर्वाह्यानाम् अन्यतमस्यानयने, बहिरेव दुर्गबाह्यदेश एव, उच्छुल्को विक्रयः अशुल्कस्तस्य विक्रयः।

Those who give false report on the transit of the merchandise shall be punished as thieves.

For smuggling goods without paying the toll along with the merchandise for which toll is paid, or for smuggling items along with stamped merchandise after breaking open the bag, the smuggled quantity shall be confiscated or fresh tax be imposed for that portion.

Those who smuggle merchandise in the guise of cowdung or hay shall be punished with first amercement.

When one imports such forbidden items as weapons, armour, metals, chariots, precious stones, grains and cattle, he shall not only be punished but such items should also be confiscated. When any of such itmes is brought in for sale, such items shall be sold free of toll far out side the area of the fort.

अन्तपालः सपादपणिकां वर्तनीं गृह्णीयात् पण्यवहनस्य, पणिकामेकखुरस्य, पशूनामर्धपणिकां, क्षुद्रपशूनां पादिकाम्, अंसभारस्य माषिकाम्। नष्टापहृतं च प्रतिविदध्यात्।

वैदेश्यं सार्थं कृतसारफल्गुभाण्डविचयनमभिज्ञानं मुद्रां च दत्त्वा प्रेषयेदध्यक्षस्य।

वैदेहकव्यञ्जनो वा सार्थप्रमाणं राज्ञः प्रेषयेत्। तेन प्रदेशेन राजा शुल्काध्यक्षस्य सार्थप्रमाणमुपदिशेत् सर्वज्ञत्वख्यापनार्थम्। ततः सार्थमध्यक्षोऽभिगम्य ब्रूयात्–इदममुष्यामुष्य च सारभाण्डं फल्गुभाण्डं च न निगूहितव्यम्, एष राज्ञः प्रभावः इति।

विषयान्तरक्षाधिकारिणो भृतिमाह–अन्तेत्यादि। अन्तपालः, सपादपणिकां पादाधिकपणरूपां, वर्तनीं तत्संज्ञां मार्गरक्षाभृतिं, गृह्णीयात्, पण्यवहनस्य पण्यवाहिनः शकटादेः। पणिकाम् एकखुरस्य एकपणात्मिकां वर्तनीं खरादेर्गृह्णीयात्। पशूनामर्धपणिकां गवादीनाम् अर्धपणात्मिकां, क्षुद्रपशूनां पादिकां मेषादीनां पादपणरूपाम्, अंसभारस्य माषिकां स्कन्धभारवाहिनस्ताम्रमाषात्मिकां च, वर्तनीं गृह्णीयात्। **नष्टापहृतमिति**। मुष्टनष्टं च, प्रतिविदध्यात् तस्करात् प्रत्यानीय वा तस्करानुपलम्भे स्वहस्ताद् वा दद्याद् अन्तपालः।

वैदेश्यमिति। वैदेश्यं विदेशागतं, सार्थं वणिक्सङ्घं, कृतसारफल्गुभाण्डविचयनम् अमुकस्यैतावन्ति सारभाण्डानि एतावन्ति फल्गुभाण्डानीति स्वेन कृतं सारफल्गुभाण्डानां विचयनमन्वेषणं यस्य तं तथाभूतम्, अध्यक्षस्य शुल्काध्यक्षस्य, प्रेषयेत्। किं कृत्वा, अभिज्ञानं स्वहस्तलेखाङ्कं, मुद्रां च पण्यवासनकरणीयां, दत्त्वा। एष शुल्काध्यक्षहरणस्य निषेधोपायः।

सर्वनियुक्तपुरुषहरणनिषेधोपायमाह—**वैदेहकेत्यादि**। वैदेहकव्यञ्जनो वा वणिक्छद्मचारी वा गूढपुरुषो राजनियुक्तः, सार्थप्रमाणं पण्यवहनादिसंख्यां, राज्ञः प्रेषयेत् रहसि निवेदयेत्। इत्थमवगतसार्थप्रमाणस्य प्रतिपत्तिमाह—तेनेति। तेन प्रदेशेन ज्ञापयेत्, सर्वज्ञत्वख्यापनार्थं 'सर्वज्ञो राजा परोक्षमपि सार्थवाहप्रमाणं दिव्यदृष्ट्या जानातीति ख्यापनार्थम्। तत इति। तत उपदेशानन्तरं, सार्थम्, अध्यक्षः अभिगम्य ब्रूयात्, किमिति—इदममुष्यामुष्य च, सारभाण्डं, फल्गुभाण्डं च, न निगूहितव्यम्। कस्मात्, एष राज्ञः प्रभावः ईदृशो राज्ञो महिमोपलभ्यते यत् परोक्षस्यापि भवदीयसारफल्गुभाण्डजातस्येयत्तां दिव्यदृष्ट्यावगम्यास्मभ्य-मुपदिशति, इति।

The officer in charge of the boundaries shall collect a paṇa and a quarter as road cess on each load of merchandise. He shall levy a paṇa on a single-hoofed animal (= ass, horse etc.), half a pana on each head of cattle (= cow, buffalo etc.); and a quarter on a minor quadruped (= sheep etc.) On a head-load of merchandise the toll shall be a māṣa. He is liable to make good the loss sustained by merchants in the part of the country under his charge.

After carefully examining foreign commodities as to their superior or inferior quality and stamping them with his seal he (the Antapāla) shall send the same to the superintendent of tolls.

Or he may despatch to the king a spy in the guise of a trader with information as to the quantity of the merchandise (in transit). The king shall in turn pass on the information to the superintendnet of tolls in view of exhibiting the king's omnicient power. Now the superintendent shall inform the merchants that such and such a merchant has brought such and such amount of superior or inferior merchandise, which none can possibly hide from the cognisance of the omniscient king.

निगूहतः फल्गुभाण्डं शुल्काष्टगुणो दण्डः, सारभाण्डं सर्वापहारः।

राष्ट्रपीडाकरं भाण्डमुच्छिन्द्यादफलं च यत्।

महोपकारमुच्छुल्कं कुर्याद् बीजं तु दुर्लभम्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकविंशोऽध्यायः शुल्काध्यक्षः, आदितो द्विचत्वारिंशः।।

निगूहत इति। निगूहतः राजप्रभावकथनेऽप्यवच्छादयतः, फल्गुभाण्डं कार्पासादिकं, शुल्काष्टगुणो दण्डः। सारभाण्डं मणिमुक्ताप्रवालादिकं, निगूहतः, सर्वापहारः गूहितसर्वसारापहरणं दण्डः।

अध्यायान्ते श्लोकमाह–राष्ट्रेत्यादि। राष्ट्रपीडाकरं भाण्डं गरलं मदिरादिपण्यम्, उच्छिन्द्याद् वारयेद् अत्यन्ताय वा नाशयेत्। अफलमल्पफलं यद् भाण्डं वार्ताकोर्वारुकादि, तच्च उच्छिन्द्यात् देशान्तरान्नानाययेत्। महोपकारं, दुर्लभं स्वविषये, बीजम् अभ्यवहार्यं व्रीह्यादिधान्यं भैषज्यार्थं च मरिचहरीतक्यादि, उच्छुल्कं शुल्करहितं कुर्यात्। तुशब्दो विशेषार्थः। बीजं चेति पाठे चशब्दस्तुशब्दस्यार्थे।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे एकविंशोऽध्यायः शुल्काध्यक्षः, आदितो द्विचत्वारिंशः।।

For hiding inferior commodities, eight times the amount of toll shall be imposed; and for concealing superior commodities, they shall be confiscated in toto.

Whatever that causes harm or is useless to the country shall be shut out; and whatever is of immense good shall be let in free of toll.

Thus the Forty second chapter of the Arthaśāstra of Kauṭalya called superintendent of tolls comes to an end. Here ends the twenty first chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 43

39. प्रक० शुल्काध्यक्षः—शुल्कव्यवहारः।

Section 39 : Regulation of Toll Dues

शुल्कव्यवहारः।

बाह्यमाभ्यन्तरं चातिथ्यं, निष्क्राम्यं प्रवेश्यं च शुल्कम्।

प्रवेश्यानां मूल्यपञ्चभागः।

पुष्पफलशाकमूलकन्दवल्लिक्यबीजशुष्कमत्स्यमांसानां षड्भागं गृह्णीयात्।

शङ्खवज्रमणिमुक्ताप्रवालहाराणां तज्जातपुरुषैः कारयेत् कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः।

क्षौमदुकूलक्रिमितानकङ्कटहरितालमनशिलाहिङ्गुलुकलोहवर्णधातूनां चन्दनागुरुकटुककिण्वावराणां सुरादन्ताजिनक्षौमदुकूलनिकरास्तरणप्राचरणक्रिमिजातानामजैलकस्य च दशभागः, पञ्चदशभागो वा।

शुल्कव्यवहार इति। अमुकपण्यस्यैतावच्छुल्कमिति व्यवस्थाकरणं शुल्कव्यवहारः। स इहोच्यते।

शुल्कमादौ त्रिधा पुनर्द्विधा च विभजते—बाह्यमित्यादि। चः प्रथमो भिन्नक्रमः। शुल्क, बाह्यमाभ्यंतरमातिथ्यं च इति त्रिधा भवतीत्यर्थः। तत्र स्वजनपदोत्पन्नपण्यसम्बन्धि बाह्यं, दुर्गस्थानीयाद्यभ्यन्तरभूमिप्रभवपण्यसम्बन्धि आभ्यन्तरं, विदेशागतपण्यसम्बन्धि आतिथ्यम्। त्रिविधमपि तत् नैष्क्राम्यं निष्क्राम्यपण्यनिष्क्रमणनिमित्तं, प्रावेश्यं च प्रवेशनीयपण्यप्रवेशननिमित्तं च इति पुनः प्रत्येकं द्विविधम्। वृद्धपाठोऽयं व्याख्याभाषयोरुपलब्धः। अवृद्धपाठे तु संबन्धि लक्ष्यम्।

प्रवेश्यानामिति। प्रवेश्यानां परदेशात् स्वदेशं स्वदेशेऽपि स्थानीयं प्रवेशयितव्यानां पण्यानां मूल्यपञ्चभागः, शुल्कं भवति। एष सामान्यविधिः।

तदपवादं त्वाह—पुष्पफलेत्यादि। पुष्पं कुसुम्भादि फलं पनसादि शाकं वास्तुकादि मूलं वालुकादि कन्दः सूरणादिः वल्लिक्यं वल्लिजं कूश्माण्डादि बीजं धान्यादि एतेषां शुष्कमत्स्यमांसयोश्च, षड्भागं मूल्यषड्भागं शुल्कं, गृह्णीयात्।

शङ्खेत्यादि। शङ्खादीना षण्णां, तज्जातपुरुषैः तल्लक्षणविचक्षणैः, कारयेत् विधापयेत्, शुल्कम्।

कीदृशैः, कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कृता, स्वान्भर्त्रावगताः कर्मप्रमाणकालवेतनफलनिष्पत्तयो यैस्तथाविधैः। पदमिदमायुधागाराध्यक्षेऽपि व्याख्यातम्।

क्षौमेत्यादि। क्षौमादीनां क्षौमं स्थूलवल्कजं दुकूलं सूक्ष्मवल्कजं क्रिमितानश्चीनपट्टः कङ्कटः सूत्रसन्नाहः हरितालमनशिशलाहिङ्गुलुका व्याख्याताः अञ्जनं सौवीरकादि, इदं व्याख्यायामेव पठ्यते, लोहवर्णो लोहजातिः धातुर्गैरिकादिः इत्येतेषां, चन्दनादीनां चन्दनागुरुणी प्रसिद्धे कटुकं पिप्पल्यादि किण्वावरं किण्वं मद्यबीजं तदन्तं तैलजातीयं द्रवजातम् इत्येतेषां, सुरादीनां सुरा मद्यभेदः दन्तो गजदन्तः अजिनं कृष्णचर्म क्षौमदुकूलनिकरः क्षौमनिष्पादनार्था दुकूलनिष्पादनार्थाश्च तन्तुनिकराः आस्तरणं शयनोपवेशनसाधनं प्रावरणं प्रावारः क्रिमिजातं कौशेयम् इत्येतेषाम्, अजैलकस्य च अजैलकालोमजस्य च, दशभागः पञ्चदशभागो वा शुल्कं भवति।

Regulation regarding the toll dues is taken up here.

Merchandise such as external, (= arriving from country parts), internal (= manufactured inside the fort) or foreign (= imported from foreign countries) shall be liable to the payment of toll alike when exported or imported. For imported commodities one fifth (1/5) of their value shall be fixed as toll.

For items like flowers, fruits, vegetables, roots, bulbuous roots, vegetables produced by creepers such as pumpkin, seeds, dried fish and dried meat one-sixth (1/6) their value shall be the toll.

With regard to conch-shells, diamonds, precious stones, pearls, corals and necklaces, experts acquainted with the time, cost and finish of the production shall assess the amount of toll.

For (items such as) fibrous garments, cotton clothes, silk, defensive armour, sulphuret of arsenic, red arsenic, vermillion, metals and colouring ingredients, sandal, brown sandal, pungents, ferments, dress and the like, wine, ivory skins, raw materials used in making fibrous or cotton garments, carpets, curtains and products yielded by worms, wool and other products yielded by goats and sheep one-tenth or one-fifteenth of their value shall be the toll.

वस्त्रचतुष्पदद्विपदसूत्रकार्पासगन्धभैषज्यकाष्ठवेणुवल्कलचर्ममृद्भाण्डानां धान्यस्नेहक्षारलवणमद्यपक्वान्नादीनां च विंशतिभागः पञ्चविंशतिभागो वा।

द्वारादेयं शुल्कपञ्चभागः। आनुग्रहिकं वा यथादेशोपकारं स्थापयेत्।

जातिभूमिषु च पण्यानामविक्रयः।

खनिभ्यो धातुपण्यादाने षट्छतमत्ययः।

वस्त्रचतुष्पदेत्यादि। वस्त्रादयो धान्यादयश्च प्रसिद्धाः तेषां, विंशतिमागः पञ्चविंशतिभागो वा शुल्कम्। अयं पूर्वोक्तश्च विकल्पो यथादेशकालं द्रष्टव्यः।

द्वारादेयमिति। द्वाराध्यक्षग्राह्यं, शुल्कपञ्चभागः यस्य यच्छुल्कमुपदिष्टं तस्य तच्छुल्कपञ्चभागः भवति। आनुग्राहिकम् अनुग्रहानीतपण्यविषयं शुल्कं द्वारादेयं वा, यथादेशोपकारं स्वदेशानुग्रहानुगुण्येन, स्थापयेत् कल्पयेत्।

जातीत्यादि। जातिभूमिषु च उत्पत्तिदेशेषु च, पण्यानाम्, अविक्रयः विक्रयो न कर्तव्य इत्यर्थः।

निषेधातिक्रमे दण्डमाह—**खानेभ्य** इति। लोहलवणाद्याकरेभ्यः, धातुपण्यादाने धातुपण्यस्य कारणरूपस्य कार्यरूपस्य वा ग्रहणे, षट्छतम् अत्ययः षट्पणशतानि दण्डो भवति, अर्थाद् आदातुर्विक्रेतुश्च।

For cloths, quadrupeds, bipeds, threads, cotton, scents, medicines, wood, bamboo, fibres, skins, clay pots; grains, oils, sugar, salt, liquor, cooked rice and the like one-twentieth or one-twenty fifth of the value shall be the toll.

Gate dues shall be collected at the rate of one-fifth of the amount of toll. Items beneficial for the state may be taxed according to the utility of the produces.

Commodities shall never be sold where they are grown or manufactured.

If one purchases items of minerals from the location of the mines, a fine of six hundred paṇams shall be imposed.

पुष्पफलवाटेभ्यः पुष्पफलादाने चतुष्पञ्चाशत्पणो दण्डः।

षण्डेभ्यः शाकमूलकन्दादाने पादोनं द्विपञ्चाशत्पणो दण्डः।

क्षेत्रेभ्यः सर्वसस्यादाने त्रिपञ्चाशत्पणः, पणोऽध्यर्धपणश्च सीतात्ययः।

अतो नवपुराणानां देशजातिचरित्रतः।

पण्यानां स्थापयेच्छुल्कमत्ययं चापकारतः।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे द्वाविंशोऽध्यायः शुल्कव्यवहारः, आदितस्त्रिचत्वारिंशः।।

पुष्पफलवाटेभ्य इत्यादि। सुगमम्।

षण्डेभ्य इत्यादि। षण्डेभ्यः शाकाद्युद्भिजक्षेत्रेभ्यः। स्पष्टमन्यत्।

क्षेत्रेभ्य इति। क्षेत्रेभ्यः धान्यकेदारेभ्यः, सर्वसस्यादाने, त्रिपञ्चाशत्पणो, दण्डः। पणः अध्यर्धपणश्च क्रेतृविक्रेत्रोर्यथाक्रमं, सीतात्ययः धान्यदण्डः। अयं च दण्डस्त्रिपञ्चाशत्पणेन समुच्चीयते।

अध्यायान्ते श्लोकमाह—**अत** इति। अत उक्तशुल्कदण्डप्रकारातिरेकेण, नवपुराणानां, पण्यानां, देशजातिचरित्रतः देशाचारजात्याचारानुसारात्, शुल्कं, स्थापयेत्। अपकारतः अपकरानुसाराद्, अत्ययं च दण्डं च, स्थापयेत्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे द्वाविंशोऽध्यायः शुल्काध्यक्षे शुल्कव्यवहारः, आदितस्त्रिचत्वारिंशः।।

When flowers and fruits are purchased from flower or fruit garden a fine of fifty-four paṇas shall be imposed.

When vegetables, roots and bulbous roots are purchased from vegetable gardens, a fine of fifty one and three quarters of paṇas are levied.

When any kind of grass or grain is purchased from the field, a fine of fifty three paṇas is to be imposed.

In the case of agricultural produce in general a fine of one paṇa and half a paṇa is to levied from the transactions.

Hence in the case of new or old customs of countries or of communities a fixed rate of toll shall be fixed and fines shall be imposed in proportion to the gravity of the offence.

Thus the Forty-third chapter of the Arthaśāstra of Kauṭalya entitled 'regulation of toll dues' comes to an end. Here ends the twenty second chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 44

40. प्रक० सूत्राध्यक्षः।

Section 40 : Superintendent of Weaving

सूत्राध्यक्षः सूत्रवर्मवस्त्ररज्जुव्यवहारं तज्जातपुरुषैः कारयेत्।

ऊर्णावल्ककार्पासतूलशणक्षौमाणि च विधवान्यङ्गाकन्याप्रव्रजितादण्डप्रतिकारिणीभी रूपाजीवामातृकाभिर्वृद्धराजदासीभिर्व्युपरतोपस्थानदेवदासीभिश्च कर्तयेत्।

श्लक्ष्णस्थूलमध्यतां च सूत्रस्य विदित्वा वेतनं कल्पयेत्। बह्वल्पतां च। सूत्रप्रमाणं ज्ञात्वा तैलामलकोद्वर्तनैरेता अनुगृह्णीयात्।

तिथिषु प्रतिपादनमानैश्च कर्म कारयितव्याः। सूत्रह्रासे वेतनह्रासो द्रव्यसारात्।

सूत्राध्यक्ष इति सूत्रम्। सूत्रम् ऊर्णादिजो गुणः तस्य अध्यक्षः कर्तनवानादिकारयिता। तद्व्यापारोऽभिधीयत इति सूत्रार्थः। 'कार्पासक्षौमाणां पञ्चपले पलसूत्रम्' इत्युक्तं कोष्ठागाराध्यक्षे। तदध्यक्षस्तद्व्यापारश्चानुक्त इहोच्यते।

सूत्राध्यक्ष इति। सूत्राध्यक्षः सूत्रवर्मवस्त्ररज्जुव्यवहारं सूत्रादीनां कर्तनवानादिकं, तज्जातपुरुषैः तच्छिल्पिकुलजैस्तत्कर्मकुशलैश्च पुरुषैः, कारयेत्।

ऊर्णेत्यादि। ऊर्णा मेषादिलोम वल्को मूर्वादित्रसरः कार्पासः प्रसिद्धः तूलं शाल्मल्यादि शणः क्षुपभेदजं क्षौममतसीजम् एतानि च, विधवादिभिः पञ्चभिः तत्र न्यङ्गाः, रूपाजीवामातृकाभिः गणिकाधात्रीभिः, वृद्धराजदासीभिः वृद्धाभिर्नृपतिपरिचारिकाभिः, व्युपरतोपस्थानदेवदासीभिश्च उपस्थानं देवालयेषु नृत्तगीतादिना देवसभाजनकर्म तद् व्युपरतम् अनर्हतया निवृत्तं यासां ताभिस्तथाभूताभिर्देवदासीभिर्देवालयपरिचारिकाभिश्च, कर्तयेत् सूत्रयेत्।

श्लक्ष्णेत्यादि। श्लक्ष्णतां स्थूलतां मध्यतां च सूत्रस्य विदित्वा भृतिं कल्पयेत्। **बह्वल्पतां चेति**। तुल्ये काले कर्तनस्य बहुत्वमल्पत्वं च, विदित्वा वेतनं कल्पयेदित्यनुषज्यते। **सूत्रप्रमाणमिति**। सूत्रस्य श्लक्ष्णतातिशयं बहुत्वं च, ज्ञात्वा, तैलामलकोद्वर्तनैः तैलाभ्यञ्जनस्नपनैरूष्मशमनार्थैः, एताः दृष्टगुणाः, अनुगृह्णीयात् उपकुर्यात् तत्प्रीतये तदन्यप्रोत्साहनाय च।

तिथिष्विति। तिथिषु कर्मदिवसेषु, प्रतिपादनमानैश्च प्रतिपादनं वेतनदानं दीयमानवेतनं वा तस्य

मानै: एतावत: कर्मण एतावद् वेतनमित्येवंरूपै: परिच्छेदैश्च, कर्म कारयितव्या: । अथवा तिथिषु दिवसविशेषेषु पर्वादिषु अशनदानसत्कारैश्च कर्म कारयितव्या:। सूत्रह्रासे सूत्रस्य न्याय्यप्रमाणतो न्यूनत्वे, वेतनह्रास:, द्रव्यसारात् द्रव्यार्घमपेक्ष्य, कर्तव्य इति शेष:।

The superintendent of weaving shall employ persons qualified to manufacture threads, coats, cloths and ropes.

In order to cut wool, fibre, cotton, panicle, hemp and flax people such as widows, cripple women, girls, ascetic women, women required to work in default of paying fines, mothers of prostitutes, old women servants of the king and devadāsis (courtesans) who have ceased to attend on temples shall be engaged.

The wages are to fixed according to the quality of the threads spun such as fine, coarse or middle quality. The total quantity produced may also be taken into account. Those who turn out a larger quantity of work may be rewarded with presentation of oil and dried cakes of myrobalan fruits.

They may be required to work even on holidays by payment of special wages (or rewards). If the threads spun out is found falling short of the requried quantity wages shall be cut, after making allowances for the variety of the raw material.

कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभि: कारुभिश्च कर्म कारयेत्, प्रतिसंसर्गं च गच्छेत्।

क्षौमदुकूलक्रिमितानराङ्कवकार्पाससूत्रवानकर्मान्तांश्च प्रयुञ्जानो गन्धमाल्यदानैरन्यैश्चौपग्राहिकैराराधयेत्। वस्त्रास्तरणप्रावरणविकल्पानुत्थापयेत्।

कङ्कटकर्मान्तांश्च तज्जातकारुशिल्पिभि: कारयेत्।

याश्चानिष्कासिन्य: प्रोषितविधवा न्यङ्गा: कन्यका वात्मानं बिभृयुस्ता: स्वदासीभिरनुसार्य सोपग्रहं कर्म कारयितव्या:।

स्वयमागच्छन्तीनां वा सूत्रशालां प्रत्युषसि भाण्डवेतनविनिमयं कारयेत्। सूत्रपरीक्षार्थमात्र: प्रदीप:।

कृतकर्मेत्यादि। इदं पदमन्यत्र व्याख्यातम्। एवम्भूतै: कारुभिश्च तन्तुवायादिभिश्च, कर्म कारयेत्। प्रतिसंसर्गं सख्यं च, गच्छेत् तत्कर्मसम्भावितच्छलप्रयोगज्ञानार्थम्।

क्षौमेत्यादि। राङ्कवं रङ्कुलोमजं क्षौमादिचतुष्कमन्यत्र व्याख्यातम्। क्षौमादीनां पञ्चानां सूत्रवानकर्मान्तान्, प्रयुञ्जान: कारयन् अध्यक्ष:, गन्धमाल्यदानै:, अन्यैश्च, औपग्राहिकै: आनुकूल्यसम्पत्तिफलै:, आराधयेत् उपचरेत् तत्कारून्। तदाराधनफलमाह—वस्त्रेत्यादि। वस्त्रास्तरणप्रावरणानां विकल्पान् प्रकारभेदान्, उत्थापयेत् अपूर्वानुल्लेख्य निर्मापयेत्।

कङ्कटेत्यादि। कङ्कटकर्मान्तांश्च सूत्रसन्नाहकर्माणि, तज्जातकारुशिल्पिभिः तत्कर्मनिपुणैः कारुभिः शिल्पिभिश्च, कारयेत्।

याश्चेति। याश्च, अनिष्कासिन्यः प्रोषितविधवाः भर्तृप्रवासनिमित्तवियुक्तभर्तृकाः परित्यक्तबहिर्निष्क्रमणाः, न्यङ्गाः अङ्गविकलाः, कन्यका वा, आत्मानं बिभृयुः स्वपरिश्रमार्जितग्रासादिना देहयात्रां कुर्युः, ताः, स्वदासीभिः, अनुसार्य अनुवर्त्य, सोपग्रहं सप्रीतिबहुमानं यथा भवति तथा, कर्म सूत्रकर्तनादि, कारयितव्याः।

स्वयमिति। स्वयमागच्छन्तीनां, वाशब्दात् स्वदासीसमानीतानां वा, सूत्रशालां, प्रत्युषसि ईषत्तमसि दिनमुखे, भाण्डवेतनविनिमयं तद्गृहकर्तितभाण्डग्रहणपूर्वकवेतनार्पणं, कारयेत्। **मूत्रपरीक्षार्थमात्रः प्रदीप** इति, सूत्रगुणपरीक्षणप्रयोजना तदन्यप्रयोजनाक्षमा मात्रा प्रकाशपरिमाणं यस्य स तथाभूतः दीपः कार्यस्तत्काल इति शेषः।

The work (of weaving) may also be got done by such artisans who are qualified to turn out a given amount of work in a given time and for a specific amount in wages. The superintendent shall establish close contact with them (to find out whether they are truthful).

Those who are engaged in the manufacture of fibrous cloths, raiments, silk cloths, woollen cloths and cotton fabrics shall be rewarded by presenting them with (items like) scents, garlands of flowers, or any other prizes of encouragement. Various kinds of garments, blankets and curtains shall be got manufactured.

Those who have previous experience shall be engaged in the manufacture of mail armour.

Such women who do not stir out of their houses, those whose husbands are gone abroad, and those who are cripple or girls may, when required to work for a living be provided with employment (of spinning the threads) in a polite manner through the medium of maid servants.

Those women who can attend the weaving centre at dawn may be enabled to exchange their spinnings for wages. There shall be just enough light in the centre to examine the threads.

स्त्रिया मुखसन्दर्शनेऽन्यकार्यसंभाषायां वा पूर्वः साहसदण्डः। वेतनकालातिपातने मध्यमः, अकृतकर्मवेतनप्रदाने च।

गृहीत्वा वेतनं कर्माकुर्वत्याः अङ्गुष्ठसन्दंशं दापयेत्। भक्षितापहृतावस्कन्दितानां च। वेतनेषु च कर्मकराणामपराधतो दण्डः।

रज्जुवर्तकैश्चर्मकारैश्च स्वयं संसृज्येत। भाण्डानि च वरत्रादीनि वर्तयेत्।

स्त्रिया इत्यादि। स्त्रियाः, मुखसन्दर्शने मुखनिर्वर्णने, अन्यकार्यसम्भाषायां प्रकृतकार्यातिरिक्तकार्यप्रश्नादौ

वा, पूर्वः साहसदण्डः। वेतनकालातिपाते भृतिदानकालातिक्रमे, मध्यमः साहसदण्डः। अकृतकर्मवेतनप्रदाने च अकृतकर्मणामुत्कोचग्रहणेन वेतनस्य दाने च, मध्यम इत्यनुषज्यते।

गृहीत्वेति। गृहीत्वा पूर्वमादाय, वेतनं, कर्माकुर्वत्याः, अङ्गुष्ठसन्दंशं दक्षिणाङ्गुष्ठतन्मध्य-माङ्गुल्यग्रयोश्छेदोऽङ्गुष्ठसन्दंशः तं, दापयेत्। भक्षितापहृतावस्कन्दितानां भक्षणापहरणपलायनानां च अर्थाद् भक्षयित्वापहृत्य वा पलायितानां च, अङ्गुष्ठसन्दंशं दापयेदित्येव। उक्त एव विषये दण्डविकल्पमाह– वेतनेष्विति। कर्मकराणां तन्तुवायादीनाम्, अपराधतः अपराधानुसारेण, वेतनेषु च दण्डः नावश्यं देहदण्डो यथोक्तः किन्तु तत्स्थाने यथापराधं वेतनदण्डोऽपि केवल इष्यत इत्यभिप्रायः। एवञ्च विकल्पपर्यवसित इह चकारो द्रष्टव्यः।

रज्ज्वित्यादि। रज्जुवर्तकैः रज्जुकल्पनजीविभिः, चर्मकारैश्च चर्ममयाश्वोपकरणादिकारिभिश्च, वर्मकारैरिति पाठे सूत्रकङ्कटादिकारिभिः, स्वयं संसृज्येत सख्यं कुर्यात् रज्ज्वादिपालनार्थं तत्कर्मानुष्ठापनार्थं च। भाण्डानि च उपकरणानि च, वरत्रादीनि गवादिबन्धनीप्रभृतीनि वर्तयेत् कारयेत्। भाण्डादीनीति तु पाठो न सुष्ठु।

If the superintendent looks at the face of these women and engages himself discussing with them some other work, he shall be punished with the first amercement. If the payment is delayed beyond the due time he shall be punished with the middle most amercement, as also when he makes payment for work which is not completed.

She who fails to do the work after receiving the wages shall have her thumb cut off. This also applies to those who misappropriate, steal or run away (with the raw material). Weavers shall be punished by levying fines proportionate to the gravity of the offence.

Those who manufacture ropes and mail armour may be closely observed by the superintendent. They may also be required to make materials and straps.

सूत्रवल्कमयी रज्जूर्वरत्रा वैत्रवैणवीः।
सान्नाह्या बन्धनीयाश्च यानयुग्यस्य कारयेत्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोविंशोऽध्यायः सूत्राध्यक्षः, आदितश्चतुश्चत्वारिंशः।।

अध्यायान्ते श्लोकमाह–सूत्रेत्यादि। सूत्रवल्कमयीः कार्पासादितन्तुमयीः शणादिवल्कमयीश्च, रज्जूः वैत्रवैणवीर्वरत्राः वेत्रमयीर्वेणुमयीश्च वरत्राः, कीदृशीः, सान्नाह्याः सन्नाहोपयोगिनीः, यानयुग्यस्य बन्धनीयाश्च रथादेरश्वादेश्च बन्धनयोग्याश्च, कारयेत्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोविंशोऽध्यायः सूत्राध्यक्षः, आदितश्चतुश्चत्वारिंशः।।

Manufacture of ropes from threads and fibres and straps from cane

and bamboo bark in order to train or tether the beasts may be got done by the authorities.

Thus the forty fourth chapter the Arthaśāstra of Kauṭalya called superintendent of weaving, comes to an end. Here ends the twentythird chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 45

41. प्रक० सीताध्यक्षः ।

Section 41 : Superintendent of Agriculture

सीताध्यक्षः कृषितन्त्रशुल्बवृक्षायुर्वेदज्ञस्तज्ज्ञसखो वा सर्वधान्यपुष्पफलशाकक़न्दमूलवाल्लिक्यक्षौमकार्पासबीजानि यथाकालं गृह्णीयात्।

बहुहलपरिकृष्टायां स्वभूमौ दासकर्मकरदण्डप्रतिकर्तृभिर्वापयेत्।

कर्षणयन्त्रोपकरणबलीवर्दैश्चैषामसङ्गं कारयेत्। कारुभिश्च कर्मारकुट्टाकमेदकरज्जुवर्तकसर्पग्राहादिभिश्च।

तेषां कर्मफलविनिपाते तत्फलहानं दण्डः।

षोडशद्रोणं जाङ्गलानां वर्षप्रमाणमध्यर्धमानूपानाम्। देशवापानाम्। अर्धत्रयोदशाश्मकानां, त्रयोविंशतिरवन्तीनाम्, अमितमपरान्तानां, हैमन्यानां च कुल्यावापानां च कालतः।

सीताध्यक्ष इति सूत्रम्। कृषिकर्माध्यक्ष इति सूत्रार्थः। 'सीताध्यक्षोपनीतः सस्यवर्णः सीता' इत्युक्तं कोष्ठागाराध्यक्षे। तदध्यक्षस्तद्व्यापारश्चाधुनोच्यते।

सीताध्यक्ष इति। सीताध्यक्षः, कृषितन्त्रशुल्बवृक्षायुर्वेदज्ञः कृषितन्त्र वृद्धपराशरादिप्रणीतं शुल्बशास्त्रं भूमिसिराज्ञानशास्त्रं वृक्षायुर्वेद आग्निवेश्यादिप्रणीतः तज्ज्ञः, तज्ज्ञसखो वा, सर्वधान्यादीनि धान्यादीनि सर्वविधस्वस्वावान्तरभेदयुक्तानि, यथाकालं संगृह्णीयात्। तत्र वाल्लिक्यं कूश्माण्डादिवल्लीफलम्। शेषं प्रसिद्धम्।

बहुहलपरिकृष्टायामिति। बहुसीरविलिखितायां, स्वभूमौ तत्तद्धान्याद्यनुगुणायां भूमौ, दासादिभिः वापयेत्, दास उदरदासक्रीतदासादिः कर्मकरः वेतनार्थकर्मकारी दण्डप्रतिकर्ता कर्मणा दण्डनिष्क्रेता।

कर्षणेत्यादि। कर्षणयन्त्राणि हलदण्डयुगादीनि उपकरणानि रज्जुदात्रादीनि परिकर्मकरा जनाश्च बलीवर्दाः प्रसिद्धाः एतैर्निर्दिष्टैः, एषां दासादीनाम्, असङ्गं क्रियानुपरोधं, कारयेत्। कारुभिश्च, कर्मारादिभिः, असङ्गं कारयेत्, तत्र कर्मारोऽयस्कारः कुट्टाकस्तक्षा मेदकः खनकः हिंसकत्वात्, भेदकपाठो वा, रज्जुवर्तकः रज्जुकल्पकः सर्पग्राहः व्यालग्राही।

तेषामिति। कारूणां, कर्मफलविनिपाते तद्दोषजनिते कृषिफलविनाशे, तत्फलहानं दण्डः हापितफलपरिमाणो दण्डः।

भूमिविशेषेषु सस्यनिष्पत्तिनिमित्तं वृष्टिप्रमाणमाह–**षोडशद्रोणं जाङ्गलानां वर्षप्रमाणमिति।** हस्तप्रमाणमुखयुक्ते वृष्टिमानार्थनिर्मिते कुण्डे मेघाभिवृष्टोदकासारपरिपूरिते यदि तद्गतं जलं षोडशद्रोणात्मकमुपलभ्येत, तदा तावद् वर्षप्रमाणं मरुप्रायाणां भूभागानां सस्यनिष्पादनपर्याप्तं भवतीत्यर्थः। **अध्यर्धं चतुर्विंशतिद्रोणम्, आनूपानां** जलप्रायाणाम्। इदं जाङ्गलानूपभेदेन वर्षप्रमाणमुक्तम्। देशभेदेन तदाह–**देशवापानामिति।** वर्षप्रमाणं वक्ष्यत इति शेषः। **अर्धत्रयोदशः** अर्धाधिकास्त्रयोदश वर्षप्रमाणद्रोणानि, **अश्मकानाम्** आरट्टानाम्। **त्रयोविंशतिः** द्रोणानि, **अवन्तीनां** मालवानाम्। **अमितम्** असंख्यातं वर्षप्रमाणम्, **अपरान्तानां** पाश्चात्यदेशस्य। **हैमन्यानां च** हिमाम्बुनिष्पाद्यसस्यानां हिमवत्प्रदेशानां च, हैन्यानामिति पाठेऽप्ययमेवार्थः, **कुल्यावापानां च** कुल्योपनेयजलमातृकप्रदेशानां च, **कालतः** स्वस्वकालानुसारेण सस्यसम्पत्तिः, न तु वर्षप्रमाणापेक्षेत्यर्थः।

Proficient in the science of agriculture dealing with the cultivation of bushes and trees or assisted by those who are trained in such sciences, the superintendent of agriculture shall in time collect the seeds of all kinds of grains, flowers, fruits, vegetables, bulbous roots, other roots, vegetables produced by creepers (like pumpkin), fibre-producing plants and cotton.

After thoroughly ploughing the royal lands he shall employ slaves, labourers and prisoners to sow the seeds.

The work of the labourers shall not suffer on account of any want of gadgets like ploughs or bullocks. There shall not be any delay in procuring assistance of blacksmiths, carpenters, borers, ropemakers, snake charmers and similar persons.

Any loss due to such people shall be punished with a fine commensurate with the loss.

The quantity of rains that fall in a region called Jāṅgala is sixteen droṇas and half as much more in moist (marshy) locatities. The quantity of rains in agricultural lands are as follows. Thirteen and a half of droṇas for Aśmakas, twenty three droṇas in Avanti, and an immense quantity in western countries, the borders of Himalayas and the countries where water channels are made use of agriculture.

वर्षत्रिभागः पूर्वपश्चिममासयोः, द्वौ त्रिभागौ मध्यमयोः सुषमारूपम्।

तस्योपलब्धिर्बृहस्पतेः स्थानगमनगर्भाधानेभ्यः शुक्रोदयास्तमयचारेभ्यः सूर्यस्य प्रकृतिवैकृताच्च।

शोभनसंवत्सरस्य रूपमाह–**वर्षत्रिभाग** इत्यादि। **वर्षत्रिभागः** वर्षस्य तत्तद्देशोक्तवृष्टिप्रमाणस्य त्रिधा विभक्तस्य एकस्त्रिभागः, **पूर्वपश्चिममासयोः** श्रावणप्रोष्ठपदाश्वयुजकार्त्तिकाख्यमासचतुष्टये प्रथमचरमयोः श्रावणकार्त्तिकयोः भवति। शेषौ **द्वौ त्रिभागौ, मध्यमयोः** प्रोष्ठपदाश्वयुजयोः, भवतः। **सुषमारूपं** सुषमायाः शोभनस्य संवत्सरस्य रूपं भवति, अर्थाद् यथोक्तं भागशो वर्षणम्।

भविष्यत: सुषमारूपस्य ज्ञापकमाह—तस्येत्यादि। तस्य सुषमारूपस्य, उपलब्धिरनुमिति:, बृहस्पते: स्थानादित्रिकात् शुक्रोदयादित्रिकात् सूर्यस्य प्रकृतिवैकृताच्च भवति। तत्र स्थानं मेषादिराशिस्थिति:। गमनं मेषादेर्वृषभादिसंक्रम:। तयोर्वृष्ट्यादिफलहेतुत्वं ज्योतिश्शास्त्रप्रसिद्धम्। गर्भाधानं मार्गशीर्षादिषु षट्सु मासेषु तुषारादिदर्शनम्। तदुक्तं–

मार्गशिरा: सतुषार: सहिम: पौष: समारुतो माघ:।
साभ्र: फाल्गुनमास: सपवनवृष्टिश्च यदि चैत्र:।।
तडिदभ्रानिलविद्युज्जलवृषितो भवति यदि च वैशाख:।
सम्यग् वर्षति मघवान् धारणदिवसेषु वर्षति चेत्।।

धारणदिवसा वैशाखकृष्णप्रतिपदादयश्चत्वार इति व्याख्यातार:। शुक्रस्योदयास्तमयौ प्रसिद्धौ। चार· आषाढमासपञ्चम्यादिषु नवसु तिथिषु संचार:। सूर्यस्य प्रकृतिवैकृतं स्वभावान्यथाभाव: सपरिवेषत्वादि। इत्थं सुषमारूपोपलब्धिकरणं ग्रहत्रयचरितमुक्तम्।

When one-third of the requisite quantity of rain falls both during the commencement and closing months of the rainy season and two-thirds in the middle, then the rainfall is considered very normal.

A forecast of such a rain fall can be made by observing the position, motion and pregnancy of Jupiter (Brhaspati), the rise and set and motion of Venus and the natural and unnatural aspect of the sun.

सूर्याद् बीजसिद्धि:। बृहस्पते: सस्यानां स्तम्बकरिता। शुक्राद् वृष्टिरिति।

त्रय: सप्ताहिका मेघा अशीति: कणशीकरा:।
षष्टिरातपमेघानामेषा वृष्टि: समा हिता।।
वातमातपयोगं च विभजन् यत्र वर्षति।
त्रीन् कर्षकांश्च जनयंस्तत्र सस्यागमो ध्रुव:।।
तत: प्रभूतोदकमल्पोदकं वा सस्यं वापयेत्।

तत्र विशेषमाह—सूर्यादिति। सूर्यात् प्रकृतिस्थाद् विकृताद् वा, बीजसिद्धि: बीजस्य सस्यफलस्य सिद्धिर्निष्पत्ति:, अनुमीयते भवति नवेति। बृहस्पते: स्थानादियुक्तात्, सस्यानां स्तम्बकरिता स्तम्बपरिबृंहणम्, अनुमीयते भवति नवेति। शुक्राद् उदयादियुक्ताद्, वृष्टि: अनुमीयते भवति नवेति।

शोभनवृष्टिक्रमं श्लोकाभ्यामाह—त्रय इत्यादि। त्रयो मेघा:, सप्ताहिका: सप्ताहोरात्राविच्छिन्न-वृष्टिकारिण:। अशीतिर्मेघा:, कणशीकरा: सान्द्रबिन्दुवर्षिण:। आतपमेघानाम् आतपयुक्तानां मेघानां, षष्टि:। एषा इत्थं परिसंख्यातमेघा, वृष्टि:, समा अन्यूनानतिरिक्ता, अत एव हिता लोकश्रेयस्करी च।।

वातमिति। वातम् आतपयोगं च विभजन् तदुभयासंकरेण तिष्ठन्, त्रीन् कर्षकान् जनयन् तिसृभिर्वृष्टिभिर्ज्यैष्ठादिवापकालेषु तिस्र: कृषी: प्रवर्तयंश्च, त्रीन् करीषान् जनयन्निति पाठे दोहलार्थानां शुष्कगोमयानां त्रीन् संग्रहावसरान् विच्छिन्नवर्षणेनोत्पादयन्नित्यर्थ:, अर्थात् पर्जन्य:, यत्र देशे, वर्षति, तत्र सस्यागमो ध्रुव: सस्यनिष्पत्तौ सन्देहो नास्ति।।

तत इति। ततः यथोक्तवृष्टिप्रमाणादिपरिज्ञानानन्तरं, प्रभूतोदकं प्रचुरजलनिष्पाद्यम्, अल्पोदकं वा अल्पजलनिष्पाद्यं वा, सस्यं वापयेत्, अर्थात् प्रभूतवृष्टावल्पवृष्टौ वा देशे यथाक्रमम्।

The sprouting of the seeds can be inferred by the position of the sun, from the position of Jupiter the formation of grains can be inferred, and from the movements of Venus rainfall can be inferred.

There are three clouds that ensure continuous rain for seven days; there are eighty clouds that pour minute drops and sixty are the clouds that appear with the sunshine. All this is termed as the rainfall. When rain free from wind and unmingled with sunshine falls so as to make it possible three turns of ploughing, then the reaping of a good harvest is certain.

Thus according to the availablility of the rainfall which may be more or less, the superintendent shall sow the seeds which require either more or less water as the case may be.

शालिव्रीहिकोद्रवतिलप्रियङ्गुदारकवरकाः पूर्ववापाः। मुद्गमाषशैम्ब्या मध्यवापाः। कुसुम्भमसूरकुलुत्थयवगोधूमकलायातसीसर्षपाः पश्चाद्वापाः।

यथर्तुवशेन वा बीजवापाः।

वापातिरिक्तमर्धसीतिकाः कुर्युः। स्ववीर्योपजीविनो वा चतुकर्थपञ्च- भागिकाः। यथेष्टमनवसितभागं दद्युरन्यत्र कृच्छ्रेभ्यः।

स्वसेतुभ्यः हस्तप्रावर्तिममुदकभागं पञ्चमं दद्युः। स्कन्धप्रावर्तिमं चतुर्थम्। स्रोतोयन्त्र-प्रावर्तिमं च तृतीयम्।

सस्येषु विशेषमाह—शालीत्यादि। शाल्यादयः सप्त, पूर्ववापाः पूर्वमेव वपनीयाः। मुद्गमाषशैम्ब्याः मध्यवापाः। कुसुम्भादयोऽष्टौ, पश्चाद्वापा पश्चिमकालवपनीयाः।

यथर्तुवशेन वा बीजवापा इति। य एते शाल्यादिबीजवापा उक्ताः अनुक्ताश्चान्ये, ते सर्वे तत्तद्बीजसम्यङ्निष्पत्तियोग्यकालानुरोधेन कर्तव्याः।

वापातिरिक्तमिति। कृतवापक्षेत्रातिरिक्तं क्षेत्रम्, अर्धसीतिकाः कृषिफलार्धभागस्वीकरणसंविदा कृषन्तः बीजबलीवर्दादिसम्पन्ना ग्राम्यकुटुम्बिनः, कुर्युः साधयेयुः कर्षणबीजवपनादिना। **स्ववीर्येत्यादि**। स्ववीर्योपजीविनो वा बीजादिषु स्वामिसम्बन्धिषु सत्सु स्वकायायासमात्रं क्षेत्रे कुर्वाणा वा कर्मकराः, चतुर्थपञ्चभागिकाः निष्पन्नस्य फलस्य चतुर्थभागं पञ्चमभागं वा लभन्ते। **यथेष्टमिति**। अनवसितभागम् अनवसितस्य अभ्युपेत्याकृष्टस्य क्षेत्रस्य सस्यभागं, यथेष्टं स्वामीच्छानतिक्रमेण, दद्युः, अर्थादर्धसीतिकादयः। तत्रापवादः—**अन्यत्र कृच्छ्रेभ्य** इति। कर्षणविघातकविपदुपनिपातव्यतिरेके।

स्वसेतुभ्य इति। स्वसेतुभ्यः सवदेहायासस्वद्रव्यव्ययनिष्पादितेभ्यस्तटाकादिभ्यः, हस्तप्रावर्तिमं कुम्भादिजलपायनरूपहस्तप्रवृत्तिसाधितम्, उदकभागम् उदकार्थं फलभागं, पञ्चमं, दद्युः राज्ञेऽर्पयेयुः, कृषीवलाः। स्कन्धप्रावर्तिमं स्कन्धवहप्रवर्तितयन्त्रपायितजलनिष्पन्नम् उदकभागं, चतुर्थं दद्युः। स्रोतोयन्त्र-

प्रवार्तिमं सारणीपायितजलनिष्पन्नं च उदकभागं, तृतीयं दद्यु:। उदककरश्चायं भूमिकरवद् द्रष्टव्य:, यतो राजा भूम्युदकयोरविशेषात् स्वामी तदुक्तं–

राजा भूमे: पतिर्दृष्ट: शास्त्रज्ञैरुदकस्य च।
ताभ्यामन्यत्तु यद् द्रव्यं तत्र स्वाम्यं कुटुम्बिनाम्।। इति।

Śāli (a variety of rice), vrīhi (rice in general), Kodrava (Paspalum scrobiculatum), tila (sesamum), priyangu (panic seeds), dāraka (a kind of pulse) and varaka (Phaseolus Tribolus) are to be sown at the commencement of the rainy season.

Mudga (Phaseolus mungo), māsa (Phaseolus Radiatus) and śaibya (a leger minus plant) are to be sown in the middle of the season.

Kusumbha (Saff flower), masūra (Ervum Hisutam), kulattha (Dolichos Uniflorus), yava (Barley) godhūma (wheat), kalāya (leguminus seeds), atasi (lin seed) and sarṣapa (mustard) are to be sown last.

Portions of the field left unsown (due to shortage of lands) may be brought under cultivation by employing those who cultivate for half the share. Those who live by their own physical exertion may cultivate such unsown fields for the sake of one-fourth or one-fifth of the produce grown; or they may pay (to the king) as much as they can without entailing any hardship upon themselves, with exception to their own private lands that are difficult to cultivate.

Those who cultivate irrigating by manual efforts shall pay one-fifth of the produce as water.cess; when the water is carried on shoulders, the share shall be one-fourth of the produce. When the irrigation is made by water lifts the share to be paid shall be one-third of the produce.

चतुर्थं नदीसरस्तटाककूपोद्घाटम्।

कर्मोदकप्रमाणेन कैदारं हैमनं ग्रैष्मिकं वा सस्यं स्थापयेत्। शाल्यादि ज्येष्ठम्। षण्डो मध्यम:। इक्षु: प्रत्यवर:। इक्षवो हि बह्वाबाधा व्ययग्राहिणश्च।

फेनाघातो वल्लीफलानां, परीवाहान्ता: पिप्पलीमृद्वीकेक्षूणां, कूपपर्यन्ता: शाकमूलानां, हरणिपर्यन्ता हरितकानां, पाल्यो लवानां गन्धभैषज्योशीरह्रीबेरपिण्डालुकादीनाम्। यथास्वं भूमिषु च स्थल्याश्चानूप्याश्चौषधी: स्थापयेत्।

स्वसेतुभ्योऽन्यत्र देयमाह–**चतुर्थमिति**। तदीसरस्तटाककूपोद्घाटम् उद्घाट्यते निस्सार्यते जलमनेनेत्युद्घाटोऽरघट्टकादियन्त्रं लक्षणया त्विह तज्जनितग्रहणम्। नद्यादिचतुष्टयाद् यन्त्रविशेषपायित-जलनिष्पन्नं, चतुर्थं भागं, दद्यु:।

कर्मोदकप्रमाणेनेति। कृष्यपेक्षितजलप्राचुर्याल्पत्वानुरोधेन, कैदारं शाल्यादिक्षेत्रवाप्यं, हैमनं हेमन्तकालवाप्यं, ग्रैष्मिकं ग्रीष्मकालवाप्यं वा, सस्यं, स्थापयेत् वापयेत्।

शाल्यादीत्यादि। शाल्यादिधान्यं, ज्येष्ठं श्रेष्ठं प्रधानाहारद्रव्यत्वादल्पव्ययायाससाध्यानल्पफलत्वाच्च। षण्डः कदल्यादिः, मध्यमः अल्पव्ययायाससाध्यफलत्वात्। इक्षुः प्रत्यवरः शाल्याद्यपेक्षया निकृष्टः। कुतः, हि यतः, इक्षवः, बह्वाबाधाः मनुष्यमूषिकाद्युपद्रवबहुलाः, व्ययग्राहिणश्च छेदनपीडनपचनादिबहुकर्मकरसापेक्षत्वात्।

अथ वापयोग्यभूमीराह—**फेनाघात** इति। फेनेनाहन्यत इति फेनाघातो जलपर्यन्तदेशः, वल्लीफलानां कूश्माण्डादीनाम्। परीवाहान्ताः जलोच्छ्वासपरिसरदेशाः, पिप्पलीमृद्वीकेक्षूणाम्। कूपपर्यन्ताः कूपपरिसरदेशाः, शाकमूलानाम्। हरणिपर्यन्ताः हरणिः कुल्या, सरस्तटाकादि रिक्तीभूत आर्द्रप्रदेश इति स्वामी, तस्याः पर्यन्ताः, हरितकानां यवसादीनाम्। पाल्यः क्षेत्रमध्यकृताः सेतवः, लवानां छिन्नानां गन्धादिपञ्चकप्रभृतीनां गन्धो मांसीग्रन्थिपर्णकादिः भैषज्यं लशुनशतपुष्पादि उशीरं लामज्जं ह्रीबेरं बालाख्यं पिण्डालुकः रोमकन्दः इत्येतदादीनाम्। वापदेश इति सर्वत्र शेषः। **यथास्वमिति**। यथास्वं भूमिषु च स्वस्वयोग्यभूमिषु जलभूमिष्वनूपभूमिषु चेत्यर्थः, स्थल्याश्च स्थलप्ररोहिणीश्च, अनूप्याश्च जलप्रायदेशप्ररोहिणीश्च, ओषधीः, स्थापयेत्।

For raising water from rivers, lakes, tanks and wells one has to pay the share of one-third or one-fourth of the produce.

The superintendent shall grow net crops, (kedāra), winter crops (haimanta) or summer crops (graiṣmika) according to the availability of workmen and water.

Rice crops and the like are the best of crops; vegetables are of intermediate nature and sugar cane (cultivation) is the worst for they are subject to evils and require much care and expenditure.

Lands which are washed by foam are suitable for srowing creeper like vegetables (pumpkin, gourd and the like), lands which are overflown by water for long pepper, grapes and sugarcane; the vicinity of wells for vegetables and roots; low grounds for green crops, and marginal furrows between any two rows of crops are suitable for the plantation of fragrant plants, medicinal herbs, cascus rots, hrībera (Andropogon plant) and piṇḍāluka (Cocculus).

Such medicinal herbs that grow in marshy lands are to be grown not only in ground suitable for them but also in pots.

तुषारपायनमुष्णशोषणं चा सप्तरात्रादिति धान्यबीजानां, त्रिरात्रं पञ्चरात्रं वा कोशीधान्यानां, मधुधृतसूकरबसाभिः शकृद्युक्ताभिः काण्डबीजानां छेदलेपो, मधुघृतेन कन्दानाम्। अस्थिबीजानां शकृदालेपः। शाखिनां गर्तदाहो गोस्थिशकृद्भिः काले दौहृदं च।

प्ररूढांश्चाशुष्ककटुमत्स्यांश्च स्नुहिक्षीरेण पाययेत्।

कार्पाससारं निर्मोकं सर्पस्य च समाहरेत्।

न सर्पास्तत्र तिष्ठन्ति धूमो यत्रैष तिष्ठति।।

सर्ववीजानां तु प्रथमवापे सुवर्णोदकसंप्लुतां पूर्वमुष्टिं वापयेत् अमुं च मन्त्रं ब्रूयात्–

बीजसंस्कारमाह–तुषारेत्यादि। तुषारपायनं रात्रौ तुषारे निवेशनम्, उष्णशोषणम् आतपे दिवा निवेशनं च, आ सप्तरात्रात् सप्तरात्रमभिव्याप्य, कर्तव्यमिति शेषः। इति एष प्रकारो, धान्यबीजानाम्। त्रिरात्रं पञ्चरात्रं वा, कोशीधान्यानां मुद्गमाषादीनां तुषारपायनमुष्णशोषणं च। मधुघृतसूकरवसाभिः शकृद्युक्ताभिः माध्वीकसर्पिर्वराहकायस्नेहैर्गोमययुक्तैः, काण्डबीजानाम् इक्षुप्रभृतीनां, छेदलेपः छिन्नप्रदेशलेपनम्। मधुघृतेन, कन्दानां सूरणादीनां, छेदलेपः। अस्थिबीजानां कार्पासादिबीजानां, शकृदालेपः। शाखिनाम् आम्रपनसादिवृक्षाणां, गर्तदाहः तन्निवेशगर्ते तृणादिदहनं, गोस्थिशकृद्भिः गवास्थिपुरीषैः, काले दौहृदं च पुष्पफलप्रसवार्हवयःप्राप्तौ दोहलं च, कर्तव्यमिति शेषः।

कृमिकीटाद्युपघातप्रतीकारमाह–**प्ररूढांश्चेति**। प्ररूढांश्च अङ्कुरितत्रिपत्रितमात्रांश्च पूर्वोक्तान् शाखिपर्यन्तान्, अशुष्ककटुमत्स्यान् स्नुहिक्षीरेण पाययेत् आर्द्रक्षुद्रमत्स्यैः समन्तदुग्धाख्यौषधिक्षीरयुक्तैः सेचयेत्। चः समुच्चये।

सर्पप्रतीकारं श्लोकेनाह–**कार्पासेत्यादि**। कार्पाससारं कार्पासनीजस्य सारं, सर्पस्य, निर्मोकं च कञ्चुकं च, समाहरेत् संमेल्य धूपयेत्। एष धूमः मिलितोभयधूपनजनितो धूमः, यत्र तिष्ठति, तत्र सर्पाः न तिष्ठन्ति।।

प्रथमवापे विशेषमाह–**सर्वबीजानामिति**। तुशब्दो विशेषे। सर्वबीजानां प्रथमवापे, सुवर्णोदकसंप्लुतां स्वर्णयुक्तजलकृतसंप्लवां पूर्वमुष्टिं प्रथमां बीजमुष्टिं, वापयेत्। अमुं वक्ष्यमाणं च, मन्त्रं मन्त्रश्लोकं, ब्रूयात् वापयन्नुच्चारयेत्।

The seeds of grains are to be exposed to mist and heat (alternatively for seven nights, the seeds of Kosi (like mudga and māṣa) are to be treated similarly three nights, the seeds of sugar-cane and the like are pasted at the end with the mixture of honey, clarified butter, the fat of hogs and cowdung; the seeds of bulbous roots to be pasted with honey and clarified butter; cotton seeds with cowdung and the water pits at the roots of trees to be burnt and manured with the bones and cow-dung on proper occasion.

Once the sprouts of seeds are grown, manuring may be done with a fresh hall of tiny fishes and irrigated with the milk of snuhi (Euphorbia Antiquorum).

Where there is the smoke produced by burning the essence of cotton seeds and the slough of a snake, there snake no longer will stay.

On the occasion of the first sowing of all kinds of seeds a handful of the same bathed in water with a piece of gold shall be sown and the following mantra may be recited.

प्रजापतये काश्यपाय देवाय नमः सदा।

सीता मे ऋध्यतां देवी बीजेषु च धनेषु च।।

षण्डवाटगोपालकदासकर्मकरेभ्यो यथापुरुषपरिवापं भक्तं कुर्यात्। सपादपणिकं मासं दद्यात्। कर्मानुरूपं कारुभ्यो भक्तवेतनम्।

प्रशीर्णं च पुष्पफलं देवकार्यार्थं व्रीहियवमाग्रयणार्थं श्रोत्रियास्तप- स्विनश्चाहरेयुः। राशिमूलमुञ्छवृत्तयः।

यथाकालं च सस्यादि जातं जातं प्रवेशयेत्।

न क्षेत्रे स्थापयेत् किञ्चित् पलालमपि पण्डितः।।

प्रजापतय इत्यादि। देवाय पर्जन्याय। ऋध्यतां वर्धताम्। ऋध्यतेरात्मनेपदमार्षम्। आद्ययोः श्लोकपादयोर्विसन्धानमपि मन्त्रत्वकृतम्। 'प्रजापतेः काश्यपाय देवलाय नमः सदा' इति भाषापाठः। तत्र तु नम इत्येतदनव्ययं परिकल्प्य प्रजापतेरिति षष्ठी सम्बन्धे समर्थनीया, 'नमःस्वस्ती'ति सूत्रे स्वस्त्यादिसाहचर्येणाव्ययस्यैव नमःशब्दस्य ग्रहणात्।

षण्डवाटेत्यादि। षण्डवाटपालकेभ्यो गोपालकेभ्यो दासेभ्यः कर्मकरेभ्यश्च, यथापुरुषपरिवापं पुरुषपरिश्रमानुरूप्येण, भक्तं भोजनं, कुर्यात् कल्पयेत्। सपादपणिकं मासं पादाधिकपणयुक्तं मासजीवितं, दद्यात्। कर्मानुरूपं, कारुभ्यस्तक्षादिभ्यः, भक्तवेतनं भोजनं वेतनं च, दद्यादित्यनुकर्षः।

प्रशीर्णं चेति। प्रशीर्णं वृक्षादेः स्वयं पतितं, पुष्पफलं पुष्पाणि फलानि च, देवकार्यार्थं, श्रोत्रियाः छन्दोध्यायिनः, तपस्विनः तापसाश्च, आहरेयुः गृह्णीयुः। राशिमूलं खलनिवेशितधान्यराश्यन्तिकगतं कणिशादि, उञ्छवृत्तयः धान्यकणादानजीविनः, आहरेयुरित्यनुषङ्गः।

अध्यायान्ते श्लोकानाह—**यथाकालमिति।** यथाकालं प्रवेशनार्हकालानतिक्रमेण, सस्यादि, जातं जातं निष्पन्नमखिलं, प्रवेशयेत्। क्षेत्रे किञ्चित् पलालमपि, न स्थापयेत्, पण्डितः अर्थसञ्चयविधानाभिज्ञः। यदाहुः—

यस्य विघ्नान् न कुर्वन्ति शीतमुष्णं रतिर्भयम्।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते।। इति।।

'Salutation to Prajāpati Kaśyapa, the divine one. May my agriculture always flourish and the goddess may reside in seeds and wealth."

Food and other provisions shall be supplied to watchmen of gardens, fences and cows, slaves and labourers and this shall include cooked food and wages, in proportion to the work done by them.

They shall be paid an amout of one and one-quarter of a paṇa per month. The wages for artisans shall be according to the work in addition to providing them with food. Śrotriyas (Vedic scholars) and mendicants may be permitted to collect grains and flowers for the purposes of worship of gods and serving the guests. Spill-over of the grains may be permitted to be collected by those who live on gathering such grains.

Grains and crops collected shall be removed to a safe place at the proper-time and they should not be kept in the field itself not even a slightest portion of the harvest by the learned one.

प्रकराणां समुच्छ्रायान् वलभीर्वा तथाविधाः।
न संहतानि कुर्वीत न तुच्छानि शिरांसि च।।

खलस्य प्रकरान् कुर्यान्मण्डलान्ते समाश्रितान्।

अनग्निकाः सोदकाश्च खले स्युः परिकर्मिणः ।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्विंशोऽध्यायः सीताध्यक्षः, आदितः पञ्चचत्वारिंशः ।।

प्रकराणामिति। प्रकराणां धान्यनिवेशस्थानानां, समुच्छ्रयान् उन्नतसन्निवेशान् कुर्वीत। वलभीर्वा तथाविधाः उच्छ्रितानि कूटागाराणि वा कुर्वीत। शिरांसि च तेषां, न संहतानि कुर्वीत अन्योन्योपश्लिष्टानि न कुर्वीत, न तुच्छानि रिक्तकानि न कुर्वीत किन्तु चण्डवाताद्यपहारनिषेधार्थं लोहपाषाणादिगुरुद्रव्यगर्भाणि कुर्वीत।।

खलस्येति। प्रकरान्, खलस्य, मण्डलान्ते स्तम्बधान्यविश्लेषणाय यत्र बलीवर्दपङ्क्तिर्मण्डलभ्रमणं कार्यते स प्रदेशो मण्डलं तस्यान्ते समीपे, समाश्रितान् कुर्यात्। खले, परिकर्मिणः परिकर्मकारिणः, अनग्निकाः धान्यदाहभयादग्निरहिताः, सोदकाश्च यादृच्छिकाग्निदीपनप्रशमार्थं सन्निहितजलाश्च, स्युः।।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्विंशोऽध्यायः सीताध्यक्षः, आदितः पञ्चचत्वारिंशः ।।

Grains shall be collected and kept as heaps or in the form of turrets. They shall never be kept close together (in clusters) and their tops shall not be small or low. Crushing floors of different fields shall be located nearby and the labourers shall be provided with enough water and there shall be no fire nearby.

Thus the forty fifth chapter of Arthaśāstra of Kauṭalya called Superintendent of agriculture comes to an end. Here ends chapter twentyfour of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 46

42. प्रक० सुराध्यक्षः।

Section 42 : Superintendent of Liquor

सुराध्यक्षः सुराकिण्वव्यवहारान् दुर्गे जनपदे स्कन्धावारे वा तज्जातसुराकिण्वव्यवहारिभिः कारयेदेकमुखमनेकमुखं वा विक्रयक्रयवशेन वा। षट्छतमत्ययमन्यत्र कर्तृक्रेतृविक्रेतृणां स्थापयेत्। ग्रामादनिर्णयनमसम्पातं च सुरायाः, प्रमादभयात् कर्मसु निर्दिष्टानां, मर्यादातिक्रमभयादार्याणाम्, उत्साहभयाच्च तीक्ष्णानाम्।

लक्षितमल्पं वा चतुर्भागमर्धकुडुबं कुडुबमर्धप्रस्थं प्रस्थं वेति ज्ञातशौचा निर्हरेयुः।

सुराध्यक्ष इति सूत्रम्। सुरा गौडी माध्वी पैष्टीत्येवं त्रिविधा तस्या अध्यक्षस्तत्सन्धानाद्यधिकृतः। स इहोच्यत इति सूत्रार्थः।

समाहर्तृप्रत्यवेक्षणीये दुर्गे सुरा निर्दिष्टा। तदध्यक्षस्तद्व्यापारो वानाभिहित इदानीमभिधीयते।

सुराध्यक्ष इत्यादि। सः, सुराकिण्वव्यवहारान् सुरातद्बीजसम्बद्धान् तत्सन्धानविक्रयादिव्यवहारान्, तज्जातसुराकिण्वव्यवहारिभिः तत्कर्मकुलोत्पन्ननिपुणतद्व्यवहारिभिः, कारयेत्। कथमित्याह–एकमुखम् एकस्थानकम्, अनेकमुखं वा अनेकस्थानकं वा, विक्रयक्रयवशेन वा क्रयविक्रयप्रियाप्रियत्वानुरोधेन वा। षट्छतमत्ययं षट्छतपणात्मकं दण्डम्, अन्यत्र कर्तृक्रेतृविक्रेतृणां व्यवस्थितस्थानेतरस्थानेषु सन्धानक्रयविक्रयकारिणां, स्थापयेत्। **ग्रामादिति**। सुराया मद्यस्य उपलक्षणया तत्पानमदवतां च, ग्रामाद्, अनिर्णयनं बहिरनिस्सरणम्, असम्पातम् अगमनं च गृहाद् गृहान्तरे जनाकीर्णे वा, स्थापयेदित्यनुषङ्गः। तत्र कारणमाह–प्रमादभयात् कर्मसु निर्दिष्टानां तत्तत्कर्मनियुक्तानामध्यक्षादीनां स्वकर्मस्ववधानभङ्गभयात्, मर्यादातिक्रमभयाद् आर्याणां साधूनां स्वधर्मातिलङ्घनभयात्, उत्साहभयाच्च तीक्ष्णानां शूराणाम् अस्थानशस्त्रप्रयोगभयाच्च।

निर्णयनाभ्यनुज्ञानपक्षमाह–**लक्षितमिति**। वाशब्दः पक्षान्तरे। लक्षितम् अभिज्ञानमुद्राचिह्नितम्, अल्पम् अल्पपरिमाणम्। अल्पत्वस्यैव व्याख्यानं **चतुर्भागमित्यादिना**। चतुर्भागं पादकुडुबम्, अर्धकुडुबं, कुडुबम्, अर्धप्रस्थं, प्रस्थं वा परमावधिपरिमाणम्, इति एवम्प्रकारं सुरापरिमाणं, ज्ञातशौचाः प्रतीतवृत्ताव्यभिचारः, निर्हरेयुः निर्णयेयुः।

The superintendent of liquor shall employ such person proficient in the manufacture of liquor and ferment and carry out business not only in

forts but also in country parts and camps in accordance with the requirements either wholesale or retail. All offenders shall be punished with a fine of six hundred paṇams for producing, selling and distributing the liquor. Liquor should not be taken out of the villages and liquor shops shall not be located close to each other. This is to avoid the workmen spoil the work in hand and the noble ones violate the decency and virtuous character and to prevent fire-brands commit indiscreet acts.

Liquor shall be sold in prescribed quantities such as one fourth or half a kuḍuba, half a prastha or even one prastha.

पानागारेषु वा पिबेयुरसञ्चारिणः।

निक्षेपोपनिधिप्रयोगापहृतादीनामनिष्टोपगतानां च द्रव्याणां ज्ञानार्थमस्वामिकं कुप्यं हिरण्यं चोपलभ्य निक्षेप्तारमन्यत्र व्यपदेशेन ग्राहयेत्। अतिव्ययकर्तारमनायतिव्ययं च।

न चानर्घेण कालिकां वा सुरां दद्यादन्यत्र दुष्टसुरायाः। तामन्यत्र विक्रापयेत्। दासकर्मकरेभ्यो वा वेतनं दद्यात्। वाहनप्रतिपानं सूकरपोषणं वा दद्यात्।

सामान्यविधिमाह–**पानागारेष्वित्यादि**। वेति वाक्यपूरणे। असञ्चारिणः मदकालवर्जितसम्पाताः।

एवं गर्ह्योऽपि सुराव्यवहारश्चोरसाहसिकाद्युपलम्भसाधनत्वान्महाफल इत्यभिप्रायेणाह–**निक्षेपेत्यादि**। निक्षेपो भाण्डघटनाय दत्तम्, उपनिधिः न्यासः, प्रयोगः आधिः, अपहृतं चोरितम्, आदिशब्दाद् याचितकादि गृह्यते, एषां निक्षेपादीनाम्, अनिष्टोपगतानां साहसहृतानां च, द्रव्याणां, ज्ञानार्थं तत्त्वावगमार्थम्, अस्वामिकम् अविदितस्वामिकं, कुप्यं खड्गादिकं, हिरण्यं च मद्यपायिना पानायाहितम्, उपलभ्य, निक्षेप्तारं कुप्यहिरण्याधातारं पुरुषम्, अन्यत्र पानागारदन्यस्मिन् प्रदेशे, व्यपदेशेन वाक्पारुष्यादिच्छलेन, ग्राहयेत् नगराध्यक्षेण। पानागार एव तद्ग्रहणे व्यपदेशाकरणे चान्ये चोरादयः पानशौण्डा यथोक्तकुप्यादिकमविश्वासात् तत्र नानयेयुरित्यत उक्तम् 'अन्यत्रे'ति 'व्यपदेशेने'ति च। अतिव्ययकर्तारम् आयाधिकव्ययकारिणम्, अनायतिव्ययम् आयतिं विना व्ययकारिणं च, ग्राहयेदित्यनुषङ्गः।

न चानर्घेणेति। अनर्घेण अल्पेन मूल्येन, कालिकां वा सवृद्धिकमूल्यदानकालावधिमतीं वा कालान्तरदेयमूल्येन वेति यावत्, सुरां, न च दद्यात् क्रेतृभ्यः, अन्यत्र दुष्टसुरायाः दुष्टसुराव्यतिरेकेण। दुष्टसुरामपि प्रशस्तसुराविक्रयस्थानादन्यत्र नीत्वा धारणकक्रेतृभ्यो दापयेदित्याह–**तामन्यत्र विक्रापयेदिति**। **दासेत्यादि**। दासकर्मकरेभ्यो वा, वेतनं दद्यात् वेतनस्थाने दुष्टसुरां दद्यात्। तच्च वेतनं क्षुद्रकर्मविषयमित्यभिप्रायेणाह–**वाहनेत्यादि**। वाहनप्रतिपानम् उष्ट्रबलीवर्दादिप्रतिपालनविषयं, सूकरपोषणं वा वराहपोषणविषयं वा, दद्याद् अर्थाद् वेतनम्। वाहनप्रतिपानमित्यस्य उष्ट्रादिव्यापारणभृतिनिष्क्रयार्थां सुरामिति वार्थः सुवचः॥

People may be encouraged to drink liquor within the shops and not allowed to go out. The owner of the shop if happens to acquire the knowledge of theft, sealed deposits, unsealed deposits, commodities given for repair, stolen articles, gold and the like, shall contrive to cause them arrested by authorities by leading such customers outside the shop.

Likewise those who are extravagant and spend beyond their means shall also be caused to be arrested.

No fresh liquor, with exception to bad liquor shall be sold below its normal price. Such (bad liquor) shall be sold outside the shop; or it may be given to labourers and servants in lieu of their wages. It may also form the drink of beasts for draught or the subsistence of hogs nourishment.

पानागाराण्यनेककक्ष्याणि विभक्तशयनासनवन्ति पानोद्देशानि गन्धमाल्योदकवन्ति ऋतुसुखानि कारयेत्।

तत्रस्था प्रकृत्यौत्पत्तिकौ व्ययौ गूढा विद्युरागन्तूंश्च।

क्रेतॄणां मत्तसुप्तानामलङ्काराच्छादनहिरण्यानि च विद्युः। तन्नाशे वणिजस्तच्च तावच्च दण्डं दद्युः।

वणिजस्तु संवृतेषु कक्ष्याविभागेषु स्वदासीभिः पेशलरूपाभिरागन्तूनां वास्तव्यानां च आर्यरूपाणां मत्तसुप्तानां भावं विद्युः।

मेदकप्रसन्नासवारिष्टमैरेयमधूनाम्।

उदकद्रोणं तण्डुलानामर्धाढकं त्रयः प्रस्थाः किण्वस्येति मेदकयोगः।

पानागाराणीत्यादि। पानोद्देशानि पानयोग्योत्कृष्टप्रदेशोपेतानि। ऋतुसुखानि ऋतुषु सर्वेषु सुखानि तत्तदुचितभोग्यवस्तुसमृद्धतया सुखकराणि। शेषं सुगमम्।

तत्रस्था इति। तत्रस्थाः पानागारस्थाः, प्रकृत्यौत्पत्तिकौ प्रकृतिसिद्धः प्रकृतिर्नित्यः अपूर्वोपजन उत्पत्तिस्तत्सिद्ध औत्पत्तिकः तथाविधौ, व्ययौ मद्यपायिनां, गूढाः पानागारकर्मकरादिव्यञ्जनाः, विद्युः। आगन्तून् विदेशागतांश्च पातॄन् विद्युः।

क्रेतॄणामिति। मद्यपायिनां, मत्तसुप्तानाम्, अलङ्काराच्छादनहिरण्यानि च देहगतानि, विद्युः, गूढा इत्येव। तन्नाशे तेषामलङ्कारादीनां चोरादिनापहारे, वणिजः मद्यविक्रयिणः, तच्च तावच्च दण्डं नष्टसदृशरूपपरिमाणं दण्डं, दद्युः।

वणिग्विषयं प्रस्तावान्तरमाह—**वणिजस्त्विति**। मद्यविक्रयिणः, संवृतेषु विविक्तेषु, कक्ष्याविभागेषु, स्वदासीभिः आप्तप्रेष्याभिः, पेशलरूपाभिः रुचिराकृतिभिः, आगन्तूनां विदेशागतानां, वास्तव्यानां च स्वदेशगतानां च, आर्यरूपाणाम् आर्यवत् प्रतिभासमानानां, मत्तसुप्तानां, भावं विद्युः अभिप्रायं गृह्णीयुः। चोरत्वपरप्रयुक्तत्वादिपरीक्षार्थम्।

मेदकादियोगविधिं प्रतिजानीते—**मेदकेत्यादि**। मेदकादीनां षण्णां, योगविधिरुच्यत इति शेषः।

मेदकयोगमाह—**उदकद्रोणमित्यादि**। द्रोणपरिमितं जलम् अर्धाढकपरिमितास्तण्डुलाः त्रिप्रस्थपरिमितं मद्यबीजमित्यनेन मिश्रणप्रकारेण मेदकयोगो भवति।

There shall be several rooms in a liquor shop provided with beds and seats kept apart. The drinking room shall contain scents, garlands of

flowers, water and other things of comfort suitable to the respective seasons.

Spies located in the shops shall ascertain whether the expenditure incurred by the customors is ordinary or extraordinary as also whether there are any strangers visiting the shops periodically.

They may also observe the value of the dress, ornaments and gold of the customers who are under intoxication. When such people under the intoxicaation are found to lose their things of value, the merchants of the shop shall be made to compensate for the loss in addition to levying a fine for a equal amount.

Owners of the liquor shop shall find of out the intentions of the visiting customers inhabiting the rooms through their woman employees who are good looking when they are under intoxication.

Liquors are of warious kinds as medaka, prasanna, āsava, ariṣṭa, maireya and madhu.

Medaka is that liquor manufactured with one droṇa of water, half an āḍhaka of rice and three prasthas of kiṇva (ferments).

द्वादशाढकं पिष्टस्य पञ्च प्रस्थाः किण्वस्य पुत्रकत्वक्फलयुक्तो वा जातिसम्भारः प्रसन्नायोगः।

कपित्थतुला फाणितं पञ्चतौलिकं प्रस्थो मधुन इत्यासवयोगः। पादाधिको ज्येष्ठः पादहीनः कनिष्ठः।

चिकित्सकप्रमाणाः प्रत्येकशो विकाराणामरिष्टाः।

मेषशृङ्गीत्वक्क्वाथाभिषुतो गुलप्रतीवापः पिप्पलीमरिचसम्भारस्त्रि- फलायुक्तो वा मैरेयः। गुलयुक्तानां वा सर्वेषां त्रिफलासम्भारः।

मृद्वीकारसो मधु। तस्य स्वदेशो व्याख्यानं कापिशायनं हारहूरकमिति।

प्रसन्नायोगमाह—द्वादशाढकमित्यादि। पुत्रकत्वक्फलयुक्तः कामरूपजनपदप्रसिद्धपुत्रकाख्य-वृक्षविशेषत्वक्फलसहितः। जातिसम्भारः 'पाठालोध्रे 'त्यादिनानुपदं वक्ष्यमाणः पाठादिप्रयोगः। शेषं सुगमम्। पूर्वत्र तण्डुलोक्तदिशा जलप्रमाणमप्यत्र पिष्टाष्टगुणमूहनीयम्।

आसवयोगमाह—कपित्थेत्यादि। कपित्थतुला शतपलः कपित्थफलसारः, फणितं, पञ्चतौलिकं तुलापञ्चकपरिमाणं, मधुनः प्रस्थः प्रस्थपरिमाणं माध्वीकम्, इत्येवम्प्रकार आसवयोगः। एष एव कपित्थादिप्रमाणचतुर्भागाधिको ज्येष्ठः, तच्चतुर्भागन्यूनस्तु कनिष्ठ इत्युच्यत इत्याह—**पादाधिक** इत्यादि। अर्थात् पूर्वोक्तो मध्यमः।

तत्तद्रोगाणां यथास्वं चिकित्सोपयोगिनोऽत एव भिषगुपदिष्टयोज्यद्रव्यप्रमाणाः अरिष्टयोगा इत्याह—**चिकित्सकप्रमाणा** इत्यादि। विकाराणां वातादिविकाररूपाणां रोगाणाम्। अरिष्टा अभयारिष्टादयो वैद्यप्रसिद्धाः।

मैरेयमाह–**मेषशृङ्गीत्यादि**। मेषशृङ्गीत्वक्क्वाथाभिषुतः मेषशृङ्गीसंज्ञकवृक्षत्वक्कषायसंहितः, गुलप्रतीवापः गुलोपचारयुक्तः, पिप्पलीमरिचसम्भारः पिप्पलीमरिचचूर्णमिश्रः, त्रिफलायुक्तो वा त्रिफलाचूर्णयुक्तो वा, मैरेयः। वाशब्दः सम्भारविकल्पने। गुलप्रतिवापिनां मद्यानां सर्वेषामपि त्रिफलासम्भारः साधारण इति कश्चित् पक्षमाह–**गुलयुक्तानामित्यादि**।

मधुविधिमाह–**मृद्वीकारस** इति। द्राक्षारसः पक्वद्राक्षाफलरसः, मधु भवति। तस्य मधुनः, स्वदेशो व्याख्यानं स्वोत्पत्तिदेशसम्बन्धनिमित्तकं विविधमर्थाद् द्विविधमाख्यानं संज्ञा, कापिशायनमिति हारहूरकमिति च। कपिशेति नदी तत्तीरगतं नगरं च तत्र भवं कापिशायनम्। हरहूरं तदेव नगरं तत्र भवं हारहूरकम्। द्व्याख्यानमिति टीकाभाषयोः स्वरसप्रतीते पाठे आख्यानद्वयमित्यर्थः, क्लीबत्वं त्रिभुवनवत्।

The variety called prasanna is the combination of twelve āḍhakas of flour malt, five prasthas of kiṇva (ferment), a specific quantity of spices together with the bark and fruits of putraka (a species of tree found in Kāmarūpa).

The āsava is prepared by the mixture of one hundred palas of Kapittha (Feronia Elephantum), five hundred palas of sugar and one prastha of honey. When the same ingredients are lessened to the extent of one quarter each it is of an inferior qaulity and by the increase of the same proportion a superior kind could be prepared.

Ariṣṭas for various kinds of diseases may be learnt from physicians as required by them.

The variety (of liquor) called maireya is prepared by a decoction of the bark of Meṣaśriṅgi (a species of poisonous plant : Odinia Pinnata or Gymnema Sylvestre) mixed with jaggery (guḍa) and with the powder of pepper or with the powder of Triphala (= Terminalia chebula, Terminalia Bellerica and Phyllanthas Emblica). For all kinds of liquor mixed with jaggery the powder of Triphala is always added.

Madhu is the juice of grapes. It is of two kinds based on its place of origin like Kāpiśāyana (of the city on the banks of the river Kapiśa) and and Hārahūraka (produced in the city called Harahūra).

माषकलनीद्रोणमामं सिद्धं वा त्रिभागाधिकतण्डुलं मोरटादीनां कार्षिकभागयुक्तं किण्वाबन्धः।

पाठालोध्रतेजोवत्येलावालुकमधुकमधुरसाप्रियङ्गुदारुहारिद्रामरिचपिप्पलीनां च पञ्चकर्षिकः सम्भारयोगो मेदकस्य प्रसन्नायाश्च। मधुकनिर्यूहयुक्ता कटशर्करा वर्णप्रसादनी च।

चोचचित्रकविलङ्गगजपिप्पलीनां च कार्षिकः क्रमुकमधुकमुस्तालोध्राणां द्विकार्षिकश्चासवसम्भारः। दशभागश्चैषां बीजबन्धः।

प्रसन्नायोगः श्वेतसुरायाः।

किण्वविधिमाह—माषकलनीत्यादि। माषकलनीद्रोणं माषकल्कभावितमुदकद्रोणम्, आमं सिद्धं वा अक्वथितं क्वथितं वा, त्रिभागाधिकतण्डुलं त्रिभागाधिकद्रोणपरिमाणतण्डुलपिष्टयुक्तं, मोरटादीनां वक्ष्यमाणानां, कार्षिकभागयुक्तं प्रत्येकपादपलभागयुक्तं, किण्वाबन्धः किण्वयोगः।

मेदकप्रसन्नयोः सम्भारयोगमाह- पाठालोध्रेत्यादि। पाठा अम्बष्ठाख्या, लोध्रः तिरीटकल्कः, तेजोवती इभपिप्पली, एला प्रसिद्धा, वालुकं हरिवालुकं, मधुकं मधुयष्टिः, मधुरसा दूर्वा, प्रियङ्गु कुङ्कुमं, दारुहरिद्रा दार्वीसंज्ञा, दार्विति भिन्नं वा पदं तच्च पीतदारुसंज्ञं, हरिद्रा तु प्रसिद्धा, मरिचं कोलं, पिप्पली प्रसिद्धा। पाठादीनां पञ्चकर्षिकः प्रत्येकं चूर्णपञ्चकर्षप्रमाणः, सम्भारयोगः, मेदकस्य प्रसन्नायाश्च। मधुकनिर्यूहयुक्ता यष्टिमधुककषाययुक्ताः, कटशर्करा गङ्गेष्टिः, वर्णप्रसादनी च मेदकप्रसन्नयोर्वर्णप्रसादहेतुश्च।

आसवसम्भारमाह—चोचेत्यादि। चोचं त्वचसंज्ञं चित्रकोऽग्निसंज्ञः विलङ्गम् अमोघा गजपिप्पली प्रसिद्धा एतासां चतसृणां च, कार्षिकः प्रत्येकं कर्षप्रमाणः, टीकाभाषयोरनुमिते 'षट्कार्षिक' इति पाठे सार्धपलप्रमाण इत्यर्थः, क्रमुकमधुकमुस्तालोध्राणां क्रमुको घोण्टा मधुकं श्यामकङ्गुः मुस्ता कुरुविन्दः लोध्रस्तिरीटः एतेषां, द्विकार्षिकश्च कर्षद्वयप्रमाणश्च, आसवसम्भारः। दशभागश्चैषां चोचादीनां दशभागः, बीजबन्धः आसवकरणद्रव्येषु योज्यः।

प्रसन्नायोगः श्वेतसुराया इति। प्रसन्नाया योगो य उक्तः स एव श्वेतसुराया अपि योगो भवति। किन्तु स सम्भाररहितः समकिण्वाबन्धश्चेत्याह स्वामी। सम्भारबीजबन्धावुभावपि नेत्याह भाषा।

Kiṇva (the ferment) is prepared by one droṇa of either boiled or unboiled malt (or paste) of māṣa (Phaseolus Radiatus), three parts more of rice and one karṣa of moraṭa (Alangium Hexapetulum).

In the preparation of medaka and prasanna (varieties of liquors), five karṣas of the powder of each pāṭhā (Clypea Hermandifolia), lodhra (Symplocos Racemosa), tejovati (Piper chaba) elāvāluka (Solanum Melongena), honey, the juice of grapes (madhurasa), priyaṅgu (panic seeds), dāruharidrā (a species of Turmeric), black pepper and long pepper are added as sambhāra (ingredients for fermentation or requisite spices). The decoction of madhuka (Bassia Latifolia) mixed with granulated sugar (Kaṭuśarkarā) when added to prasanna gives it a pleasing colour.

The quantity of spices to be added to āsava (for fermentation) is one karṣa of the powder of each cocaka (bark of cinnamon), citraka (Plumbago Zeylanica), vilanga (Embelia Ribes), gajapippali (Scindapsus Officinalis) and two karṣas of the powder of each of kramuka (betelnut), madhuka (Bassia Latifolia), mustā (Cyprus Rotundus), and Lodhra (Symplocos Racemosa). The addition of the one-tenth of the above is called bijabandha (ferments).

Those ingredients that are added to Prasanna (variety of liquor) could be mixed with white liquor (Śvetasurā).

सहकारसुरा, रसोत्तरा, बीजोत्तरा वा महासुरा, सम्भारिकी वा।

तासां मोरटापलाशपत्तूरमेषशृङ्गीकरञ्जक्षीरवृक्षकषायभावितं दग्धकटशर्कराचूर्णं लोध्रचित्रकविलङ्गपाठामुस्ताकलिङ्गयवदारुहरिद्रेन्दीवरशतपुष्पापामार्गसप्तपर्णनिम्बास्फोतकल्कार्धयुक्तमन्तर्नखो मुष्टिः कुम्भीं राजपेयां प्रसादयति। फाणितः पञ्चपलिकश्चात्र रसवृद्धिर्देयः।

कुटुम्बिनः कृत्येषु श्वेतसुरामौषधार्थं वारिष्टमन्यद् वा कर्तुं लभेरन्।

उत्सवसमाजयात्रासु चतुरहः सौरिको देयः। तेष्वननुज्ञातानां प्रहवणान्तं दैवसिकमत्ययं गृह्णीयात्।

अथ सुराभेदाः–सहकारसुरेति। सुरैव सहकारतैलयुक्ता सहकार सुरा। गुडप्रतिवापयुक्ता सुरा रसोत्तराख्या या शीधु इत्युच्यते। बीजोत्तरा बीजद्रव्यमात्राधिका महासुरा। सम्भारमात्राधिका सुरा सम्भारिकी।

सुराप्रसादनविधिमाह–तासामिति। तासां सर्वासां सुराणां, मोरटादिषट्ककषायभावितं मोरटा मूलपुष्पिकाख्यो वल्लीभेदः पलाशः किंशुकः पत्तूरो लोहमारकः मेषशृङ्गी विषाणी करञ्जो नक्तमालः क्षीरवृक्षो वटादिः एतेषां निर्यूहेन भावितं, दग्धकटशर्कराचूर्णं, लोध्रादिकल्कार्धयुक्तं कलिङ्गयवः देशविशेषभवो यवः शतपुष्पा सितच्छत्राख्या अपामार्गः खरमञ्जरी आस्फोतः ब्रह्मवृक्षः शेषं प्रसिद्धम् एषां लोध्रादीनां कल्कस्य अर्धेन कटशर्कराचूर्णार्धप्रमाणेन युक्तम्, अन्तर्नखो मुष्टिः अदृश्यनखमुष्टिमेयं, प्रक्षिप्तमिति शेषः, कुम्भीं खारीमितां सुरां, राजपेयां प्रसादयति राजपानयोग्या यथा भवेत् तथा स्वच्छां करोति। फाणितः, पञ्चपलिकश्च पलपञ्चकप्रमाणश्च, अत्र प्रसादितसुरायां, रसवृद्धिर्देयः रसवृद्धिप्रयोजनः क्षेप्तव्यः।

कुटुम्बिन इति। कुटुम्बिनः पौरजानपदाः, कृत्येषु विवाहादिकार्येषु, श्वेतसुराम्, औषधार्थं वारिष्टम् औषधार्थं भिषगुपदिष्टमरिष्टं वा, अन्यद्वा मेदकादि वा, कर्तुं सन्धातुं, लभेरन्।

उत्सवेत्यादि। उत्सवसमाजयात्रासु वसन्ताद्युत्सवेषु बन्धुजनमेलनेषु इष्टदेवतापूजासु च, चतुरहः सौरिको देयः चत्वारो दिवसाः सुरापानार्था अनुज्ञातव्याः, सुराध्यक्षेण। तेषु उत्सवादिषु, अननुज्ञातानाम् अनुज्ञां विनैव पिबतां, प्रहवणान्तं प्रहवणं तुष्टिभोजनं तेनोत्सवादिसमाप्तिकालो लक्ष्यते, तदवधिकमित्यर्थः, दैवसिकमत्ययं गृह्णीयात् प्रात्यहिकं दण्डं गृह्णीयात् सुराध्यक्षः। अननुज्ञातपानजनितमददिवसेषु कर्महानिनिमित्तं दण्डं कर्मकरेभ्यो गृह्णीयादिति केचिद् व्याचक्षते।

The liquor called Sahakārasurā contains much juice of mango (Sahakāra); Rasottarā contains decoction of molasses; Bījottarā contains much contents of seeds and Mahasurā contains much spices.

All these types of liquor can be rendered pleasant and sweet with the addition of a handful (with concealed nails) of powdered granulated sugar dissolved in the decoction of moraṭa (Alangium Hexapetulum), palāśa (Butea Frondosa), dattura (Dattura Fastuosa), meṣaśrṅga (a kind of poisonous herb), karañja (Robinir Mitis), Kṣiravrkṣa (bark of milky trees), mixed with one half of the paste (or malt) formed by combining the powders of lodhra (Symplocos Racemosa), citraka (Phumbago Zeylanica), vilanga (Embelia Ribes), Pāṭha (Clypea Hermandiffolia), mustā (Cyprus

Rotundus), Kalāya (leguminous seeds), dāruharidrā (a species of turmeric—Amonum Xanthorrhizon), indivara (blue lotus), śatapuṣpa (Anethum Sowa), apāmārga (Achyranthes Aspera), saptaparṇa (Echites scholaris) and nimba (Nimba Melia) is added to a kumbha of liquor to make it palatable to the king. Five palas of phāṇita (sugar) are added to the above in order to increase its flavour.

On certain special occasions people (members of a family) may be allowed to manufacture white liquor, ariṣṭas for the use in diseases and other types of liquor.

On the occasions of festival, fairs and pilgrimage permission may be given to prepare liquor for the use of four days at a stretch. On such occasions daily fines may be collected by the authorities from those who are permitted to manufacture the liquor (till the end of the period).

सुराकिण्वविचयं स्त्रियो बालाश्च कुर्युः।

अराजपण्याः पञ्चकं शतं शुल्कं दद्युः सुरकामेदकारिष्टमधुफलाम्लाम्लशीधूनां च।

अह्नश्च विक्रयं व्याजी ज्ञात्वा मानहिरण्ययोः।

तथा वैधरणं कुर्यादुचितं चानुवर्तयेत्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे

पञ्चविंशोऽध्यायः सुराध्यक्षः, आदितः षट्चत्वारिंशः।।

सुरेत्यादि। सुराकिण्वविचयं सुराया विचयं श्रपणादिरूपं कर्म किण्वस्य विचयं शोषणादिरूपं च, स्त्रियो बालाश्च कुर्युः, तद्रसानभिज्ञाः।

अराजपण्या इति। स्वोत्पादितमद्यविक्रयिणः, शुल्कं राजभागं, दद्युः। कथं दद्युः, पञ्चकं शतम् इतिशब्द इहाध्याहर्तव्यः पञ्चकं शतमिति पञ्च शुल्कोऽस्मिञ्छते दीयत इत्यनेन क्रमेण दद्युरित्यर्थः। केषां पण्यानामित्याकाङ्क्षायामाह—**सुरकेत्यादि**। तत्र सुरैव सुरका, मेदकारिष्टमधूनि प्रतीतानि, फलाम्ला तालनालिकेरादिमद्यम्, अम्लशीधु उदक्षु प्रतीतमिति स्वामी। चकारः किण्वादिग्रहणार्थः।

उक्तशुल्कातिरेकेण व्याज्या अपि करणमध्यायान्तश्लोकेनाह—**अह्नश्चेति**। अह्नश्च विक्रयं दिनकृतं विक्रयं, तथा वैधरणं मानावश्यम्भाविनं पण्यच्छेदं च, ज्ञात्वा इयत्तया निर्धार्य, मानहिरण्ययोर्व्याजीं षोडशभागरूपां मानव्याजीं विंशतिभागरूपां हिरण्यव्याजीं च, कुर्यात् कल्पयेत्, सुराध्यक्षः। करणं च न यथाकामं भवति, किन्तु समुदाचारसिद्धमेवानुसर्तव्यमित्याह—**उचितं चानुवर्तयेदिति**।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे

पञ्चविंशोऽध्यायः सुराध्यक्षः, आदितः षट्चत्वारिंशः।।

Women and children may be permitted to help in the preparation of liquor and ferments (as they are ignorant of its taste).

Those who deal with liquor other than that of the king shall pay five per cent as toll.

Those who prepare liquor on their own shall pay the taxes to the government, with regard to the manufacture of sura, medaka, ariṣṭa, wine, phalamla (juice from fruits) and āmlaśidha (spirit distilled from molasses).

The authorities shall ascertain the day's sale with regard to the above kinds of liquor, the difference of royal and public measures, the excessive amount of the sale proceeds realised thereby and fix the amount of compensation due to the king (from local and foreign merchants) and avoid loss of revenue always resorting to the best course.

Thus the forty sixth chapter of the Arthaśāstra of Kauṭalya entitled superintendent of liquor comes to an end. Here ends the twentyfifth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 47

43. प्रक० सूनाध्यक्षः।

Section 43 : Authority of the Slaughter-House

सूनाध्यक्षः प्रदिष्टाभयानामभयवनवासिनां च मृगपशुपक्षिमत्स्यानां बन्धवधहिंसायामुत्तमं दण्डं कारयेत्। कुटुम्बिनामभयवनपरिग्रहेषु मध्यमम्।

अप्रवृत्तवधानां मत्स्यपक्षिणां बन्धवधहिंसायां पादोनसप्तविंशतिपणमत्ययं कुर्यात्, मृगपशूनां द्विगुणम्।

प्रवृत्तहिंसानामपरिगृहीतानां षड्भागं गृह्णीयात्। मत्स्यपक्षिणां दशभागं वाधिकं, मृगपशूनां शुल्कं वाधिकम्।

पक्षिमृगाणां जीवत्षड्भागमभयवनेषु प्रमुञ्चेत्।

सूनाध्यक्ष इति सूत्रम्। सूना भक्ष्यप्राणिवधस्थानं तदध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः। उत्तममध्यमाधमेषु कर्मसु तदनुरूपा अध्यक्षाः कार्या इत्युक्तमधस्तात्। तत्र समाहर्तृसन्निधातृप्रभृतय उत्तमाः पौतवाध्यक्षादयो मध्यमाश्चाभिहिताः। इदानीमधमकर्माध्यक्षा अभिधीयन्त इति सम्बन्धः।

तदाह—**सूनाध्यक्ष** इति सूनाध्यक्षः, प्रदिष्टाभयानां प्रख्यापिताहिंसानाम्, अभयवनवासिनां च ब्रह्मसोमारण्यसर्वातिथिमृगवनादिवासिनां च, मृगपशुपक्षिमत्स्यानां मृगाणां कुरङ्गादीनां पशूनां खड्गमहिषादीनां पक्षिणां मयूरादीनां मत्स्यानां च, बन्धवधहिंसायां बन्धनप्रहारमारणेषु, उत्तमम् उत्तमसाहसं, दण्डं कारयेत्। कुटुम्बिनाम्, अभयवनपरिग्रहेषु अभयवनवासिमृगादिविषये वधादौ, मध्यमं साहसं, कारयेत्।

अप्रवृत्तेत्यादि। अप्रवृत्तवधानां चिरानुष्ठीयमानवधाः प्रवृत्तवधाः तथा न भवन्तीत्यप्रवृत्तवधाः तेषां, मत्स्यपक्षिणां बन्धवधहिंसायां, पादोनसप्तविंशतिपणम्, अत्ययं दण्डं, कुर्यात्। मृगपशूनां तथाविधानां, द्विगुणम् अर्धोनचतुष्पञ्चाशत्पणं दण्डं कुर्यात्।

प्रवृत्तेत्यादि। प्रवृत्तहिंसानाम्, अपरिगृहीतानाम् अस्वामिकारक्षितवनगतानां वधादौ, षड्भागं गृह्णीयात्। मत्स्यपक्षिणां, दशभागं वाधिकं दशमांशं ततोऽधिकं वा, गृह्णीयात्। मृगपशूनां, शुल्कं वाधिकं राजादेयं मृगपशुमूल्यस्य दशभागं ततोऽधिकं वा, गृह्णीयात्।

पक्षीत्यादि। पक्षिमृगाणां वनगृहीतानां, जीवत्षड्भागं जीवतां षड्भागम्, अभयवनेषु, प्रमुञ्चेत्।

The officer in charge of the slaughter-house shall take care to see that

no person, entraps, kills or molests dear, bison, birds and fish which are under the protection of the state living in forests of protection (or sanctuary) and he who commits this crime shall be punished with the highest amercement. If the same crime is committed by the householders they shall be punished with the middle most amercement.

When a person entraps, kills or molests either fish of birds that do not pray upon other animals, he shall be punished with a fine of twenty six and three-quarters of paṇas and the offence in case of animals like deer and other beasts, the fine shall be twice as mentioned above.

From the animals that are not under protection and captured the share of the state shall be one-sixth. In case of fish and birds one-tenth or more than that shall be collected and the toll for deer and other animals shall be more than that.

One-sixth of the animals captured and which are alive shall be let off in forests under state protection.

सामुद्रहस्त्यश्वपुरुषवृषगर्दभाकृतयो मत्स्याः सारसा नादेयास्तटाककुल्योद्भवा वा, कौञ्चोत्क्रोशकदात्यूहहंसचक्रवाकजीवञ्जीवकभृङ्गराजचकोरमत्तकोकिलमयूरशुकमदनशारिका विहारपक्षिणो मङ्गल्याश्चान्येऽपि प्राणिनः पक्षिमृगा हिंसाबाधेभ्यो रक्ष्याः; रक्षातिक्रमे पूर्वः साहसदण्डः।

मृगपशूनामनस्थि मांसं सद्योहतं विक्रीणीरन्। अस्थिमतः प्रतिपातं दद्युः। तुलाहीने हीनाष्टगुणम्।

वत्सो वृषो धेनुश्चैषामवध्याः। घ्नतः पञ्चाशत्को दण्डः। क्लिष्टघातं घातयतश्च।

रक्ष्यप्राणिन आह—सामुद्रेत्यादि। सामुद्राः समुद्रभवाः हस्त्यश्वाद्याकृतयश्चेति विग्रहः तथाभूताः, मत्स्याः जलचरविशेषाः, तथा सारसाः सरश्चराः, नादेयाः नदीचराः, तटाककुल्योद्भवा वा तटाकभवाः कुल्याभवाश्च मत्स्याः, तथा क्रौञ्चोत्क्रोशकादयस्त्रयोदश पक्षिणः, तत्र क्रौञ्चः क्रुङ्नामा उत्क्रोशकः कुररः दात्यूहः कालकण्ठकः जीवञ्जीवकः पक्षिभेदः भृङ्गराजो धूम्याटः चकोरश्चन्द्रिकाप्रियः मदनशारिके पक्षिजातिभेदौ शेषाः प्रसिद्धाः, विहारपक्षिणः क्रीडार्थाः कुक्कुटादयः, मङ्गल्याश्चान्येऽपि प्राणिनः पक्षिमृगाः मङ्गलार्थाश्च गरुडभरद्वाजादय इतरेऽपि प्राणिनः पक्षिणो मृगाश्च, हिंसाबाधेभ्यः मारणपीडनेभ्यो, रक्ष्याः। रक्षातिक्रमे तद्रक्षणानास्थायां, पूर्वः साहसदण्डः, सूनाध्यक्षस्य।

मांसविक्रयविधिमाह—मृगेत्यादि। मृगपशूनाम्, अनस्थि अस्थिविनाकृतं, मांसं, सद्योहतम् अयातयामम् अभिनवं, विक्रीणीरन्। अस्थिमतः अस्थियुक्तस्य मांसस्य, प्रतिपातं दद्युः पातो हानिः तत्प्रतिनिधिः प्रतिपातः हीनप्रतीकारः तं दद्युः अस्थियोगहापितमांसमात्राप्रतिपूरणार्थमधिकमांसमात्रां दद्युरित्यर्थः। तुलाहीने हीनाष्टगुणं तुलोन्मानच्छद्मनिमित्तहानियोगिनि मांसे हीनमांसादष्टगुणं मांसं, दद्युः। तत्र चाष्टगुणेऽष्टभाग एव हापितपूरणार्थः क्रेतुः, अवशिष्टास्तु अष्टभागाः सप्त सूनाध्यक्षस्येत्याह स्वामी।

वत्स इति। वत्सः स्तनन्धयः, वृषः रेतस्सेचनक्षमः, धेनुश्च प्रसवधर्मिणी गौश्च, एषां मृगपशूनाम् अनुज्ञातवधानामपि मध्ये, अवध्याः। घ्नतः वत्सादिमारयितुः, पञ्चाशत्कः पञ्चाशत्पणिकः, दण्डः। क्लिष्टघातं घातयतश्च विचित्रव्यथोत्पादनदारुणो वधो यथा भवेत् तथा वधं कारयतश्च उक्त एव दण्डः।

Animals living in the ocean having the form of elephants, horses, possessed of human shape as well as fish in tanks, lakes, channels and rivers, and such game birds as krauñca (a kind of heron), utkrośaka (osprey), dātyūha (a kind of cuckoo), hamsa (swan), cakravāka (the ruddy goose); Jīvañjīvaka (a kind of pheasant), bhṛṅgarāja (lanius malabaricus), cakora (partridge); mattakokila (cuckoo), peacock, parrot and maina as well as other auspicious animals whether birds or beasts shall be protected from all kinds of molestations. Those who infringe the rule shall be punished with the first amercement.

One may sell boneless flesh of animals just killed. In the case of selling flesh along with bones an equivalent compensation (in the form of flesh) may be given (to the buyer). Any diminution in weight owing to the use of a false scale shall be compensated with eight times the diminution.

(Among animals) cattle such as a calf, a milch cow etc; shall not be slaughtered. The one who slaughters these or tortures them to death shall be punished fifty paṇas.

परिसूनमशिरःपादास्थि विगन्धं स्वयंमृतं च न विक्रीणीरन्। अन्यथा द्वादशपणो दण्डः।

दुष्टाः पशुमृगव्याला मत्स्याश्चाभयचारिणः।
अन्यत्र गुप्तिस्थानेभ्यो वधबन्धमवाप्नुयुः।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
षड्विंशोऽध्यायः सूनाध्यक्षः, आदितः सप्तचत्वारिंशः।।

अविक्रेयमांसान्याह–**परिसूनमिति**। परिसूनं सूना मांसपरिनिष्पादनस्थानं तत् परिवर्जितं यस्य तत् तथाभूतम् अर्थात् सूनातिरिक्तस्थलनिहतप्राणिदेहोद्धृतं मांसं, तथा अशिरःपादास्थि शिरःपादास्थिशून्यं वनहतखादितावशिष्टमृगाङ्गसम्बन्धि मांसं, तथा विगन्धं दुर्गन्धि मांसं, मस्वयंमृतं च रोगमृतमांसं च, न विक्रीणीरन्। अन्यथा परिसूनादिविक्रये, द्वादशपणो दण्डः।

अध्यायप्रान्ते श्लोकमाह–**दुष्टा** इति। अभयचारिणः अभयवनेषु रक्ष्यमाणाः, दुष्टाः हिंस्राः, पशुमृगव्यालाः पशवो गवयाद्याः मृगाः शुनकादयः व्याला व्याघ्रादयश्च, त्स्याश्च शिंशुमारादयः, गुप्तिस्थानेभ्योऽन्यत्र अभयवनेभ्योऽन्यस्मिन् स्थाने, समागता इति शेषः, वधबन्धम् अवाप्नुयुः। स एषोऽभयवनस्थपशुमृगादिवधस्य प्राक्प्रतिषिद्धस्य प्रतिप्रसवः।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
षड्विंशोऽध्यायः सूनाध्यक्षः, आदितः सप्तचत्वारिंशः।।

Flesh of animals slaughtered out side the slaughter-house shall not be sold as also those which are headless, legless, boneless flesh, rotten flesh of animals as also of those which met with natural death. Otherwise one shall be punished with twelve paṇas.

Cattles, wild beasts, wild elephants, and fishes living under state protection in forests shall be entrapped and killed outside the forest region if they become vicious.

Thus the fortyseventh chapter of the Arthaśāstra of Kauṭalya entitled the authority of the slaughter-house comes to an end. Here ends the twentysixth chapter of second Adhikaraṇa called Adhyakṣapracāra.

Chapter 48

44. प्रक० गणिकाध्यक्षः।

Section 44 : The Superintendent of Prostitutes

गणिकाध्यक्षो गणिकान्वयामगणिकान्वयां वा रूपयौवनशिल्पसम्पन्नां सहस्रेण गणिकां कारयेत्। कुटुम्बार्धेन प्रतिगणिकाम्।

निष्पतिताप्रेतयोर्दुहिता भगिनी वा कुटुम्बं भरेत। तन्माता वा प्रतिगणिकां स्थापयेत्। तासामभावे राजा हरेत्।

सौभाग्यालङ्कारवृद्ध्या सहस्रेण वारं कनिष्ठं मध्यमयुत्तमं वारोपयेत्। छत्रभृङ्गारव्यजन-शिबिकापीठिकारथेषु च विशेषार्थम्।

गणिकाध्यक्ष इति सूत्रम्। गणिका रूपाजीवाः तासामध्यक्षः, अर्थात् तद्व्यापार उच्यत इति सूत्रार्थः। 'रूपाजीवाः स्नानशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येदि'त्युक्तम्। तदध्यक्षस्त्वनुक्त इदानीमभिधीयते।

गणिकाध्यक्ष इति। सः, गणिकान्वयां गणिकावंशभवाम्, अगणिकान्वयां वा, वाशब्देन गणिकात्वं प्रति वंशस्याप्रयोजकत्वे सूचिते गणिकात्वप्रयोजकं धर्ममाह– रूपयौवनशिल्पसम्पन्नां सौन्दर्यतरुणिमकला-कौशलशालिनीं स्त्रियं, सहस्रेण गणिकां कारयेत् नवकुटुम्बस्थापनार्थरूप्यसहस्रदानेन गणिकास्थाने स्थापयेत्, वक्ष्यमाणनियोगानुष्ठानाय। अयमेकगणिकास्थापनपक्षः। अनेकगणिकास्थापनपक्षमाह–**कुटुम्बार्धेनेति**। कुटुम्बं गणिकाकुटुम्बकर्म राजपरिचर्यालक्षणं तस्यार्धेन अर्धमेकमनयानुष्ठेयमपरमन्ययेत्यर्धशो विभजनेन, अथवा कुटुम्बस्थापनार्थदेयद्रव्यं कुटुम्बं तस्यार्धेन अर्धशो दानेन, प्रतिगणिकां द्वितीयामपि कारयेत्। कुटुम्बार्धोक्त्या पूर्वोक्तस्य सहस्रस्याप्यर्धशो विभज्य दानं गणिकाप्रतिगणिकयोरुक्तप्रायम्।

निष्पतितेत्यादि। निष्पतिताप्रेतयोः प्रोषिताप्रमीतयोर्गणिकयोः, दुहिता, भगिनी वा, कुटुम्बं गणिकातन्त्रं, भरेत वहेत। अर्थात् तद्धनं च हरेत। तन्माता वा प्रतिगणिकां स्थापयेत् दुहितृभगिन्योरभावे तन्मातैव तत्स्थानेऽन्यामादिश्य तत्कार्यं कारयेत्। तासां दुहितृभगिनीप्रतिगणिकामातृणाम्, अभावे, राजा, हरेद् गणिकाधनम्।

सौभाग्यालङ्कारवृद्ध्येति। सौभाग्यालङ्कारवृद्ध्यानुगुण्येन, सहस्रेण उपदापणसहस्रग्रहणेन, वारं नियोगं, कनिष्ठम् अधमम्, मध्यमम्, उत्तमं वा, आरोपयेद् दद्यात्। तत्र कनिष्ठस्य सहस्रग्रहणे मध्यमस्य द्विसहस्रग्रहणम् उत्तमस्य त्रिसहस्रग्रहणमिति बोद्धव्यम्। किमर्थं कनिष्ठादिमारोपयेदित्यत्राह–**छत्रभृङ्गारव्यजनशिबिका-पीठिकारथेषु च विशेषार्थमिति**। छत्रादिग्रहणादिकर्मसु अनुष्ठानप्रतिनियमार्थं, यद्वा तेषु यथायोगमनुष्ठीय-

मानेषु शोभोत्कर्षार्थम्। तत्रच्छत्रादिषु षट्सु मध्ये प्रथमद्विकं नियोगस्य कनिष्ठस्य द्वितीयद्विकं मध्यमस्य तृतीयद्विकमुत्तमस्येति क्रम औचित्यादवसेयः।

The superintendent of prostitutes shall employ (at the king's court) a prostitute either born in such families or outside on a salary of one thousand paṇas (per annum) and that girl should be noted for her beauty, youth and connected accomplishments. A rival to her shall also be engaged at a remuneration of half the salary prescribed above.

In case she happens to be away or dies, her daughter or sister shall look after her family. Or her mother shall appoint another prostitute for the job (on remuneration). In the absence of these the king shall forfeit their rights.

Prostitutes shall be classified into three types according to assignment of particular job as Kaniṣṭha—junior with a remuneration of a hundred gold coins; Madhyama—middle class with a remuneration of five hundred coins and Uttama—superior with a salary of one thousand gold coins. The Uttama type may be assigned the jobs like waiting at the door, assisting in the play of dice and supplying of betels for chewing. The Madhyama is to be assigned job like carrying umbrella, golden pitcher and fan. The Kaniṣṭha one shall place and remove the footsteps and pots to wash the feet (of the king). Special duties assigned to these shall be the carrying of the royal umbrella, golden pitchers, fans, stools or footrests and to help the king to ascend the chariot.

सौभाग्यभङ्गे मातृकां कुर्यात्।

निष्क्रयश्चतुर्विंशतिसाहस्रो गणिकायाः। द्वादशसाहस्रो गणिकापुत्रस्य। अष्टवर्षात् प्रभृति राज्ञः कुशीलवकर्म कुर्यात्।

गणिकादासी भग्नभोगा कोष्ठागारे महानसे वा कर्म कुर्यात्। अविशन्ती सपादपणमवरुद्धा मासवेतनं दद्यात्।

भोगं दायमायं व्ययमायतिं च गणिकाया निबन्धयेत्। अतिव्ययकर्म च वारयेत्।

सौभाग्यभङ्ग इति। रूपयौवनापगमे वार्धकनिमित्ते, मातृकां कुर्यात् तावत्कालभुक्तां मातृस्थानीयां कुर्यात्, अर्थाद् भोग्यगणिकायाः।

गणिकात्वनिर्मोक्षविधिमाह—**निष्क्रय** इति। निष्क्रयः राजदास्यनिर्मोक्षमूल्यं, चतुर्विंशतिसाहस्रः चतुर्विंशतिसहस्रपणः, गणिकायाः। द्वादशसाहस्रो द्वादशसहस्रपणो निष्क्रयः, गणिकापुत्रस्य। निष्क्रयाभावे त्वाह—**अष्टवर्षादिति**। अष्टवर्षात् प्रभृति, राज्ञः, कुशीलवकर्म चारणकर्म, कुर्याद् गणिकापुत्रः।

गणिकादासीति। गणिकायाः परिचारिका, भग्नभोगा भोगार्हवयोऽतिक्रान्ता, कोष्ठागारे, महानसे

वा, कर्म व्रीह्यवघातादिकं पाकपात्रमार्जनादिकं वा, कुर्यात्। अविशन्ती कर्माकुर्वती, सपादपणं, मासवेतनं दद्याद् गणिकायै। का दद्यात्, अवरुद्धा पुरुषेण केनचिद् गृहेऽवरुध्यात्मैकभोग्यतां नीता गणिकादासी।

भोगमिति। भोगं भोक्तृपुरुषदत्तं धनं, दायं मातृक्रमागतं धनम्, आयं भोगातिरिक्तलाभम्, व्ययम्, आयतिं च प्रभावं च, गणिकायाः, निबन्धयेत् पुस्तके लेखयेद्, गणिकाध्यक्षः। अतिव्ययकर्म च, वारयेत् प्रतिषेधयेत्।

Once her beauty and accomplishments fade due to old age, she may be given the rights of a mother prostitute, jobs being assigned to junior ones.

For releasing a prostitute from the royal duties and to make her a free person, an amount of twenty four thousand coins shall be paid to the king.

For the relsease of the son of a prostitute from bondage twelve thousand coins shall be paid. From the age of eight years onward they shall hold musical performance etc; before the king.

The lady assistant of a prostitute, one passed the age of enjoyment, shall be appointed to perform the duties at the palace, or kitchen. If unemployed such girls shall be paid a monthly wage a paṇa and a quarter for the subsistence.

The authorities shall note the earnings, inheritance, income, expenditure and future earnings of every prostitute. They shall prevent the extravagent expenditure on their part.

मातृहस्तादन्यत्राभरणन्यासे सपादचतुष्पणो दण्डः। स्वापतेयं विक्रयमाधानं नयन्त्याः सपादपञ्चशत्पणो दण्डः।

चतुर्विंशतिपणो वाक्यापारुष्ये। द्विगुणो दण्डपारुष्ये। सपादपञ्चशत्पणः पणोऽर्धपणश्च कर्णच्छेदने।

अकामायाः कुमार्या वा साहसे उत्तमो दण्डः। सकामायाः पूर्वः साहसदण्डः।

गणिकामकामां रुन्धतो निष्पातयतो वा व्रणविदारणेन वा रूपमुपघ्नतः सहस्रदण्डः। स्थानविशेषेण वा दण्डवृद्धिरा निष्क्रयद्विगुणात्। पणसहस्रं वा दण्डः।

मातृहस्तादिति। मातृहस्तादन्यत्र प्रियविटादिहस्ते, आभरणन्यासे आभरणानां रक्षार्थेऽर्पणे, सपादचतुष्पणो दण्डः, गणिकायाः। स्वापतेयं स्वं वस्त्रभाजनादि, विक्रयम्, आधानं वा, नयन्त्याः, सपादपञ्चाशत्पणो दण्डः।

चतुरित्यादि। चतुर्विंशतिपणः तावन्मानो दण्डः, वाक्पारुष्ये वाचा पराक्रोशे। द्विगुणः अष्टचत्वारिंशत्पणः, दण्डपारुष्ये करपादलगुडताडनादौ। सपादपञ्चाशत्पणः, पणोऽर्धपणश्च सार्धपण इत्यर्थः, कर्णच्छेदने दण्डः। तत्राद्यो राज्ञे देयः, द्वितीयस्तु गणिकाध्यक्षाय। त एते गणिकादण्डाः।

अथ तत्कामुकपुरुषदण्डमाह–**अकामायाः** इति। अकामाया इच्छारहितायाः, कुमार्याः, वाशब्दः प्रस्तावान्तरद्योतनार्थः, साहसे बलात्करणे, उत्तमो दण्डः उत्तमसाहसः। सकामायाः इच्छन्त्याः कुमार्याः, साहसे, पूर्वः साहसदण्डः।

गणिकामिति। गणिकाम्, अकामां, रुन्धतः स्वगृहे अवरुध्य वासयतः, निष्पातयतो वा निष्पतनं निर्मोक्षणं कारयतो वा, व्रणविदारणेन वा रूपम् उपघ्नतः व्रणहेतुना दन्तनखादिक्षतेन रूपं विकारयतो वा, सहस्रदण्डः। **स्थानेत्यादि**। स्थानविशेषेण वा शरीरगततत्तत्स्थानविशेषानुरूप्येण वा, दण्डवृद्धिः उक्तस्य सहस्रदण्डस्य वृद्धिः गुणनिका कल्पनीया। आ कुत एषा वृद्धिकल्पनेत्याह–आ निष्क्रयद्विगुणात् निष्क्रयश्चतुर्विंशतिसाहस्रो य उक्तस्तस्य द्विगुणम् अष्टाचत्वारिंशत्साहस्रमभिव्याप्य। तदुपरि शरीरावयवोपघातनिमित्ता दण्डवृद्धिर्नास्तीत्यर्थः। स्वामी तु स्थानविशेषेण वेति पतीकमुपादाय व्याचष्टे– "उत्तमादिवारप्राधान्येन दण्डवृद्धिः कल्पनीया। आकुत इत्याह–आ **निष्क्रयद्विगुणादिति**। निष्क्रयश्चतुर्विंशतिसाहस्रः तद्द्विगुणोऽष्टाचत्वारिंशत्साहस्रः इति। आ निष्क्रयद्विगुणादित्येतदनन्तरं 'पणसहस्रं वा दण्डः' इति वाक्यम् अर्थशास्त्रादर्शेषु पठ्यते। तत्तु स्वामिटीकाभाषयोरननुसंहितत्वात् पूर्वोत्तरग्रन्थानाकाङ्क्षितत्वाच्च प्रक्षिप्तं मन्यमानैर्न व्याख्यातमस्माभिः।

If she (prostitute) deposits her ornaments (for safe keeping) in the hands of any person other than her mother, she may be fined four paṇas and a quarter. If she is to sell or mortgage her property (or wealth) she may be made to pay a fine of fifty paṇas and a quarter.

A prostitute shall be fined twenty-four paṇas for speaking ill of others. Twice the same shall be fixed as fine for causing physical hurt to other. She is be fined fifty paṇas and a quarter as also one and a half paṇas for cutting the ear (of any person).

If a person forces against the will of a prostitute or of an young prostitute damsel, he shall be punished with the highest amercement. If the prostitute is willing and (is of under age) he shall be punsihed with the first amercement (for forcing his will).

For forcing an unwilling prostitute, or hurting or inflicting disfigurement a thousand paṇas may be charged as fine to the culprit.

प्राप्ताधिकारां गणिकां घातयतो निष्क्रयत्रिगुणो दण्डः। मातृकादुहितृकारूपदासीनां घात उत्तमः साहसदण्डः।

सर्वत्र प्रथमेऽपराधे प्रथमः, द्वितीये द्विगुणः, तृतीये त्रिगुणः, चतुर्थे यथाकामी स्यात्।

राजाज्ञया पुरुषमनभिगच्छन्ती गणिका शिफासहस्रं लभेत। पञ्चसहस्रं वा दण्डः।

भोगं गृहीत्वा द्विषत्या भोगद्विगुणो दण्डः। वसतिभोगापहारे भोगमष्टगुणं दद्याद् अन्यत्र व्याधिपुरुषदोषेभ्यः।

प्राप्ताधिकारामिति। लब्धच्छत्रभृङ्गारादिनियोगां, गणिकां, घातयतः, निष्क्रयत्रिगुणः

द्वासप्ततिसाहस्रपणो, दण्डः। मातृकादुहितृकारूपदासीनां घाते कुट्टन्याः कुमार्याः प्रतिकर्मदास्या वा ताडने, उत्तमः साहसदण्डः।

सर्वत्रेति। सर्वस्मिन्, प्रथमेऽपराधे यो य उक्तस्तस्मिंस्तस्मिन्निदम्प्रथमकृतेऽपराधे, प्रथमः यो य उक्तो दण्डः स स प्रथम इत्यर्थः। द्वितीये तस्मिंस्तस्मिन्नपराधे पुनरारब्धे, द्विगुणः स स दण्डः कार्य इति शेषः। तृतीये, त्रिगुणः। चतुर्थेऽपराधे, यथाकामी स्यात् चतुर्गुण-सर्वस्वहरण-प्रवासनादिरूपं दण्डं स्वेच्छानुरोधेन विदध्यादित्यर्थः।

राजाज्ञयेति। राजाज्ञानुरोधेन, पुरुषमनभिगच्छन्ती, गणिका, शिफासहस्रं कशाघातसहस्रं, दण्डं लभेत। पञ्चसहस्रं वा दण्डः शिफासहस्राभावपक्षे पञ्चसहस्रपणात्मको दण्डः।

भोगमिति। भोगं सम्भोगवेतनं, गृहीत्वा, द्विषत्याः भोगदं पुरुषमरोचयमानायाः, भोगद्विगुणो दण्डः। **वसतीत्यादि**। वसतिभोगापहारे वसतिभोगस्य रात्रिसम्भोगस्य अपहारे कथादिव्याजेन कालयापने, भोगं सम्भोगवेतनं गृहीतम्, अष्टगुणं दद्यात् तत्रापवादः—**अन्यत्र व्याधिपुरुषदोषेभ्य** इति। व्याधयः कुष्ठादयः पुरुषदोषा अरागत्वादयः तद्व्यतिरेकेण।

When a man hurts a properly employed prostitute of the court, he shall be fined three times of the amount of redemption. For hurting the mother of a prostitute, or an younger sister or a female assistant, he shall be punished with the highest amercement.

As regards offences in general, the punishment for the first time shall be the first amercement, twice as much for the second time, thrice as much for third time and for further offences like the fourth time, the king shall impose such punishments as he deems proper.

When a prostitue refuses to court a person as ordered by the king, she shall be punished with a thousand lashes with a whip or pay a fine of five hundred paṇas.

If a prostitute after having received the required amount refuses to yield her person to the customer she shall be fined twice the fees fixed, and this applies only when the person approaching her is free from contageous diseases or personal defects.

पुरुषं घ्नत्याश्चिताप्रतापोऽप्सु प्रवेशनं वा।

गणिकाभरणमर्थं भोगं वापहरतोऽष्टगुणो दण्डः। गणिका भोगमायतिं पुरुषं च निवेदयेत्।

एतेन नटनर्तकगायकवादकवाग्जीवनकुशीलवप्लवकसौभिकचारणस्त्रीव्यवहारिणां स्त्रियो गूढाजीवाश्च व्याख्याताः।

तेषां तूर्यमागन्तुकं पञ्चपणं प्रेक्षावेतनं दद्यात्।

रूपाजीवा भोगद्वयगुणं मासं दद्युः।

गीतवाद्यपाठ्यनृत्तनाट्याक्षरचित्रवीणावेणुमृदङ्गपरचित्तज्ञानगन्धमाल्यसंयूहनसम्पादन-संवाहनवैशिककलाज्ञानानि गणिका दासीरङ्गोपजीविनीश्च ग्राहयतो राजमण्डलादाजीवं कुर्यात्।

पुरुषमिति। पुरुषं घ्नत्याः मारयन्त्याः, चिताप्रतापः तेनैव सह चितायामारोप्य दहनम्, अप्सु प्रवेशनं वा गलमहाशिलाबन्धेन जलनिमज्जनं वा कर्तव्यम्।

गणिकाभरणमिति। गणिकाया आभरणम्, अर्थं तदन्यद् वा वस्तु, भोगं वा सम्भोगवेतनं वा, अपहरतः, अष्टगुणः अपहृतद्रव्याष्टगुणः, दण्डः। **गणिकेति**। सा, भोगम् आयतिं तन्मूलमायं, पुरुषं च कृतवासं, निवेदयेत्।

एतेनेति। उक्तेन गणिकाकल्पेन, नटादीनां दशानां, स्त्रियः, गूढाजीवाश्च प्रच्छन्नव्यभिचारजीविन्यश्च, व्याख्याताः उक्ताः, त एते गणिकाविधय एव यथासम्भवमासु योजनीया इत्यर्थः। तत्र नटा अर्थाभिनयजीविनः, नर्तकाः गात्रविक्षेपमात्रकारिणः, गायकाः कण्ठगायिनः, वादकाः वैणिकादयः, वाग्जीवनाः कथकाः, कुशीलवाः नर्तकीप्रधानाः, प्लवका रज्ज्वारोहकाः, सौभिका 'ऐन्द्रजालिकाः छायाग्राहका इत्यपरे' इति स्वामी, चारणा, विटमल्लादयः, स्त्रीव्यवहारिणो बन्धकीकुटुम्बिनः। चारणानां स्त्रीव्यवहारिणामिति व्यस्तपाठोऽपि।

तेषामिति। तेषां, तूर्यं नटनर्तकादिमेलकम्, आगन्तुकं विदेशादागतं, पञ्चपणं प्रेक्षावेतनं स्वकला-प्रकाशनार्थं वेतनं, दद्याद् राज्ञे।

रूपाजीवा इति। गणिकाः, भोगद्वयगुणं दिवसद्वयलाभं, मासं मासदेयं, दद्युः।

गीतवाद्येत्यादि। गीतादीनां कलान्तानां षोडशानां ज्ञानानि, गणिकाः पूर्वोक्ताः, दासीरङ्गोपजीविनीश्च दासीर्गणिकातिरिक्तवेश्याः रङ्गोपजीविनीर्नटादिस्त्रियश्च, ग्राहयतः शिक्षयत आचार्यस्य, राजमण्डलाद् राज्ञो यन्मण्डलं नगरग्रामादिसमूहोत्थमायजातं तत्सकाशाद्, आजीवं वृत्तिं, कुर्यात् कल्पयेद् राजा। तत्र गीतवाद्ये प्रसिद्धे, पाठ्यमाख्यायिकादि, नृत्तं पदार्थाभिनयः, नाट्यं वाक्यार्थाभिनयः, अक्षरं लिपिः, चित्रम् आलेख्यकर्म, वीणा वेणुर्मृदङ्गश्च प्रसिद्धाः, परचित्तज्ञानं परेङ्गिताकारवेदनं, गन्धमाल्यसंयूहनसम्पादने गन्धसंयूहनं गन्धयुक्तिः माल्यसम्पादनं माल्यगुम्फनं, संवाहनमङ्गमर्दनं, वैशिकं दत्तकाचार्यादितन्त्रं, कलाः उक्तातिरिक्ता-श्चतुष्षष्ठ्यन्तर्गताः कलाविद्याः।

For murdering the paramour, she shall be burnt in a funeral pyre or be thrown into water.

When a paramour fails to pay the required amount to a prostitute or steals money from her, he shall be fined eight times of that amount. A prostitute is required to give such information (to the authority) regarding the income already received, income expected in future and the details of the paramour.

This applies to the women of actors, dancers, singers, instrumentalists, jesters who speak humorously, mimic players, rope dancers, jugglers, wandering bards, pimps and spies.

Those who come from a far off country to present their performances may be paid five paṇas as fees for their shows.

Prostitutes are liable to pay to the state twice the days income per mensem.

Those who train the prostitutes, female slaves and actresses arts such as singing, playing on musical instruments, reading (of books), dancing, acting, writing (alphabets), painting, playing on the instruments like Vīṇā (lute), pipe and drum, reading the thoughts of others, manufacture and preparation of scents and garlands, shampooing and the art of attracting and captivating the mind of others shall be endowed with maintenance from the state.

गणिकापुत्रान् रङ्गोपजीविनश्च मुख्यान् निष्पादयेयुः सर्वतालावचराणां च।
संज्ञाभाषान्तरज्ञाश्च स्त्रियस्तेषामनात्मसु।
चारघातप्रमादार्थं प्रयोज्या बन्धुवाहनाः।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तविंशोऽध्यायः गणिकाध्यक्षः, आदितोऽष्टाचत्वारिंशः।।

गणिकेत्यादि। गणिकापुत्रान्, रङ्गोपीविनश्च, मुख्यान् निष्पादयेयुः प्रधानान् आचार्यादिस्थानीयान् कुर्युः। केषां, सर्वतालावचराणां च सर्वेषामपि रङ्गोपजीविनाम्।

प्रान्ते श्लोकमाह—**संज्ञेत्यादि।** संज्ञाभाषान्तरज्ञाः सङ्केतविशेषज्ञाः भाषाविशेषज्ञाश्च, तेषां तालावचराणां, स्त्रियः, अनात्मसु अजितेन्द्रियेषु दूष्येषु, चारघातप्रमादार्थं चाराणां परप्रयुक्तगूढपुरुषाणां घातार्थं रहोविस्रम्भवधार्थं प्रमादार्थं च विषयासक्तिजननेन स्वकर्तव्योपेक्षोत्पादनार्थं च, प्रयोज्याः विधेयीकृत्य प्रयोक्तव्याः राज्ञा। विधेयत्वार्थमाह—**बन्धुवाहना** इति। बन्धुभिरर्थदानवशीकृतैर्वाह्यमाना यथाराजादेशं नीयमानाः।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तविंशोऽध्यायः गणिकाध्यक्षः, आदितोऽष्टाचत्वारिंशः।।

They shall also train the sons of prostitutes and other members of the troupe to because proficient in the job.

The ladies of actors and others of similar profession who have been taught various languages and signals shall along with their relatives be employed as spies to detect the wicked as well as to murder the foreign spies working incognito (in the state).

Thus the forty-eighth chapter of the Arthaśāstra of Kauṭalya entitled the superintendent of prostitutes comes to an end. Here ends the twentyseventh chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 49

45. प्रक० नावध्यक्षः।

Section 45 : The Superintendent of Ships

नावध्यक्षः समुद्रसंयाननदीमुखतरप्रचारान् देवसरोविसरोनदीतरांश्च स्थानीयादिष्ववेक्षेत।

तद्वेलाकूलग्रामाः क्लृप्तं दद्युः।

मत्स्यबन्धका नौकाभाटकं षड्भागं दद्युः। पत्तनानुवृत्तं शुल्कभागं वणिजो दद्युः। यात्रावेतनं राजनौभिः सम्पतन्तः। शङ्खमुक्ताग्राहिणो नौभाटकं दद्युः, स्वनौभिर्वा तरेयुः।

अध्यक्षश्चैषां खन्यध्यक्षेण व्याख्यातः।

नावध्यक्ष इति सूत्रम्। नावां यानपात्राणाम् अध्यक्ष आदेयभागाधिकृत इत्यर्थः। समाहर्तृकर्मण्यात्मरक्षितके च नावोऽभिहिताः। तदध्यक्षस्त्वनुक्त इहाभिधीयते।

नावध्यक्ष इति। सः, समुद्रसंयाननदीमुखतरप्रचारान् समुद्रकूलसमीपयानस्य नदीसुद्रसङ्गमतरणस्य च मार्गान्, देवसरोविसरोनदीतरांश्च देवसरः सदाजलसमृद्धं महासरः विसरः शोष्यसरः नदी प्रसिद्धा एषां तरणमार्गांश्च, स्थानीयादिषु स्थानीयद्रोणमुखखार्वटिकसंग्रहग्रामेषु, अवेक्षेत।

तद्वेलेत्यादि। तद्वेलाकूलग्रामाः समुद्रतटमहासरः प्रभृतितीरवर्तिग्रामवासिनः, क्लृप्तं कल्पितं किमपि तरणार्थं राजादेयं, दद्युः नौव्यापारसततोपयोगात्। तदभावान्नान्ये जानपदास्तद् दद्युः।

मत्स्येत्यादि। मत्स्यबन्धका दाशाः, नौकाभाटकं राजकीयाया नौकाया अवक्रयं, षड्भागं मत्स्यषष्ठभागं, दद्युः। पत्तनानुवृत्तं पण्यपत्तनसिद्धं, शुल्कभागं शुल्कार्थं भागं पण्यमूल्यस्य पञ्चमभागं षष्ठभागं वा, वणिजः, दद्युः। शुल्काध्यक्षग्राह्य एवायं शुल्कभाग इहोक्तः तदतिरिक्तप्रार्थना नावध्यक्षेण मा कारीत्येतदर्थम्। यात्रावेतनं, राजनौभिः, संपतन्तः गतागतं कुर्वन्तः, दद्युर्यथाप्रसिद्धम्। शङ्खमुक्ताग्राहिणः नौभाटकं दद्युः, विशेषाकथनाद् उक्तमत्स्यबन्धकवत् षड्भागम्। स्वनौभिर्वा तरेयुः। एषां स्वनौतरणाभ्यनुज्ञानान्मत्स्यबन्धानां स्वनौतरणप्रतिषेधो गम्यते। नौहाटकमित्यपपाठः। नौविभागकमिति तु व्याख्यापाठः।

अध्यक्षश्चेति। नावध्यक्षश्च, एषां शङ्खादीनां विषये, खन्यध्यक्षेण व्याख्यातः खन्यध्यक्षवद् भाटकलब्धशङ्खादीनां कर्मान्तान् पण्यव्यवहारं च नावध्यक्षः कारयेदित्यर्थः।

The superintendent of ships shall examine (from time to time) the

accounts (and details) relating to the navigation at sea ports, of mouths of rivers as also on lakes natural or artificial where offices are established (to oversee the trade) to collect the dues.

Villages located at such places or on the banks (of rivers and lakes) shall pay a fixed tax (to the state).

Fishermen shall pay one-sixth of the haul as fees for the fishing activity. Traders shall pay the tax befitting a town. Passengers travelling on board the king's ship shall pay the requisite amount as sailing fees. Those who collect shells and pearls (from he river or sea) shall pay the rent for the ship or canoe. They may resort to the use of their own boats.

The superintendent of ships shall follow the rules and regulations as prescribed in the case of the authority of mines.

पत्तनाध्यक्षनिबन्धं पण्यपत्तनचारित्रं नावध्यक्षः पालयेत्।

मूढवाताहतां तां पितेवानुगृह्णीयात्। उदकप्राप्तं पण्यमशुल्कमर्धशुल्कं वा कुर्यात्।

यथानिर्दिष्टाश्चैताः पण्यपत्तनयात्राकालेषु प्रेषयेत्। संयान्तीर्नावः क्षेत्रानुगताः शुल्कं याचेत। हिंस्त्रिका निर्घातयेद्, अमित्रविषयातिगाः पण्यपत्तनचारित्रो- पघातिकाश्च।

शासकनियामकदात्ररश्मिग्राहकोत्सेचकाधिष्ठिताश्च महानावो हेमन्तग्रीष्मतार्यासु महानदीषु प्रयोजयेत्। क्षुद्रिकाः क्षुद्रिकासु वर्षास्राविणीषु।

बद्धतीर्थाश्चैताः कार्याः राजद्विष्टकारिणां तरणभयात्।

पत्तनेत्यादि। पत्तनाध्यक्षनिबन्धं पत्तनाध्यक्षप्रतिष्ठापितं, पण्यपत्तनचारित्रं पण्यपत्तनाचारं, नावध्यक्षः, पालयेत् नातिवर्तेत।

मूढवाताहतामिति। मूढां दिङ्मोहापयातां वाताहतां विपरीतवाताकुलितां च, तां नावं, पितेव, अनुगृह्णीयात् तारयेत्। उदकप्राप्तं जलदूषितं, पण्यम्, अशुल्कम्, अर्धशुल्कं वा, कुर्यात् तच्छेदानुरूप्येण।

यथानिर्दिष्टाश्चेति। अशुल्का अर्धशुल्का वा, एता-नावः, पण्यपत्तनयात्राकालेषु, प्रेषयेद् असङ्गं विसृजेत्। संयान्तीर्गच्छन्तीः, नावः, क्षेत्रानुगताः शुल्कस्थानगताः, शुल्कं याचेत। इह शुल्कस्य याचनं न वक्तव्यं सिद्धत्वात्, तदिहोच्यते शुल्कतोऽधिकं मा याचीत्युपदेशार्थम्। हिंस्त्रिकाः हिंस्राश्चोरादयः तद्वतीः, नावः, निर्घातयेत्। अमित्रविषयातिगाः शत्रुदेशयायिनीः, पण्यपत्तनचारित्रोपघातिकाश्च नावः, निर्घातयेत्।

शासकेत्यादि। शासकादिपञ्चकाधिष्ठिताश्च शासको निदेष्टा नियामकः पोतवाहः दात्रग्राहको लवित्रग्राही रश्मिग्राहकः प्रग्रहग्राही उत्सेचकः प्रविशज्जलापनेता एतैरपायप्रतिविधायिभिरध्यासिताश्च, महानावः, हेमन्तग्रीष्मतार्यासु अवर्षाकालेऽपि नौतरणीयासु, महानदीषु सिन्धुसरयूप्रभृतिषु, प्रयोजयेत्। क्षुद्रिकाः क्षुद्रनावः, क्षुद्रिकासु वर्षास्राविणीषु वर्षाकालमात्रतरणीयजलासु कुनदीषु, प्रयोजयेदिति वर्तते।

बद्धेत्यादि। बद्धतीर्थाश्च बद्धाः संयताः सनियन्त्रणाः कृतारक्षा इति यावत् तीर्था अवतारा यासां तास्तथाभूताः, एताः नावः, कार्याः। कुतः, राजद्विष्टकारिणं शत्रुप्रयुक्ततीक्ष्णरसदादीनां, तरणभयात्।

The superintendent of ship is required to follow (strictly) the rules and procedures adopted by the authorities of commercial towns.

He shall show a kindness befitting a father when he comes across a ship beaten by unfavourable wind and weather.

Merchandise spoiled by water shall either be exempted from buying tax or their dues may be suitably reduced to half the amount.

Such ships shall be permitted to set sail on their course to other commercial towns. Ships that touch the port or harbour shall be asked to pay the fixed dues. Pirate ships as well as those arriving from enemy countries with bad intentions and those that infringe the customs of commercial towns shall be destroyed.

Big ships that could navigate in large rivers even in the seasons of winter and summer shall have navigators such as a captain, steers man and servants to pull the ropes and put the anchor in addition to draining of water from the hold (if necessary). Small ships or boats shall be launched in small rivers during the rainy season.

These shall be well protected lest the enemies and traitors would get away with them.

अकालेऽतीर्थे च तरतः पूर्वः साहसदण्डः। काले तीर्थे चानिसृष्टतारिणः पादोनसप्तविंशतिपणस्तरात्ययः।

कैवर्तकाष्ठतृणभारपुष्पफलवाटषण्डगोपालकानामनत्ययः सम्भाव्यदूतानुपातिनां च सेनाभाण्डचारप्रयोगाणां च। स्वतरणैस्तरतां, बीजभक्तद्रव्योपस्करांश्चानूपग्रामाणां तारयताम्।

ब्राह्मणप्रव्रजितबालवृद्धव्याधितशासनहरगर्भिण्यो नावध्यक्षमुद्राभिस्तरेयुः।

कृतप्रवेशाः पारविषयिकाः सार्थप्रमाणा वा विशेयुः।

परस्य भार्यां कन्यां वित्तं वापहरन्तं शङ्कितमाविग्नमुद्भाण्डीकृतं महाभाण्डेन मूर्ध्नि भारेणावच्छादयन्तं सद्योगृहीतलिङ्गिनम् अलिङ्गिनं वा प्रव्रजितमलक्ष्यव्याधितं भयविकारिणं गूढसारभाण्डशासनशस्त्राग्नियोगं विषहस्तं दीर्घपथिकममुद्रं चोपग्राहयेत्।

नियन्त्रणविधिमाह–अकाल इति। अकालो निशीथादौ, अतीर्थे अघट्टे च, तरतः पूर्वः साहसदण्डः। काले, तीर्थे च, अनिसृष्टतारिणः अननुज्ञातस्य तरतः, पादोनसप्तविंशतिपणः, तरात्ययः तरणदण्डः।

तरणदण्डापवादमाह–कैवर्तेत्यादि। कैवर्तादीनां कैवर्तानां धीवराणां काष्ठवाहिनां तृणवाहिनां पुष्पवाटपालकानां फलवाटपालकानां षण्डपालकानां गोपालकानां च, अनत्ययः अदण्डः। सम्भाव्यदूतानुपातिनां च सम्भाव्यम् अनुपतनीयतया शङ्कितं चोरादिमनुपततां दूतं राजदूतं कार्यशेषार्थमनुपततां च, अनत्यय इत्यनुषज्यते। सेनाभाण्डचारप्रयोगाणां च सेनोपकरणगूढपुरुषप्रयोगाणां च, अनत्ययः। स्वतरणैः स्वकीयैस्तरण-साधनैः बाह्वलाबूभस्त्रादिभिः, तरतां, बीजभक्तद्रव्योपस्करांश्च बीजं वापार्थं भक्तकं कर्मकराशनं द्रव्यं

पुष्पफलशाकादि उपस्कर: वेशवार: इत्येतांश्च, आनूपग्रामाणां जलप्रचुरदेशसन्निविष्टग्रामवासिनां, तारयताम्, अनत्यय:।

आतराप्रदानेन नावध्यक्षमुद्रामात्रं गृहीत्वा ये तरणार्हा जनास्तानाह—**ब्राह्मणे**त्यादि। सुगमम्।

कृतप्रवेशा इति। कृतप्रवेशा अभ्यनुज्ञातप्रवेशा:, पारविषयिका: परदेशागता:, सार्थप्रमाणा वा अननुज्ञातप्रवेशत्वेऽपि अनुज्ञातसार्थाधिष्ठातृका वा, विशेयु:, नृपस्य देशम्।

परस्येति। परस्य भार्यां कन्यां वित्तं वा अपहरन्तम्, उपग्राहयेत् शङ्कितत्वादिलिङ्गैर्वक्ष्यमाणैरनुमाय बन्धयेत्। तत्र शङ्कितं चकितचारिणम्, आविग्नं सम्भ्रान्तम्, उद्भाण्डीकृतं समधिकभाण्डभारवाहिनं, महाभाण्डेन मूर्ध्नि भारेणावच्छादयन्तं बृहदाकृतिना पलालादिभारेण शिरसि कृतेनावृतप्रायमुखं, सद्योगृहीतलिङ्गिनं प्रव्रजितं तत्कालकलितपरिव्राजकचिह्नम्, अलिङ्गिनं वा प्रव्रजितं सद्य:परित्यक्तपरिव्राजकचिह्नं वा, अलक्ष्यव्याधितं व्याधितव्यपदेशिनमदृष्टव्याधिचिह्नं, भयविकारिणं वदनश्वेतीभावादिभयचिह्नयुक्तं, गूढसारभाण्डशासन-शस्त्राग्नियोगं गूढसारभाण्डं गूढरत्नादिद्रव्यं गूढशासनं गूढलेखं गूढशस्त्रं गूढायुधं गूढाग्नियोगं गूढोऽग्नियोग: औपनिषदवक्ष्यमाणनिष्प्रतीकाराद्यग्नियोगद्रव्यं यस्य तं तथाभूतं च, विषहस्तं, दीर्घपथिकं दूराध्वगमनश्रान्तम्, अमुद्रम् अन्तपालमुद्रारहितं च, उपग्राहयेत्।

Those who navigate in imroper time and in prohibited waters shall be punished with the first amercement. When a person crosses the river outside the proper time at the usual place, he shall be required to pay a fine of twenty six and three quarters of paṇas for the offence.

Fishermen, carriers of fire wood, collectors of grass, traders of flowers, fruits and vegetables, and herdsmen are exempted from paying dues for crossing as also those following criminals, messengers of errand, and servants to carry provisions to the army. Those who make use of their own boats to carry seeds, cooked food and commodities through marshy districts are also exempted.

Brahmins, ascetics, children, aged people, afflicted by disease, royal messengers and pregnant women shall be permitted to cross rivers without paying dues.

Foreign traders who visit the country regularly and those who are familiar to the merchants of the locality shall be allowed to land in port towns (without paying tax).

Those who get away with the wife, maiden or wealth of others, a suspicious person appearing excited, one without any baggage or one who conceals a small baggage under a bigger baggage carried on head, one who has just put on a new robe rejecting the usual garment, one who has turned to be an ascetic, one who pretends to be afflicted with disease (which is not apparently visible), one who seems to be alarmed, one who stealthily carrying valuable objects or going on secret mission or carrying weapons

or explosives, carries, poison in one's hand and one who is coming from a far away place without any pass (or evidence of permission), shall be arrested.

क्षुद्रपशुर्मनुष्यश्च सभारो माषकं दद्यात्। शिरोभारः कायभारो गवाश्वं च द्वौ। उष्ट्रमहिषं चतुरः। पञ्च लघुयानम्। षड् गोलिङ्गम्। सप्त शकटम्। पण्यभारः पादम्।

तेन भाण्डभारो व्याख्यातः। द्विगुणो महानदीषु तरः।

क्लृप्तमानूपग्रामा भक्तवेतनं दद्युः।

तरवेतनविधिमाह—क्षुद्रेत्यादि। क्षुद्रपशुः अजादिः, मनुष्यश्च सभारः करगृहीतभारः, माषकं दद्यात्। शिरोभारः शिरोधार्यो भारः, कायभारः स्कन्धधार्यः, गवाश्वं च गौश्चाश्वश्च, द्वौ माषौ, दद्यादिति सम्बध्यते। उष्ट्रमहिषम् उष्ट्रश्च महिषश्च, चतुरः माषकान्, दद्यात्। पञ्च लघुयानं लघुगन्त्री पञ्च माषकान् दद्यात्। षड् गोलिङ्गं मध्यमगन्त्री षट् माषान्, दद्यात्। सप्त शकटं दद्यात्। पण्यभारः पण्यानां तुलाविंशतिः, पादं पणचतुर्भागं, दद्यात्।

तेनेति। तेन पण्यभारवेतनकथनेन, भाण्डभारो महिषोष्ट्रादिवाह्यो, व्याख्यातः उक्तः, एकैकस्य भारस्यैकं माषकं दद्यादिति। त एत आतरा लघुनदीविषयाः। अत एवाह—**द्विगुणो महानदीषु तर** इति। तरः तरणवेतनम्।

क्लृप्तमिति। क्लृप्तं यत्किञ्चिद्, आनूपग्रामाः, भक्तवेतनं राजभाव्यातिरिक्तं, दद्युः नाविकस्य।

A minor quadruped or a man carrying load shall pay a tax of one māṣaka. A head-load or a load carried on shoulders, or on a cow and a horse shall pay two māṣas each. A camel or buffalo shall each pay four māṣas. A small cart-load shall pay five māṣas and a cart drawn by bull shall pay six māṣas. A big cart attracts a due of seven māṣas. A head-load of merchandise requires one-fouth māṣa.

And this explains other merchandises also. In large rivers the ferry bees are double the usual due.

Villages near marshy locations shall give a prescribed rate along with food-stuffs.

प्रत्यन्तेषु तराः शुल्कमातिवाहिकं वर्तनीं च गृह्णीयुः। निर्गच्छतश्चामुद्रस्य भाण्डं हरेयुः। अतिभारेणावेलायामतीर्थे तरतश्च।

पुरुषोपकरणहीनायामसंस्कृतायां वा नावि विपन्नायां नावध्यक्षो नष्टं विनष्टं वाभ्यावहेत्।

सप्ताहवृत्तामाषाढीं कार्त्तिकीं चान्तरा तरः।

कार्मिकप्रत्ययं दद्यान्नित्यं चाह्निकमावहेत्॥

॥ इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे अष्टाविंशोऽध्यायः नावध्यक्षः, आदित एकोनपञ्चाशः॥

प्रत्यन्तेष्विति। विषयसीमसु, तराः तारकाः, शुल्कम्, आतिवाहिकम् अतिवाहननिमित्तं राजभाव्यं,

वर्तनीं च अन्तपालदेयं च, गृह्णीयुः सार्थात्। निर्गच्छतश्चामुद्रस्य सार्थस्य, भाण्डं हरेयुः। **अतिभारेणेति**। अतिभारेण पुरुषद्वयवहनीयेन भारेण युक्तस्य, अवेलायाम् अकाले, अतीर्थे अघट्टे, तरतश्च, भाण्डं हरेयुरिति वर्तते।

पुरुषेत्यादि। पुरुषैः शासकनियामकादिभिः उपकरणैश्चारिष्टसेचनादिभिर्हीनायाम्, असंस्कृतायाम् वा सीवनादिसंस्काररहितायां वा, नावि, विपन्नायां सत्यां, नावध्यक्षः, नष्टं जलप्रलीनं लवणजातीयं, विनष्टं जलयोगदूषितरूपादिकं वा, पण्यद्रव्यम्, अभ्यावहेद् दद्यात्।

तरवेतनकालं श्लोकेनाह—**सप्ताहेत्यादि**। सप्ताहो वृत्तो यस्या ऊर्ध्वं सा सप्ताहवृत्ता तादृशीम्, आषाढीम् आषाढपौर्णमासीं, कार्तिकीं कार्त्तिकपौर्णमासीं तथाविधाम्, अन्तरा आषाढबहुलसप्तम्याः कार्त्तिकबहुल-सप्तम्याश्च मध्ये इत्यर्थः, तरः आतरः, ग्राह्य इति शेषः, निर्दिष्टस्य कालस्य वर्षात्वाद् वर्षातार्यासु नदीषु। सर्वर्तुतार्यासु तु नित्यं ग्राह्य इत्यर्थात् सिद्धम्। कार्मिकप्रत्ययम् अयमयं कर्मदिवस इति कर्मदिवसज्ञानं, दद्याद् नावध्यक्षाय। नित्यं च, आह्निकं दिने दिनेऽधिगतमातरम्, आवहेत् दद्यात्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टाविंशोऽध्यायः नावध्यक्षः, आदित एकोनपञ्चाशः।।

In boundary regions ferrymen shall receive the dues (toll), carriage cess cand road cess. They shall confiscate the goods of persons travelling without a pass. The same applies to those who carry excess load, sailing in improper time or place. The superintendent of boats shall make good for the loss caused by want of ferrymen or lack of repair to the canoe.

Boats should be launched in the month of Āṣāḍha omitting the first seven days of the month and in the month of Kārtika. The evidence of ferry men should be preserved and the daily income should be remitted (to the treasury).

Thus the fortyninth chapter of the Arthaśāstra of Kauṭalya entitled the superintendent of ships comes to an end. Here ends the twentyeighth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 50

46. प्रक० गोध्यक्षः।

Section 46 : The Superintendent of Cows

गोध्यक्षो वेतनोपग्राहिकं करप्रतिकरं भग्नोत्सृष्टकं भागानुप्रविष्टकं व्रजपर्यग्रं नष्टं विनष्टं क्षीरघृतसञ्जातं चोपलभेत।

गोपालकपिण्डारकदोहकमन्थकलुब्धकाः शतं शतं धेनूनां हिरण्यभृताः पालयेयुः। क्षीरघृतभृता हि वत्सानुपहन्युरिति वेतनोपग्राहिकम्।

जरद्गुधेनुगर्भिणीपष्ठौहीवत्सतरीणां समविभागं रूपशतमेकः पालयेत्। घृतस्याष्टौ वारकान् पणिकं पुच्छम् अङ्कचर्म च वार्षिकं दद्यादिति करप्रतिकरः।

गोध्यक्ष इति सूत्रम्। गवाम् उपलक्षणया महिषादीनां गोमहिषाद्याजीवानां चाध्यक्षो गोध्यक्षः तत्कर्माभिधीयत इत्यर्थः। स्वपक्षपरपक्षवशीकरणसाधनभूतासु वार्तापदार्थेषु कृषिपाशुपाल्यवणिज्यासु कृषिवणिज्ये सीताध्यक्षपण्याध्यक्षयोरुपपादिते। पाशुपाल्यं त्वनुक्तमिहाभिधीयत इति सङ्गतिः।

गोध्यक्ष इति। गोध्यक्षः, वेतनोपग्राहिकादीन्यष्टौ, उपलभेत् अध्यक्षयेत्।

तानि क्रमशो व्याचष्टे–**गोपालकेत्यादि**। गोपालकादयः पञ्च गोपालकः प्रसिद्धः पिण्डारको महिषपालः दोहकः क्षीरदोग्धा मन्थको दधिमथनकर्मा लुब्धको व्यालभयपरिहर्ता इत्येते, शतं शतं धेनूनां गवां, पालयेयुः। किंवेतनास्ते, हिरण्यभृताः हिरण्येन धनधान्यरूपेण वेतनेन भृताः पुष्टाः, न तु तदन्येन क्षीरेण घृतेन वेत्यर्थः। कुतः क्षीरघृतभृता न कर्तव्यास्तत्राह–**क्षीरघृतभृता हीति**। तद्वेतना हि, वत्सान् स्तनन्धयान्, उपहन्युः क्षीरलोभनिमित्तादतिदोहनात् कर्शयेयुः। इति एतद्, वेतनोपग्राहिकं वेतनोपग्राहनिमित्तत्वात् तत्संज्ञम्।

जरदित्यादि। जरद्गुर्जरद्गवी गोह्रस्वत्वमार्षम्। धेनुर्दोग्ध्री गर्भिणी प्रसिद्धा पष्ठौही वृषगवेषिणी वत्सतरी अतीतस्तनन्धयभावा इत्येतासां पञ्चानां, समविभागं प्रत्येकं विंशतिक्रमेण तुल्यविभागयुक्तं, रूपशतं शतात्मकं जरद्गव्यादिभेदमेलकम्, एकः पालनवृत्तिः, पालयेत्। घृतस्येति। घृतस्य, अष्टौ वारकान् चतुरशीतिकुडुबान्, पणिकं पुच्छं पुच्छगणनया देयः करः पुच्छः तमेकैकस्य पशोरेकैकपणात्मकम्, अङ्कचर्म च राजमुद्रायुक्तं मृतचर्म च, वार्षिकं वर्षदेयं, दद्यात् स्वामिने। इति करप्रतिकरः एष प्रकारः करप्रतिकरसंज्ञः।

The superintendent of cows shall administer herds of cattle maintained for wages; herds surrendered for a fixed quantity of dairy produce; useless and abandoned herds; herds maintained for a share in

dairy produce; classes of herds; cattle that has gone astray; cattle that are irrecoverably lost and the accrued quantity of milk and clarified butter.

Those who graze the herds of cattle in the units of hundreds include a cowherd, a buffalo herdsman, a milker, a churner and a hunter and they do it if for fixed wages. These are likely to starve the calves to death for the profit of milk and ghee.

A single person shall rear a hundred heads made up of equal numbers of each of aged cows, milch cows, pregnant cows, heifers and calves (as one's duty). Such a person shall give (to the owner) eight vārakas (a particular measure) of clarified butter per annum as well as the branded skin (of dead cows if any) and this system is called herds surrendered for a fixed quantity of dairy produce.

व्याधितान्यङ्गानन्यदोहीदुर्दोहापुत्रघ्नीनां च समविभागं रूपशतं पालयन्तस्तज्जातिकं भागं दद्युरिति भग्नोत्सृष्टकम्।

परचक्राटवीभयादनुप्रविष्टानां पशूनां पालनधर्मेण दशभागं दद्युरिति भागानुप्रविष्टकम्।

वत्सा वत्सतरा दम्या वहिनो वृषा उक्षाणश्च पुङ्गवाः। युगवाहनशकटवहा वृषभाः सूनामहिषाः पृष्ठस्कन्धवाहिनश्च महिषाः। वत्सिका वत्सतरी पष्ठौही गर्भिणी धेनुश्चाप्रजाता वन्ध्याश्च गावो महिष्यश्च। मासद्विमासजातास्तासामुपजा वत्सा वत्सिकाश्च। मासद्विमासजातानङ्कयेत्। मासद्विमासपर्युषितमङ्कयेत्। अङ्कं चिह्नं वर्णं शृङ्गान्तरं च लक्षणम्, एवमुपजा निबन्धयेदिति व्रजपर्यग्रम्।

व्याधितेत्यादि। व्याधितादीनां पञ्चानां व्याधिता रुग्णा न्यङ्गा अङ्गविकला अनन्यदोही एकेनैव दोहनीया न त्वन्येन दोहनीया दुर्दोहा पादवन्धनादिकृच्छ्रदोह्या पुत्रघ्नी स्रवद्गर्भा मिग्रमाणवत्सा च इत्येतासां च, समविभागं रूपशतं पूर्वोक्तप्रत्येकविंशतिप्रकारं, पालयन्तः, तज्जातिकं भागं पूर्वोक्तस्यार्धं त्रिभागं वा तदनुरूपं घृतादिराजभागं, दद्युः। इति भग्नोत्सृष्टकं तदाख्यम्।

भागानुप्रविष्टकमाह—**परचक्रेत्यादि**। परचक्राटवीभयात् शत्रुच्छलनभयात् वनचरापहारभयाच्च, अनुप्रविष्टानां राजव्रजप्रवेशितानां, पशूनां, पालनधर्मेण पालनस्य सवेतनत्वनियमेन, दशभागं, दद्युः पशुस्वामिनो राज्ञे। इत्येतद्, भागानुप्रविष्टकं तदाख्यम्।

व्रजपर्यग्रमाह—**वत्सा** इत्यादि। वत्साः स्तनन्धयाः, वत्सतराः परित्यक्तस्तनपानाः, दम्याः दमनयोग्याः, वहिनः वोढारः, वृषाः सेक्तारः, उक्षाणश्च जरद्गवाश्च, पुङ्गवाः इत्येते षड्विधाः पुमांसो गावः। युगवाहनशकट वहाः, वृषभाः सेक्तारः, सूनामहिषाः मांसमात्रोपयोगिनो महिषाः, पृष्ठस्कन्धवाहिनश्च, महिषाः इत्येते चतुर्विधा महिषाः। स्त्रीगवीनां महिषीणां च साधारणान् भेदानाह—**वत्सिकेत्यादि**। तत्र धेनुर्दोग्ध्री। अप्रजाता विजननार्हवयोऽनधिरूढा। वन्ध्या वशा। शेषाः प्रसिद्धाः। इत्थं सप्तविधा गावो महिष्यश्च। **मासेत्यादि**। मासद्विमासजाताः मासजाताः द्विमासजाताश्च, तासां गोमहिषीणां, वत्साः स्तनन्धयाः, वत्सिकाः स्तनन्धय्यश्च, उपजाः उपजासंज्ञिताः। तासु मासद्विमासजातान्, अङ्कयेत् तप्तमुद्रया योजयेत्। भागानुप्रविष्टकादिविषय-

मङ्कनमाह—मासद्विमासपर्युषितमङ्कयेदिति। ज्ञातस्वाम्किस्याज्ञातस्वामिकस्य वा राजव्रजप्रविष्टस्यैकमास परिवासे द्विमासपरिवासे वा जाते तमप्यङ्कयेद् गोध्यक्ष इत्यर्थः। चतुर्विधं लक्षणमाह—अङ्कमिति। अङ्कं स्वस्तिकादिसन्निवेशं तप्तमुद्राकृतं कृत्रिमं, चिह्नं पुच्छश्वेतिमकालिमादि सहजं, वर्णं शुक्लकृष्णादिं, शृङ्गान्तरं च शृङ्गगतं विशेषं च, लक्षणं, निबन्धयेत् पुस्तके लेखयेत्। एवम् अनेन प्रकारेण उक्तचतुर्लक्षणीयागेन, उपजाः, निबन्धयेत्। इति एतत् सप्तदशविधं व्रजपर्यग्रं तदाख्यम्।

A person who is to rear a hundred heads made up of afflicted cattle, crippled cattle, cattle that could not be milked by none other than the accustomed regular person, cattle that are not easily milked and cattle that is seen killing their own calves, shall pay to the owner a share in dairy produce and it is termed as due from useless and abandoned herd.

When one protects cattle under the threat of enemy on behalf of the superintendent, such a person shall be given one-tenth of the dairy produce and such a due is called share for maintenance of herds.

Cattle belonging to male gender are calssified (into six) as calves, steer, tameable ones, oxen (capable of carrying load), bulls (kept for crossing cows) and matured ones (capable of pulling a cart). Buffaloes are (of four kinds as) those that pull the cart, cross the females, fit only for procuring flesh and carrying load on its back. Females of cows and buffaloes are calves, female steer, heifer, pregnant ones, milch cattle and barren cattle. Young ones of these (cows and buffaloes) are those aged (or completed) one month or two months (after birth). Once they have completed a month or two they may be branded (with hot iron). All cattles which are two months old shall be branded by the authorities. The charcteristics of cattle to be noted (in registers) are marks of branding with iron, features of natural ones, colour and the distance between the horns and this is applicable to cattle in general.

चोरहृतमन्ययूथप्रविष्टमवलीनं वा नष्टम्।

पङ्कविषमव्याधिजरातोयाहारावसन्नं वृक्षतटकाष्ठशिलाभिहतमीशानव्यालसर्पग्राहदावाग्निविपन्नं विनष्टम्। प्रमादादभ्यावहेयुः।

एवं रूपाग्रं विद्यात्।

स्वयं हन्ता घातयिता हर्ता हारयिता च वध्यः।

त्रिविधं नष्टमाह—चोरेत्यादि। चोरहृतम्, अन्ययूथप्रविष्टम्, अवलीनं वा वने स्वयूथाद् भ्रष्टं वा, नष्टं नष्टाख्यम्।

विनष्टमाह—पङ्केत्यादि। पङ्कादिभिः षड्भिः पङ्केन कर्दममज्जनेन विषमेण गर्तादिपतनेन व्याधिना रोगेण जरया वयोवृद्धतया तोयेन महारयजलप्रवाहाकृष्ट्या आहारेण इत्येतैरवसन्नं विपन्नं, वृक्षादिभिश्चतुर्भिः वृक्षपातभृगुभ्रंशमहाकाष्ठपतनमहाशिलापातरूपैरभिहतम्, ईशानादिपञ्चकविपन्नम् ईशानेन विद्युज्जोतिषा

हिंस्रमृगपन्नगनक्रदनवह्निभिश्च प्रमीतं, विनष्टं तदाख्यं भवति। प्रमादादिति। पालकानवधानदोषाद्, विनष्टमिति वर्तते, अभ्यावहेयुः दद्युः, अर्थात् पालकादयः।

एवमिति। उक्तेन प्रकारेण, रूपाग्रं गवादिप्रमाणं, विद्यात्।

स्वयमेव गवादिहननहरणकर्तुस्तत्प्रयोजयितुश्च गोपालकस्य वधो दण्ड इत्याह—**स्वयं हन्तेत्यादि।**

Those that are lost include the ones stolen by thieves, strayed into other herds of cattle and as such (lost to the owner).

Cattle that are entangled in quagmire, fallen into a pit, deceased due to ailment, old age and want of food, over which uprooted trees (or branches) are fallen, drowned in water, beaten to death with staff or stone, struck by lightning, devoured by huge beasts of prey, bitten by cobra or carried away by a crocodile are considered as irrecoverably lost. Keepers shall look after to protect them (from such dangers).

The way to assess their number are those given above.

One who hurts or kills a cattle as also one who causes others to do this shall be slain.

परपशूनां राजाङ्केन परिवर्तयिता रूपस्य पूर्वं साहसदण्डं दद्यात्।
स्वदेशीयानां चोरहृतं प्रत्यानीय पणिकं रूपं हरेत्। परदेशीयानां मोक्षयितार्धं हरेत्।
बालवृद्धव्याधितानां गोपालकाः प्रतिकुर्युः।
लुब्धकश्वगणिभिरपास्तस्तेनव्यालपरबाधभयमृतुविभक्तमरण्यं चारयेयुः।
सर्पव्यालत्रासनार्थं गोचरानुपातज्ञानार्थं च त्रस्नूनां घण्टातूर्यं च बध्नीयुः।
समव्यूढतीर्थमकर्दमग्राहमुदकमवतारयेयुः पालयेयुश्च।

परपशूनामिति। अराजपशूनां, राजाङ्केन रूपस्य परिवर्तयिता राजकीयाङ्कदानेन रूपभेदयिता, पूर्वं साहसदण्डं दद्यात्।

स्वदेशीयानामिति। तेषां, चोरहृतं, प्रत्यानीय प्रत्यर्प्य, पणिकं रूपं हरेत् रूपसंख्यानग्राह्यो दण्ड इह रूपमित्युच्यते एकैकस्य रूपस्यैकपणप्रमाणं रूपदण्डं गृह्णीयात्। परदेशीयानां परदेशपशूनामुपगतानां, मोक्षयिता तत्स्वामी, अर्धं हरेत् तन्मूल्यस्यार्धं गृह्णीयात्, अर्थादर्धं दण्डं दद्यात्।

बालवृद्धेत्यादि। सुगमम्।

लुब्धकश्वगणिभिरित्यादि। व्याधैः श्वगणपोषकैश्च, अपास्तस्तेनव्यालपरबाधभयं परिहृतचोरहिंस्रमृग-शत्रूपद्रवभयम्, ऋतुविभक्तम् ऋतुषु विभक्तम् अस्मिन्नस्मिन् ऋताविदमिदं तृणजलादिसमृद्धतया समुचितमिति विभज्य व्यवस्थितम्, अरण्यं चारयेयुः।

सर्पेत्यादि। सर्पव्यालत्रासनार्थं सर्पव्यालानां भयजननार्थं, गोचरानुपातज्ञानार्थं देशममुकमनुसञ्चरन्ति गाव इति घण्टातूर्यशब्दतोऽनुमानार्थं च, त्रस्नूनां शब्दत्रासिनां पशूनामत्रासार्थपरिचेतव्यशब्दानां, घण्टातूर्यं लोहघण्टारूपं तूर्यं, बध्नीयुः, कण्ठे।

समेत्यादि। समव्यूढतीर्थम् अविषमविस्तीर्णावतारम्, अकर्दमग्राहम् अपङ्कनक्रम्, उदकम्, अवतारयेयुः

स्नानपानार्थं, पालयेयुश्च यावत्स्नानपानकालमप्रमत्ता जलजन्यभयाद् रक्षेयुश्च पशुयूथम्।

One who brands a cow as belonging to the king by dubious methods shall be punished with the first amercement.

When a person recovers a cattle of his own region from thieves, he shall receive, the reward already announced (for its recovery). When he recovers a cattle of another region (from the thieves) he shall receive half its value.

Cattle rearers shall apply remedies to calves and aged cows which suffer from various diseases.

They shall graze the cattles in forest regions separately earmarked for the purpose of grazing from season to season as pasture grounds, and which are protected from thieves and other molesting beasts by hunters aided by their hounds.

Timid cattle may be provided with sounding bells attached to heir neck to help the grazing people to locate them as also to scare away the snakes and tigers (with their noise).

Cowherds shall permit the cattle to enter into ponds, rivers and lakes which are of equal depth and free from mud and not infested by crocodiles and protect them from similar dangers.

स्तेनव्यालसर्पग्राहगृहीतं व्याधिजरावसन्नं च आवेदयेयुरन्यथा रूपमूल्यं भजेरन्।

कारणमृतस्याङ्कचर्म गोमहिषस्य, कर्णलक्षणमजाविकानां, पुच्छमङ्कचर्म चाश्वखरोष्ट्राणां, वालचर्मवस्तिपित्तस्नायुदन्तखुरशृङ्गास्थीनि चाहरेयुः।

मांसमाममार्द्रं शुष्कं वा विक्रीणीयुः।
उदश्वित् श्ववराहेभ्यो दद्युः।
कूर्चिकां सेनाभक्तार्थमाहरेयुः।
किलाटो घाणपिण्याकक्लेदार्थः।
पशुविक्रेता पादिकं रूपं दद्यात्।
वर्षाशरद्धेमन्तानुभयतः कालं दुह्युः।
शिशिरवसन्तग्रीष्मानेककालम्।

चोराद्यपहृतं रोगवार्धकप्रमीतं पशुमध्यक्षाय काले निवेदयेयुरनिवेदने मूल्यमेकैकस्य रूपस्य दद्युरित्याह–स्तेनेत्यादि।

कारणेत्यादि। कारणमृतस्य व्याधिजरादिमृतस्य, अङ्कचर्म अङ्कयुक्तं चर्म, गोमहिषस्य, आहरेयुः आहृत्य दर्शयेयुः प्रत्ययार्थम्। कर्णलक्षणं कर्णकृतं चिह्नम्, अजाविकानां बस्तोरभ्राणाम्, आहरेयुः। पुच्छम् अङ्कचर्म च अश्वखरोष्ट्राणाम्, आहरेयुः। पुच्छम् अङ्कचर्म च अश्वखरोष्ट्राणाम्, आहरेयुः। वालादीनि च

नव, आहरेयुः कुप्यार्थम्। तत्र वस्तिर्मूत्राशयः, पित्तं मायुः स्नायुः स्नावः। शेषं प्रसिद्धम्।

मांसमिति। मांसम्, आमम् अपक्वम्, आर्द्रं, शुष्कं वा, विक्रीणीयुः।

उदश्विदिति। उदश्वित् तक्रं, श्ववराहेभ्यो, दद्युः पोषणार्थम्।

कूर्चिकामिति। तक्रयुक्तक्षीरविकृतिं, शुष्कघनीकृततक्रविकारमिति स्वामी। सेनाभक्तार्थम्, आहरेयुः।

किलाट इति। किलाटः क्षीरविकृतिः, घाणपिण्याकक्लेदार्थः किञ्चित्सावशेषतैलः पिण्याको घाणपिण्याकः तस्य गोमहिषादिभक्ष्यस्य क्लेदार्थः क्लेदनरूपे संस्कारे विनियोक्तव्यः।

पशुविक्रेतेति। सः, पादिकं रूपम् एकैकस्य रूपस्य विक्रीयमाणस्य पादपणं, दद्यात्, अध्यक्षाय।

वर्षेत्यादि। वर्षाशरद्धेमन्तान् ऋतून्, उभयतःकालं सायं प्रातश्च, दुह्युः, गोमहिषीः। शिशिरवसन्तग्रीष्मान्, एककालं रात्रावेव, दुह्युः।

Cattle which are lost due to theft, killed by beasts and bitten to death by serpents as also because of old age shall be reported to the authorities to avoid from making good for the loss.

When a cattle like cow and buffalo are dead due to natural causes one should bring their skin with the branded mark, in the case of goat or sheep, the skin together with the ear, and in cases of horses, ass and camel their foil containing the brand mark should be brought before the authority, and if the ones are of young age besides the above one is required to bring the fat, bile, sinew, teeth, hoofs, horns and bones.

The cowherds may sell either flesh or dried flesh.

They shall distribute butter milk as drinks to dogs and hogs.

A part of the same (butter milk) in the form curd shali be brought in a bronze vessel for preparing food for the army.

Coagulated milk or cheese may be made use of to soften oil-cakes.

The seller of a cow shall give to the (king) authority one-fourth of the value.

Cattle may be milked twice a day (morning and-evening) during the season of rain, autumn and winter. In the seasons of later part of winter, spring and summer milking may be restricted to one time (in the morning alone).

द्वितीयकालदोग्धुरङ्गुष्ठच्छेदो दण्डः। दोहकालमतिक्रामतस्तत्फलहानं दण्डः।

एतेन नस्यदम्ययुकपिङ्गनवर्तकाला व्याख्याताः।

क्षीरद्रोणे गवां घृतप्रस्थः। पञ्चभागाधिको महिषीणाम्। द्विभागाधिकोऽजावीनाम्। मन्थो वा सर्वेषां प्रमाणं, भूमितृणोदकविशेषाद्धि क्षीरघृतवृद्धिर्भवति।

यूथवृषं वृषेणावपातयतः पूर्वः साहसदण्डः, घातयत उत्तमः। वर्णावरोधेन दशतीरक्षा।

द्वितीयेत्यादि। द्वितीयकालदोग्धुरङ्गुष्ठच्छेदो दण्ड इति अयं च कालनियमो देशव्यवस्थया द्रष्टव्यः, क्वचिद् देशे ग्रीष्मेऽपि त्रिकालदोहदर्शनादित्याह स्वामी। दोहकालमिति। तं प्रातः सायं च यथोक्तम्, अतिक्रामतः, तत्फलहानं तद्दिवसवेतनहानिः, दण्डः।

एतेनेति। दोहकालातिपातनेन, नस्यदम्ययुगपिङ्गनवर्तनकालाः नस्यकालो नासावेधनकालः दम्यकालो दमनार्हकालः युगपिङ्गनकालः अदान्तस्य दान्तेन सह युगे योजनकालः वर्तनकालो मेथिबन्धनप्रचारणकालः इत्येते, व्याख्याताः तानप्यतिक्रामतस्तत्फलहानं दण्ड इत्यर्थः।

क्षीरेत्यादि। क्षीरद्रोणे, गवां घृतप्रस्थः प्रस्थमितं घृतं जायते। पञ्चभागाधिकः प्रस्थपञ्चमभागयुक्तो घृतप्रस्थः, महिषीणां, क्षीरद्रोणे भवति। द्विभागाधिकः अर्धकुडुबाधिको घृतप्रस्थः, अजावीनां, क्षीरद्रोणे भवति। इदं च घृतप्रमाणं प्रायिकम्। अत एवाह–मन्थो वेति। मथनमेव, सर्वेषां घृतपरिमाणानां, प्रमाणं निश्चायकम्। तत्र हेतुकथनं–भूमितृणोदकविशेषाद्धीत्यादिना। क्षीरघृतवृद्धिः क्षीरघृतयोर्वृद्धिः क्षीरे घृतस्य वृद्धिर्वा।

यूथेत्यादि। यूथवृषं सेकारं, वृषेण तथाविधेन सह, अवपातयतः योधयतः, पूर्वः साहसदण्डः। घातयतः उत्तमः साहसदण्डः।

वर्णेत्यादि। वर्णावरोधेन दशतीरक्षा वर्णनियमेन दशकवर्गाणां रक्षा शुक्लवर्णा एको दशवर्गः लोहितवर्णोऽन्य इत्येवं नियतैकैकवर्णयोगिनां दशानां दशतां रक्षणं, कर्तव्यम्। दशतीशब्दस्य स्त्रीत्वमत एव पाठात् कल्प्यं, दशतामिति वा पाठः।

He who milks a second time (against the practice) shall be punished with the culting of his thumb. If one is late in milking the cow (after the lapse of usual time) one shall forfeit the remuneration there of.

The same rule is applicable to the periods of putting a string through the nose, taming or training them to the yoke. One droṇa of cows milk will yield one prastha of butter on churning. In the case of buffalo's milk the quantity of butter will be one-fifth of prastha more. The same quantity of milk of goats and sheep will produce one half-prastha more of ghee. The exact quantity can be ascertained only after churning and increase of milk and ghee is due to the nature of pastures, grasses, availability of water etc.

When a person causes a bull from the herd to be yoked with another bull, he shall be punished with the first amercement and if he causes its death he needs the highest amercement.

Cattle may be classed into groups of ten according to the colour and be allowed to graze together.

उपनिवेशदिग्विभागो गोप्रचाराद् बलान्वयतो वा गवां रक्षासामर्थ्याच्च।

अजादीनां षाण्मासिकीमूर्णां ग्राहयेत्।

तेनाश्वखरोष्ट्रवराहव्रजा व्याख्याताः।

बलीवर्दानां नस्याश्वभद्रगतिवाहिनां यवसस्यार्धभारः, तृणस्य द्विगुणं, तुला घाणपिण्याकस्य, दशाढकं कणकुण्डकस्य, पञ्चपलिकं मुखलवणं, तैलकुडुबो नस्यं, प्रस्थः पानम्। मांसतुला, दध्नश्चाढकं, यवद्रोणं, माषाणं वा पुलाकः। क्षीरद्रोणमर्धाढकं वा सुरायाः, स्नेहप्रस्थः, क्षारदशपलं शृङ्गिवेरपलं च प्रतिपानम्।

उपनिवेशेत्यादि। उपनिवेशदिग्विभागः गवाद्युपनिवेशदिग्व्यवस्था, गोप्रचाराद् गोप्रचारदिशमनुसृत्य, बलान्वयतो वा गवां गोबलयोगमनुसृत्य च, रक्षासामर्थ्याच्च चोरादिभयरहितत्वनिमित्तकं रक्षणसौकर्यमनुसृत्य च, भवति।

अजादीनामिति। अजाविप्रभृतीनां, षाण्मासिकीं षण्मासप्रवृद्धाम्, ऊर्णां, ग्राहयेत्।

तेनेति। उक्तेन गवादिकल्पेन, अश्वखरोष्ट्रवराहव्रजाः, व्याख्याताः वेतनोपग्राहिकादन्यश्वादियूथेष्वपि यथासम्भवं योज्यानीत्यर्थः।

अशनादिकमाह–**बलीवर्दानामिति**। तेषां मध्ये, नस्याश्वभद्रगतिवाहिनां नस्यानां कृतनासावेधानाम् अश्वभद्रगतिवाहिनां गवां, यवसस्य घासस्य, अर्धभारः दश तुलाः, अशनं भवतीति शेषः। तृणस्य सामान्यस्य, द्विगुणं विंशतितुलाः। तुला घाणपिण्याकस्य। दशाढकं चत्वारिंशत् प्रस्थाः कणकुण्डकस्य सूक्ष्मतण्डुलांशयुक्तस्य तण्डुलमलस्य। पञ्चपलिकं, मुखलवणं सिन्धूद्भवं लवणम्। तैलकुडुबौ नस्यं कुडुबमितं तैलं नासापुटनिषेच्यमौषधम्। प्रस्थः प्रस्थपरिमाणं तैलं धृतं वा, पानम्। मांसतुला शतपलप्रमाणं मांसम्। दध्नश्चाढकम्। यवद्रोणं यवानां द्रोणं माषाणां वा पुलाकः अर्धपक्वः सिक्थो वा, द्रोणपरिमाणः। यवमाषपुलाकयोश्चायं विकल्पः। क्षीरद्रोणमिति। द्रोणमितं क्षीरम्, अर्धाढकं वा सुरायाः क्षीराभावे अर्धाढकमिता सुरा। स्नेहप्रस्थः तैलधृतान्यतरस्य प्रस्थः, क्षारदशपलं गुडपलदशकं, शृङ्गिबेरपलं शुण्ठ्याः पलं च, इत्येतच्चतुष्टयं मिलितं, प्रतिपानम् अग्निदीपनार्थं पानं, भवति।

Cowherds shall take the cattle to graze in pastures either far or near according to their ability to protect them.

Sheep and other animals shall be shorn of their wool once in six months.

The same rules shall be applied to animals like horses, asses, camels and hogs.

For bulls that are provided with nose-strings and which are equal to horses in speed and in carrying loads half a bhāra (= 200 palas or ten tulas) of meadow grass (per day); twice the above quantity of ordinary grass, one tulā (= 100 palas) of oil cakes, ten āḍhakas of bran, five palas of salf, one kuḍuba of oil for rubbing over the nose and one prastha of drink (are required). Further, one tulā of flesh, one āḍhaka of curds, one droṇa of barley or cooked māṣa (Phaseolus Radiatus) may be given. Then one droṇa of milk, half an āḍhaka of surā (liquor), one prastha of oil or ghee, ten palas of sugar or jaggery, one pala of the front of śṛṅgivera (ginger) may be constituted to form a drink (to increase the appetite).

पादोनमश्वतरगोखराणां, द्विगुणं महिषोष्ट्राणां कर्मकरवलीवर्दानाम्। पायनार्थं च धेनूनाम्। कर्मकालतः फलतश्च विधानम्। सर्वेषां तृणोदकप्राकाम्यम्। इति गोमण्डलं व्याख्यातम्।

पञ्चर्षभं खराश्वानामजावीनां दशर्षभम्।
शत्यं गोमहिषोष्ट्राणां यूथं कुर्याच्चतुर्वृषम्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनत्रिंशोऽध्यायः गोध्यक्षः, आदितः पञ्चाशः।।

पादोनमिति। पादन्यूनं पूर्वोक्तं भद्रगतिबलीवर्दविधानमेव, अश्वतरगोखराणां वेसरपुङ्गवान्तरगर्दभानां, भवति। द्विगुणमिति। द्विगुणं भद्रगत्युक्तद्विगुणं महिषोष्ट्राणां, कर्मकरबलीवर्दानां शकटाद्युपयोगिनां पुङ्गवानां च। पायनार्थं च धेनूनामिति। पायनप्रयोजनकं यद् विधानमुक्तं तच्च चकाराद् भक्षणार्थं च, द्विगुणमिति वर्तते। कर्मकरबलीवर्दविषये धेनुविषये च विधानद्वैगुण्यवचनेनाप्यपरितुष्यन् विधानसारमुपदिशति–**कर्मकालतः फलतश्च विधानमिति**। कर्मकालपरिमाणाद्यनुसारेण कर्मकरबलीवर्दानां दुग्धबाहुल्यादिफल-प्राप्त्यनुसारेण च धेनूनामशनपानविधानं द्विगुणं ततोप्यधिकं वा निश्चेतव्यमित्यभिप्रायः। **सर्वेषामिति**। सर्वपूशनां, तृणोदकप्राकाम्यं तृणस्य उदकस्य च प्राकाम्यं पर्याप्तत्वं, कार्यम्। तृणोदकं प्रकाम्यमिति पाठे तृणं च उदकं च प्रकर्षेण काम्यं दुग्धवृद्ध्यनुरूपमपेक्षणीयं, यद्वा कामः पश्वभिलाषस्तत्पूरणानुरूपमित्यर्थः। इति गोमण्डलं तत्सम्बद्धं विधाजातं, व्याख्यातं वितत्य प्रतिपादितम्।

यूथकल्पनां श्लोकेनाह–**पञ्चर्षभमिति**। शत्यं व्यक्तिशतप्रमाणं, यूथं, खराश्वानां, पञ्चर्षभं पञ्च ऋषभाः सेक्तारो यस्मिंस्तत् तथाभूतं, कुर्यात्। अजावीनां, यूथं, दशर्षभं दशसेक्त्रधिष्ठितं, कुर्यात्। गोमहिषोष्ट्राणां, यूथं, चतुर्वृषं सेक्तृचतुष्टयाधिष्ठितं, कुर्यात्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनत्रिंशोऽध्यायः गोध्यक्षः, आदितः पञ्चाशः।।

The above mentioned commodites less by one quarter each in their quantity may be given to mules, cows and asses (per day as diet) while twice the quantity may be given as diet for buffaloes and camels (which are used in activities). For cows (cattle) kept at work twice the quantity may be given for drink. This shall be according to the work they are made to turn out and considering the need of the situation. For all (types of cattles) enough grass (fodder) and drinking water shall be given (in abundance. These are in general the prescriptions for cattle.

In a herd of one hundred asses and mules there shall be five male animals (at least) and in the case of herds of goats and sheep there shall be ten males per hundred. For a herd of ten heads of cows or buffaloes there shall be four male animals each.

Thus the fiftieth chapter of the Arthaśāstra of Kauṭalya entitled the Superintendent of cows comes to an end. Here ends the twentyninth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 51

47. प्रक० अश्वाध्यक्षः।

Section 47 : The Superintendent of Horses

अश्वाध्यक्षः पण्यागारिकं क्रयोपागतमाहवलब्धमाजातं साहाय्यागतकं पणस्थितं यावत्कालिकं वाश्वपर्यग्रं कुलवयोवर्णचिह्नकर्मवर्गागमैर्लेखयेत्।

अप्रशस्तन्यङ्गव्याधितांश्चावेदयेत्।

कोशकोष्ठागाराभ्यां च गृहीत्वा मासलाभमश्ववाहश्चिन्तयेत्।

अश्वविभवेनायतामश्वायामद्विगुणविस्तारां चतुर्द्वारोपावर्तनमध्यां सप्रग्रीवां प्रद्वारासन-फलकयुक्तां वानरमयूरपृषतनकुलचकोरशुकशारिकाभिराकीर्णां शालां निवेशयेत्।

अश्वाध्यक्ष इति सूत्रम्। अश्वाध्यक्षः सर्वाश्वनायकः अर्थात् तद्व्यापारोऽभिधीयत इति सूत्रार्थः। स्वाम्यादिप्रकृत्यभिधानानन्तरं दण्डप्रकृतिं प्राप्तावसरां वक्तुमुपक्रमः। तत्राश्वानां प्राधान्यात् प्रथमं तदध्यक्षा-भिधानम्।

अश्वाध्यक्ष इत्यादि। अश्वपतिः, पण्यागारिकं प्राभृतोपनीतं पण्यागारगतं, क्रयोपागतं क्रीतम्, आहवलब्धं युद्धाहृतम्, आजातं निजाश्वोत्पन्नं, साहाय्यागतकं साहाय्यदानेन लब्धं, पणस्थितम् आधित्वेन स्थितं, यावत्कालिकं यावान् प्रयोजनकालस्तावते कालायान्यस्मादानीतं, वाशब्दश्चार्थे, इत्थं सप्तप्रकारम्, अश्वपर्यग्रम् अश्वानां प्रमाणं, कुलवयोवर्णचिह्नकर्मवर्गागमैः कुलेन पारसीककाम्बोजारट्टवनायुप्रभृतिना वयसा द्विवर्षत्रिवर्षचतुर्वर्षादिना वर्णेन शुक्लकृष्णादिना चिह्नेन धवलवालफालप्रोथादिना कर्मणा सान्नाह्यादिना वर्गेण पारसीकादिभिरियद्भिरियानयं वर्ग इति वर्गीकरणेन आगमेन प्राप्तिस्थानेन च, इत्येवं सप्तभिर्विशेषैर्युक्तं, लेखयेत्।

अप्रशस्तेत्यादि। अप्रशस्तान् शृङ्गस्थानमांसबुद्बुदत्वान्यप्रभैकाङ्घ्रित्वादिदोषयुक्तान् न्यङ्गान् अङ्गविकलान् व्याधितांश्च, आवेदयेत्, यथाकालं परिवर्तनार्थं चिकित्सार्थं च।

शालाविधिमाह–**अश्वविभवेनेति**। अश्वविभवेनायताम् अश्वपर्यग्रानुरूप्येण दीर्घाम्, अश्वायामद्विगुण-विस्ताराम् अश्वायाममनुपदं वक्ष्यति, तद्द्विगुणविस्तारां, चतुर्द्वारोपावर्तनमध्यां चतुर्द्वारं सुखप्रवेशनिर्गमार्थमग्न्या-दिभये निष्क्रमणद्वाराणां सर्वतः सौलभ्यार्थं च परिकल्पितद्वारचतुष्टयम् उपावर्तनं प्रलुठनस्थानं मध्ये यस्यास्तां तथाभूतां, सप्रग्रीवां प्रग्रीवेण मुखप्रासादेन सहितां, प्रद्वारासनफलकयुक्तां प्रद्वाराभ्यां द्वारोभयपार्श्वगताभ्याम् आसनफलकाभ्यां युक्तां, वानरमयूरादिभिः सप्तभिर्विषप्रतीकारप्रयोजनाभिराकीर्णां, शालां मन्दुरां, निवेशयेत् निर्मापयेत्।

The superintendent of horses shall enter into the register (the seven details pertaining to the horse) taking into account their colour, marks of identification, group or classes and the native places of the horses and classifying them into 1. Those that are made available for purchase at the sale-houses, 2. those that are newly added by recent purchase, 3. those that have been captured in wars (with opposite parties), 4. those that are of local breed, 5. those that are sent thither for help 6. those that are mortgaged and 7. these that are temporarily kept in stables.

He shall give proper reports to the king regarding horses that are inauspicious, crippled or afflicted with diseases.

Every horse man should consider how to make the maintenance of horses is economically feasible and the monthly profit considering the amount he has received from the king's treasury and store-house.

The superintendent shall make a stable which is twice the length of a horse (on the one side) and twice as broad as the length, taking into consideration the number of horses to be kept. It should have four doors facing the four quarters with its general floor suited for the rolling of horses, with a projected front portion provided with wooden seats at the entrance and containing monkeys, peacocks, red-spoted deer, mongoose, partridge, parrots and maina birds.

अश्वायामचतुरश्रश्लक्ष्णफलकास्तारं सखादनकोष्ठकं समूत्रपुरीषोत्सर्गमेकैकशः प्राङ्मुखमुदङ्मुखं वा स्थानं निवेशयेत्। शालावशेन वा दिग्विभागं कल्पयेत्। बाडवावृष-किशोराणाम् एकान्तेषु।

बडबायाः प्रजातायास्त्रिरात्रं घृतप्रस्थपानम्, अत ऊर्ध्वं सक्तुप्रस्थः स्नेहभैषज्यप्रतिपानं दशरात्रं, ततः पुलाको यवसमार्तवश्चाहारः।

अश्वायामेत्यादि। अश्वायामचतुरश्रश्लक्ष्णफलकास्तारम् अश्वदैर्घ्यानुगुण्येन चतुरश्रनिर्मितं श्लक्ष्णं च फलकम् आस्तारं आस्तरणं यस्मिंस्तत् तथाभूतं, सखादनकोष्ठकं खादनकोष्ठैर्यवसादिविकरणाधार-भूतैस्तद्रक्षणकोष्ठैः सहितं, समूत्रपुरीषोत्सर्गं मूत्रपुरीषानवरोधसंविधानसहितम् अर्थात् किञ्चिदग्रतः समुन्नतम्, एकैकशः प्रत्यश्वं, प्राङमुखम् उदङ्मुखं वा स्थानं निवेशयेत्। **शालावशेन वा दिग्विभागं कल्पयेदिति।** राजभवनस्य य उत्तरपूर्वो दिग्विभागोऽश्वशालार्थ उक्तः 'उत्तरपूर्वं भागं कोशो गवाश्वं च' इति, स चेदश्वानां बाहुल्यादपर्याप्तः, तदा निर्मातव्यशालामहत्त्वानुगुण्येन दिग्विभागोऽन्यः स्वीकरणीय इत्यर्थः। **बडवेत्यादि।** बडबानां प्रसविनीनां वृषाणां सेक्तॄणां किशोराणां षण्मासादूर्ध्वम् आ त्रिवर्षात् किशोराः तेषां च, एकान्तेषु तदन्याश्वानां तेषां चान्योन्यदृष्ट्यगोचरेषु स्थलेषु, स्थानं कल्पयेदिति वर्तते।

बडबाया इति। तस्याः, प्रजातायाः प्रसूतायाः, त्रिरात्रं, घृतप्रस्थपानं प्रथमदिवसादूर्ध्वं प्रातः प्रातरिति स्वामी। अत ऊर्ध्वं, सक्तुप्रस्थः अपराह्णभोजनं, तदनन्तरं स्नेहभैषज्यप्रतिपानं स्नेहयुक्तमूलक्वाथादिप्रतिपानं, दशरात्रम्। **तत इति।** तदनन्तरं, पुलाकः अर्धसिद्धयवादिः, यवसं घासः, आर्तवश्चाहारः ऋतुयोग्यश्चाहारः सस्यलक्षणः।

The space for every horse shall be four times as broad as the length of the horse with its central floor fitted with smoothened planks, with separate compartments to keep the fodder. There shall be passages for the removal of urine and dung and with a door bring either to the north or east. The distinction of quarters may be according to the suitable position of the stable. Steeds, stallions and colts shall be kept separately.

After giving birth to a colt, a steed shall be fed for the first three days with a drink of one prastha of clarified butter; afterwards it shall be fed with a prastha of flour and made to drink oil mixed with medicine for ten nights and after this it shall be given cooked grains, meadow grass and other efood items suited to the season of the day.

दशरात्रादूर्ध्वं किशोरस्य घृतचतुर्भागः सक्तुकुडुबः, क्षीरप्रस्थश्चाहार आ षण्मासादिति। ततः परं मासोत्तरमर्धवृद्धिर्यवप्रस्थ आत्रिवर्षाद्, द्रोण आ चतुर्वर्षादिति। अत ऊर्ध्वं चतुर्वर्षः पञ्चवर्षो वा कर्मण्यः पूर्णप्रमाणः।

द्वात्रिंशदङ्गुलं मुखमुत्तमाश्वस्य, पञ्च मुखान्यायामः, विंशत्यङ्गुला जङ्घा, चतुर्जङ्घ उत्सेधः। त्र्यङ्गुलावरं मध्यमावरयोः। शताङ्गुलः परिणाहः। पञ्चभागावरं मध्यमावरयोः।

उत्तमाश्वस्य द्विद्रोणं शालिव्रीहियवप्रियङ्गूणामर्धशुष्कमर्धसिद्धं वा, मुद्गमाषाणां वा पुलाकः। स्नेहप्रस्थश्च। पञ्चपलं लवणस्य। मांसं पञ्चाशत्पलिकम्। रसस्याढकं द्विगुणं वा दध्नः पिण्डक्लेदनार्थम्। क्षारपञ्चपलिकः सुरायाः प्रस्थः पयसो वा द्विगुणः प्रतिपानम्। दीर्घपथभारक्लान्तानां च खादनार्थं स्नेहप्रस्थोऽनुवासनम्। कुडुबो नस्यकर्मणः। यवसस्यार्धभारः, तृणस्य द्विगुणः, षडरत्निपरिक्षेपः पुञ्जीलग्रहो वा!

दशरात्रादिति। दशरात्रादूर्ध्वं, किशोरस्य, घृतचतुर्भागः पादकुडुबघृतयुक्तः सक्तुकुडुबः, क्षीरप्रस्थश्च, आहारः। **आ षण्मासादिति**। आमासषट्कम् एवं कर्तव्यम्। **ततः परमिति**। षण्मासादूर्ध्वं, मासोत्तरमर्धवृद्धिः प्रतिमासं वर्धमानार्धप्रस्थः, यवप्रस्थः। आ कुतोऽयं यवप्रस्थो वर्धत इत्याह–**आ त्रिवर्षादिति**। **द्रोण** इति। यवद्रोणः त्रिवर्षादूर्ध्वम्, आ चतुर्वर्षाद्, आहारः। अत ऊर्ध्वं, चतुर्वर्षः, पञ्चवर्षो वा अश्वः, कर्मण्यः सान्नाह्यादिकर्मार्हः, पूर्णप्रमाणः पूर्णं प्रमाणं वक्ष्यमाणं यस्य स तथाभूतो भवति।

तदेव प्रमाणं व्याचष्टे–**द्वात्रिंशदित्यादि**। उत्तमाश्वस्य, द्वात्रिंशदङ्गुलं मुखं, पञ्च मुखानि आयामः षष्ट्यधिकशताङ्गुला जङ्घा, चतुर्जङ्घ उत्सेधः अशीत्यङ्गुलमौन्नत्यम्। त्र्यङ्गुलावरं मध्यमावरयोः यदुक्तमुत्तमस्य मुखादिप्रमाणं तद् मध्यमस्य त्र्यङ्गुलावरं त्र्यङ्गुलन्यूनम् अवरस्य अधमस्य ततोऽपि त्र्यङ्गुलन्यूनम्। टीकाभाषयोः द्व्यङ्गुलावरमिति पाठ उपात्तः। अथ परिणाहस्य प्रमाणमाह–**शताङ्गुल इति**। अङ्गुलशतप्रमाणः, परिणाहः परिक्षेपः, अर्थादुत्तमाश्वस्य। पञ्चभागावरं मध्यमावरयोः उत्तमाश्वपरिणाहप्रमाणात् पञ्चभागन्यूनम् अर्थादशीत्यङ्गुलं मध्यमाश्वस्य षष्ट्यङ्गुलमवराश्वस्य परिणाहप्रमाणम्।

आहारविधानमाह–**उत्तमाश्वस्येति**। तस्य, द्विद्रोणं शालिव्रीहियवप्रियङ्गूणां शाल्याद्यन्यतमस्य द्रोणद्वयम्, अर्धशुष्कम् अर्धसिद्धं वा, भोजनमिति शेषः। मुद्गमाषाणां वा, पुलाकः भक्तसिक्थकः, उक्तपरिमाणः।

स्नेहप्रस्थश्च धृतस्य तैलस्य वा प्रस्थश्च पानार्थः। पञ्चपलं लवणस्य। मांसं, पञ्चाशत्पलिकं पञ्चाशत्पलप्रमाणम्। रसस्य मांससंस्कृतस्य, आढकं, द्विगुणं वा दध्नः दध्याढकद्वयं वा, पिण्डक्लेदनार्थं भुक्तपुलाकक्लेदनार्थम्। क्षारपञ्चपलिकः गुलादिपञ्चपलयुक्तः सुरायाः प्रस्थः, पयसो वा, द्विगुणः प्रस्थद्वयं, प्रतिपानम् अपराह्णदेयम्। दीर्घपथभारक्लान्तानां च दीर्घाध्वलङ्घनभारवहनपरिश्रान्तानां च, खादनार्थम् अग्निदीपनद्वारेण सम्यगाहार-ग्रहणार्थं, स्नेहप्रस्थः, अनुवासनम् अनुवासनाख्यवस्तिचिकित्सादानं, भवति। यदुक्तं–

"वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परः।
यः स्नेहैर्दीयते स स्यादनुवासननामकः।।
कषायक्षीरतैलैर्यो निरूहः स निगद्यते।"

इति। कुडुबः स्नेहस्य प्रस्थचतुर्भागः, नस्यकर्मणः नासिकासेचनस्य। यवसस्य हरितसस्यादेः, अर्धभारः दश तुलाः। तृणस्य शुष्कस्य, द्विगुणः विंशतितुलाः, यवसाभावे। षडरत्निपरिक्षेपः पुञ्जीलग्रहो वा हस्तषट्कपरिणाहः पुञ्जीलानां तृणस्तम्बानां ग्रहो वा अर्थाद् भुजद्वयालिङ्गनग्राह्यस्तृणस्तम्बसङ्घातो वा।

A colt after the tenth day of its birth shall be given a kuḍuba of flower mixed with one-fourth quantity of clarified butter as well as one prastha of milk till it become six months old. Thereafter upto three years the above quantity of food shall be increased half as much during each succeeding month with the addition of one prastha of barley and upto the fourth year thereafter an addition of a droṇa of barley is recommended. Then after attaining the age of four or five the colt attains its full growth and becomes seviceable.

The measurement of the face of the best of the horses is thirty two angulas; its length is five times of its face; its shanks measure twenty angulas and its height is four times of its shank. Horses of medium and lower sizes fall short of the above measurements by three aṅgulas. The circumference of the best horse is one hundred aṅgulas, while the horses of the medium and lower sizes fall short of the above measurement by one-fifth (measuring eight aṅgulas).

For the best of the horses (the diet shall be) two-droṇas of any one of the grains like rice, barley, panic seeds which are soaked or cooked, cooked mudga (Phaseolus mungo) or māṣa (Phaseolus Radiatus), One prastha of oil (is recommended). The quantity of salt may be five palas. Fifty palas of flesh (is needed). One āḍhaka of broth or double the quantity of curd is needed to soften the food item. Five palas of sugar (or molasses), one prastha of liquor and two prasthas of milk are needed to form a drink to make the diet relishing. The same quantity of drink is to be provided for the horse which is required to go on a long journey or to carry heavy loads. A prastha of oil is needed for giving enema while one kuḍuba of oil is required for pouring into the nose. Other things required are half a bhāra

(ten tulas) of meadow grass, twice as much of ordinary grass and a quantity of six aratnis of hay stalk or grass for spreading in the ground (to form a bed for the horse).

पादावरमेतन्मध्यमावरयोः। उत्तमसमो रथ्यो वृषश्च मध्यमः। मध्यमसमश्चावरः। पादहीनं बडबानां पारशमानां च। अतोऽर्धं किशोराणां च। इति विधायोगः।

पादावरमेतन्मध्यमावरयोरिति। उत्तमस्याश्वस्योक्तं द्विद्रोणादिकं सर्वं चतुर्भागन्यूनं मध्यमस्य ततोऽपि चतुर्भागन्यूनमधमस्य। **उत्तमसम** इति। उत्तमाश्वविधासमानविधः, रथ्यो वृषश्च मध्यमः रथवाही मध्यमाश्वः सेक्ता च मध्यमाश्वः। मध्यमसमश्चावरः अधमाश्वो रथवाही अधमाश्वः सेक्ता च मध्यमाश्वविधासमानविधः। पादहीनं चतुर्भागहीनम् अर्थात् त्रिविधमपि विधाविधानं, बडवानां, पारशमानां च अश्वतराणां च। इह पारशमानामिति माकारयुक्तपाठलेखनं कोशेषु चिन्त्यम्। पारशवानामिति तु वाकारयुक्तं पठितव्यं, तदा हि पारशवशब्दः सङ्करजातिमनुष्यवचनः सङ्करजेऽश्वे वेगसराख्ये भक्त्या प्रयुक्त इति शक्यते वक्तुम्। अतोऽर्धं बडवाविधायाः अर्धं, किशोराणां च। इति एवं, विधायोगः उक्तः।

For horses of medium and lower size the above quantities less by one quarter is needed. A mature horse or a stallion of medium size shall be given the diet of a best horse and similar horses of the lower sizes also need the same quantity that of a medium one. Half of the above quantity is needed for the colts. This is the distribution of diet for horses (of various sizes).

विधापाचकसूत्रग्राहकचिकित्सकाः प्रतिस्वादभाजः।

युद्धव्याधिजराकर्मक्षीणाः पिण्डगोचरिकाः स्युः। असमरप्रयोग्याः पौरजानपदानामर्थेन वृषा बडबास्वायोज्याः।

प्रयोग्यानामुत्तमाः काम्बोजकसैन्धवारट्टजवानायुजाः। मध्यमा वाह्लीकपापेयकसौवीर-कतैतलाः। शेषाः प्रत्यवराः।

तेषां तीक्ष्णभद्रमन्दवशेन सान्नाह्यमौपवाह्यं वा कर्म प्रयोजयेत्।

चतुरश्रं कर्माश्वस्य सान्नाह्यम्।

विधापाचकसूत्रग्राहकचिकित्सका इति। अश्वाहारपक्तारोऽश्वपरिचारका अश्ववैद्याश्च, प्रतिस्वादभाजः विधाभागिनः, अतो विधायास्तद्भजनीया मात्रापि अश्वभोज्यमात्राभिः सह संविधेयेत्यभिप्रायः।

युद्धव्याधिजराकर्मक्षीणा इति। युद्धादित्रयक्षीणाः सान्नाह्यादिकर्मक्षीणाश्च, पिण्डगोचरिकाः अप्रशस्तः पिण्डः कुक्षिपूरणमात्रार्थ आहारो गोचर एषामिति तथाभूताः, स्युः। **असमरप्रयोग्या** इति। युद्धानर्हाः, पौरजानपदानाम्, अर्थेन प्रसूतिरूपप्रयोजनेन, वृषाः सेक्तारो भवन्तः, बडवासु आयोज्याः।

प्रयोग्यानामिति। प्रगतचर्याशिक्षाणां युद्धयोग्यानामश्वानां मध्ये, उत्तमाः, काम्बोजकादयः कम्बोजादि-देशचतुष्टयोत्पन्नाः। मध्यमा बाह्लीकादिदेशचतुष्टयोत्पन्नाः शेषाः उक्तेतरसौराष्ट्रादिदेशभवाः, प्रत्यवराः अधमाः।

अश्वानां द्विविधं कर्माह–तेषामिति। उत्तमादीनां, तीक्ष्णभद्रमन्दवशेन तीक्ष्णोऽतिमात्रतेजस्सत्त्वः

आघातलेशस्याप्यसोढा भद्रस्तेजस्सत्त्वयुक्तः आघातसत्वानुरूपचेष्टो मन्दो निस्तेजस्सत्त्वो महाघातोत्पादनीय-कर्मप्रतिपत्तिः त्रिविधैतत्स्वभावानुगुण्येन, सान्नाह्यं साङ्ग्रामिकम्, औपवाह्यकं वा क्रीडायानाध्व यानदिप्रयोजनकं वा, कर्म, प्रयोजयेत्।

चतुर्थमिति। चतुरश्रं सौष्ठवयुक्तं, कर्म शालिहोत्रादिप्रपञ्चितविशेषं साहासिककर्म, सान्नाह्यं, भवति।

Those who are engaged in cooking food, grooming horses and veterinary surgeons shall have a share in the rations (of diet) prescribed above.

Horses incapacitated by war, diseases, old age and rendered unfit and as such live only to consume food. They shall in the interest of citizens and country people be kept only to cross steeds.

Those horses belonging to the breed of Kamboja, Sindhu, Āraṭṭa and Vanāya countries are the best for use in battle etc; those of Bhahlika, Pāpeya, Sauvira and Taitala region are of middle quality. The rest of the breed are considered as ordinary.

These three types of horses may be appropriately trained either for war or riding according to their nature as furious, mild or stupid (and employed for such purposes).

The regular and appropriate training of a horse is for the purpose of war.

वल्गनो नीचैर्गतो लङ्घनो धोरणो नारोष्ट्रश्चौपवाह्याः।

तत्रौपवेणुको वर्धमानको यमक आलीढप्लुतः (पृथ? पूर्व) गस्त्रिकचाली च वल्गनः।

स एव शिरः कर्णविशुद्धो नीचैर्गतः, षोडशमार्गो वा। प्रकीर्णकः प्रकीर्णोत्तरो निषण्णः पार्श्वानुवृत्त ऊर्मिमार्गः शरभक्रीडितः शरभप्लुतः त्रितालो बाह्यानुवृत्तः पञ्चपाणिः सिंहायतः स्वाधूतः क्लिष्टः श्लिङ्गितो बृंहितः पुष्पाभिकीर्णश्चेति नीचैर्गतमार्गाः।

कपिप्लुतो भेकप्लुत एणप्लुत एकपादप्लुतः कोकिलसंचार्युरस्यो बकचारी च लङ्घनः।

औपवाह्यं पञ्चधा विभजते—वल्गन इत्यादिना। औपवाह्याः औपवाह्याश्वमार्गाः।

वल्गनमार्गं विवृणोति—तत्रेत्यादि। तत्र वल्गनादिषु पञ्चसु मार्गेषु मध्ये, औपवेणुकः हस्तमात्रमण्डल इति स्वामी, वर्धमानकस्तावन्मात्रमण्डलपङ्क्तिपरिपाटीवल्गनः, यमको युगपदुभयमण्डलवल्गनः, आलीढप्लुतः एकपादसङ्कोचापरपादप्रसारणपूर्वप्लुतियुक्तः, पूर्वगः पूर्वार्धवल्गनः, त्रिकचाली त्रिकं पृष्ठवंशाधरः तेन पश्चार्धलक्षणात् पश्चार्धवल्गनः।

स एवेति। वल्गनमार्ग एव, शिरःकर्णविशुद्धः शिरसा कर्णाभ्यां चाविकृतः, नीचैर्गतः तदाख्यः। षोडशमार्गो वा वक्ष्यमाणषोडशविधश्च सः। के ते प्रकारा इत्याह—**प्रकीर्णक** इत्यादि। प्रकीर्णकः सर्वगतिसङ्करयुक्तः, प्रकीर्णोत्तरः प्रकीर्ण एवैकगतिप्रधानः, निषण्णो निष्कम्पपृष्ठगतिः, पार्श्वानुवृत्तस्तिर्यग्गतिः,

ऊर्मिमार्गः उन्नतानतगतिः, शरभक्रीडितः शरभगतिः, शरभप्लुतः शरभतुल्योत्पतनः, त्रितालः त्रिपदगामी, बाह्यानुवृत्तः सव्यापसव्यवल्गनगतिः, पञ्चपाणिः चरणत्रयं सकृदवस्थाप्य एकं द्विरवस्थापयति, सिंहायतः सिंहतुल्यगतिः, स्वाधूतः अतिदीर्घगतिः, क्लिष्टो विवहनविस्रब्धगतिः, श्लिङ्गितोऽवनताग्रयायी, बृंहित उन्नताग्रयायी, पुष्पाभिकीर्णो गोमूत्रिकागतिः। इति एते, नीचैर्गतमार्गाः।

लङ्घनमाह—**कपिप्लुत** इत्यादि। वानरमण्डूकहरिणप्लुतैः सदृशप्लुतत्वात् कपिप्लुतो भेकप्लुत एणप्लुतश्च, एकपादप्लुतः संकोच्य पादत्रयमेकेन पादेन प्लुतं यस्य सः, कोकिलसञ्चारी पिकवत्सञ्चारः, उरस्यः संकोच्य सर्वान् पादान् उरसैव प्लवमानः, बकचारी च बकवत्सञ्चारश्च, लङ्घनः।

The ways of riding (the horse) are (five) described as circular movement, slow movement, jumping, galloping and responding to signals.

(Among them) the varieties of the circular movements are (six) Aupaveṇuka (turning in a circle of a hand in diameter), vardhamānaka (advancing keeping to the circular movement previously begun), yamaka (having two consecutive circular movements), Ālīḍhapluta (retracting one leg and moving forward with the other foot in a jumping action), Pūrvaga (with the hind part remaining steady and the front portion of the body making rapid movement) and Trikacālī (movemente of only the hind portion of the body).

The kind of movements described above with the head and ear kept erect are called slow movements, which are performed in sixteen ways—prakīrṇaka (a combination of several movements), prakīrṇottara (the above movement with one of them made prominent), niṣaṇṇa (movement with hind portion kept steady), pārśvānuvṛtta (movement side ways) ūrmimārga (movement up and down like a wave), śarabhakrīḍita (playing like the beast called Śarabha (said to have eight legs), śarabhapluta (leaping like a Śarabha), tritāla (movement using only three legs), bāhyānuvṛtta (moving left and right), pañcapāṇi (after setting down three legs once, the fourth one puts down twice), simhāyata (pacing like a lion), svādhūta (galloping with long strides), cliṣṭa (moving leisurely without a rider), ślingita (moving with front portion slightly bent), bṛmhita (moving with hind portion bent a little) and puṣpābhikīrṇa (with zigzag motion).

(The stride called) laṅghana (jumping) is of (seven kinds) called kapipluta (jumping like a monkey), bhekapluta (jumping like a frog), eṇapluta (jumping like an antelope), ekapādapluta (jumping with one leg having pressed down three of the four legs), kokilasañcārī (moving like a cuckoo), urasya jumping with its breast almost touching the ground (having contracted the legs) and bakacārī (leaping like crane).

काङ्को वारिकाङ्को मायूरोऽर्धमायूरो नाकुलोऽर्धनाकुलो वाराहोऽर्धवाराहश्चेति धोरणः।

संज्ञाप्रतिकारो नारोष्ट्र इति।

षण्णव द्वादशेति योजनान्यध्वा रथ्यानाम्। पञ्च योजनान्यर्धाष्टमानि दशेति पृष्ठवाह्यानामश्वानामध्वा।

विक्रमो भद्राश्वासो भारवाह्य इति मार्गाः।

विक्रमो वल्गितमुपकण्ठमुपजवो जवश्च धाराः।

तेषां बन्धनोपकरणं योग्याचार्याः प्रतिदिशेयुः। साङ्ग्रामिकं रथाश्वालङ्कारं च सूताः। अश्वानां चिकित्सकाः शरीरह्रासवृद्धिप्रतीकारमृतुविभक्तं चाहारम्।

धोरणमाह—काङ्क इत्यादि। कङ्कसमानगतिः काङ्कः, वारिकाङ्कः हंसादिसमानगतिः। एवं मायूरादिर्व्याख्येयः। इति एवमष्टविधो धोरणः।

नारोष्ट्रमाह—संज्ञाप्रतिकार इति। शिक्षितसङ्केतानुरूपचेष्टितः, नारोष्ट्राख्यः। इतिशब्द औपवाह्यनिरूपणसमाप्तौ।

गन्तव्याध्वमानमाह—षण्णवद्वादशेत्यादि। रथ्यानां रथवाहिनामुत्तममध्यमाधमानाम् अश्वानाम्, अध्वा, षट् नव द्वादशेति क्रमात् षड्योजनो नवयोजनो द्वादशयोजनश्च भवति। तथा पञ्च योजनानि, अर्धाष्टमानि सार्धानि सप्त योजनानि, दश योजनानि, इति क्रमेण पृष्ठभारवाहिनाम् अश्वानां त्रिविधानाम् अध्वा।

त्रिविधं गतिभेदमाह—विक्रम इति। विक्रमः शनैर्गमनं, भद्राश्वासो मध्यमः, भारवाह्यो द्रुतगमनम्, इति मार्गाः।

धारा आह—विक्रमो वल्गितमिति। विक्रमः शनैर्गमनं, वल्गितं प्रेङ्खितम्, उपकण्ठमुत्प्लुत्योत्प्लुत्य गमनम्, उपजवः प्रथमवेगः, जवश्चरमवेगः, इति धाराः।

तेषामिति। रथ्यानां पृष्ठवाह्यानां चाश्वानां, बन्धनोपकरणं बन्धनान्युपकरणानि च मुखकण्ठपृष्ठपादादियोजनीयानि कवियपर्याणादीनि, योग्याचार्याः प्रतिदिशेयुः अश्वशिक्षाचार्याः उपदिशेयुः। सांग्रामिकं रथाश्वालङ्कारं च, सूताः सारथयः प्रतिदिशेयुः। अश्वानां चिकित्सकाः अश्ववैद्याः, शरीरह्रासवृद्धिप्रतीकारं देहबलहानिप्रतिक्रियां मेदोवृद्धिप्रतिक्रियां च, ऋतुविभक्तं चाहारं तत्तदृतुयोग्यतया व्यवस्थितम् आहारं च, प्रतिदिशेयुः।

The (eight) types of gallop called dhoraṇa are : kāṅka (flying like a vulture), vārikāṅkṣa (dashing like a duck in water), māyūra (running like a peacock), ardhamāyūra (dashing at half the speed of a peacock), nākula (running like a mongoose), ardhanākula (moving at half the speed of a mongoose), vārāha (running like a hog), and ardhavārāha (with half the speed of a hog).

Nāroṣṭra is the movement responding to the signals (already given at the time of training).

Saṭ (six), nava (nine) and dvādaśa (twelve) are the distance, covered

by horses in yojanas (to be treversed in a day by horses yoked to carriages). The distances covered by horses, with a rider, are measured as five, eight and ten yojanas.

Trotting is (of three kinds) as vikrama (using its vigour in full), bhadrāśvāsa (moving with good breathing without straining) and bhāravāhya (pacing with speed carrying a load on its back).

Dhārāḥ (pacing of the horse) is of several kinds as vikrama (according to its strength with natural movement), valgita (trotting with circular movement), upakaṇṭha (with occasional gallop) upajava (with a little speed) and java (with natural pacing).

Qualified instructors shall prescirbe as to the manufacture of proper ropes to tether the horses. Charioteers shall oversee the manufacture of equipments of horses used in a war (such as housings, saddle etc.). Veterinary surgeons shall prescribe requisite remedies to deal with undue growth or diminution in the body of the horses and also the variations in diet according to the changes of seasons.

सूत्रग्राहकाश्वबन्धकयावसिकविधापाचकस्थानपालकेशकारजाङ्गलीविदश्च स्वकर्मभिरश्वानाराधयेयुः।

कर्मातिक्रमे चैषां दिवसवेतनच्छेदनं कुर्यात्। नीराजनोपरुद्धं वाहयतश्चिकित्सकोपरुद्धं वा द्वादशपणो दण्डः। क्रियाभैषज्यसङ्गेन व्याधिवृद्धौ प्रतीकारद्विगुणो दण्डः। तदपराधेन वैलोम्ये पत्रमूल्यं दण्डः।

तेन गोमण्डलं खोरष्ट्रमहिषमजाविकं च व्याख्यातम्।

द्विरह्नः स्नानमश्वानां गन्धमाल्यं च दापयेत्।

कृष्णसन्धिषु भूतेज्याः शुक्लेषु स्वस्तिवाचनम्।।

सूत्रेत्यादि। सूत्रग्राहकादयः सप्त, स्वकर्मभिः, अश्वान्, आराधयेयुरुपचरेयुः। तत्र सूत्रग्राहकः सूत्रग्रहणाधिकृतः वेल्लनपायनोद्वर्तनादिकर्ता, अश्वबन्धकः खलीनपर्याणाद्युपकरणबन्धनादिकृतः यावसिकः ऋत्वनुगुणयवसप्राशयिता, विधापाचकः शालिमुद्गमाषादिपक्ता, स्थानपालः अश्वावस्थानदेशशोधकः, केशकारः कालिककेशकल्पकः, जाङ्गलीविद् विषविद्याकोविदः।

कर्मातिक्रमे चेति। स्वस्वकर्मणामननुष्ठानेऽन्यथानुष्ठाने वा, एषा सूत्रग्राहकादीनां, दिवसवेतनच्छेदनं कुर्यात्। नीराजनोपरुद्धं नीराजना शान्त्युदकपुष्पदीपादिना सत्कारो दुरितशान्तये बलवृद्धये च क्रियमाणः तदर्थमुपरुद्धं, चिकित्सकोपरुद्धं वा चिकित्सार्थं, वाहयतः, द्वादशपणो दण्डः। क्रियाभैषज्यसङ्गेन क्रियायाश्चिकित्सनस्य भैषज्यस्य औषधस्य च यथाकालाकरणेन, व्याधिवृद्धौ, प्रतीकारद्विगुणः प्रतिक्रियार्थ-व्ययद्विगुणः, दण्डः, अश्वाध्यक्षस्य। तद्पराधेन क्रियाभैषज्यदोषेण, वैलोम्ये अश्वस्य विपत्तौ, पत्रमूल्यं विपन्नवाहमूल्यं, दण्डः।

तेनेति। तेन अश्वाराधनादिविधिनोक्तेन, गोमण्डलं खरोष्ट्रमहिषम् अजाविकं च व्याख्यातं गोमण्डलादिविधिरप्युक्तप्रायः। अश्ववदेव गोमण्डलादेरप्याराधनादिकं कर्तव्यं, तदकरणे गवाध्यक्षस्य दण्डश्च भवतीत्यर्थः।

अध्यायान्ते श्लोकावाह–द्विरह्नः स्नानमश्वानामित्यादि। दिनेदिने वारद्वयम् अश्वानां स्नानं, शरद्ग्रीष्मयोः, दापयेत्। गन्धमाल्यं च दापयेत्, नित्यम्। कृष्णसन्धिषु भूतेज्याः कृष्णपर्वसु अमावास्यासु भूतबलीन्, दापयेत्। शुक्लेषु शुक्लसन्धिषु स्वस्तिवाचनं ब्राह्मणाशीर्वादनं, दापयेत्।

Those who are engaged to attend on horses are (of seven categories such as) sūtragrāhakas (those who move the horse holding the reins), aśvabandhaka (those who tether the horses in stables), yāvasikas (those who supply suitable meadow grass, according to seasons), Vidhāpācakas (those who cook the grains for the horses), sthānapālas (those who keep watch over the ground of the stables(keśakāras (those who groom the horses by caring the hairs) and jāṅgalīvidas (those who apply remedies against poison).

Default in the duties of such persons shall be punished with the forfeiture of the daily wages. A fine of twelve paṇas may be imposed on those who take away the horses for riding which they are kept for the purpose of nīrājana (waving of lights to ward off evils) or for medical treatment. Defects of medicine or carlessness in administering the same for the particular disease may cause intensity to the disease in which case the physician shall be fined twice the cost of the treatment. In case there happens to be adverse, (resulting in the death of the animal) a fine equal to the cost of the animal shall be imposed.

These rules shall be applied in the cases of cows buffaloes, goats and sheep.

Horses shall be bathed and anointed with sandal powder twice a day in addition to decorating with incences and garlands. On new moon days sacrifices to Bhūtas and on full moon days auspicious hymns to divinity shall be given, in addition to invokings by the Brahmins.

नीराजनामाश्वयुजे कारयेन्नवमेऽहनि।

यात्रादाववसाने वा व्याधौ वा शन्तिके रतः।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रिंशोऽध्यायः अश्वाध्यक्षः, आदित एकपञ्चाशः ।।

नीराजनाम् आरात्रिकाम्, आश्वयुजे मासि, कारयेत्, नवमेऽहनि नवम्याम्, यात्रादौ अवसाने वा उद्योगस्यारम्भे समाप्तौ च, व्याधौ वा अश्वमारके च, शान्तिके रतः शान्तिप्रयोजनके कर्मण्यासक्तः।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकारे
त्रिंशोऽध्याय: अश्वाध्यक्ष: आदित एकपञ्चाश: ।।

On the ninth day of the month of Āsvayuja, on commencing and closing of a journey as well as when one is afflicted with disease a priest shall wave light before the horses to invoke blessings to them.

Thus the fifty first chapter of the Arthaśāstra of Kauṭalya entitled the superintendent of horses comes to an end. Here ends the thirtieth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 52

48. प्रक० हस्त्यध्यक्षः।

Section 48 : The Superintendent of Elephants.

हस्त्यध्यक्षो हस्तिवनरक्षां दम्यकर्मक्षान्तानां हस्तिहस्तिनीकलभानां शालास्थानशय्याकर्मविधायवसप्रमाणं कर्मस्वायोगं बन्धनोपकरणं साङ्ग्रामिकमलङ्कारं चिकित्सकानीकस्थोपस्थायुकवर्गं चानुतिष्ठेत्।

हस्त्यायामद्विगुणोत्सेधविष्कम्भायामां हस्तिनीस्थानाधिकां सप्रग्रीवां कुमारीसङ्ग्रहां प्राङ्मुखीमुदङ्मुखीं वा शालां निवेशयेत्।

हस्त्यायामचतुरश्रश्लक्ष्णालानस्तम्भफलकान्तरकं मूत्रपुरीषोत्सर्गस्थानं निवेशयेत्। स्थानसमशय्यामर्धापाश्रयां दुर्गे सान्नाह्यौपवाह्यानां बहिर्दम्यव्यालानाम्।

हस्त्यध्यक्ष इति सूत्रम्। हस्त्यध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः। सङ्गतिस्त्वश्वाध्यक्षवद् द्रष्टव्या। इदं च प्रकरणमध्यायद्वयेन वितन्यते।

हस्त्यध्यक्ष इति। सः, हस्तिवनरक्षां गजवनप्रवेशनिषेधादिरूपां, दम्यकर्मक्षान्तानां शिक्षाग्रहणदान्तानां, हस्तिहस्तिनीकलभानां, शालादिषट्कप्रमाणं शाला कुटी स्थानम् आलानप्रदेशः शय्या संवेशस्थानं कर्म सान्नाह्यादिकं विधा आहारः यवसं हरितसस्यादि एतेषां प्रमाणं, कर्मसु आयोगं दम्यादिकर्मसु वक्ष्यमाणेषु आसक्तिं, बन्धनोपकरणं बन्धनमालानग्रैवेयकादि उपकरणम् अङ्कुशवेणुयन्त्रादि च, साङ्ग्रामिकं वर्मतोमरादिकम्, अलङ्कारं वैजयन्तीक्षुरप्रमालादिकं, चिकित्सकादिवर्गं च चिकित्सका गजवैद्याः अनीकस्थाः गजशिक्षाविचक्षणाः उपस्थायुकाः कर्मकराः तेषां वर्गं च, अनुतिष्ठेत् अवेक्षेत।

शालानिवेशमाह—**हस्त्यायामेत्यादि**। नवहस्तो हस्त्यायामः तद्द्विगुणः अष्टादशहस्त उत्सेध उच्छ्रयः विष्कम्भो विस्तारः आयामो दैर्घ्यं च यस्यास्तां तथाभूतां, हस्तिनीस्थानाधिकां हस्तिनीस्थानं षडरत्नि तेनाधिकाम् अर्थाच्चतुर्विंशतिहस्तदीर्घां, सप्रग्रीवां प्रग्रीवेण मुखशालयोपेतां, कुमारीसंग्रहां कुमारी आलानस्तम्भोपरिनिवेशिता तुला सुखबन्धनार्था तत्सङ्ग्रहवर्तीं, प्राङ्मुखीम् उदङ्मुखीं वा शालां, निवेशयेत् निर्मापयेत्।

स्थाननिवेशमाह—**हस्त्यायामेत्यादि**। हस्त्यायामो नवहस्तः तच्चतुरश्रं तदनुरूपमवृत्ताद्याकारं श्लक्ष्णो मसृण आलानस्तम्भः फलकान्तर फलकरूपं स्थलच्छादकं च यस्य तत् तथाभूतं च, मूत्रपुरीषोत्सर्गस्थानं तदुत्सर्गानुगुणं किञ्चिदग्रोन्नतं स्थानं, निवेशयेत्। स्थानसमशय्यां स्थानसभां शय्याम्, अर्धापाश्रयाम् अर्धम् अर्धपञ्चमहस्तः तावन्मानोऽपाश्रय उन्नतस्थानं यस्यां तादृशीं, दुर्गे दुर्गान्तः, सान्नाह्यौपवाह्यानां, बहिर्दम्यव्यालानां दुर्गबहिर्देशे दमनीयानां हिंस्राणां च, निवेशयेत्।

Proper steps shall be taken by the superintendent of elephants to protect forests abounding in elephants and oversee the operation in respect of standing or lying in stables of elephants, male, female and young ones when they are tired after training. He shall also examine the proportional quantity of rations and grass, the extent of training given to them, their housings and ornaments, in addition to supervising the work of veterinarians treating them, of trainers of elephants that are used for warfare and of grooms such as drivers, binders and other attendants.

The stable for elephants shall be twice as broad, twice as high as length of an elephant with separate compartments for female elephants with more length than the other with a protruding entrance door with posts to tether called Kumarīsaṅgraha—a balance like rod mounted on the post to facilitate tying of the elephant rope. The door of the stable shall be facing either the east or the north.

The space inside the stable in front of the tethering post shall form a square, one side of which shall be equal to the length of an elephant and shall be paved with smooth planks having several holes to drain the urine and dung. There shall be enough space as broad as the length of an elephant and provided with a raised platform to half the height of an elephant to facilitate leaning on. Elephants to be used in war or for riding shall be kept inside the fort while those which are still being trained and tamed or having bad temper shall be kept outside the fort.

प्रथमसप्तमावष्टमभागावह्नः स्नानकालौ, तदनन्तरं विधायाः। पूर्वाह्णे व्यायामकालः, पश्चाह्नः प्रतिपानकालः। रात्रिभागौ द्वौ स्वप्नकालौ, त्रिभागः संवेशनोत्थानिकः।

ग्रीष्मे ग्रहणकालः। विंशतिवर्षो ग्राह्यः।

विक्को मूढो मत्कुणो व्याधितो गर्भिणी धेनुका हस्तिनी चाग्राह्याः।

सप्तारत्निरुत्सेधो नवायामो दशपरिणाहः प्रमाणतश्चत्वारिंशद्वर्षो भवत्युत्तमः। त्रिंशद्वर्षो मध्यमः। पञ्चविंशतिवर्षोऽवरः।

कालविनियोगमाह–**प्रथमेत्यादि**। अह्नः, प्रथमसप्तमौ, अष्टमभागौ, स्नानकालौ। एतेन द्विः स्नानमुक्तम्। तद्नन्तरं विधायाः द्वितीयोऽष्टभागो भोजनस्य कालः। पूर्वाह्णे, व्यायामस्य कर्माभ्यासस्य कालः। पश्चाह्नः अपराह्णः, प्रतिपानकालः। इहापरशब्दस्याह्नशब्दपरकस्य पश्चभावकरणमार्षम्। रात्रिभागवाविति। रात्रेर्द्वौ त्रिभागौ, स्वप्नकालौ। त्रिभागः संवेशनोत्थानिकः अवशिष्टस्तृतीयभागो दशघटिकात्मकः संवेशनोत्थानविनियोज्यः। तत्र पञ्चघटिकाः संवेशनस्य, परा उत्थानस्येति द्रष्टव्यम्।

गजग्रहणकालमाह–**ग्रीष्मे ग्रहणकाल** इति। तदा हि गजास्तापातिरेकात् प्रक्षीणबला भूत्वा सुग्रहा भवन्तीति। विंशतिवर्षोऽतिक्रान्तविंशतिवयस्कः तदधिकवयस्को वा, ग्राह्यः ग्रहणार्हः।

अग्राह्यानाह–**विक्क** इति। विक्कः स्तनन्धयः, मूढः हस्तिनीसमानदन्तः, मत्कुणो दन्तरहितः, व्याधितः रोगी, गर्भिणी प्रसिद्धा, धेनुका स्तनपानदायिनी, हस्तिनो च, अग्राह्याः।

प्रमाणमाह–**सप्तारत्निरुत्सेध** इति। सप्तहस्तोच्छ्रयवान्, नवायामो नवहस्तदैर्घ्यः, दशपरिणाहः दशहस्तपरिक्षेपः, प्रमाणतः प्रमाणेन यथोक्तेन युक्तः, चत्वारिंशद्वर्षः, उत्तमो भवति। त्रिंशद्वर्षः तावद्वयस्को वक्ष्यमाणप्रमाणोऽधमः।

The first and seventh of the eight divisions of the day are the two bathing times fixed for the elephants and after which it is the time for their food. Forenoon is the time for exercises and the afternoon is for drink. Two parts of the night is the time for their sleep while three parts are to be set apart for their rest prelude to the sleep and for waking up after sleep.

The time for capturing the elephants is summer. Those which are twenty years old shall be (preferably) captured.

The young ones which are still sucking, those which have small tusk which is equal to that of a female elephant, that which are toothless, that which are afflicted by diseases, that which are pregnant, elephants which suckle their young ones and females may not be captured.

The best ones (to be captured) should have a height of seven aratnis, length of nine aratnis and circumference of ten aratnis and having forty-years of age. (Aratni = a cubit of the middle length, from the elbow to the tip of the little finger). A thirty year old elephant is of middle class while that which is twenty five years of age is of the lowest class.

तयोः पादावरो विधाविधिः।

अरत्नौ तण्डुलद्रोणः। अर्धाढकं तैलस्य। सर्पिषस्त्रयः प्रस्थाः। दशपलं लवणस्य। मांसं पञ्चाशत्पलिकम्। मद्यस्य आढकं द्विगुणं वा पयसः प्रतिपानम्। गात्रावसेकस्तैलप्रस्थः शिरसोऽष्टभागः प्रादीपिकश्च। यवसस्य द्वौ भारौ सपादौ शष्पस्य शुष्कस्यार्धतृतीयो भारः। कडङ्गरस्यानियमः।

सप्तारत्निना तुल्यभोजनोऽष्टारत्निरत्यरालः।

यथाहस्तमवशेषः षडरत्निः पञ्चारत्निश्च।

विधाविधिमाह–**तयोः पादावरो विधाविधि**रिति। वक्ष्यमाणोत्तमविधाविध्यपेक्षया चतुर्भागन्यूनो विधाविधिर्मध्यमस्य, मध्यमविधापेक्षया चतुर्भागन्यूनश्चाधमस्य।

उत्तमस्य विधाप्रमाणमाह–**अरत्नौ तण्डुलद्रोण** इति। एकस्योत्सेधारत्नेः प्रमाणस्य एकस्तण्डुलद्रोणः। **अर्धाढकं तैलस्ये**त्यादि सुगमम्। रसस्य मांससंस्कृतस्य आढकं, द्विगुणं वा दध्नः रसाभावे दध्याढकद्वयं वा, पिण्डक्लेदनार्थं भुक्तपिण्डसेचनार्थम्। क्षारं दशपलिकं गुडादि दशपलप्रमाणम्। मद्यस्याढकं, द्विगुणम् आढकद्वयं वा, पयसः क्षीरस्य, प्रतिपानम् अपराह्णदेयम्। गात्रावसेकः शरीराभ्यङ्गः, तैलप्रस्थः। शिरसः, अष्टभागः तैलार्धकुडुबः। प्रादीपिकश्च प्रदीपार्थश्च, अष्टभागः। यवसस्य हरितसस्यादेः, द्वौ भारौ चत्वारिंशत्

तुला:। शष्पस्य बालतृणस्य हरितस्य, सपादौ द्वौ भारौ। शुष्कस्य यवसस्य शष्पस्य च, अर्धतृतीयो भार: सार्धं भारद्वयम्। कडङ्गरस्य शाखाबुसस्य सल्लकीपल्लवादे:, अनियम: यावत्तृप्ति दानमित्यर्थ:। अनया चैकारत्न्युत्सेधोक्तया प्रक्रियया सप्तारत्न्युत्सेधस्योत्तमहस्तिनस्तण्डुलादिकडङ्गरान्तं विधाजातं सप्तगुणितं द्रष्टव्यम्।

अष्टारत्न्युत्सेधस्यात्यरालाख्यस्यानेन प्रकारेण विधाधिक्यप्राप्तावपवादमाह–**सप्तारत्निना तुल्यभोजन** इत्यादि।

यथाहस्तमिति। षडरत्नेस्तण्डुलद्रोणषट्कं पञ्चारत्नेस्तण्डुलद्रोणपञ्चकमित्येवम् उत्सेधहस्तमानानुरोधेन, अवशेष: सप्तारत्न्यष्टारत्न्यतिरिक्त:, षडरत्नि: सप्तारत्न्युत्सेधापेक्षयैकारत्निन्यूनोत्सेधो मध्यमगणनीय:, पञ्चारत्निश्च मध्यमापेक्षयैकारत्निन्यूनोत्सेधोऽधमगणनीयश्च, विधापरिमाणयोगीति शेष:। तत्र मध्यमाधमयो-रुत्सेधवदायामे परिणाहे चैकैकारत्निह्रासो द्रष्टव्य:।

The diet for the above mentioned two lesser classes shall be lessened by a quarter each.

The provisions for an elephant (having seven aratnis in height) shall be one droṇa of rice; half an āḍhaka of oil; three prasthas of ghee; ten palas of salt, fifty palas of flesh, one āḍhaka of broth (rasa) or twice the quantity of curd to render the dish tasteful, ten palas of sugar, one āḍhaka of liquor, two āḍhakas of milk (for drink after the food). A prastha of oil is required for smearing over the body and one eight of the same for applying on the head as well as for use in a lamp to be kept in a stable. (Other requirements include) two bhāras (a bhāra = 2000 palas) of meadow grass, two and a half bhāras of ordinary grass and two and a half bhāras of dry grass. Also a good quantity of the stalks of various pulses are needed.

An elephant in rut having eight aratnis in height shall have the provisions and rations equal to that of an elephant of seven aratnis in height.

Others of six or five aratnis in height shall be provided with rations proportionate to the their sizes.

क्षीरयावसिको विक्क: क्रीडार्थं ग्राह्य:।

सञ्जातलोहिता प्रतिच्छन्ना संलिप्तपक्षा समकक्ष्या व्यतिकीर्णमांसा समतल्पतला जातद्रोणिकेति शोभा:।

शोभावशेन व्यायामं भद्रं मन्दं च कारयेत्।
मृगसङ्कीर्णलिङ्गं च कर्मस्वृतुवशेन वा।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकत्रिंशोऽध्याय: हस्त्यध्यक्ष:, आदितो द्विपञ्चाश:।।

क्षीरयावसिक इत्यादि। क्रीडार्थं न तु कर्मार्थं ग्राह्यो विक्को यदि कौतुकाद् गृहीतः, तदा स क्षीरयवसाभ्यां यथातृप्तिदत्ताभ्यां पोषणीय इत्यर्थः।

सप्तविधाः शोभा आह–**सञ्जातलोहितेति**। त्वगस्थिमात्रयुक्तस्य हस्तिन उपजातरुधिरा प्रथमावस्था तत्कृता शोभा सञ्जातलोहिता नाम, प्रतिच्छन्ना किञ्चिन्मांसोपजनच्छन्नास्थिका, संलिप्तपक्षा मांसलेपमसृणपार्श्वा, समकक्ष्या अन्यूनानतिरिक्तमांसावयवा, व्यतिकीर्णमांसा क्वचिदुन्नतं क्वचिदवनतमित्येवं व्यामिश्रं मांसं यस्यां सा तथाभूता, समतल्पतला सगं पृष्ठवंशसमोत्पन्नमांसं तल्पतलं पृष्ठवंशपार्श्वं यस्यां सा तथा, जातद्रोणिका द्रोणीव द्रोणिका द्रोणीसमाना पृष्ठस्याकृतिः सा वंशस्य निम्नीभावात् तत्पार्श्वोन्नतिकृताज्जाता यस्यां सा तथा। इति शोभाः, सप्त सप्तावस्थाकृताः।

अध्यायान्ते श्लोकमाह–**शोभावशेनेत्यादि**। उक्तावस्थानुगुण्येन, व्यायामं शिक्षां, कारयेत्। कं, भद्रम् उत्तमं, मन्दं मध्यमं, चेकारात् मृगमवरं च हस्तिनम्। मृगसङ्कीर्णलिङ्गं च मृगं भद्रादिसङ्करजं च भद्रमन्दभद्रमृगादिनवप्रकारं हस्तिनम्। कर्मसु सान्नाह्यौपवाह्येषु, व्यायामं परिश्रमं कारयेत्। ऋतुवशेन वा शरदाद्यनुष्णकालानुसारेण च, कर्मसु व्यायामं कारयेत्।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
एकत्रिंशोऽध्यायः हस्त्यध्यक्षः, आदितः द्विपञ्चाशः।।

Young elephant captured for the sake of mere sporting may be fed with milk and meadow grass.

The (seven) physical splendours (that contribute to their grace) are (enumerated as) sañjātalohitā (that which is blood-red being emaciated), praticchannā (that which is a little fleshy), samliptapakṣā (fleshy smooth with no protruding bones), samakakṣyā (with flesh evenly spread on either side), vyatikīrṇamāmsā (with uneven flesh on the body), samatalapatalā (with even surface having flesh on either side of the back), and jātadroṇikā (with fleshy sides of uneven surface).

The elephants may be exercised in accordance with their physical splendour considering them as bhadra (the best), manda (the middling or slow) and mṛgasaṅkīrṇaliṅga (having mixed virtues of the best and middling).

They may be engaged in activities according to the particular seasons.

Thus the fifty second chapter of the Arthaśāstra of Kauṭalya entitled the superintendent of elephants comes to an end. Here ends the thirtyfirst chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 53

48. प्रक० हस्त्यध्यक्षः-हस्तिप्रचारः।

Section 48 : Superintendent of Elephants : Training

कर्मस्कन्धाः चत्वारः दम्यः सान्नाह्य औपवाह्यो व्यालश्च।

तत्र दम्यः पञ्चविधः-स्कन्धगतः स्तम्भगतो वारिगतोऽवपातगतो यूथगतश्चेति। तस्योपविचारो विक्ककर्म।

सान्नाह्यः सप्तक्रियापथः-उपस्थानं संवर्तनं संयानं वधावधो हस्तियुद्धं नागरायणं साङ्गामिकं च। तस्योपविचारः कक्ष्याकर्म ग्रैवेयकर्म यूथकर्म च।

औपवाह्योऽष्टविधः-आचरणः, कुञ्जरौपवाह्यः, धोरणः, आधानगतिकः, यष्ट्युपवाह्यः, तोत्रोपवाह्यः, शुद्धोपवाह्यः, मार्गायुकश्चेति। तस्योपविचारः- शारदकर्म हीनकर्म नारोष्ट्रकर्म च।

कर्मस्कन्धा इत्यादि। कर्मस्कन्धाः क्रियासमूहाः, चत्वारः चतूरूपाः। रूपाण्याह-दम्य इत्यादि।

तत्रेति। तेषु चतुर्षु मध्ये, दम्यः पञ्चविधः। ता एव विधा आह-स्कन्धगतः स्कन्धारोहप्रवणः, स्तम्भगतः आलानबन्धनसहः, वारिगतः वारिर्गजग्रहणभूमिस्तत्प्रविष्टः, अवपातगतः अवपातनार्थं कल्पितं तृणादिच्छन्नं गर्तं गतः, यूथगतो दान्तहस्तिनीसहविहारव्यसनी, चः समुच्चये। तस्य दम्यस्य, उपविचारः उपचरणं, विक्ककर्म विक्कस्योपचरणमिव भवति। तच्च क्षीरयवसेक्षुकाण्डादिदानम्।

सान्नाह्यमाह-**सान्नाह्य** इत्यादि। सः, सप्तक्रियापथः उपस्थानादिसप्तविधक्रियामार्गः। तत्र उपस्थानं पूर्वापरावयवानां नमनोन्नमनादिकं ध्वजोल्कावेणुरज्ज्वादिलङ्घनं च, संवर्तनं शयनोपवेशनरेखागर्तविषम-लङ्घनादिकं भूमिकर्म, संयानम् ऋजुवक्रगोमूत्रिकामण्डललाघवादिगतिविशेषः, वधावधः हस्तदन्तगात्रैरश्वनर-रथादेस्तत्प्रतिनिधेर्वा घातो ग्रहणं वा, हस्तियुद्धं हस्तिभिर्हीनतुल्यतमैः सह वरण्डकाद्यामिषमन्तरतः कृत्वा युद्धं 'प्रसिद्धलालापिण्डिकाख्यमि'ति स्वामी। नागरायणं गोपुराट्टालकपरिघादिभञ्जनं, साङ्ग्रामिकं प्रकाशयुद्धसौप्तिकादिकम्। **तस्योपविचार** इति। सान्नाह्यस्योपचरणं, कक्ष्याकर्म वस्त्राबन्धनशिल्पं, ग्रैवेयकर्म कलापकादिकण्ठबन्धनकौशलं, यूथकर्म च पूर्वकायोन्नतत्वापरकायोन्नतत्वसमकायत्वादिचिह्नैर्हस्ति-शास्त्रोक्तैर्गिरिचरादियूथान्तर्गतत्वं विज्ञाय तत्तद्यूथानुगुणकर्मसु नियोजनं च।

औपवाह्यमाह–औपवाह्योऽष्टविध इत्यादि। तत्र आचरण: पूर्वकायोन्नतावनतापरकायोन्नतावनतादि-सर्वविधगजगत्यनुसारी, कुञ्जरौपवाह्य: कुञ्जरान्तरेण सहौपवाह्यादिकर्ता, धोरण एकेनैव पक्षेणं सर्वकर्मकर:, आधानगतिक: द्वित्रिविधगतियायी सर्वगतिकुशलश्च, यष्ट्युपवाह्य: यष्ट्यैव केवलया क्रियाकारी, तोत्रोपवाह्य: सकण्टकयष्ट्या क्रियाकारी, शुद्धोपवाह्य: यष्टितोत्रनैरपेक्ष्येण पदाघातादिसंज्ञयैव केवलया सर्वकर्मकर:, मार्गायुकश्च मृगयुकर्मशिक्षितश्च, इति। मार्गयुक इति ह्रस्वद्वितीयाक्षपाठो युक्त:। तस्य औपवाह्यस्य, उपविचार: उपचरणम् तदेवाह–शारदकर्म शारदस्याप्रतिभस्य अनुरूपं कर्म। शारदश्च चतुर्विध: स्थूलकृशलोहितप्राकृत-भेदात्। तेन स्थूलस्य कृशीकरणं कृशस्य स्थूलीकरणं लोहितस्य मन्दाग्नेरग्निदीपनं प्राकृतस्य प्रकृतिस्थस्य स्वास्थ्यरक्षणमिति चतुष्प्रकारं शारदकर्म। हीनो निर्व्यायामस्तस्य व्यायामयोजनं हीनकर्म, नारोष्ट्रकर्म च संज्ञाशिक्षणं च।

For the purpose of training elephants are classed into four kinds such as damya (that which is tameable), sānnāhya (that which is suitable for training for war), aupavāhya (that which is trained for riding) and vyāla (the rogue elephants).

Those which are damyas (tameable) belong to five kinds as skandhagata (that could be mounted on its back), stambhagata (that which could be tethered to the post), vārigata (that which enters the forest where it is trapped), avapātagata (that which lies in pits) and yūthagata (that which is attached to its herd). They could be treated and nourished a though they are young ones (in the beginning).

Training of the war-elephants is of seven kinds such as upasthāna (drill, such as rising, bending etc.), samvartana (turning such as lying down, sitting etc), samayāna (advancing with straight or serpentine movements), vadhāvadha (trampling down and killing (the infantry by horses and chariots), hastiyuddha (fighting with other elephants) nāgarāyaṇa (assailing forts and cities) and sāmgrāmika (warfare). The initial preliminary steps are kakṣyākarma (binding the elephants with girths), graiveyakarma (putting on collars to facilitate climbing by warriors or mahouts) and yūthakarma (prompting them to work in the company of trained herds).

Aupavāhya (trained for riding) falls under eight categories such as : ācaraṇa (following the several trained movements of an elephant with fore and hind limbs raised with the back a little lowered), kuñjaraupavāhya (which suffers a rider to mount over it when in company with another elephant), dhoraṇa (that which is taught trotting), ādhānagatika (trained in various kinds of movements), yaṣṭyupavāhya (that which moves by the prompting of the staff), totropavāhya (which can be made to move by a goad), śuddhopavāhya (which moves without the prompting of staff or goad) and mārgāyuka (that which is of help in hunting). The first steps of

such training are śāradakarma (autumnal work), hīnakarma (mean deeds) and nāroṣṭrakarma (training to respond to signals).

व्याल एकक्रियापथः। तस्योपविचार आयम्यैकरक्षः कर्मशङ्कितोऽवरुद्धो विषमः प्रभिन्नः प्रभिन्नविनिश्चयो मदहेतुविनिश्चयश्च।

क्रियाविपन्नो व्यालः। शुद्धः सुव्रतो विषमः सर्वदोषप्रदुष्टश्च। तेषां बन्धनोपकरणमनीकस्थप्रमाणम्। आलानग्रैवेयकक्ष्यापरायणपरिक्षेपोत्तरादिकं बन्धनम्। अङ्कुशवेणुयन्त्रादिकमुपकरणम्। वैजयन्तीक्षुरप्रमालास्तरणकुथादिकं भूषणम्। वर्मतोमरशरावापयन्त्रादिकः साङ्ग्रामिकालङ्कारः।

व्याल इति। सः, एकक्रियापथः एककर्ममार्गः। तस्योपविचारः उच्यत इति शेषः। आयम्यैकरक्षः नियम्यैकेन रक्षणीयः अथवा आयम्यो दण्डस्तेनैवैकेन रक्षणीयः सः। तस्य विशेषानाह–कर्मशङ्कितः शिक्षाकाले विसंवादी, अवरुद्धः कर्मानुपयोगोपेक्षितः, विषमः यदृच्छानुष्ठायी, प्रभिन्नो मददोषदुष्टः, प्रभिन्नविनिश्चयः मदाद् विधादिदोषाच्च व्याकुलीभूतः, मदहेतुविनिश्चयश्च सदामदत्वादविज्ञातमदहेतुश्च।

व्यालसामान्यलक्षणमाह–**क्रियाविपन्न** इति। दुष्टकर्मदूषितः, व्यालः। **शुद्ध** इत्यादि। तद्विशेषकथनम्। तत्र शुद्धः केवलघातुकोऽष्टादशदोषयुक्तः, सुव्रतः केवलचालकः पञ्चदशदोषयुक्तः, विषमः घातनचालनोभयकारी शुद्धसुव्रतोभयदोषैर्युक्तः, सर्वदोषप्रदुष्टः उक्तैस्त्रयस्त्रिंशद्दोषैः स्वकीयैश्चैकोनविंशतिदोषैर्युक्तः। शुद्धादीनां तद्दोषाणां च लक्षणं हस्तिशास्त्रतोऽवगन्तव्यम्।

तेषामिति। गजानां, बन्धलोपकरणं बन्धनमुपकरणं च, अनीकस्थप्रमाणम् अनीकस्थो हस्तिशिक्षाविचक्षणस्तत्प्रमाणकं तदुपदिष्टं, करणीयम्।

Vyāla (the rogue elephant) can be trained only in one way. The best way is to keep them under control is punishment. It has an aversion for work, it is obstinate and difficult to control, perverse in nature, unsteady, wilful and of infatuated temper when under the influence of rut.

Training of rogue elephants is useless and will prove a failure. Such elephants may be urely roguish, clever in roguery, perverse or possessed of all kinds of vices (respectively known punder the names of śuddha, suvrata, viṣama and sarvadoṣapraduṣṭa).

The form of fetters to put them under control may be ascertained from the experts on elephantology. Ālāna (tethering posts), graiveya, (collar) kakṣyā parāyaṇa (the rope put on the neck to facilitate the climbing of the rider) parikṣepa (leg chains) and uttara (frontal fetters) are the equipments to bind the elephants. Aṅkuśa (hook), venu (bamboo staff) and yantra contrivances) are other instruments. Ornaments to decorate the elephants are the necklace called Vaijayanti and kṣurapramālā (nakṣatramālā), āstaraṇa (litter) and kutha (housings). War equipmetns, include varma (armour) tomara (iron club), śarāvāpa (bag to hold the arrows) and machines.

चिकित्सकानीकस्थारोहकाधोरणहस्तिपकौपचारिकविधापाचकयावसिकपादपाशिककुटीरक्षकौपशायिकादिरौपस्थायिकवर्गः।

चिकित्सककुटीरक्षविधापाचकाः प्रस्थौदनं स्नेहप्रसृतिं क्षारलवणयोश्च द्विपलिकं हरेयुः। दशपलं मांसस्यान्यत्र चिकित्सकेभ्यः।

पथिव्याधिकर्ममदजराभितप्तानां चिकित्सकाः प्रतिकुर्युः।

आलानेत्यादि। आलानादिकं बन्धनं तत्र आलानं स्तम्भः ग्रैवेयं कलापकः कण्ठबन्धः कक्ष्या वरत्रा परायणम् आरोहणालम्बरज्जुः परिक्षेपः पादपाशादिः उत्तरं द्वितीयं कलापादिकम्, आदिशब्दात् त्रिपद्यादिग्रहणम्। अङ्कुशेत्यादि। अङ्कुशादिकं उपकरणम्। तत्र अङ्कुशः सृणिः वेणुर्दण्डः यन्त्रम् आयुधागाराध्यक्षोक्तं पाञ्चालिकादि। भूषणमाह–वैजयन्तीत्यादि। वैजयन्ती गजपताका क्षुरप्रमाला नक्षत्रमाला आस्तरणं नमतं कुथः वर्णकम्बलः आदिपदाच्छङ्खादिग्रहणम्। साङ्ग्रामिकालङ्कारमाह–वर्मेत्यादि। वर्म कवचं तोमरश्चतुर्हस्तादिरायुधागाराध्यक्षोक्तः शरावापस्तूणी यन्त्रं नानारूपमायुधाध्यक्षोक्तम् एतदादिकः, साङ्ग्रामिकः युद्धार्थः अलङ्कारः।

हस्तिकर्मकरवर्गमाह–चिकित्सकेत्यादि। चिकित्सको गजवैद्यः अनीकस्थः प्रतीतः आरोहकः शास्त्रज्ञो गजारोहः आधोरणः शास्त्राभिज्ञः कर्मकुशलः हस्तिपको हस्तिरक्षी औपचारिकश्चारणोद्वर्तनाभ्यञ्जनादिकर्ता विधापाचकः आहारपक्ता यावसिकः यवसप्रवेशकः पादपाशिकः पादबन्धकः कुटीरक्षकः शालापालनशुचीकरणाद्यधिकृतः औपशायिकः शयनशालाधिकृतः एतदादिः, औपस्थायिकवर्गः कर्मकरवर्गः।

चिकित्सककुटीत्यादि। चिकित्सकादयस्त्रयः, प्रस्थौदनं प्रस्थप्रमाणमन्नं, स्नेहप्रसृतिं तैलघृतादेरर्धाञ्जलिं, क्षारलवणयोश्च, द्विपलिकं पलद्वयप्रमाणं, हरेयुः हस्त्याहाराल्लभेरन्, प्रत्येकमात्मार्थे। दशपलं मांसस्य, अन्यत्र चिकित्सकेभ्यः चिकित्सकान् वर्जयित्वा, हरेयुः कुटीरक्षा विधापाचकाश्च।

पथीत्यादि। पथ्यादिपञ्चकाभितप्तानां हस्तिनां, चिकित्सकाः, प्रतिकुर्युः पथिगमनादिजन्याभितापप्रतीकारं कुर्युः।

The group of persons to attend on the needs of the elephants include cikitsaka (elephant doctor), anīkastha (trainer) ārohaka (expert rider), ādhoraṇa (who grooms), hastipaka (the protector), aupacārika (one who massages), vidhāpācaka (the cook), yāvasika (one who procures grass), pādapāśika (one who tethers to the post). Kuṭīrakṣaka (the sweeper of the stable), and aupaśāyika (who keeps watch during the night).

Elphant doctors, watchmen, sweepers and cooks shall collect (from the storehouse) one prastha of cooked rice, a handful of oil and two palas of sugar and salt. Excepting the doctors, the others shall receive ten palas of flesh each.

The doctors shall apply necessary medicine to elephants while making a journey, or afflicted by diseases, tired due to over work, in rut or old age.

स्थानस्याशुद्धिर्यवसस्याग्रहणं स्थले शायनमभागे घातः परारोहणमकाले यानमभूमावतीर्थेऽवतारणं तरुषण्ड इत्यत्ययस्थानानि। तम् एषां भक्तवेतनादाददीत।

तिस्र नीराजनाः कार्याश्चातुर्मास्यृतुसन्धिषु।

भूतानां कृष्णसन्धीज्याः सेनान्यः शुक्लसन्धिषु।।

दन्तमूलपरीणाहद्विगुणं प्रोज्झ्य कल्पयेत्।

अब्दे द्व्यर्धे नदीजानां पञ्चाब्दे पर्वतौकसाम्।

।। इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
द्वात्रिंशोऽध्यायः हस्तिप्रचारः, आदितः त्रिपञ्चाशः।।

दण्डहेतूनाह–**स्थानस्येत्यादि**। स्थानस्य अशुद्धिः अमार्जनं, यवसस्य अग्रहणम् आशनाभावः, स्थले स्थण्डिले शायनम्, अभागे घातः ताडनानर्हे मर्मादौ ताडनं, परारोहणम् आरोहणानधिकृतस्यारोहणम्, अकाले यानम् अनियते काले चारणम्, अभूमौ विषमदेशे यानम्, अतीर्थे नद्यादेरघट्टे अवतारणं, तरुषण्डे तरुगहने अवतारणम्, इति एवञ्जातीयानि, अत्ययस्थानानि दण्डस्य कारणानि, अर्थाद् औपस्थायिकवर्गस्याध्यक्षस्य च। तं दण्डम्, एषां, भक्तवेतनाद्, आददीत गृह्णीयात्।

विधिशेषं श्लोकद्वयेनाह–**तिस्र** इति। तिस्रो नीराजनाः बलवृद्धिदुरितशान्तिप्रयोजना आरात्रिकाः, कार्याः। कदा कदा, चातुर्मास्यृतुसन्धिषु चातुर्मास्यश्चतुर्षु मासेषु भवाः पौर्णमास्यः तासु, ऋतुसन्धिषु पूर्वापरऋतुसन्धिस्थासु अर्थात् कार्त्तिकीफाल्गुन्याषाढीषु, भूतानां, कृष्णसन्धीज्याः अमावास्यासु बलयः, कार्याः। सेनान्यः स्कन्दस्य, शुक्लसन्धिषु पूर्णिमासु, इज्याः कार्या इति शेषः।।

दन्तेत्यादि। दन्तमूलपरीणाहद्विगुणं विषाणमूलपरिक्षेपमानद्विगुणमानं भागं, प्रोज्झ्य परिहाय, कल्पयेत्। छित्त्वा गृह्णीयात्, प्रोज्झितातिरिक्तं दन्तभागमित्यार्थम्। छेदकालमाह–अब्दे द्व्यर्धे सार्धे वर्षद्वये अतीते, नदीजानां नदीचारिणां हस्तिनां, पञ्चाब्दे अतीते, पर्वतौकसां गिरिचराणाम्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
द्वात्रिंशोऽध्यायः हस्त्यध्यक्षे हस्तिप्रचारः, आदितस्त्रिपञ्चाशः।।

Offences punishable with fines include :—accumulation of dirt in the stable; failure to bring grass, causing the elephant to lie down on hard and unprepared ground; hurting the vital parts of the body; permission to a strangter to ride on it, untimely riding, leading it to water through impassable places and allowing it to enter into thick and thorny forest. Such fines shall be collected from the rations and wages due to the offenders.

On the occasion of Cāturmāsya (the months of July, August, September and October) and on the occasion of the meeting of two seasons, waving of lights may be performed thrice. Further on new moon and full moon days commanders (of the army) shall perform sacrifices to Bhūtas for the protection of the elephants.

Occasionally tusks may be cut off leaving as much as equal to twice the circumference of the tusk near its root. This may be done once in two and a half years in the case of elephants born in the regions irrigated by rivers and once in five years in the case of those born in mountain regions.

Thus the fifty third chapter of the Arthaśāstra of Kauṭalya entitled the training of elephants comes to an end. Here ends the thirty second chapter of the second Adhikaraṇa called Adhyaksapracāra.

Chapter 54

49, 50, 51. प्रक० रथाध्यक्षः, पत्त्यध्यक्षः, सेनापतिप्रचारः।

Section : 49. The Superintendent of Chariots
Section : 50. The Superintendent of Infantry
Section : 51. Duties of the Commander-in-Chief

अश्वाध्यक्षेण रथाध्यक्षो व्याख्यातः।

स रथकर्मान्तान् कारयेत्।

दशपुरुषो द्वादशान्तरो रथः। तस्मादेकान्तरावरा आ षडन्तरादिति सप्त रथाः।

देवरथपुष्यरथसाङ्ग्रामिकपारियाणिकपरपुराभियानिकवैनयिकांश्च रथान् कारयेत्।

रथाध्यक्ष इति सूत्रम्। रथानाम् अध्यक्षः घटनसंस्करणाद्यधिकृतो रथाध्यक्षः अर्थात् तत्कर्माभिधीयत इति सूत्रार्थः।

अश्वाध्यक्षेणेति। अश्वाध्यक्षविधानेन, रथाध्यक्षः व्याख्यातः रथाध्यक्षविधानं व्याख्यातं रथ्यानां शालानिवेशनं विधादानं कर्मायोजनं गन्तव्याध्वपरिकल्पनं बन्धनोपकरणघटनं कर्मकरनियोजनं नीराजनमित्येवञ्जातीयमश्वाध्यक्षोक्तं कर्म रथाध्यक्षेणाप्यनुष्ठेयमित्यर्थः।

अधिकं त्वाह—**स** इत्यादि। रथाध्यक्षः, रथकर्मान्तात् घटनसंस्करणरूपान्, कारयेत्।

रथस्य प्रमाणमाह—**दशपुरुष** इति। 'द्वादशाङ्गुलो वितस्तिश्छायापौरुषं चे'ति द्वादशाङ्गुलो यः पुरुषः उक्तः तेन पुरुषप्रमाणेन दशपुरुषः दशवितस्तिः अर्थादुत्सेधे पञ्चहस्तः, द्वादशान्तरः हस्तषट्कविस्तारः, रथः। अयमुत्तमः। इतो न्यूनप्रमाणान् रथानाह—**तस्मादिति**। दशपुरुषरथाद्, एकान्तरावराः आ षडन्तरात् आ षड्वितस्तिविस्तारादेकैकवितस्तिविस्तारन्यूनाः, अर्थाद् विस्तारन्यूनतानुगुणोत्सेधन्यूनतायुक्ताश्च, रथा भवन्तीति शेषः। इति अनेन प्रकारेण, सप्त रथाः दशपुरुषेणादिमेन सह।

विनियोगभेदनिबन्धनांस्तत्संज्ञाभेदानाह—**देवरथे**त्यादि। देवरथो यात्रोत्सवेषु देवप्रतिमासञ्चारणार्थो रथः, पुण्यरथः विवाहादिमङ्गलावसरारोहणार्थः, साङ्ग्रामिकः युद्धार्थः, पारियाणिकः अध्वसञ्चारार्थः, परपुराभियानिकः शत्रुदुर्गभञ्जनावसरोपयोज्यः, वैनयिकः विनयश्चर्याशिक्षणं तदर्थः, एवं संज्ञान् रथान् कारयेत्।

The functions of the superintendent of horses will explain those relating to the superintendent of chariots.

The superintendent of chariots shall attend to the construction of chariots.

The ideal chariot shall measure twenty puruṣas in height and twelve puruṣas in width. Seven more chariots with width deqreasing by one puruṣa successively down to a chariot of six puruṣas in width shall be constructed (based on the ideal one). (Puruṣa = 12 aṅgulas)

The types chariots to be constructed : (based on requirements) are. Devaratha (chariots for the use of gods in temple processions); puṣyaratha (to be used on the occasion of marriages to carry the bride and groom in procession), sāṅgrāmika (chariots for use in battle), pāriyāṇika (for the purpose of travel in general), parapurābhiyānika (used in assailing the strongholds of the enemy's) and vainayika (used for the purpose of training).

इष्वस्त्रप्रहरणावरणोपकरणकल्पनाः सारथिरथिकरथ्यानां च कर्मस्वायोगं विद्यात्। आ कर्मभ्यश्च भक्तवेतनं भृतानामभृतानां च योग्यारक्षानुष्ठानमर्थमानकर्म च।

एतेन पत्त्यध्यक्षो व्याख्यातः। स मौलभृतश्रेणिमित्रामित्राटवीबलानां सारफल्गुतां विद्यात्। निम्नस्थलप्रकाशकूटखनकाकाशदिवारात्रियुद्धव्यायामं च विद्यात्। आयोगमयोगं च कर्मसु।

इष्वस्त्रेत्यादि। इष्वादिकल्पनाः इषूणां बाणानां सतूणीराणाम् अस्त्राणां धनुषां प्रहरणानां तोमरादीनाम् आवरणानां पल्याणादीनाम् उपकरणानां वल्गादीनां च कल्पना रचनाः, सारथिरथिकरथ्यानां कर्मसु आयोगं च यन्तृणां रथयोक्तृणां रथवाहानां च स्वस्वकर्मसु अभियोगातिशयं च, विद्यात्। **आ कर्मभ्यश्चेति**। आ कर्मणां परिसमाप्तेः, भक्तवेतनं, भृतानां नित्यनियुक्तशिल्पिनाम्, अभृतानाम् आगन्तुशिल्पिनां च सपरिकर्मिणां, योग्यारक्षानुष्ठानं योग्यानां स्वकर्मण्यतिनिपुणानां शिल्पिनां यद्वा अश्वहृदयरथचर्यादिशिक्षारूप-योग्योपदेशाचार्याणाम् आरक्षा परोपजापाद् रक्षणम् अनुष्ठानं व्यापारसौष्ठवासौष्ठवमात्रां च, अर्थमानकर्म च अर्थकर्म प्रभूतधनदानं मानकर्म पारितोषिकवलयवस्त्रादिदानसत्कारं च, विद्याद् आकलयेत्।

इति रथाध्यक्षप्रकरणं समाप्तम्।

पत्त्यध्यक्ष इति सूत्रम्। पदात्यधिकृतव्यापारोऽभिधीयत इति सूत्रार्थः।

एतेनेति। उक्तेन रथाध्यक्षव्यापारेण, पत्त्यध्यक्षो व्याख्यातः पदात्यध्यक्ष इष्वस्त्रप्रहरणादिकल्पनाः कर्मस्वायोगं भक्तवेतनं योग्यारक्षानुष्ठानमर्थमानकर्म चेत्येतत् सर्वं पदातिविषयं चिन्तयेदित्यर्थः। अधिकविधिमाह—स इत्यादि। पत्त्यध्यक्षः, मौलभृतश्रेणिमित्रामित्राटवीबलानां मौलं मूले स्थानीये भवं सैन्यं भृतं वेतनपरिगृहीतं बलं श्रेणिर्जनपदवर्त्यायुधीयगणः मित्रबलममित्रबलमटवीपालबलम् इति षड्विधानां बलानां, सारफल्गुतां, विद्यात् स्थानविनियोगाय जानीयात्। निम्नादियुद्धव्यायामं च निम्नयुद्धाद्यष्टविधयुद्ध-शिक्षां च, विद्यात्। तत्र निम्नयुद्धं सतृणजलमध्यदेशयुद्धं स्थलयुद्धं निरुदकस्तम्बदेशयुद्धं प्रकाशयुद्धं प्रतीतं

कूटयुद्धं साङ्ग्रामिकाधिकरणविकल्पितं कपटयुद्धं खनकयुद्धं भूमिं खात्वा तत्र स्थित्वा क्रियमाणं युद्धम् आकाशयुद्धं प्राकारादिकमारुह्य क्रियमाणं युद्धं दिवायुद्धरात्रियुद्धे प्रतीते। आयोगमयोगं च कर्मस्विति। पत्तीनां स्वकर्मसु 'सर्वदेशकालशस्त्रवहनं व्यायामश्चेति पदातिकर्माणि' इति साङ्ग्रामिकाधिकरणे वक्ष्यमाणेषु तत्परत्वमव्यापारं च विद्यात्।

इति पत्त्यध्यक्षप्रकरणं समाप्तम्।

He shall also examine the efficiency of training the troops in various aspects like shooting arrows, in hurling iron clubs and cudgels, in wearing mail armour, in equipment, in charioteering, in fighting seated on a chariot, and in controlling horses drawing the chariots. Also he shall aattend to the accounts of provision and wages paid to those who are either permanently or temporarily employed (to make chariots etc.) He should see that the employees are kept contented and happy by giving them adequate rewards and ascertain the actual distance of roads.

The same rules shall apply to the superintendent of infantry. He should ascertain the basic strength as well as weakness of hereditary troops, hired troops, the corporate body of the troops as well as that of the army of friendly or unfriendly kings and of wild tribes. Further he shall be familiar with the nature of fighting in low grounds, of open battle, of fraudulent attack, of fighting under the cover of entrenchment, or from heights, and of fighting in daytime and night time, beside the regular training necesasry for such warfare. Further he shall be aware of the fitness or unfitness of troops on emergent occasions.

तदेव सेनापतिः सर्वयुद्धप्रहरणविद्याविनीतो हस्त्यश्वरथचर्या- संघुष्टश्चतुरङ्गस्य बलस्यानुष्ठानाधिष्ठानं विद्यात्।

स्वभूमिं युद्धकालं प्रत्यनीकमभिन्नभेदनं भिन्नसन्धानं संहतभेदनं भिन्नवधं दुर्गवधं यात्राकालं च पश्येत्।

सेनापतिप्रचार इति सूत्रम्। हस्त्यश्वरथपदातिरूपचतुरङ्गसमुदायात्मकं मौलभृतादिषट्प्रकारोपेतं बलं सेना तस्य पतिर्नायकः सेनापतिः तस्य प्रचारो व्यापारोऽभिधीयत इति सूत्रार्थः। एकैकाङ्गाध्यक्षकथनानन्तरं सर्वाङ्गसमुदायाध्यक्षस्य क्रमप्राप्तत्वाद् वचनम्।

तदेवेत्यादि। अश्वाध्यक्षादीनां पत्त्यध्यक्षान्तानां चतुर्णामङ्गाध्यक्षाणां यत् कर्मजातमभिहितं तदेव, सेनापतिः, विद्यात्। स कथम्भूतः, सर्वयुद्धप्रहरणविद्याविनीतः सर्वेषु युद्धेषु निम्नयुद्धादिषु सर्वेषु प्रहरणेषु धनुर्वर्गादिषु विद्यासु आन्वीक्षिकीप्रभृतिषु च कृतशिक्षः, हस्त्यश्वरथचर्यासङ्घुष्टः गजाद्यारोहणयोधनादिकर्मसु प्रख्यातः। तदेवेत्येतद् विशिनष्टि—चतुरङ्गस्य बलस्यानुष्ठानाधिष्ठानमिति। हस्त्यश्वरथपदात्यात्मिकायाः सेनायाः यान्यनुष्ठानानि 'हस्त्यश्वरथपत्तिकर्माणी'ति साङ्ग्रामिकाधिकरणे वक्ष्यमाणानि कर्माणि तदधिष्ठानं तदाश्रयम् अश्वाध्यक्षादिकर्मणामश्वादिकर्मानुरूपकरणीयत्वात्।

अतिदिष्टकर्मातिरिक्तं कर्माह–स्वभूमिमित्यादि। स्वभूमिं सेनाव्यायामार्हं देशं, युद्धकालं प्रकाशादियुद्धयोग्यं कालं, प्रत्यनीकं शत्रुबलम्, अभिन्नभेदनम् अभिन्नस्य परव्यूहस्य भेदनं विश्लेषणं, भिन्नसन्धानं भिन्नस्य विश्लिष्टस्य स्वबलस्य संश्लेषणं, संहतभेदनं परस्परक्षार्थसङ्घटितानां विघटनं, भिन्नवधं विघटितानां वधं, दुर्गवधं परपुरस्थानीयादिविध्वंसनं, यात्राकालं च अभिषेणनकालं च, पश्येत् विद्यात्।

He alone is the true commander-in-chief of the army who is trained in handling all kinds of weapons and in leading the division of the army like elephants, horses, chariots and infantry and is prepared to meet emergent calls either to advance or retreat. He shall also know as to what kind of ground is favourable for his forces, time of military actions, enemy forces, dissension among the enemy forces, putting together of his own scattered forces, ability to scatter the combined and compact enemy forces etc. Further he shall annihilate the forces that are skittled and shall know how to assail a fortress besides ascertaining the suitable time for making a general advance.

तूर्यध्वजपताकाभिर्व्यूहसंज्ञाः प्रकल्पयेत्।
स्थाने याने प्रहरणे सैन्यानां विनये रतः।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे त्रयस्त्रिंशोऽध्यायः रथाध्यक्षः पत्त्यध्यक्षः सेनापतिप्रचारश्च, आदितः चर्तुष्पञ्चाशः।।

विधिशेषं श्लोकेनाह–तूर्येत्यादि। स्थाने गमननिवृत्तौ, याने गमने, प्रहरणे पराभिहनने च विषये, तूर्यध्वजपताकाभिः वाद्यैः शङ्खचक्रादिचिह्नैः वैजयन्तीभिश्च, व्यूहसंज्ञाः युद्धव्यूहितस्वसैन्यस्य सङ्केतान् पराविज्ञेयान्, प्रकल्पयेद् उल्लिखेत्। उल्लिखितसङ्केताविसंवादेन स्वसैन्या वाद्यविशेषश्रवणध्वज-पताकाविशेषदर्शनैः स्थानगानाद्यनुष्ठानं यथा कुर्युस्तथा तान् शिक्षयेच्चेत्यभिप्रायकमध्यक्षविशेषणमाह–**सैन्यानां विनये रत इति।।**

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे त्रयस्त्रिंशोऽध्यायः रथाध्यक्षः पत्त्यध्यक्षः सेनापतिप्रचारश्च, आदितश्चतुष्पञ्चाशः।।

He shall be an expert to guide his own forces by making use of trumpets, banners or flags and formations to direct his own army by suggesting advancement, retreat, action etc., in a battle field.

Thus the fifty fourth chapter of the Arthaśāstra of Kauṭalya dealing with the superintendents of chariots, infantry and duties of the commander-in-chief comes to an end. Here ends the thirtythird chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 55

52, 53. प्रक० मुद्राध्यक्षः, विवीताध्यक्षः।

Section : 52 : The Superintendent of Passports

Section : 53 : The Superintendent of Pasture Lands

मुद्राध्यक्षो मुद्रां माषकेण दद्यात्।

समुद्रो जनपदं प्रवेष्टुं निष्क्रमितुं वा लभेत।

द्वादशपणममुद्रो जानपदो दद्यात्। कूटमुद्रायां पूर्वः साहसदण्डः। तिरोजनपदस्योत्तमः।

विवीताध्यक्षो मुद्रां पश्येत्।

मुद्राध्यक्ष इति सूत्रम्। मुद्रा नाम पण्यलेख्यादिषु करणीयो राजकीयश्चिह्नविशेषः शुल्काध्यक्षे प्रस्तुतः तस्या अध्यक्षो मुद्राध्यक्षः। स तद्व्यापारश्च तत्रानुक्त इहाभिधीयत इत्यर्थः।

मुद्राध्यक्ष इति। सः, मुद्रां नायं चोरः शत्रुचारो वेति प्रत्ययजननार्थां, माषकेण दद्यात् माषकं राजकोशवृद्ध्यर्थं गृहीत्वा दद्यात्, प्रवेष्ट्रे निष्क्रमित्रे च।

अगृहीतमुद्रस्य प्रविशतो निर्गच्छतश्च दण्डमाह–**द्वादशपणमित्यादि**। द्वादशपणं दण्डम्, अमुद्रः अगृहीतमुद्रः, जानपदः विजिगीषुजनपदभवः, दद्यात्। अन्यजनपदभवस्य तु अमुद्रस्य कूटमुद्राकरण-वक्ष्यमाणदण्डवृद्धिन्यायेन दण्डवृद्धिः काचित् स्थापनीया। कूटमुद्रायां कृत्रिममुद्रायां प्रदर्श्यमानायां, पूर्वः साहसदण्डः, अर्थाद् विजिगीषुजनपदभवस्यैव। तिरोजनपदस्य अन्यजनपदभवस्य कूटमुद्राप्रदर्शयितुः उत्तमः साहसः।

इति मुद्राध्यक्षप्रकरणं समाप्तम्।

विवीताध्यक्ष इति सूत्रम्। विवीतं गोप्रचरणार्हस्तृणादिमान् प्रदेशः तस्याध्यक्षस्तद्व्यापारोऽभिधीयत इति सूत्रार्थः। य एते मुद्राध्यक्षदण्डनीया उक्ता अमुद्रकूटमुद्राः, ते महापथमृजुमपहाय विमार्गेणैव विवीतगतेन प्रायश्चरन्तो विवीताध्यक्षेणैव स्वयं स्वपुरुषद्वारेण वा गृहीत्वा मुद्राध्यक्षायार्पणीया इत्यतो मुद्राध्यक्षानन्तरं विवीताध्यक्षकथनसङ्गतिः।

विवीताध्यक्ष इति। सः, मुद्रां पश्येत् प्रतिविवीतपथिकं मुद्रास्ति नवेति परीक्षेत।

The superintendent of passports shall issue passes at the rate of a māṣa per pass.

The holder of such a pass will be at liberty to enter into or go out of the country.

Whoever enters or leaves without a valid pass shall be liable to pay a fine of twelve paṇas despite his being a native of the country. Possession of a false pass is to be punished with the first amercement. An outsider possessing a false pass shall be punished with the highest amercement.

The superintendent of pasture lands shall scruitinise the passes.

भयान्तरेषु च विवीतं स्थापयेत्। चोरव्यालभयान्निम्नारण्यानि शोधयेत्।

अनुदके कूपसेतुबन्धोत्सान् स्थापयेत्, पुष्पफलवाटांश्च।

लुब्धकश्वगणिनः परिव्रजेयुररण्यानि। तस्करामित्राभ्यागमे शङ्खदुन्दुभिशब्दमग्राह्याः कुर्युः शैलवृक्षाधिरूढा वा शीघ्रवाहना वा।

अमित्राटवीसञ्चारं च राज्ञो गृहकपोतैर्मुद्रायुक्तैर्हारयेयुः धूमाग्निपरम्परया वा।

मुद्राविचयस्य व्याप्त्यर्थमाह—**भयान्तरेषु** चेति। भयं चोरपरापसर्पचारशङ्का तद्गोचरेषु भूप्रदेशेषु कृष्येष्वकृष्येषु वा सर्वविधेषु, विवीतं स्थापयेत्। एतेन अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेद्' इति भूमिच्छिद्रविधानप्रकरणोक्त्या कृष्यभूमौ विवीताभावात् तत्पथचारिषु मुद्राविचयाभावप्रसङ्ग इति शङ्का निरस्ता। चोरव्यालभयात्, निम्नारण्यानि निम्नानि गभीराणि भूच्छिद्राणि अरण्यानि च, शोधयेत् तस्करा हिंस्रमृगाश्च तत्र निलीय वसन्ति नवेति मुहुः परीक्षेत।

अनुदक इति। निर्जले प्रदेशे, कूपसेतुबन्धोत्सान् कूपान् उदपानान् सेतुबन्धान् जलावरोधबन्धान् उत्सान् तात्कालिकान् क्षुद्रकूपांश्च, स्थापयेत्। पुष्पफलवाटान्, चकारात् प्रपादिकं च, स्थापयेत्।

लुब्धकश्वगणिन इति। लुब्धकाश्च श्वगणिनश्च, परिव्रजेयुररण्यानि वनानि परितश्चरेयुः, अर्थाच्चोरा-मित्रादीनां प्रवेशपरिहाराय प्रविष्टपरिज्ञानाय च। चोराद्यागमस्यान्तपालादीन् प्रति निवेदनार्थमाह— **तस्करेत्यादि**। तस्करामित्राभ्यागमे शङ्खदुन्दुभिशब्दम्, अग्राह्याः तस्करामित्राणां ग्रहणागोचराः सन्तः, कुर्युः। अग्राह्यत्वप्रकारमाह—**शैलवृक्षाधिरूढा** वेत्यादि। स्पष्टार्थम्।

अमित्रेत्यादि। अमित्राटवीसञ्चारं च अमित्राणां शत्रूणाम् अटवीसञ्चारं मृगयाद्यर्थं वनसञ्चारवृत्तान्तं, राज्ञः स्थानीयस्थितस्य, गृहकपोतैर्मुद्रायुक्तैः लेखयुक्तैर्गृह्यकरपारावतैः, हारयेयुः नयेयुः। धूमाग्निपरम्परया वा हारयेयुः दिवा धूमपरम्परया नक्तमग्निपरम्परया वा नयेयुः। परम्परा तु—आ वनाद् आस्थानीयं विवीताध्यक्षपुरुषाः कृतसङ्केताः क्रोशान्तरेषु स्थिताः वनगतपुरुषप्रथमप्रदर्शितधूमाग्निदर्शनात् तदुत्तरकोशान्तर-स्थितेन स्वोत्तरं क्रोशान्तरस्थितं प्रति धूमाग्निप्रदर्शनं, तेन स्वोत्तरं प्रति तेन स्वोत्तरं प्रतीत्येवंरूपा द्रष्टव्या।

Pasture grounds may be provided in between any two dangerous places. Such valleys shall be made free from the fear of thieves, elephants and other beasts.

Barren lands of the country shall be provided with wells, tanks, etc., in addition to creating flower and fruit gardens.

Hunters with their hounds shall move about the forests when thieves or enemies approach they should remain concealed by ascending tree tops and mountains and escape by fast conveyances and continue to blow conch shells and beat the drums.

Noticing the movements of the enemies or wild tribes they shall pass on the information by flying the pigeons of royal household with passes (mudrās) or causing fire and smoke at successive distances.

द्रव्यहस्तिवनाजीवं वर्तनीं चोररक्षणम्।

सार्थातिवाह्यं गोरक्ष्यं व्यवहारं च कारयेत्।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे

चतुस्त्रिंशोऽध्यायः मुद्राध्यक्षो विवीताध्यक्षः, आदितः पञ्चपञ्चाशः ।।

व्यापारशेषं श्लोकेनाह–द्रव्येत्यादि। द्रव्यहस्तिवनाजीवं द्रव्यवने हस्तिवने च विद्यमानो य आजीवः उपजीव्यपदार्थः कुप्याध्यक्षहस्त्यध्यक्षोपादेयव्यतिरिक्तः यवसेन्धनाङ्गारादिः तं, वर्तनीं दुर्गमार्गसन्तारणभृतिं, चोररक्षणं तद्भृतिं, सार्थातिवाह्यं भयस्थानेषु वणिक्सङ्घस्यातिवाहनवेतनं, गोरक्ष्यं गोरक्षानिमित्तमादेयं, व्यवहारं यथोक्तपदार्थक्रयविक्रयव्यवहारं च, कारयेत् अनुष्ठापयेत्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे

चतुस्त्रिंशोऽध्यायः मुद्राध्यक्षो विवीताध्यक्षश्च, आदितः पञ्चपञ्चाशः।।

He is bound to protect timber and elephant forests, to keep the road in good shape with proper repair, to arrest the thieves, to secure the safety of mercantile movements, to protect the cows and to help conducting the transaction of the people.

Thus the fifty fifth chapter of the Arthaśāstra of Kauṭalya dealing with the section of the superintendent of passports and the superintendent of pasture lands comes to an end. Here ends the thirty fourth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 56

54, 55. प्रक०समाहर्तृप्रचार: गृहपतिवैदेहकतापसव्यञ्जना: प्रणिधय:।

Section 54 : Duty of the Revenue Collectors
Section 55 : Spies Disguised as Householders Merchants and Ascetics

समाहर्ता चतुर्धा जनपदं विभज्य ज्येष्ठमध्यमकनिष्ठविभागेन ग्रामग्रं परिहारकामयुधीयं धान्यपशुहिरण्यकुप्यविष्टिप्रतिकरमिदमेतावदिति निबन्धयेत्।

समाहर्तृप्रचार इति सूत्रम्। सर्वेभ्य आयस्थानेभ्यो दुर्गराष्ट्रखनिसेतुवनव्रजवणिक्पथलक्षणेभ्यो राजार्थानां सम्यगाहर्ता समाहर्ता तस्य प्रचारो व्यापार: सर्वजनपदचिन्तनरूपोऽभिधीयत इति सूत्रार्थ:। एकैकार्थाध्यक्षाणां प्रतिपादनानन्तरं सर्वार्थाध्यक्षस्य प्राप्तावसरत्वात् कथनम्।

समाहर्तेत्यादि। समाहर्ता, चतुर्धा जनपदं विभज्य चतुर्भिरंशै: जनपदं पृथक्कृत्य, ज्येष्ठमध्यमक-निष्ठविभागेन चतुर्ष्वप्यंशेषु प्रत्येकं ज्येष्ठो मध्यम: कनिष्ठ इति विभागं कुलसंख्याप्रयुक्तं ग्रामाणां सारफल्गुत्वप्रयुक्तं च विभागं कृत्वा, ग्रामाग्रं निबन्धयेत् ग्रामाणां प्रातिस्विकं सामूहिकं च परिमाणं लेखयेत्। कथं निबन्धयेदित्याह–**इदमेतावदितीति**। एतच्च ग्रामाग्रादौ सर्वत्र सम्बध्यते। अमुकग्राम ईदृग्रूप एतत्परिमाण: अमुकग्रामसमुदाय ईदृग्रूप एतत्परिमाणश्चेत्यनेन प्रकारेण। तथा परिहारकं परिहार: महादानादिनिमित्त: करमोक्षस्तद्युक्तं ग्रामाग्रम्, इदमेतावदिति निबन्धयेत् एत एतावन्तो ग्रामा: करमोक्षिता इति लेखयेत्। आयुधीयं दण्डकरदायकं ग्रामाग्रम्, इदमेतावदिति निबन्धयेत् एत एतावन्तो ग्रामा: एतावत आयुधीयान् प्रयच्छन्तीति लेखयेत्। धान्यादिपञ्चकप्रतिकरम् इदमेताावदिति निबन्धयेत्। प्रतिनियत: कर: प्रतिकर:, स धान्यादिषु प्रत्येकं सम्बध्यते, धान्यप्रतिकरं पशुप्रतिकरं हिरण्यप्रतिकरं कुप्यप्रतिकरं विष्टिप्रतिकरं च, इदमेतावदिति निबन्धयेत् एष्वेषु ग्रामेषु अमुकामुकधान्येभ्य एतावद्भ्य एतावांस्तत्तद्धान्यप्रतिकर: प्रतिवत्सरम् उपसम्पद्यत इति लेखयेत्। एतावान् पशुप्रतिकरोऽमुकामुकजातीयान् वाहदोहलोमाद्युपकर्तॄन् एतावत: पशून् उपनयतीति लेखयेत्। एष एतावान् हिरण्यप्रतिकर: कोशप्रवेश्यं हेमरूप्यं रूप्यरूपं ताम्ररूपं चैतावत् प्रयच्छतीति लेखयेत्। कुप्यप्रतिकर एष एतावान् एतान्येतावन्ति कुप्यद्रव्याणि वितरतीति लेखयेत्। विष्टिप्रतिकर एष एतावानेतावतां कर्मकरपुरुषाणामर्पणेनोपकरोतीति लेखयेत्।

Samāhartā (the collector of revenues) shall divide the janapada (kingdom) into four districts and shall subdivide the grāmas (villages) into (three) as to first, middle and lowest rank to facilitate the arrangement into several heads such as those exempted from taxation (parihāraka), those that supply soldiers (āyudhīya), those that pay their taxes in the form of grains, cattle, gold or raw material and those that supply free labour and dairy produce in lieu of taxes.

तत्प्रदिष्टः पञ्चग्रामीं दशग्रामीं वा गोपश्चिन्तयेत्।

सीमावरोधेन ग्रामाग्रं कृष्टाकृष्टस्थलकेदारारामषण्डवाटवनवास्तुचैत्यदेवगृहसेतुबन्ध-श्मशानसत्रप्रपापुण्यस्थानविवीतपथिसङ्ख्यानेन क्षेत्राग्रं, तेन सीम्नां क्षेत्राणां च मर्यादारण्य-पथिप्रमाणसम्प्रदानविक्रयानुग्रहपरिहारनिबन्धान् कारयेत्। गृहाणां च करदाकरदसङ्ख्यानेन।

इत्थं कृतनिबन्धस्य जनपदस्य चतुर्भागमेकैकमेकैकः स्थानिकश्चिन्तयेदिति वक्ष्यति। चतुर्भागेऽपि ग्रामान् पञ्चशो दशशो वा विभज्य एकैकस्मिन् ग्रामविभागे स्थानिकनियम्यमवान्तरचिन्तकं गोपसंज्ञमेकैकं कुर्यादित्याह–**तत्प्रदिष्ट** इति। तेन समाहर्त्रा प्रदिष्टो नियुक्तः पुरुषः, पञ्चग्रामीं दशग्रामीं वा ग्रामाणामुत्तमत्वे तत्पञ्चकम् अधमत्वे तद्दशकम् अर्थान्मध्यमत्वे तत्षट्कादिकं च यथोचितं, गोपश्चिन्तयेत् गोपसंज्ञः सन् चिन्तयेत्, यश्चिन्तयति स गोपसंज्ञयोच्यत इत्यर्थः।

कथं चिन्तयेदित्याह–**सीमावरोधेनेति**। नदीशैलादिसीमपरिच्छेदेन, ग्रामाग्रं ग्रामपरिमाणं, कारयेत् निबन्धयेत्। कृष्टाकृष्टाद्यष्टादशसंख्यानेन, क्षेत्राग्रं क्षेत्रपरिमाणं, कारयेत् एतावत् कृष्टमेतावदकृष्टमित्येवं कृष्यादिक्षेत्रं परिच्छिद्य निबन्धयेत्। तत्र कृष्टं कृष्टपच्यव्रीह्याद्युत्पत्तिक्षेत्रम्, अकृष्टम् अकृष्टपच्यनी-वाराद्युत्पत्तिक्षेत्रं, वाटः इक्ष्वादिभूमिः, वनं ग्रामवास्युपजीव्यवृक्षवृन्दस्थानं, वास्तु ग्रामभूमिः, चैत्यः उद्देशवृक्षः, देवगृहादित्रयं प्रसिद्धं, सत्रम् अन्नदानशाला, प्रपा पानीयशाला, पुण्यस्थानं तीर्थादि, विवीतं गोप्रचारप्रदेशः, पन्थाः रथशकटपद्गतागतमार्गः। **तेनेति**। तेन संख्यानेन, सीम्ना नदीशैलादीनां, क्षेत्राणां च, मर्यादादिनिबन्धान् कारयेत् मर्यादादिपुस्तकानि लेखयेत्। तत्र मर्यादा परस्परावधिः, अरण्यमनुपजीव्यवनं, पन्थाः प्रकृष्यादिपरस्परप्रवेशनिर्गममार्गः, प्रमाणं स्वस्वपरिमाणं, संप्रदानम् अमुकेनामुकस्य दत्तमितीदृशं, विक्रयः प्रसिद्धः, अनुग्रहः धान्याद्युणदानेन कर्षकाणामुपकारः, परिहारः करमोक्षः। गृहाणां च करदाकरदसंख्यानेन, निबन्धान् कारयेदिति वर्तते एतावन्ति गृहाणि करदायकैर्जनैरध्युषितानि एतावन्ति चाकरदायकैरित्येवं संख्याय पुस्तकेषु लेखयेत्।

Gopa, the village accountant authorised by him shall look after the revenues of five or ten villages as the case may be.

By fixing the boundaries of the villages, by assigning numbers to the plots of grounds as cultivated, uncultivated, plains, wetlands, gardens, fences, forests, altars, temples of gods, irrigation facilities, cremation grounds, feeding houses with provision to supply free water to travellers, places of pilgrimages, pasture grounds and roads, and thereby fixing the boundaries of various villages, of fields, of forests and of roads, the

accountant shall register gifts, sales, charities and remission of taxes regarding fields. He shall also decide upon the houses as tax-paying or non-tax paying.

तेषु चैतावच्चातुर्वर्ण्यमेतावन्तः कर्षकगोरक्षकवैदेहकारुकर्मकर- दासाश्चैतावच्च द्विपदचतुष्पदमिदं च हिरण्यविष्टिशुल्कदण्डं समुत्तिष्ठतीति।

कुलाना च स्त्रीपुरुषाणां बालवृद्धकर्मचरित्राजीवव्ययपरिमाणं विद्यात्।

एवञ्च जनपदचतुर्भागं स्थानिकः चिन्तयेत्।

गोपस्थानिकस्थानेषु प्रदेष्टारः कार्यकरणं बलिप्रग्रहं च कुर्युः।

तेषु चेति। तेषु च गृहेषु, एतावत् चातुर्वर्ण्यम् एतावन्तोऽमुकामुकवर्णभवा जनाः, एतावन्तः कर्षकादयः षड्वर्गाश्च, एतावच्च द्विपदचतुष्पदमिदं च पिण्डेनैतावन्तो मनुष्याश्च पशवश्चैते, वसन्तीति सर्वत्र शेषः। इदं च हिरण्यविष्टिशुल्कदण्डं हिरण्यं स्वर्णरूप्यादि विष्टिः कर्मकरः शुल्कः घट्टदेयं दण्डः सैन्यः इत्येच्चतुष्टयं वार्षिकं, समुत्तिष्ठति उत्पद्यते राजार्थम्, इति अनेन प्रकारेण, निबन्धान् कारयेदिति वर्तते।

कुलानामिति। कुलानां च स्त्रीपुरुषाणां कुटुम्बसम्बन्धिनां च स्त्रीणां पुरुषाणां च, बालादिपरिमाणं बालवृद्धपरिमाणम् एतावद्वयस्काः स्त्रियः पुरुषाश्चेत्येवं वयःपरिच्छेदे कर्माणि वर्णजातिप्रसिद्धानि तत्परिमाणं चरित्रं देशजात्याद्याचारस्तत्परिमाणम् आजीवो वृत्तिः अर्थात् तन्निमित्त आयस्तत्परिमाणं व्ययः कुटुम्बभरणार्थधनविनियोगस्तत्परिमाणं च, विद्यात्, गोपः।

एवञ्चेति। अनेन प्रकारेण, जनपदचतुर्भागं, स्थानिकः स्थानिकपदव्यपदेश्यश्चतुर्भागनायकः, चिन्तयेत्।

गोपेत्यादि। गोपस्थानिकस्थानेषु गोपानां स्थानिकानां च स्वव्यापारानुष्ठानप्रदेशेषु, प्रदेष्टारः कण्टकशोधनाधिकारिणः, कार्यकरणं कण्टकोद्धरणलक्षणकार्यानुष्ठानं, बलिप्रग्रहं च बलीनां गोपस्थानिकनिबन्धारूढानां राजार्थानां प्रसभग्रहणं च अर्थात् स्वयमदायकेभ्यः, अथवा बलिप्रग्रहं बलिनां राष्ट्रमुख्यानां राजार्थोत्थापनविघ्नकारिणां प्रग्रहं गोपस्थानिकविधेयास्ते यथा स्युस्तथा दमनं, कुर्युः।

इति समाहर्तृप्रचारः समाप्तः।

Further he shall register the total number of inhabitants as belonging to all the four castes in each village in addition to preparing an account of the exact number of cultivators, cowherds, merchants, artisans, labourers, slaves, and biped and quadruped animals, fixing at the same time the amount of gold, free labour, toll and fines that could be collected from each (of the houses as dues to the state).

He shall also maintain a register as to the number of young and oldmen that inhabit in each house as also their history (caritra), occupation (ājīva), income (āya) and expenditure (vyaya).

Likewise the sthānika (the district officer) shall attend to accounts of one-quarter of the janapada (kingdom).

Pradesthā (commissioner) shall collect taxes and administer the function looked after (in a general manner) by gopas (village accountants) and sthānikas (district officers).

समाहर्तृप्रदिष्टाश्च गृहपतिकव्यञ्जना येषु ग्रामेषु प्रणिहितास्तेषां ग्रामाणां क्षेत्रगृहकुलाग्रं विद्युः। मानसञ्ज्ञाताभ्यां क्षेत्राणि भोगपरिहाराभ्यां गृहाणि वर्णकर्मभ्यां कुलानि च। तेषां जङ्घाग्रमायव्ययौ च विद्युः। प्रस्थितागतानां च प्रवासावासकारणमनर्थ्यानां च स्त्रीपुरुषाणां चारप्रचारं च विद्युः।

गृहपतिकवैदेहकतापसव्यञ्जनाः **प्रणिधय** इति सूत्रम्। गृहपतिकव्यञ्जना वैदेहकव्यञ्जनास्तापसव्यञ्जनाश्च संस्थाविशेषा गूढपुरुषोत्पत्तिप्रकरणोक्ताः, प्रणिधयः गूढपुरुषाः लक्षणया तेषां प्रणिधानानि ग्रामेषु जनपदेषु च नियोजनानि अभिधीयन्त इति सूत्रार्थः। गृहपतिकवैदेककतापसव्यञ्जनप्रणिधय इति समस्तपाठे गृहपतिव्यञ्जनादीनां त्रयाणां संस्थाविशेषाणां प्रणिधयः प्रणिधानानि नियोजनानीति स्पष्ट एवार्थः। संस्थापञ्चके तिसृणां प्राधान्याद् ग्रहणमन्ययोरप्यभ्युपायत्वाविशेषादुपलक्षणम्। तेन कापटिकोदास्थितसंस्थयोरपि प्रणिधानं संगृहीतं द्रष्टव्यम्। संस्थाप्रणिधानं च ग्रामजनपदवृत्तान्तज्ञानस्य गोपस्थानिकप्रचारपरीक्षणस्य च समाहर्त्रवश्यापेक्षणीयस्याभ्युपायभूतं समाहर्तृप्रचारस्यैवाङ्गमिति तस्येहाभिधानसङ्गतिः।

तत्र गृहपतिव्यञ्जनप्रणिधानं तावदाह—**समाहर्तृप्रदिष्टाश्चेति**। समाहर्त्रा नियुक्ताः, गृहपतिकव्यञ्जनाः, येषु ग्रामेषु, प्रणिहिताः नियोजिताः, तेषां ग्रामाणां, क्षेत्रगृहकुलाग्रं क्षेत्रसंख्यां गृहसंख्यां कुलसंख्यां च, विद्युः। कानि कानि कथं विद्युरित्याह—**मानसञ्ज्ञाताभ्यां क्षेत्राणीति**। मानेनायामविस्तारादिपरिच्छेदेन उत्पन्नसस्यपिण्डेन च क्षेत्राग्रं विद्युः। भोगपरिहाराभ्यां गृहाणि करकरमोक्षाभ्यां गृहवास्तव्यान्, विद्युः। वर्णकर्मभ्यां कुलानि च ब्राह्मणादिजात्या तथा यजनकृष्यादिकर्मणा कुटुम्बानि च, विद्युः। **तेषामिति**। कुलानां, जङ्घाग्रं जङ्घाशब्देन पादचारिणो लक्ष्यन्ते कुलसम्बन्धिनां पादचारिणां द्विपदचतुष्पदानामग्रम् इयत्ताम्, आयव्ययौ च धनोत्पत्तिविनियोगौ च, विद्युः। **प्रस्थितेत्यादि**। प्रस्थितागतानामिति व्यस्तसमस्तविपर्यस्तग्रहणं प्रस्थितानां निजाधिवासस्थलादन्यत्र वस्तुं गच्छताम्, आगतानां वस्तुमन्यप्रदेशादागतानां, प्रस्थितागतानां वस्तुमन्यत्र गत्वा पुनः प्रत्यागतानाम्, आगतप्रस्थितानां क्वचिद् वस्तुमागत्य ततोऽन्यत्र गत्वा पुनः प्रत्यागतानाम्, आगतप्रस्थितानां क्वचिद् वस्तुमागत्य ततोऽन्यत्र वस्तुं प्रस्थितानां चेत्यर्थः। प्रवासावासकारणं प्रवासे अध्युष्यमाणस्थलवासपरित्यागे आवासे तदन्यस्थलवापसपरिग्रहे च कारणं, विद्युः। अनर्थ्यानां च स्त्रीपुरुषाणाम् अनाशंसनीयानां नर्तकीबन्धक्यादीनां स्त्रीणां विटकितवादीनां पुरुषाणां च, प्रवासावासकारणं विद्युः। चारप्रचारं च परप्रयुक्तापसर्पप्रवृत्तिं च, विद्युः।

Spies under the guise of householders deputed by the collector for espionage shall ascertain the validity of accounts (prepared by village and district officers) regarding fields, houses and families of each village as also the details regarding the area of output of produce in respect of fields. In the case of fields the area is to be taken into account, while regarding houses the rental value is to be noted and the caste and profession are also worth noting. The value of the cattle (like biped and quadruped), income and expenditure of the house are also points to be accounted for. They shall

also find out the causes of emigration and immigration of persons both men and women as also their character and conduct including their movements outside the area.

एवं वैदेहकव्यञ्जनाः स्वभूमिजानां राजपण्यानां खनिसेतुवनकर्मान्तक्षेत्रजानां परिमाणमर्घं च विद्युः। परभूमिजातानां वारिस्थलपथोपयातानां सारफल्गुपण्यानां कर्मसु च। शुल्कवर्तन्यातिवाहिकगुल्मतरदेयभागभक्तपण्यागारप्रमाणं विद्युः।

एवं समाहर्तृप्रदिष्टास्तापसव्यञ्जनाः कर्षकगोरक्षकवैदेहकानामध्यक्षाणां च शौचाशौचं विद्युः। पुराणचोरव्यञ्जनाश्चान्तेवासिनश्चैत्यचतुष्पथशून्यपदोदपाननदीनिपानतीर्थायतनाश्रमारण्यशैलवनगहनेषु स्तेनामित्रप्रवीरपुरुषाणां च प्रवेशनस्थानगमनप्रयोजनान्युपलभेरन्।

वैदेहकव्यञ्जनप्रणिधानमाह–एवमिति। एवं यथा गृहपतिव्यञ्जनास्तथा वैदेहकव्यञ्जनाः, स्वभूमिजानां राजपण्यानां पण्याध्यक्षप्रतिपादितानां, खनिसेतुवनकर्मान्तक्षेत्रजानां खनिजानां खन्यध्यक्षोक्तानां शङ्खवज्रादीनां सेतुजानां मत्स्यप्लवादीनां वनजानां कुप्याध्यक्षोक्तानां द्रव्यवनभवानां कर्मान्तजानां खातवप्रादिकर्मान्तभूम्युत्पन्नानां क्षेत्रजानां व्रीह्यादीनां सीताध्यक्षोक्तानां च, परिमाणम् इयत्ताम्, अर्घं मूल्यं च, विद्युः। परभूमिजातानां देशान्तरजातानां, वारिस्थलपथोपयातानां जलमार्गेण स्थलमार्गेण च स्वदेशमुपगतानां, सारफल्गुपण्यानां साराणां रत्नादीनां फल्गूनां शाकादीनां च पण्यानां, कर्मसु च क्रयविक्रयादिषु च, परिमाणमर्घं च विद्युरिति वर्तते। तथा शुल्काद्यष्टकप्रमाणं शुल्कस्य शुल्काध्यक्षोक्तस्य वर्तन्या अन्तपालादेयस्य आतिवाहिकस्य सार्थातिवाहनार्थस्य विवीताध्यक्षग्राह्यस्य गुल्मदेयस्य रक्षिसङ्घदेयस्य तरदेयस्य नावध्यक्षदेयस्य भागस्य सहव्यवहारिविभाज्यांशस्य भक्तस्य व्यवहर्तृपुरुषबलीवर्दादिभोजनव्ययस्य पण्यागारस्य पण्यगृहभाटकादेश्च प्रमाणम् इयत्तां, विद्युः।

तापसव्यञ्जनप्रणिधानमाह–एवमिति। अनेन प्रकारेण, समाहर्तृप्रदिष्टाः समाहर्तृनियुक्ताः, तापसव्यञ्जनाः, कर्षकगोरक्षकवैदेहकानाम्, अध्यक्षाणां च गोपादीनां च, शौचाशौचं विद्युः। **पुराणचोरव्यञ्जनाश्चेति।**

Likewise spies under the guise of merchants shall ascertain the quantity and price of the royal merchandise indlucing minerals, produces of gardens, forests, fields and articles that are manufactured. In the matter of foreign merchandise of superior or inferior quality arriving thither by land ways or waterways, they shall ascertain the actual amount of toll, road cess, conveyance cess, military cess, ferry charges and one-sixth portion payable as tax by the merchants, the expenditure incurred by the traders for their subsistence and charges incurred in ware houses to keep the merchandise.

Similarly spies under the guise of ascetics shall as ordered by the collector (of revenues) gather information as to the proceedings, honest or dishonest of agriculturalists, cowherd traders and heads of government departments. Men disguised as confirmed thieves who are notorious, putting on the appearance of the disciples of the ascetics shall be stationed

at various points like where altars are situated or where four roads meet, in ancient ruins, in the vicinity of tanks, rivers, bathing ghats, in places of pilgrimage and hermitage, in desert tracts, mountains and thick-grown forests shall likewise ascertain the causes of arrival and departure of dubious persons, thieves, enemies and persons of undue bravery.

समाहर्ता जनपदं चिन्तयेदेवमुत्थितः।

चिन्तयेयुश्च संस्थास्ताः संस्थाश्चान्याः स्वयोनयः।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे पञ्चत्रिंशोऽध्यायः समाहर्तृप्रचारः गृहपतिवैदेहकतापसव्यञ्जनप्रणिधयश्च, आदितः षट्पञ्चाशः।।

सन्धिच्छेदादिना परद्रव्यापहारिणश्चोराः ते चिराभ्यस्ततत्कर्माणः पुराणचोराः तद्व्यञ्जनास्तद्वेषाः, अन्तेवासिनः तापसव्यञ्जनशिष्याः, चैत्यादिष्वेकादशसु स्थानेषु, तत्र चैत्यं देवालयः चतुष्पथं शृङ्गाटकं शून्यपदं निर्जनस्थानम् उदपानः स्रोतःप्रापितावरुद्धजलो जलाधारः नदी प्रसिद्धा निपानम् उपकूपजलाशयः तीर्थायतनं पुण्योदकप्रदेशः आश्रमो मुनिगृहम् अरण्यं ब्रह्मसोमारण्यं शैलगहनवनगहने प्रसिद्धे एतेषु। स्थित्वेति शेषः। स्तेनामित्रप्रवीरपुरुषाणां च स्तेनानां चोराणाम् अमित्रपुरुषाणां शत्रुप्रयुक्तानां तीक्ष्णरसदादीनां प्रवीरपुरुषाणाम् अल्पनिमित्तपरमारणसाहसिकानां च, चकारादनर्थ्यस्त्रीपुरुषाणां च प्रवेशनस्थानगमनप्रयोजनानि अमुष्मिन् देशे अमुष्मिन् काले प्रवेशः स्थितिर्निर्गमनमित्येतानि प्रयोजनं च, उपलभेरन् जानीयुः।

अध्यायान्ते श्लोकमाह—**समाहर्तेति**। एवम् उक्तेन प्रकारेण, उत्थितं उद्युक्तः, समाहर्ता जनपदं चिन्तयेत्, अर्थाद् गोपस्थानिकसहायः। ताश्चसंस्थाः समाहर्तृप्रदिष्टाः पूर्वोक्ताः गहपतिकव्यञ्जनादयः संस्थाविशेषाः, जनपदं चिन्तयेयुः, चकाराद् गोपस्थानिकौ च। संस्थाश्च तांश्च तत्तद्व्यञ्जनयोनीन् संस्थाविशेषान्, अन्याः स्वयोनयः तत्तद्योनिसमानयोनयः संस्थाः, चिन्तयेयुः परीक्षेरन्। संस्थापरीक्षार्थस्य चेदं संस्थान्तरप्रणिधानस्य वचनं न तात्पर्यतो विध्यर्थं, किन्तु कर्मकराः प्रायोऽर्थलोभाद् राजार्थं वा हापयन्ति प्रजा वा परिपीडयन्तीत्यवश्यं तत्कर्मशोधने समाहर्त्रा नित्यं प्रतिजागरितव्यमित्युपदेशार्थम्। तेन संस्थाचिन्तनाय संस्थान्तरकल्पने संस्थानवस्थाप्रसङ्ग इति न चोदनीयम्।।

।। इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे पञ्चत्रिंशोऽध्यायः समाहर्तृप्रचारः गृहपतिवैदेहकतापसव्यञ्जनाः प्रणिधयश्च, आदितः षट्पञ्चाशः।।

Thus the collector-general (of revenues) shall administer the country (with the help of the officers under him) constituting his various establishments of espionage.

Thus the fifty sixth chapter of the Arthaśāstra of Kauṭalya entitled duties of collectors and engagement of spies in disguises. Here ends the thirtyfifth chapter of the second Adhikaraṇa called Adhyakṣapracāra.

Chapter 57

56. प्रक० नागरिकप्रणिधिः।

Section 56 : The Duty of a City Superintendent

समाहर्तृवन्नागरिको नगरं चिन्तयेत्। दशकुलीं गोपो, विंशतिकुलीं चत्वारिंशत्कुलीं वा। स तस्यां स्त्रीपुरुषाणां जातिगोत्रनामकर्मभिः जङ्घाग्रमायव्ययौ च विद्यात्।

एवं दुर्गचतुर्भागं स्थानिकश्चिन्तयेत्।

धर्मावसथिनः पाषण्डिपथिकानावेद्य वासयेयुः। स्वप्रत्ययाश्च तपस्विनः श्रोत्रियांश्च।

नागरिकप्रणिधिरिति सूत्रम्। नगरे स्थानीये नियुक्तो नागरिकः तस्य प्रणिधिः प्रणिधानं व्यापारे नियोजनम् अभिधीयत इति सूत्रार्थः। सर्वसमुदयानां यथोक्तरूपाणां रक्षणीयत्वाद् तद्रक्षणस्य तदाश्रयस्थान-रक्षणाधीनत्वात् स्थानीयस्य तदाश्रयस्थानत्वात् तद्रक्षणस्येहाभिधानसङ्गतिः।

समाहर्तृवदिति। नागरिकः, नगरं स्थानीयं, समाहर्तृवत् चिन्तयेत् यथा समाहर्ता जनपदं चतुर्धा विभज्य गोपस्थानिकसहायश्चिन्तयेत् तथा स्थानीयं चतुर्धा विभज्य गोपस्थानिकसहायश्चिन्तयेत्। तत्र गोपस्य चिन्तनीयं विषयमाह–**दशकुलीमि**ति। दशकुलीं दशकुलानि उत्तमानि, गोपः, चिन्तयेदिति सम्बध्यते। तथा विंशतिकुलीं विंशतिं कुलानि मध्यमानि, चत्वारिंशत्कुलीं वा चत्वारिंशतं कुलानि वाधमानि, चिन्तयेत्। स गोपः, तस्यां दशकुल्यां विंशतिकुल्यां चत्वारिंशत्कुल्यां वा स्वचिन्ताविषयभूतायां, स्त्रीपुरुषाणां स्त्रीणां पुरुषाणां च, जातिगोत्रनामकर्मभिः, जङ्घाग्रं जङ्घाशब्देन पादचारिजनो लक्ष्यते तेन जनसंख्यामित्यर्थः, आयव्ययौ च, विद्यात्।

स्थानिकस्य चिन्तनीयमाह–**एवमि**ति। एवं यथा गोपो दशकुलीप्रभृतिं तद्गतस्त्रीपुरुषजङ्घाग्रायव्यय-ज्ञानपूर्वं चिन्तयेत् तद्वत्, दुर्गचतुर्भागं स्थानिकः चिन्तयेद् दुर्गचतुर्भागगतस्त्रीपुरुषजङ्घाग्रायव्ययज्ञानपूर्वं तन्त्रयेत्, दुर्गचतुर्भागचिन्तकश्चायं स्थानिकाख्यः।

धर्मावसथिन इति। धर्मावसथाः धर्मशालाः तदधिकारिणो धर्मावसथिनः, पाषण्डिपथिकान् पाशुपतशाक्यभिक्षुकादीन् अध्वगान्, आवेद्य गोपाय निवेद्य, वासयेयुः धर्मावसथेषु। स्वप्रत्ययाश्च स्वकृतः स्वयं विचार्य कृतः प्रत्ययः तपस्विश्रोत्रियविश्वासो येषां ते तथाभूता सन्तः, तपस्विनस्तापसान्, श्रोत्रियान् छान्दसांश्च, वासयेयुरिति वर्तते। स्वप्रत्ययत्ववचनं तद्वासननिमित्तस्य दोषस्य स्वगामित्वद्योतनार्थम्।

The city superintendent shall administer the affairs of the city as in the case of the collector-general (of revenues). A Gopa (village officer) shall

keep the accounts of ten households, twenty households or forty households. He shall ascertain the caste, gotra, the name and occupation of both men and women in these households as also their income and expenditure.

Likewise the sthānika (the district officer) shall attend to the accounts relating to the respective quarters of the capital (after dividing the same into four section).

Managers of the charitable institutions shall report to the authorities (to gopa and sthānika) as to any heretics and travellers arriving to reside in the institution. Only after ascertaining the reliability of their character ascetics and men learned in Vedas could be accomodated.

कारुशिल्पिनः स्वकर्मस्थानेषु स्वजनं वासयेयुः। वैदेहकाश्चान्योन्यं स्वकर्मस्थानेषु। पण्यानामदेशकालविक्रेतारमस्वकरणं च निवेदयेयुः।

शौण्डिकपाकमांसिकौदनिकरूपाजीवाः परिज्ञातमावासयेयुः। अतिव्ययकर्तारमत्याहितकर्माणं च निवेदयेयुः।

चिकित्सकः प्रच्छन्नव्रणप्रतीकारकारयितारमपथ्यकारिणं च गृहस्वामी च निवेद्य गोपस्थानिकयोर्मुच्यते। अन्यथा तुल्यदोषः स्यात्।

कारुशिल्पिन इति। कारवः शिल्पिनश्च, स्वकर्मस्थानेषु स्वजनं वासयेयुः, स्वप्रत्ययाः। वैदेहकाश्च वणिजश्च, स्वप्रत्ययाः, अन्योन्यं स्वकर्मस्थानेषु तत्पण्यवणिक् तत्पण्यवणिजमिति न्यायमनपहाय पण्यव्यवहारस्थानेषु, वासयेयुः। पण्यानाम्, अदेशकालविक्रेतारम् अदेशे अकाले च विक्रयकर्तारम् आगन्तुकं, निवेदयेयुः, नागरिकाय। अस्वकरणं च अस्वीयस्य पण्यस्य व्यवहरणं च, निवेदयेयुः।

शौण्डिकेत्यादि। शौण्डिकाः मद्यविक्रयिणः पाक्वमांसिकाः पक्वमांसविक्रयिणः औदनिका अन्नविक्रयिणः रूपाजीवाः वेश्याश्च, परिज्ञातं समानशीलादिद्वारेण विदितं, आवासयेयुः। पुनः किं कुर्युः, अतिव्ययकर्तारम्, अतिव्ययस्य विज्ञातायत्यभ्यधिकस्याविज्ञातायतिकस्य वा व्ययस्य कर्तारम्, अत्याहितकर्माणं च अतिमात्रारब्धमद्यपानादिकर्माणं च निवेदयेयुः, गोपस्थानिकेभ्यः।

चिकित्सक इति। भिषक्, प्रच्छन्नव्रणप्रतीकारकारयितारं प्रच्छन्नं स्वकृतापराधोद्भेदभयादन्याविदितं यथा भवति तथा व्रणानां शस्त्राद्युत्पादितानां प्रतीकारस्य चिकित्सायाः कारयितारम्, अपथ्यकारिणं च अपथ्यानि रोगमरणोत्पादकानि द्रव्याणि करोति सम्पादयत्यन्विष्यति वेत्यपथ्यकारी तं च, निवेद्य गोपस्थानिकयोः, मुच्येत शुध्येत्। अन्यथा अनिवेदने, तुल्यदोषः व्रणप्रतीकारयित्रपथ्यकारिणोरनुष्ठानं तद्गृहपतिश्च, निवेद्य गोपस्थानिकयोर्मुच्येतान्यथा तुल्यदोषः स्यात्।

Artisans and men engaged in handicrafts shall allow others of their own profession to stay with them and carry on their work on their own responsibility. Similarly merchants may on their own responsibility allow fellow traders to live with them or to join their activities. They (the

merchants) shall report to the authorities about the untimely transaction of commodities in a forbidden place or time.

Sellers of spirituous liquors, cooked flesh and cooked rice as well as prostitutes may permit others to live with them after ascertaining their character. They shall report on the person spending much and engaging in risky activities.

A physician who undertakes to treat a dubious person suffering from secret diseases shall inform the master of the house and both of them shall report the matter to authorities like Gopa and Sthānika lest they may be found guilty. Both of them shall have equal guilt.

प्रस्थितागतौ च निवेदयेत्। अन्यथा रात्रिदोषं भजेत। क्षेमरात्रिषु त्रिपणं दद्यात्।

पथिकोत्पथिकाश्च बहिरन्तश्च नगरस्य देवगृहपुण्यस्थानवनश्मशानेषु सव्रणमनिष्टोपकरणमुद्भाण्डीकृतमाविग्नमतिस्वप्नमध्वक्लान्तमपूर्वं वा गृह्णीयुः।

एवमभ्यन्तरे शून्यनिवेशावेशनशौण्डिकौदनिकपाक्वमांसिकद्यूत- पाषण्डावासेषु विचयं कुर्युः।

अग्निप्रतीकारं च ग्रीष्मे मध्यमयोरह्नश्चतुर्भागयोः। अष्टभागोऽग्निदण्डः। बहिरधिश्रयणं वा कुर्युः।

प्रस्थितागतौ चेति। प्रस्थितः स्वगृहात् कार्यान्तरेण देशान्तरं प्रस्थितः आगतः देशान्तरात् कार्यान्तरेण स्वगृहं प्राप्तः तौ च, निवेदयेत् प्रस्थानागमनकालप्रयोजनाद्याख्यानपूर्वमावेदयेत्, अर्थाद् गृहस्वामी। अन्यथा निवेदनाभावे, रात्रिदोषं भजेत रात्रौ ताभ्यां कृतस्य चौर्यादिलक्षणस्य दोषस्य भागी भवेत्। क्षेमरात्रिषु क्षेमयुक्तासु अनुपजातचौर्यासु अनिवेदनरात्रिषु, त्रिपणं पणत्रयात्मकमनिवेदनापराधदण्डं दद्यात्। क्षेमेऽपि दण्डविधानं निवेदनानुष्ठानस्य कदाप्यव्यभिचारार्थम्।

पथिकेत्यादि। पथिकोत्पथिकाश्च पथिका महामार्गचारिणो वैदेहकादिव्यञ्जनाः उत्पथिका विवीतपथचारिणः काष्ठतृणादिहारकगोपालकादिव्यञ्जनाः त उभये सञ्चाराः, बहिरन्तश्च नगरस्य विद्यमानेषु, देवगृहादिषु चतुर्षु स्थानेषु, सव्रणं शस्त्राद्युत्पादितव्रणम्, अनिष्टोपकरणम् अनिष्टानि वर्जनीयान्युपकरणानि काकल्यादीनि चोरादिसाधनानि यस्य तम्, उद्भाण्डीकृतं समधिकभाण्डभारवाहिनम्, आविग्नं भीतम्, अतिस्वप्नं रात्रिव्यायामजागरवंशादतिमात्रनिद्रापन्नम्, अध्वक्लान्तं दीर्घाध्वसञ्चारश्रान्तम्, अपूर्वं वा अज्ञातपूर्वं वा, गृह्णीयुः, अर्थान्नागरिकाय चार्पयेयुः।

एवमिति। अनेन प्रकारेण, अभ्यन्तरे स्थानीयन्तराले, शून्यनिवेशादिषु शून्यानिवेशे शून्यालये आवेशने शिल्पशालायां शौण्डिकावासे औदनिकावासे पाक्वमांसिकावासे द्यूतावासे पाषण्डावासे चेत्येवं सप्तसु, विचयं सव्रणाद्यन्वेषणं कुर्युः, अर्थाद् गूढपुरुषा नागरिकादिसम्बन्धिनः।

अग्नीत्यादि। कुर्युरित्यनुवर्तते। अग्निप्रतिषेधं च अग्निकार्याणां महताम् अग्न्यतिप्रज्वलनबहुलस्फुलिङ्गोद्गतिहेतूनां वारणं च कुर्युः। कदा, ग्रीष्मे ग्रीष्मर्तौ, तत्रापि न सर्वदा किन्तु मध्यमयोरह्नश्चतुर्भागयोः दिवससम्बन्धिनोः द्वितीयतृतीययामयोः। तृणपर्णादिमयपटलावृतगृहविषयश्चायं प्रतिषेधः। निषिद्धकारिणां

दण्डमाह–**अष्टभाग** इति। पणाष्टभागः, अग्निदण्डः निषिद्धकालाग्निकार्यकरणनिमित्तो दण्डः। अग्निकार्यस्य पाकार्थस्थाल्यधिश्रयणस्य तदानीमवर्जनीयत्वे त्वाह–**बहिरिति**। बहिरधिश्रयणं वा पटलानावृतावकाशाधिश्रयणं वा, कुर्युः।

Master of the house shall report (to the authorities) about people arriving and departing from their houses. Otherwise they shall be guilty of the offence committed during the night. Even if no theft is committed during such nights they are required to pay a fine of three paṇas (for failing to make the report).

Wayfarers travelling along a high road or by footpath shall catch hold of any person whom they find to be suffering from a wound or ulcer, or carrying destructive instruments or tired by carrying a heavy load, or timidly avoiding others, or sleeping too much or fatigued by a long journey, or apparently a stranger to the locality, or wandering in temple of gods, places of pilgrimage or burial grounds.

(Those engaged as spies) shall search for suspicious persons in deserted houses, workshops, liquor shops or places where cooked rice and flesh are supplied, or in gambling houses and in the abode of heretics.

During summer kindling of fire shall be prohibited during the two middle-most parts of day time, the day being divided into four equal parts. Such offences shall be punished with a fine of one-eighth of a paṇa. House owners may carry on cooking operations even outside their houses.

पादः पञ्चघटीनाम्। कुम्भद्रोणीनिःश्रेणीपरशुशूर्पाङ्कुशकचग्रहणीदृतीनां चाकरणे।

तृणकटच्छन्नान्यपनयेत्। अग्निजीविन एकस्थान् वासयेत्। स्वगृहप्रद्वारेषु गृहस्वामिनो वसेयुरसम्पातिनो रात्रौ। रथ्यासु कुटव्रजाः सहस्रं तिष्ठेयुः, चतुष्पथद्वारराजपरिग्रहेषु च।

अग्निकार्यकरणस्य घटिकाविशेषसम्बन्धे दण्डविशेषमाह–**पाद** इति। पादः पणचतुर्भागदण्डः, पञ्चघटीनां द्वितीयतृतीययाममध्यमपञ्चघटिकानां सार्धद्वादशघटिकात ऊर्ध्वम् आ सार्धसप्तदशघटिकात इत्यर्थः। कुम्भद्रोण्यादीनां चाकरणे कुम्भो घटो जलपूर्णः द्रोणी दारुमयो जलाधारो जलपूर्णः निःश्रेणी अधिरोहणी उच्चदेशारोहणार्था परशुः कुठारो दार्वादिच्छेदनार्थः शूर्पं प्रस्फोटनं प्रतिमुखधूमप्रसरवारणार्थम् अङ्कुशं सृणिर्दह्यमानवस्त्वाकर्षणार्थः कचग्रहणी शालापटलतृणहरणसाधनं दृतिश्चर्ममयमुदकपात्रम् इत्येतेषामग्नि-निर्वापणसाधनानां ग्रीष्मकाले गृहद्वारेष्वनिवेशने, पाद इत्यनुवर्तते पणचतुर्भागो दण्डः।

तृणकटच्छन्नान्यपनयेदिति। तृणकटमयच्छर्दींषि गृहाणि, अपनयेद् निरस्येद् ग्रीष्मे। अग्निजीविनः अयस्कारताम्रतक्षादीन्, एकस्थान् वासेयत् एकस्मिन् महति चतुश्शाले कृताग्निभयप्रतिविधाने वासयित्वा कर्म वासयेत्। **स्वगृहेत्यादि**। स्वगृहप्रद्वारेषु स्वगृहमुखद्वारेषु, गृहस्वामिनो वसेयुः। कथम्भूताः, असम्पातिनो रात्रौ निशायामन्यत्र सञ्चारं वर्जयन्तः। रथ्यासु विशिखासु, कुटव्रजाः सजलाः कुम्भपङ्क्तयः, सहस्रं तिष्ठेयुः। चतुष्पथद्वारराजपरिग्रहेषु च चतुष्पथेषु शृङ्गाटकेषु द्वारेषु नगरादिद्वारेषु राजपरिग्रहेषु कोशगृहकुप्यगृह-कोष्ठागारपण्यगृहगजाश्वशालादिषु च, कुटव्रजास्तिष्ठेयुः।

A fine of a quarter of paṇa is due from a house owner who fails to keep in front of his house (during summer) the items like five potfuls of water, a water-tub (made of wood), a ladder, an axe, a winnowing basket, a hook (to pull down door panels caught by fire), pincers (to remove hay-stalk) and a leather bag.

Thatched roof may always be avoided (or removed). Those who work by fire (like blacksmiths) shall live together in a single locality. House-owner shall ever be present (at night) at the door of his own house, avoiding travel. Pots filled with water may be placed in thousands at localities like big streets and junctions where four roads converge, and in front of the royal buildings.

प्रदीप्तमनभिधावतो गृहस्वामिनो द्वादशपणो दण्डः। षट्पणोऽवक्रयिणः। प्रमादाद् दीप्तेषु चतुष्पञ्चाशत्पणो दण्डः।

प्रादीपिकोऽग्निना वध्यः।

पांसुन्यासे रथ्यायामष्टभागो दण्डः। पङ्कोदकसन्निरोधे पादः। राजमार्गे द्विगुणः।

पुण्यस्थानोदकस्थानदेवगृहराजपरिग्रहेषु पणोत्तरा विष्ठादण्डाः। मूत्रेष्वर्धदण्डाः।

भैषज्यव्याधिभयनिमित्तमदण्ड्याः।

प्रदीप्तमिति। प्रदीप्तम् अनभिधावतः प्रज्वलिताग्निकं किमपि गृहं दृष्ट्वाप्यनभिद्रवतः, गृहस्वामिनः, द्वादशपणो दण्डः भवति। षट्पणोऽवक्रयिणः भाटकेन गृहे वसतोऽनभिधावतो गृहस्वाम्युक्तदण्डार्धदण्डः। **प्रमादादिति**। प्रमादाद् अनवधानाद्, दीप्तेषु सत्सु अर्थात् स्वगृहेष्वपि, चतुष्पञ्चाशत्पणो दण्डः। स गृहारक्षकस्येत्येके।

प्रादीपिक इति। प्रदीपिका वह्निना गृहसन्दीपनं तत्कर्ता, अग्निना तद्दीपितेनैव, वध्यः तदैव गृहीतश्चेत्। कालान्तरगृहीतस्याप्यग्निदाहः कण्टकशोधने वक्ष्यते–'विवीतक्षेत्रखलवेश्मद्रव्यहस्तिवनादीपकमग्निना दाहयेदि'ति।

पांस्वित्यादि। रथ्यायां रथशकटादिसञ्चारमार्गे, पांसुन्यासे पांसूनां धूलीनां तज्जातीयानामवकराणां च निक्षेपे, अष्टभागः पणाष्टमांशः, दण्डः। तत्रैव पङ्कोदकसन्निरोधे पङ्कमिश्रजलावरोधने, पादः पादपणदण्डः। राजमार्गे महामार्गे, द्विगुणः पांसुन्यासे पङ्कोदकसन्निरोधे च रथ्योक्तद्विगुणः पादपणात्मकोऽर्धपणात्मकश्च क्रमेण दण्डः।

पुण्येत्यादि। राजमार्ग इत्यनुवर्तते तत्र, पुण्यस्थानादिषु चतुर्षु च, पणोत्तरा उत्तरोत्तरैकैकपणाधिकाः राजमार्गे एकपणः पुण्यस्थाने द्विपणः उदकस्थाने तटाकादौ त्रिपणः देवगृहे चतुष्पणः राजपरिग्रहे राजगृहकोशागारादौ पञ्चपण इत्येवमात्मकाः, विष्ठादण्डाः। सूत्रेषु उक्तेष्वेव प्रदेशेषु मूत्रविसर्जने, अर्धदण्डाः क्रमाद् अर्धपणैकपणसार्धपणद्विपणार्धतृतीयपणात्मका दण्डाः।

भैषज्यव्याधिभयनिमित्तमदण्ड्या इति। भैषज्यं विरेचनद्रव्यसेवनं व्याधिरतिसारप्रमेहादि भयं प्रसिद्धम्। एतन्निमित्तकं चेद् विष्ठामूत्रकरणं राजमार्गादौ, तर्हि दण्ड्या न भवन्ति।

A house owner who fails the rush in order to extinguish a fire (in his locality) is to be fined twelve paṇas while one who is living on rent in a house shall be fined six paṇas for failure to rush to the spot. One who carelessly sets fire (to house) shall be fined fifty four paṇas.

One who purposely sets a house ablaze may be thrown into the fire (and be killed as such).

Throwing of dirt (in the form of dust) is punishable with a fine of one-eighth of a paṇa and for causing mire or water to collect in the street one-fourth of a paṇa is the fine. For such offences in the Rājamārga (main road or king (road) double the amount prescribed above shall be levied as fine.

For excreting faeces in places of pilgrimage, reservoirs of water, temples and royal mansions the offenders may be fined from one paṇa and upwards in the order of offences. For urinating in the above places the fines shall be half the amount prescribed.

But if such excretions are due to the administration of medicines or due to disease no punishment shall be imposed.

मार्जारश्वनकुलसर्पप्रेतानां नगरस्यान्तरुत्सर्गे त्रिपणो दण्डः। खरोष्ट्राश्वतराश्वपशुप्रेतानां षट्पणः। मनुष्यप्रेतानां पञ्चाशत्पणः।

मार्गविपर्यासे शवद्वारादन्यतः शवनिर्णयने पूर्वः साहसदण्डः। द्वाःस्थानां द्विशतम्। श्मशानादन्यत्र न्यासे दहने च द्वादशपणो दण्डः।

विषण्नालिकमुभयतोरात्रं यामतूर्यम्। तूर्यशब्दे राज्ञो गृहाभ्याशे सपादपणमक्षणताडनम् प्रथमपश्चिमयामिकम्। मध्यमयामिकं द्विगुणम्। बहिश्चतुर्गुणम्।

मार्जारेत्यादिवाक्यत्रयमतिरोहितार्थम्।

मार्गेत्यादि। मार्गविपर्यासे प्रसिद्धमार्गादन्येन मार्गेण शवानां नयने, शवद्वारादन्यतः शवनिर्णयने व्यवस्थितप्रेतनिर्हरणद्वारातिरिक्तद्वारेण प्रेतनिर्हरणे, पूर्वः साहसदण्डः। द्वाःस्थानां द्वाररक्षिणां द्वारान्तरनिर्णयनम-प्रतिषेधतां, द्विशतं पणद्विशतदण्डः। श्मशानादित्यादि। न्यासे स्थापने, स च बालानाथादीनाम्। शेषं स्पष्टम्।

विषण्नालिकमिति। यामतूर्यं यामे यन्त्रणीयजनसञ्चारे प्रहरे भवं तूर्यं तत्सञ्चारनिरोधसूचकं वाद्यघोषणं यामतूर्यं, तत्, उभयतोरात्रं रात्रेरुभयोः पार्श्वयोः, अर्थात् प्रथमपश्चिमयामयोः कर्तव्यमिति शेषः। तत्रापि घटिकानियमार्थमाह–विषण्नालिकं विवर्जिताः षट् नालिकाः रात्रिपूर्वपश्चिमभागसंबन्धिन्यो यस्मिंस्तद् यथा भवति तथा, रात्रेरादितः षट्सु घटिकास्वतीतासु अन्ततश्च षट्सु घटिकास्ववशिष्टास्वित्यर्थः। इह उभयतोरात्रमिति रात्रिमुभयत इत्यर्थेऽव्ययीभावः समासान्तश्चार्षः। तुर्यशब्द इति। श्रूयमाणे, राज्ञो, गृहाभ्याशे गृहसमीपे सञ्चरतामिति शेष, सपादपणम् अक्षणताडनं पादाधिकपणोऽकालसञ्चारदण्डः भवति। तच्चाक्षणसञ्चारदण्डनं किं सर्वरात्रियामविषयं, नेत्याह–प्रथमपश्चिमयामिकं प्रथमयामशेषसञ्चारविषयं पश्चिमयामशेषसञ्चारविषयं चेत्यर्थः। द्वितीयतृतीययामसञ्चारविषयमाह–मध्यमेत्यादि। मध्यमयामिकम् अक्षणताडनं, द्विगुणम्

अर्धतृतीयपणम्। इदं सर्वं नगरान्तःसञ्चारविषयं, नगरबहिर्देशसञ्चारविषयमाह–बहिरिति। बहिर्नगराद् बहिर्नगरपरिसरदेशे, चतुर्गुणं राजगृहाभ्याशसञ्चारोक्तदण्डचतुर्गुणम् अर्थात् पञ्चपणात्मकम् अक्षणताडनं भवति।

For throwing the carcass of animals such as a cat, dog, mongoose and snake inside the city, the offender shall be punished with a fine of three paṇas. If the carcass is of animals such as an ass, a camel, a mule and cattle, the fine shall be six paṇas. For throwing a human corpse a fine of fifty paṇas may be imposed.

If a dead body is taken out of a city through a gate other than the permitted one or through a path other than already prescribed, the first amercement shall be imposed and the guard of the gate through which the corpse was taken shall be fined two hundred paṇas (for his carelessness). For cremating a dead body beyond the cremation ground, a fine of twelve paṇas may be imposed.

The trumpets to announce the time (for prohibiting movement at night) shall be sounded twice, the first being six nālikas (aproximately two and a half hours) after the fall of night and six nālikas before the dawn. After the sounding of the trumpets whoever moves on the vicinity of the royal house during the first or last yāma (approximately three hours) shall be punished with a fine of one paṇa and a quarter; for movement during the middle most yāma double the above amount may be collected as fine. For movement outside (the royal building or the fort) the offender shall be punished with four times the above fine.

शङ्कनीये देशे लिङ्गे पूर्वापदाने च गृहीतमनुयुञ्जीत।

राजपरिग्रहोपगमने नगररक्षारोहणे च मध्यमः साहसदण्डः।

सूतिकाचिकित्सकप्रेतप्रदीपयाननागरिकतूर्यप्रेक्षाग्निनिमित्तं मुद्राभिश्चाग्राह्याः।

चाररात्रिषु प्रच्छन्नविपरीतवेषाः प्रव्रजिता दण्डशस्त्रहस्ताश्च मनुष्या दोषतो दण्ड्याः।

शङ्कनीय इति। शङ्क्यतेऽस्मिन् स्थितं पुरुषं चोरजारादित्वेनेति शङ्कनीयः तथाभूते सति, देशे निष्कुटादौ, शङ्कनीये लिङ्गे अवगुण्ठनकुड्यच्छायानिलयनादिके सति, पूर्वापदाने च पूर्वकृते चौर्यादिवृत्ते च प्रतीते सति, गृहीतम् अनुयुञ्जीत तद्देशस्थं तल्लिङ्गिनं तदपदानकं च जनं दृष्टं गृहीत्वा पृच्छेत्–कस्त्वं कुतः कस्य किमर्थमिहागतोऽसीति।

राजपरिग्रहोपगमन इति। राजकीयावसथोद्यानादिष्वननुमतस्य प्रवेशने, नगररक्षारोहणे च नगररक्षाणां प्राकाराट्टालकादीनामारोहणे च, मध्यमः साहसदण्डः।

सूतिकेत्यादि। सूतिकादिसप्तकनिमित्तं सूतिका प्रसूता तत्पदेन तच्छुश्रूषणं लक्ष्यते। सूतिकानिमित्तं सूतिकाशुश्रूषणे निमित्ते चिकित्सकनिमित्तं चिकित्सकपरिचरणे निमित्ते प्रेतनिमित्तं शवनिर्हरणे निमित्ते प्रदीपयाननिमित्तं दीपेनात्मानं प्रकाश्य गमने निमित्ते नागरिकतूर्यनिमित्तं नागरजनसमूहनचिह्नतूर्यवादने

निमित्ते प्रेक्षानिमित्तं राजानुज्ञातनाटकादिप्रयोगदर्शने निमित्ते अग्निनिमित्तं च स्वपरगृहाद्यग्निदीपने निमित्ते च अग्निग्रहणस्योपलक्षणार्थत्वादन्यस्मिन्नपि भयहेतौ निमित्ते, अग्राह्याः अक्षणसञ्चारिणो न ग्राह्याः किन्तु निमित्तं परीक्ष्य मोक्तव्या इत्यर्थः। तथा मुद्राभिश्चाग्राह्याः मन्त्रिनागरिकादिमुद्रोपेताश्चाक्षणचारिणो न ग्राह्याः।

चाररात्रिष्विति। चारः सर्वसञ्चारः तत्सम्बन्धिनीषु रात्रिषु अनुमतसर्वसञ्चारासु महोत्सवादि-रात्रिष्वित्यर्थः, प्रच्छन्नविपरीतवेषाः प्रच्छन्ना अवगुण्ठनादिसंवृतस्वरूपाः विपरीतवेषाः पुंवेषाः स्त्रियः स्त्रीवेषाः पुरुषाश्च राजाज्ञानिष्कासिताः, प्रव्रजिताः परिव्राजकाः, दण्डशस्त्रहस्ताश्च दण्डपाणयः शस्त्रपाणयश्च, मनुष्याः, दोषतो दण्ड्याः परीक्ष्य यथादोषोपलम्भं दण्डनीयाः।

For movement in suspicious localities with suspicious appearance one may be arrested as the perpetrator of a criminal act and shall be examined.

For moving in the vicinity of royal buildings and ascending defensive fortifications of the capital the punishment shall be the middle most amercement.

Those who move out at night to attend the work of midwifery, or medical treatment, or to carry a dead body to the cremation ground, or carrying a lamp in his hand as well as those who proceed to meet the officer in charge of the city, or to find out the reason for sounding trumpet (at the wrong time) or to extinguish the outbreak of fire, or under the authority of a pass shall not be arrested.

During the night when free movement is permitted those who move in disguise, those who stir out though forbidden as well as those who move with clubs and other weapons in hand shall be punished according to the proportional gravity of the offence.

रक्षिणामवार्यं वारयतां वार्यं चावारयतामक्षणद्विगुणो दण्डः।

स्त्रियं दासीमधिमेहयतां पूर्वः साहसदण्डः, अदासीं मध्यमः, कृतावरोधामुत्तमः, कुलस्त्रियं वधः।

चेतनाचेतनिकं रात्रिदोषमशंसतो नागरिकस्य दोषानुरूपो दण्डः, प्रमादस्थाने च।

नित्यमुदकस्थानमार्गभूमिच्छन्नपथवप्रप्राकाररक्षावेक्षणं, नष्टप्रस्मृतापसृतानां च रक्षणम्।

बन्धनागारे च बालवृद्धव्याधितानाथानां जातनक्षत्रपौर्णमासीषु विसर्गः। पुण्यशीलाः समयानुबद्धा वा दोषनिष्क्रयं दद्युः।

रक्षिणामिति। अवार्यम् अभ्यनुज्ञाताक्षणसञ्चारं सूतिकाशुश्रूषुप्रभृतिं वारयतां, वार्यं च सामान्यजनम्, अवारयतां, रक्षिणां नागरिकपुरुषाणाम्, अक्षणद्विगुणः अक्षणसञ्चारिविहितदण्डद्विगुणः सार्धपणद्वयात्मकः, दण्डः। स्त्रियं दासीम् अन्यदीयाम्, अधिमेहयतां बलाद् गच्छतां रक्षिणां, पूर्वः साहसदण्डः। अदासीं गणिकाम् अधिमेहयतां, मध्यमः साहसदण्डः। कृतावरोधां दासीमदासीं वा केनचिद् भार्यात्वेन परिगृहीताम्, अधिमेहयताम् उत्तमः साहसदण्डः। कुलस्त्रियम्, अधिमेहयतां, वधः प्राणवियोजनं दण्डः।

चेतनाचेतनिकमिति। चेतनभवमचेतनभवं च, रात्रिदोषं रात्रिदृष्टममङ्गलम्, अशंसतः अनिवेदयतः, नागरिकस्य पौरस्य, दोषानुरूपो दण्डः कल्प्यः। प्रमादस्थाने च प्रमादो रक्षिपुरुषाणां रक्षाव्यापारशैथिल्यं तस्य स्थाने, हेतुभूते मद्यपानादौ च, दोषानुरूपो दण्डः।

नित्यमिति। उदकस्थानानि नदीकूपतटाकादीनि, मार्गाः प्रवेशनिर्गमद्वाराणि, भूमयः स्थलानि, छन्नपथाः सुरुङ्गादिमार्गाः, वप्राः प्राकाराधाराः, प्राकारा वरणाः, रक्षाः अट्टालकपरिखादयः, एषामुदकस्थानादीनां सप्तपदार्थानामवेक्षणं परीक्षणं, नित्यं प्रतिदिवसानुष्ठेयं कर्म भवति नागरिकस्य। नष्टप्रस्मृतापसृतानां च नष्टानां स्वामिप्रमादगलितानां भूषणादीनां प्रस्मृतानां स्वामिविस्मृतानाम् अपसृतानां स्वयमपगताना द्विपदचतुष्पदानां च, रक्षणं, नित्यं नियतानुष्ठेयम् आ स्वामिदर्शनात्।

बन्धनागारे चेति। कारागृहे च स्थितानां, बालादीनां चतुर्णां, जातनक्षत्रपौर्णमासीषु राज्ञो वार्षिकजन्मर्क्षोत्सवेषु पूर्णिमासु च, विसर्गः बन्धनगृहाद् मोक्षणं, कर्तव्यमिति शेषः **पुण्येत्यादि।** पुण्यशीलाः धर्माचरणस्वभावाः कुतोऽपि यादृच्छिकाद् वृत्तव्यतिक्रमात् प्रसक्तकारागृहप्रवेशा इत्यार्थं, समयानुबद्धा दोषनिष्क्रयं दद्युः समयेन आयतिविशुद्धिप्रातिभाव्यसंविदा प्रतिबद्धाः कृतदोषानुरूपं हिरण्यदण्डं दद्युः, बन्धनगृहे प्रवेशाभावाय। तदिदं बन्धनगृहप्रवेशनपक्षप्रतिक्षेपकं पक्षान्तरं वाशब्दो द्योतयति।

Watchmen who stop those who ought not have stopped, and fail to stop those who must have been stopped shall be punished with a fine of twice the amount levied for untimely movement. Watchmen who maintain carnal connection with maid servants shall be punished with the first amercement; if the lady is not a maid servant the middle most amercement is due for the offence; for ravaging an woman arrested for untimely movement the highest amercement is due while for molesting a woman of high birth the offender shall be put to death.

When an officer engaged in night duty does not make a report to the king on nocturnal nuisance of animate or in animate beings due to his carelessness, he shall be punished according to the gravity of the crime.

The (officer in charge of the city) shall make a daily inspection of reservoirs of water, of roads, of the hidden passage for going out of the city (in emergency), of forts, fort walls and other defensive items.

On the day in which the birth star of the king occurs as well as on full moon days such prisoners as are young, old, diseased and helpless shall be let out from the prison, when people of charitable disposition come forward to compensate the loss incurred by the prisoner. They may be released from the jail by accepting an adequate ransom.

दिवसे पञ्चरात्रे वा बन्धनस्थान् विशोधयेत्।
कर्मणा कायदण्डेन हिरण्यानुग्रहेण वा।।
अपूर्वदेशाधिगमे युवराजाभिषेचने।
पत्रजन्मनि वा मोक्षो बन्धनस्य विधीयते।।

।। इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
षट्त्रिंशोऽध्यायः नागरिकप्रणिधिः। आदितः सप्तपञ्चाशः।।

अध्यायान्ते श्लोकावाह—दिवस इति। दिवसे प्रतिदिवसं, पञ्चरात्रे वा प्रतिपञ्चरात्रं वा, बन्धनस्थान्, विशोधयेत् विशोधनं दण्डग्रहणेन दोषनिष्क्रयं कारयेत्। कथं, कर्मणा भारवहनशकटाकर्षणादिना दण्डदानासामर्थ्ये, कायदण्डेन शरीरताडनादिना कर्मकरणासौकर्ये, हिरण्यानुग्रहेण वा हिरण्यग्रहणरूपेणानुग्रहेण वा बन्धनस्थगुणित्वे। इह केचिद् 'विशोधयेदि'त्यस्यावृत्त्या 'बन्धनगतान् विशोधयेत् सुस्था दुःस्था वेति परीक्षेते'त्यर्थान्तरमपि संगृह्णन्ति।।

बद्धमोक्षनिमित्तान्याह—अपूर्वेत्यादि। अपूर्वदेशाधिगमे शत्रुजयनिमित्ते नूतनदेशलाभे। शेषं सुगमम्।।

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने।
आध्यक्ष्याख्याधिकरणं द्वैतीयीकमपूर्यत।।

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य
श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्यायगणपतिशास्त्रिणः
कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्रीमूलाख्यायाम् अध्यक्षप्रचारे
द्वितीयाधिकरणे षट्त्रिंशोऽध्यायः नागरिकप्रणिधिः।
अध्यक्षप्रचारो द्वितीयमधिकरणं समाप्तम्।।
प्रथमसम्पुटः समाप्तः।
शुभं भूयात्।

Once in a day or once in five nights, jails may be emptied of prisoners in consideration of the work they have performed or of whipping inflicted upon them or of an adequate ransom paid on their behalf in gold.

When a new country is annexed to the present one, when an heir-apparent is installed on the throne or when a prince is born to the ruling monarch it is the custom to set prisoners free.

Thus the fifty seventh chapter of the Arthaśāstra of Kauṭalya entitled the duty of a city superintendent comes to an end. Here ends the thirtysixth chapter of the second Adhikaraṇa called Adhyakṣapracāra.